20 For sequence in Ñ2 V3 B D9 cf. v.l. 12. Ś1 D12 read 20 after 12. —b) B4 -विप्रयोजितं; D1 -विप्रयोजकं. —D8 reads (erroneously) 20d-21a after 19c. —d) D6 हंसः (for वासः).

21 D8 reads 20d-21a after 19c. —ab) B3 विलपतं. Ś1 Ñ1 D1.3.4.8.12 विलप(Ś1 °प्य)मानस्य. B3.4 D9 M1.2 तत्र तस्य (by transp.). ❀ Cr.g: विलपतः विलपति सति।; Cm: विलपतः सतः।; Ct: विलपतो रामस्य विलापं श्रुत्वेत्यर्थः. ❀ Ś1 Ñ1 D1.3.12 राघवस्य महात्मनः; D2.4.8 रामस्य सुमहा(D4 विदिता)त्मनः (for b). —c) Ñ B2 D9 -रश्मिर्; D5 T1 M3 -रुचिर् (for -वपुर्). —d) Ś1 Ñ V3 B1.3 D7.10-12 G1.2 उपागतः (Ś1 D12 °ययौ; G2 °विशत्) (for उपागमत्).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

आश्वासितो लक्ष्मणेन रामः संध्यामुपासत । | स्मरन्कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ २२

G. 5. 75. 0
B. 6. 5. 23
L. 5. 74. 22

इति श्रीरामायणे युद्धकाण्डे पञ्चमः सर्गः ॥ ५ ॥

---

22 Ñ1 D4 om. 22.—^{b}) T3 G3 Cm^{p} उपागमत्; M1.2 उपाविशत्; Cr.m.g as above (for उपासत). —T2.3 G1 M1.2 om. 22^{cd}. D6 reads ^{cd} after 3^{ab}.—^{d}) D6 -कृतां (for -कृतः). ❀ Cr: उपासत उपास्ते। लकारव्यत्यय आर्षः। उपागमत् इति पाठः।; Cm: स्मरन्निति हेतौ शतृप्रत्ययः। सीतास्मरणाद्धेतोः शोकाकुलीकृतो रामो लक्ष्मणेनाश्वासितः संध्यामुपासत।; so also Cg.t. ❀ —For 22, Ś1 Ñ2 V1.3 B D1–3.8.9.12 subst.:

103* इति स दयितया विनाकृतः
सुरपतितुल्यवपुर्नरेश्वरः।
लवणजलमुदीक्ष्य दुस्तरं
जनकनरेन्द्रसुतामचिन्तयत्।

[(l. 1) Ś1 D2.3.8.12 वनितया; V3 B2 दयिता-; D1 तेन तया (for दयितया). V3 -विनाकृतः सन्; D1.8 निराकृतः; D3 नितांत-दुःखी (for विनाकृतः). —(l. 2) B1 -वलो (for -वपुर्). D1 -महाबलौघः; D3 -वपुर्न चास्युपेतः (for -वपुर्नरेश्वरः). —(l. 3) B1 D1.3 अवेक्ष्य (for उदीक्ष्य). B2 स दुस्तरं; B3 सत्वरं; B4 प्रस्तरं (for दुस्तरं). —(l. 4) D2 -नृप- (for -नरेन्द्र-). Ś1 D2.8.12 अशोचत; B2 अतिचिंतयत्; D1 च शोचमानः; D3 असौ शुशोच (for अचिन्तयत्).]

Colophon.—*Kāṇḍa name*: Ñ V1.3 B D1–4.8.9.12 सुन्दरकाण्डे.—*Sarga name*: Ś1 D12 समुद्रतीरगमनं; Ñ1 रामप्रलापः; Ñ2 B2–4 वेलावनविलापः (B2 °निवासः); V1 रामविरहवेदना; V3 उद्योगे वेलावननिवासः; B1 सागरविलोक-निवासविलापः; D1.2.8 रामविलापः; D3.4 रामपरिदेवनः; D9 वनविलापः. —*Sarga no.* (figures, words or both): Ś1 Ñ1 B3 D1.2.4.8.12 om.; Ñ2 D9 78; V1 74; V3 66; B1 77; B2 69*; B4 80; D3 81; D5–7.10.11 S 5 (as in text). —After colophon, D2 concludes with समागम उद्योगपर्वणि दिग्विजयश्च समाप्तोयं सुन्दरकाण्डः; D12 with समाप्तमुद्योगपर्व दिग्विजयश्च; G M1.2 with श्रीरामाय नमः; M5 with श्रीरामचन्द्राय नमः. —Thereafter Ś1 Ñ V1.3 B D1–4.8.9.12 ins. a passage relegated to App. I (No. 1) and then read Sarga 10.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

६

G. 5. 77. 1
B. 6. 6. 1
L. 5. 77. 1

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् ।
राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना ।
अब्रवीद्राक्षसान्सर्वान्हिया किंचिदवाङ्मुखः ॥ १

धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी ।
तेन वानरमात्रेण दृष्टा सीता च जानकी ॥ २

प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः ।
आविला च पुरी लङ्का सर्वा हनुमता कृता ॥ ३

किं करिष्यामि भद्रं वः किं वा युक्तमनन्तरम् ।
उच्यतां नः समर्थं यत्कृतं च सुकृतं भवेत् ॥ ४

मन्त्रमूलं हि विजयं प्राहुरार्या मनस्विनः ।
तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ५

त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः ।
तेषां तु समवेतानां गुणदोषं वदाम्यहम् ॥ ६

6

☞ Cv is missing for Sarga 6 (Folio damaged).

1 [a]) D1.3.4 लंकायास् (for लङ्कायां). Ś1 Ñ1 B3.4 D1–4.8.12 तत् (for तु). Ś1 D12 श्रुत्वा; Ñ1 D1–4.8 दृष्ट्वा; D7 सर्वं (for कर्म). —[b]) Ś1 Ñ1 D1–4.8.12 घोरं (Ś1 °र) कर्मः; Ñ2 V1.3 B D9 दृष्ट्वा घोरं (by transp.) (for घोरं दृष्ट्वा). —[c]) G2 महातेजा; Cm.k.t as in text (for हनुमता). —[d]) B2 शक्रेणैव; G2 वानरेण; Cm.g.k as in text (for शक्रेणेव). Ś1 Ñ1 D1–4.8.12 श्लाघनीयं सु (Ñ1 स) दुष्करं; V1.3 संभ्रमाविष्टचेतनः; L(ed.) संकुद्धेंद्रियमानसः. ❀ Cg: शक्रेणेव शक्रतुल्येन। "इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति विभक्तेरलोपः. ❀ —For 1[e/], Ś1 Ñ V1.3 B D1–4.8.9.12 subst.:

104* अमात्यानब्रवीत्सर्वान्राक्षसान्सविभीषणान्।
रोषसंरक्तनयनः कोपात्किञ्चिदवाङ्मुखः।

[(l. 1) Ś1 D12 वीरो (for सर्वान्). Ñ1 भीमविक्रमान् (for सविभीषणान्). D8 राक्षसः सविभीषणः (for the post. half). —(l. 2) Ś1 Ñ1 D12 संरक्तघोर-; D1.2.4.8 संरब्ध- (D2 °ब्धो) रक्त- (for रोषसंरक्त-). D3 संरक्तनयनः कोपाद् (for the prior half). D8 व्रीडात् (for कोपात्).]

—Thereafter Ś1 Ñ V1.3 B4 D1–4.8.9.12 cont. 106*.

2 For 2[ab], Ś1 Ñ V1.3 B4 D1–4.8.9.12 subst.:

105* धर्षितेयं पुरी लङ्का दुष्प्रवेशा सुरैरपि।

[D12 दर्शिता (for धर्षिता). B4 दुष्प्रधर्षा; D1 दुराधर्षा; D3.4 दुःप्रवेश्या (for दुष्प्रवेशा).]

—[d]) Ś1 Ñ V1.3 B4 D1–4.8.9.12 प्राकृतेन कु (B4 सु) बुद्धिना. —For 2, B1–3 subst.; while Ś1 Ñ V1.3 B4 D1–4.8.9.12 cont. after 104*:

106* आगतश्च प्रविष्टश्च हनुमान्नगरीमिमाम्।
दृष्ट्वा तेन च वैदेही प्रविश्यान्तःपुरं मम।

[(l. 1) V3 अग्रतश् (for आगतश्). —After l. 1, Ś1 Ñ1 D1–4.8.12 ins.; while V1.3 ins. after 3:

106(A)* मन्त्रकालः समुत्पन्नो मन्त्र्यतामत्र यद्धितम्।

[V1 मन्यताम् (for मन्त्र्य°). Ñ1 D8 मंत्रवद्धितं; D1 बुद्धिसंयुताः (for अत्र यद्धितम्).]

—(l. 2) Ś1 Ñ2 V3 D12 हि (for च). B1 D2.8 प्रधृष्य (for प्रविश्य). Ñ2 B2.4 D9 महत् (for मम).

3 [a]) D12 प्रासादे; G2 प्राकारो; Cg as in text (for प्रासादो). Ś1 दैत्य- (for चैत्यः). Ñ2 B D9 प्रासादशिखरं भग्नं; D1 प्रासादधर्षिताश्चैत्याः. —D6 om. 3[cd]. —[c]) Ś1 Ñ1 V1.3 B D1–5.7–9.12 G M1.2.5 आकुला; T3 दीपिता; Cg.k.t as in text (for आविला). —[d]) T2 damaged for सर्वा. —After 3, V1.3 ins. 106(A)*.

4 [a]) M1.2 करिष्याम; Cm.g.k.t as in text (for °मि). Ś1 Ñ V1.3 B D1–4.8.9.12 किं करिष्यामहे (V1 D3 °म्यहं) तत्र. —[b]) T3 को; Cm.g.k.t as in text (for किं). D10.11 वो (for वा). Ś1 D12 L (ed.) विधानं युक्तमुत्तरं (L[ed.]) °मं). —[c]) B2 उच्यते. D5 T1 G3 च; Cm.g.k.t as in text (for यत्). Ś1 Ñ V1 B D1–4.8.9.12 transp. नः and यत्. V3 उच्यतां यत्समुत्पन्नं. —D4 om. 4[d]–5[b]. —[d]) Ś1 Ñ1 V1.3 B1.3.4 D1–3.8.12 किमत्र; D5 T1 G3 यत्कृतं; T2 कृत्यं च; G1 कृतं तु; Ck.t as in text (for कृतं च). T3 सुमहद्; Cg.k.t as in text (for सुकृतं). Ñ2 B2 D9 किं वा युक्ततरं भवेत्.

5 D4 om. 5[ab] (cf. v.l. 4). —[a]) D7.10.11 च; M1.3 om. (subm.) (for हि). D3 विज्ञेयं; D9 विनयं; M1.2 *जयं (for विजयं). —[b]) V1 D7.10 प्रवदंति; D11 प्रवदंति च (hypm.) (for प्राहुरार्या). V3 B4 M1.2 मनीषिणः; Ck.t as in text (for मनस्विनः). Ś1 D12 प्राहुर्विजय-कांक्षिणः. —[c]) G1 त*हं (for तस्माद्वै). G3 रोचते; M1.3 रोचयेन् (for रोचये). Ś1 Ñ1 V3 B1–3 D1–4.8.9.12 G (ed.) तस्माद्वो (D3 °द्वै; D9 °दा) रोच (G [ed.] °च्य) तां मंत्रो; B4 तस्मान्मे रोचते मंत्रो.

6 [a]) T3 सुलभाः (for त्रिविधाः). —All MSS. record hiatus between [a] and [b]. —[c]) Ś1 Ñ V1.3 B2 D2–4.8.9.12 च (for तु). —[d]) Ś1 Ñ V1.3 B1.2.4 D1–4.8.9.12 गुणदोषान्; B3 D10.11 T2 G2 M3 Cm.g.k.t °दोषौ (for गुणदोषं).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये ।
मित्रैर्वापि समानार्थैर्बान्धवैरपि वा हितैः ॥ ७
सहितो मन्त्रयित्वा यः कर्मारम्भान्प्रवर्तयेत् ।
दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥ ८
एकोऽर्थं विमृशेदेको धर्मे प्रकुरुते मनः ।
एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ९
गुणदोषावनिश्चित्य त्यक्त्वा दैवव्यपाश्रयम् ।
करिष्यामीति यः कार्यमुपेक्षेत्स नराधमः ॥ १०
यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः ।
एवं मन्त्रोऽपि विज्ञेय उत्तमाधममध्यमः ॥ ११
ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा ।
मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ १२
बह्वयोऽपि मतयो गत्वा मन्त्रिणो ह्यर्थनिर्णये ।
पुनर्यत्रैकतां प्राप्तः स मन्त्रो मध्यमः स्मृतः ॥ १३

G. 5-77-14
B. 6. 6. 13
L. 5-77-14

7 [a]) D6 मंत्र-; D9 om. (for हित-). D9 * युक्तैः (for -संयुक्तैः). Ñ2 B2 मंत्रि(B2 यश्रि [sic])तं मंत्रिभिर्युक्तैः; B1.3.4 मंत्रिभिर्मंत्रितं युक्तैः; D10.11 Ck.t मंत्रस्त्रिभिर्हि संयुक्तः. —[b]) D2 समंत्रैर्; D4 समर्थैः; L(ed.) समेतैर् (for समर्थैर्). B4 मंत्रि-; D3 हित- (for मन्त्र-). Ś1 Ñ V1.3 B1–3 D1.3.4.9 -निश्चये; B4 D2.8.12 -निश्चयैः; D6 -निर्णयैः (for -निर्णये). —[c]) D1.4 च (for वा). Ś1 D12 L(ed.) अमात्यैर्वा समेतार्थैर्(L [ed.] °त्यार्थो). —[d]) Ñ1 M5 वापि (for अपि). D10.11 Ct [अ]धिकैः (for हितैः). Ñ2 V1.3 B D9 वा हिते रतैः; D6 T2.3 चापि संहितैः; D7 G3 वा समाहितैः (for अपि वा हितैः). —For 7[cd], D2.8 subst.; while D3.4 ins. after 7[ab]:

107* मन्त्रयेत सदा राजा समानार्थैः कुलोद्वहैः ।

[D8 मित्रैर्वापि (for मन्त्रयेत). D3 कार्याकार्य-; D8 समानार्थे (for समानार्थैः). D2 कुलोद्भवैः.]

8 [a]) Ś1 D12 सु(D12 स)मंत्रं; Ñ1 यत्रैवं; Ñ2 V3 D2.3.9 सहसा; D4 सह वा (for सहितो). Ñ1 मंत्रयित्वा तु; D6 T3 °युक्तो यः; D9 °येन्मंत्रं (for मन्त्रयित्वा यः). V1 B सह संमंत्र्य यो मंत्रं; D1.3 सह संमंत्र्य यः सद्भिः (D8 सद्भिर्यः). —[b]) Ś1 B2.3 D12 कार्यारंभे; Ñ1 V1.3 B1.4 D1.3.4.8 कर्मारंभे(Ñ1 °भः; B1.4 °भं); D9 कामारंभे (for कर्मारम्भान्). Ś1 Ñ V1 B1–3 D1.3.4.8.9.12 T3 प्रवर्ततेः; Ct as in text (for °येत्). D2 कर्मारंभेषु वर्तते. —[c]) Ś1 Ñ V1.3 B1–3 D1.2.4.9.12 दैवाच्च; B4 दैवार्थं; D8 धैर्याच्च; Cg.k.t as in text (for दैवे च). —D12 om.(hapl.) 8[d]–9[c].

9 D12 om. 9[abc] (cf. v.l. 8). —[a]) B4 D1.3.8 एकोर्थान् (for एकोऽर्थं). Ś1 Ñ V1.3 B1(before corr. विसृजति).2–4 D1–4.8.9 विमृशति; G3 कुरुते हि; M1.2 विमृशन् (for विमृशेद्). —[b]) T3 तु प्रकृते; M1.2 च कुरुते (for प्रकुरुते). Ś1 Ñ1 V3 D1.4 मतिं (for मनः). Ñ2 V1 B D2.8.9 धर्मस्य(D2 धर्मेषु; D8 धर्मार्थं) कुरुते मतिं; D3 मतिं च कुरुते स्वयं. —[d]) Ś1 D12 पुरुषं परं (for मध्यमं नरम्). —After 9, D7 ins. रामाय नमः.

10 [a]) Ś1 M5 विनिश्चित्य; D10.11 G3 Ck.t न निश्चित्य (for अनिश्चित्य). Ñ2 B D9 गुणदोषमाचिंत्यैव; V1.3 D1.4 गुणदोषान्विनिश्चित्य. ❀ Cr: गुणदोषावनिश्चित्येति पाठः. ❀ —[b]) Ñ2 D9 व्यक्तं; D7 M5 कृत्वा (for त्यक्त्वा). D6 T3 दैवं; M3 Cm धर्म-; Cg.k.t as in text (for दैव-). V1 -परायणः (for -व्यपाश्रयम्). Ś1 D2.4.8.12 त्यक्तधर्मव्यपाश्रयः; Ñ1 D1.3 त्यक्तदैवव्यपाश्रयः; V3 त्यक्तदोषपरायणः; B1.3 G2 व्यक्तं(G2 त्यक्त्वा) दे(B3 दै)वव्यपाश्रयः; B2 व्यक्तं देवैरुपाश्रयः; B4 व्यक्तं दैवमपाश्रयः; L(ed.) दैव एकपरायणः. —[c]) D9 यत् (for यः). G2 कुर्यात्; Cm.g.k.t as in text (for कार्यम्). —[d]) B D9 कुरुते; D4 उपेक्ष्यः (for उपेक्षेत्). D3 महाधमः. G2 तमाहुरधमं नरं. ❀ Cm.g: उपेक्षेत् उपेक्षेत. ❀

11 [a]) Ñ1 V1 D1–4.8 T2 G3 [ए]व (for [इ]मे). Ś1 D12 यथैव पुरुषा(D12 °षं) लोके; Ñ2 V3 B D9 यथैव पुरुषानाहुर्(B2 °नां तु); T3 यदिमे पुरुषाः सत्यम्. —[b]) Ñ2 V3 B1.3.4 D9 -मध्यमान्. —B4 D8.12 G3 M1.2 om. (hapl.?) 11[cd]. —[c]) Ñ2 V1.3 B1–3 D9 तथा (for एवं). B3 हि; G2 च (for ऽपि). D5 T1 M3 एवं मंत्रा हि विज्ञेया. —[d]) D5 T1 M3 -मध्यमाः.

12 [a]) V1 ऐकमर्थम्; V3 एकत्वं सम्-; Cr.m.g.k.t as in text (for ऐकमत्यम्). —[b]) Ś1 Ñ V3 B1.2 D3.8.9.12 G2 कर्मणा; B3 वर्त्मना; Cm.g.k.t as in text (for चक्षुषा). —[c]) Ś1 D5.12 मंत्र- (for यत्र). Ñ1 D1.4 मंत्रिणां(Ñ1 °णो) मंत्रनियमात्; Ñ2 B2 D9 मंत्रिणां विनयोपेतं; V1.3 B1.3.4 मंत्रिणां योर्थ(B3 °त्र) नियमस्; D2.3.8 मंत्रिणां मंत्रनियमस्(D8 °यतं). —B1 reads [d] in marg. —[d]) D8 मंत्रसत्तमं.

13 [a]) D4 बाह्ये; Cm.g as in text (for बह्वयो). M5 हि (for ऽपि). D2.5 T1 विमतयो; Cm.g as in text (for ऽपि मतयो). Ś1 मत्या; D7 कृत्वा; D8 भित्त्वा; D12 मत्वा; M3 Cm.g भूत्वा (for गत्वा). Ñ2 B D9–11 Ct G(ed.) बह्वीरपि म(Ñ2 D9 ग)तीर्गत्वा(G [ed.] °र्दृत्वा); V1.3 बह्वीरपि मतीः कृत्वा; D3 बहूनां तु पृथग्भूत्वा. —[b]) G3 मंत्रिणा. G1 [ऽ]पि (for हि). Ś1 विचार्य मंत्रनिश्चये; Ñ1 B3 D7 M1.2 मंत्रिणां (D7 °णो) मंत्रनिर्णये; Ñ2 V1.3 B1.2.4 D1.3.4.6.8.9 T3 M3.5 मंत्रिणामर्थनिश्च(B1 T3 M3.5 °निर्ण; D8 °सिद्ध)ये; D2 मंत्रिणो मंत्रसिद्धये; D10.11 मंत्रिणामर्थनिर्णयः; D12 *** मंत्रनिश्चयं; G2 मंत्रिणोर्थविनिर्णये. ❀ Cr: बह्वयो मतयः

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 77. 15
B. 6. 6. 14
L. 5. 77. 15

अन्योन्यमतिमास्थाय यत्र संप्रतिभाष्यते ।
न चैकमत्ये श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते ॥ १४

तस्मात्सुमन्त्रितं साधु भवन्तो मन्त्रिसत्तमाः ।
कार्यं संप्रतिपद्यन्तामेतत्कृत्यतमं मम ॥ १५

वानराणां हि वीराणां सहस्रैः परिवारितः ।
रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥ १६

तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् ।
तरसा युक्तरूपेण सानुजः सबलानुगः ॥ १७

बह्वीर्मतीरित्यर्थः। व्यत्ययेन द्वितीयार्थे प्रथमा। मन्त्रिणो ह्यर्थनिर्णय इति पाठः।; Cm : बह्वयोऽपि मतयो गत्वेति पाठे मन्त्रिणो ह्यर्थनिर्णये इति पाठः. ❀ —^{c}) D8 मंत्र- (for यत्र). Ś1 Ñ1 V3 D1.2.4.9.12 यांति; Ñ2 V1 B D3.8 याति; G1.2 M Cm.g प्राप्ताः; Cr.t as in text ; Ck याताः (for प्राप्तः). —^{d}) Ñ1 मतः (for स्मृतः).

14 ^{a}) D4–6 T G1.2 M3.5 Cr.m.g.k अन्योन्यं; Ct as in text (for अन्योन्य-). M1.2 -मतम् ; Cr.m.g.k.t as in text (for -मतिम्). —^{b}) D8.10 -भाषते (for -भाष्यते). D3 सत्वरं प्रतिभाष्यते. —For 14^{ab}, Ś1 D12 subst. :

108* मन्त्रं कृतं विलुम्पन्ति अन्यथा परिभाष्यते ।

[Note hiatus between the two halves.];

while Ñ2 V1.3 B D9 subst. for 14^{ab} :

109* गर्हितान्योन्यमतयो मन्त्रिणो ब्रुवते सदा ।

[V3 गर्हंतु; B गर्हंतो (for गर्हित-). B1.2 यदा (for सदा).] —^{c}) Ś1 Ñ1 B2 D12 -मत्यलेशो; Ñ2 -मंत्रतां यो; V1 -मंत्र-शेषो; D1.2.4 -मत्ये(D2 °त्य) श्लेषो; D6 -मत्यं श्रेयो (for -मत्ये श्रेयो). B1(also in marg. न चैकः सह्यतां यातो) न चैकः सह्यः शेषोस्ति (corrupt); B3 न चैकतामवाप्नोति; B4 न कः सुमंत्रतां यातो; D3 न चैकमत्या तिष्ठेद्यो; D8 न चैकमत्ये श्लेषोपि; D9 न चैको मंत्रतां याति. —^{d}) Ś1 Ñ2 B2 D9.12 स मंत्रो (by transp.). V1 स मंत्रो मंत्र * धमः; G1 मंत्रः सो*****.

15 ^{a}) D3 समंत्रितं; T2 °तः ; Cm.g.k.t as in text (for सुमन्त्रितं). Ś1 D12 ज्ञात्वा; L (ed.) कृत्वा (for साधु). D8 तस्मात्सुमंत्रिसाधुत्व (sic) ; T3 तेषु मंत्रतमं साधु. —Ñ2 illeg. for 15^{b}. —^{b}) Ñ1 भवेयुर्; V3 B2 D1–4.8 भवेद्यन् (for भवन्तो). V1 D10.11 T1.3 G1.2 M3.5 Ck t मतिस (G1 M3 °मु)त्तमाः (for मन्त्रिसत्तमाः). —After 15^{ab}, D7 G3 ins. :

110* इतीमं मन्त्रयत्राजा कार्यं तत्प्रतिपद्यते ।

—^{c}) Ś1 Ñ1 D12 संप्रतिपद्यध्वं; V1.3 °पत्यर्थम् ; B2 °पाद्यंतां; B4 तु प्रतिपद्यंतां; L (ed.)च प्रतिपद्येत (for संप्रतिपद्यन्ताम्). D1–4.8 कार्यसंप्रतिपत्त्यर्थम्. —^{d}) Ś1 D12 भवेत् (for एतत्). Ñ1 V1 D1.2.8 कार्यं मतं; D3.4 कार्यतमं; D6.10.11 T2 M कृत्यं मतं; G1 कार्यं कृतं (for कृत्यतमं). Ś1 महत् (for मम). Ñ2 B D9 तद्धि कार्यतमं मम(Ñ2 D9 महत् ; B1 मतं; B4 शुभं) ; V3 तद्वै कार्यं मतं मम; T3 एतत्कृत्यं मम प्रियं; G3 यत्तद्वै कथ्यतां मम. —For 15^{cd}, D7 subst. ; while G3 cont. after 110* :

111* तस्मान्मन्त्रयतां सर्वै ह्येतं कृत्यं मतं मम ।

[D7 तस्मात्संमंत्र्यतां सर्वैर् (for the prior half). D7 एतत् (for ह्येतं).]

16 ^{a}) Ś1 D12 सु- (for हि). B3 भूतानां; D10.11 धीराणां (for वीराणां). D7 स वानराणां वीराणां. —Ñ2 B D9 om. 16^{cd}. —^{c}) D2 T2.3 ह्येतिः Cr.m.g.k.t as in text (for ऽभ्येति). ❀ Cr : अभ्येति अचिरादेष्यति। वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यदर्थे लट्। ; so also Cm.g.k.t. ❀ —D3 om. 16^{d} – 17. V1 illeg. for 16^{d}. —^{d}) Ñ1 V3 D1.2.4.8 G3 अव(D4 °मि)रोधकः (V3 °लोककः [sic] ; D8 °तः) (for उपरोधकः). Ś1 D12 नूनं मम विरोधतः .

17 D3 om. 17 (cf. v.l. 16). Ś1 D12 om. 17. —^{a}) B2 भविष्यति (for तरि°). Ñ2 B D9 परि(B4 °रं)व्यक्तं (for च सुव्यक्तं). —^{b}) D1.11 सागरः . D9 transp. राघवः and सागरं. B3 शुभं (for सुखम्). ❀ Ct : प्रथमान्तपाठे सगरस्य गोत्रापत्यं सागर इति रामविशेषणम् ; तदा सागरमिति द्वितीयान्तमन्यत्पदमध्याहार्यम्. ❀ —^{c}) Ñ1 V1.3 B1.3.4 D1.2.4.8 तपसा; Ñ2 B2 D9 तेजसा (for तरसा). Ñ2 V3 B1–3 D9 महता युक्तः ; B4 यत्नता युक्तः (sic) (for युक्तरूपेण). —^{d}) Ñ1 सबलः ; G3 सागरं (for सानुजः). D6 T2.3 सहबांधवः ; Cm.t as in text (for सबलानुगः). Ñ2 V1.3 B D1.2.4.8.9 सबलः सपदानुगः. —After 17, Ñ1 ins. 115* and then cont.; while D5–7.10.11 S ins. after 17 :

112* समुद्रमुच्छोषयति वीर्येणान्यत्करोति वा ।

[Ñ1 damaged up to 18^{b}. G3 M5 च; Cg.k as above (for वा).]

—G3 cont. :

113* खरो येन हतः संख्ये तस्य वीर्यं न लक्ष्यते ।

—After 17, Ñ2 V1.3 B D9 ins. :

114* करिष्यत्याकुलां लङ्कां व्यक्तं रामो न संशयः ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अस्मिन्नेवंगते कार्ये विरुद्धे वानरैः सह ।
हितं पुरे च सैन्ये च सर्वं संमन्त्र्यतां मम ॥ १८

G. 5. 77. 19
B. 6. 6. 18
L. 5. 77. 19

इति श्रीरामायणे युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

---

18 Ñ1 damaged for 18^{ab} (cf. 112*). —^{a}) Ś1 Ñ2 V1.3 B1–3 D1.6.9–12 G3 Ck.t तस्मिन् ; G2 तस्माद् ; Cr.m.g as in text (for अस्मिन्). Ś1 Ñ2 V1.3 B D3.9–12 T2 Ck.t -विधे; Cm.g as in text (for -गते). Ś1 D12 काले (for कार्ये). —^{b}) Ś1 D12 विरोधाद् ; D1.2 विरोधो; D3.5.8 T1.2 विरोधे; G3 M5 विरुद्धैर् ; Cr.m.g.k.t as in text (for विरुद्धे). Ñ2 B1–3 D9 मम राक्षसाः (for वानरैः सह). —^{c}) L (ed.) सैन्येन (for सैन्ये च). —^{d}) D4 तत्सर्वं; T2 सर्वे सं- ; Cm.g.k.t as in text (for सर्वं सं-). M5 मन्त्रयतां (for संमन्त्र्यतां). Ñ V1 B2.4 D1.3.4.9 इति; V3 B1.3 इह (for मम). —For 18^{cd}, Ś1 D2.8.12 subst. ; Ñ1 ins. after 17 ; V1.3 D1.4 ins. after 18^{ab} :

115* यदस्माकं क्षमं ब्रूत तच्छीघ्रं प्रविमृश्य हि ।

[V1.3 कार्यं (for ब्रूत). V1 प्रतिपाद्यतां; V3 प्रविधीयतां; D4 प्रतिमृश्य ह (for प्रविमृश्य हि).]

—After 18, Ñ2 V1.3 B D9 ins. :

116* इति रजनीचराधिपेन तेन
रजनीचराः स्वमतानि चोदिताः ।
विधिवदनुविचिन्त्य सर्वशो
दशवदनेन कथां प्रचक्रमुः ।

[(l. 1) Ñ2 V1.3 B4 D9 रजनिचराधिपेन. B2 om. (hapl.) तेन.—(l. 2) Ñ2 B4 D9 रजनिचराः. Ñ2 V3 सुमतानि; B1.4 स्व(B4 सु)मतेन (for स्वमतानि). Ñ2 बाधिताश्च; B1 नोदिताः ; D9 बोधिताः (for चोदिताः). —(l. 3) B3 विविधम् (for विधिवद्). B1 अथ (for अनु-). V3 सर्वं (for सर्वशो). —(l. 4) B1.3 कथायां; B4 दशां (for कथां). B2.3 प्रचक्रुः.

Colophon : D4 T2 om.; Ñ1 damaged colophon. —*Kāṇḍa name*: Ñ2 V1.3 B D1.3.8.9.12 सुन्दरकाण्डे. —*Sarga name* : Ś1 D12 रावणमंत्रः ; Ñ2 V1.3 B D1.3.9 रावणवाक्यं; D2 लंकापर्वणि रावणमंत्रः ; D8 न्यौत्य(औत्पा ?) तिकदर्शनं. — *Sarga no.* (figures, words or both) : B1.3 D1.2.8.12 om. ; Ś1 79 ; Ñ2 D9 81 ; V1 76 ; V3 69 ; B2 70 ; B4 83 ; D3 84 ; D5–7.10.11 T1.3 G M 6 (as in text) ; L (ed.) 77. —After colophon, D3 concludes with राम; G M1.2.5 with श्रीरामाय नमः .

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

७

G. 5. 78. 1
B. 6. 7. 1
L. 5. 78. 1

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः ।
ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् ॥ १
राजन्परिघशक्त्यृष्टिशूलपट्टससंकुलम् ।
सुमहन्नो बलं कस्माद्विषादं भजते भवान् ॥ २
कैलासशिखरावासी यक्षैर्बहुभिरावृतः ।
सुमहत्कदनं कृत्वा वश्यस्ते धनदः कृतः ॥ ३
स महेश्वरसख्येन श्लाघमानस्त्वया विभो ।
निर्जितः समरे रोषाल्लोकपालो महाबलः ॥ ४
विनिहत्य च यक्षौघान्विक्षोभ्य च विगृह्य च ।
त्वया कैलासशिखराद्विमानमिदमाहृतम् ॥ ५
मयेन दानवेन्द्रेण त्वद्भयात्सख्यमिच्छता ।
दुहिता तव भार्यार्थे दत्ता राक्षसपुंगव ॥ ६
दानवेन्द्रो मधुर्नाम वीर्योत्सिक्तो दुरासदः ।
विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः ॥ ७
निर्जितास्ते महाबाहो नागा गत्वा रसातलम् ।
वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः ॥ ८

7

D4 T2 cont. the previous Sarga.

1 ^{ab}) D6 तु (for ते). G3 रावणेन; Cr.k.t as in text (for राक्षसास्ते). D8 इत्युक्ता राक्षसाः सर्वे राक्षसेंद्रेण धीमता. —^{d}) Ś1 D12 तस्मिंदं (for रावणं). —Ñ1 damaged after रावणं up to 16^{a} (read after 1). Ś1 Ñ1 V1 D1–4.8.12 राक्षसाधिपं; G1 राक्ष***. —After 1, Ś1 Ñ V3 B D1–4.8.9.12 read 16. —After 1, D5 T1 G2.3 M2.3.5 ins.; while D6.7.10.11 T2.3 G1 M1 Cm.g.k.t ins. l. 1 only :

117* द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः ।
अवज्ञायात्मपक्षं च राजानं भीषयन्ति हि ।

[(l. 1) G3 इवाज्ञाय (for अवि°). —(l. 2) G2.3 M3.5 अविज्ञाय (for अव°). G2 हि (for च).]

2 ^{a}) T2 जानन् (for राजन्). Ś1 D12 -निस्त्रिंश- ; Ñ2 V3 B2.3 D9 -शूलेषु; V1 B1.4 -शूलेन; T G3 M1 -शक्त्यष्टि- ; G2 -शक्त्यष्टा; Cr.m.g as in text (for -शक्त्यृष्टि-). —^{b}) Ñ2 V1.3 B D9 -खड्ग- (for -शूल-). Ś1 D12 -शक्त्यृष्टि-; Ñ1 D1–4.8 -सुद्गर-; Ñ2 V1.3 B D6.7.9–11 M1 Cm.g -पट्टिश-; D5 -पट्टसु- ; M5 -पट्टिस-; Cr as in text (for -पट्टस-). D7.10.11 -कुंतलं; Cr.m.g as in text (for -संकुलम्). —^{c}) Ś1 Ñ2 V1.3 B D1–3.8.9.12 ते; D4 तद् (for नो). M1.2 भयं (for बलं). Ñ1 सुरक्षभवनं कस्माद्. —^{d}) Ś1 D12 कुरुते (for भजते). —After 2, D5–7.10.11 S ins. :

118* त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ।

3 ^{a}) Ś1 Ñ V1.3 B D1–4.8.9.12 कैलासशिखरं (D9 °रे) गत्वा; T1 G3 °रावासो. —^{b}) Ś1 Ñ V1.3 B D3.4.8.9.12 आवृतं; D1 आवृता; D2 आततं; L(ed.) वृतं (subm.) (for आवृतः). —B1 om. 3^{cd}. —^{c}) Ś1 Ñ1 V1.3 D1–4.8.12 नीता यक्षास्त्वया शांतिं. —^{d}) Ś1 Ñ1 V1 D1–4.8.12 वशे (Ś1 after corr. °शी) च; V3 वशश्च (for वश्यस्ते).

4 ^{a}) Ñ2 B D9 तं (for स). D4 महेश्वरस्य (for स महेश्वर-). —^{b}) Ñ2 B D9 श्लावमानं; D2.4.5.7.8 T1 G3 M श्लाघ्यमानस्; D6 T2.3 श्लाघनीयस्; Ck.t as in text (for श्लाघमानस्). Ñ2 B2 D9 महामते (B2 °तिः); B1.3 तदा विभो; B4 परं विभो; D1 त्वयानघ (for त्वया विभो). —^{cd}) D3 निर्जिताः (for °तः). D3 लोकपाला महाबलाः (for ^{d}). Ñ2 B1(m.).2–4 D9 निर्जित्य समरे राजँल्लोकपालं महाबलं (B1 महेश्वरं).

5 ^{a}) D5–7.10.11 T1 G Ck.t विनिपात्य; D8 विनिर्जित्य (for विनिहत्य). —^{b}) Ñ2 D7.10.11 विनिगृह्य; B2.3 D2.6.8.9 M2 च निगृह्य; B4 *विसृज्य (for च विगृह्य). V3 विनिक्षिप्य निगृह्य च.

6 ^{b}) Ś1 D12 भक्त्या वै; L (ed.) त्वद्भक्त्या (for त्वद्भयात्). D2.8 संधिम् (for सख्यम्). —^{c}) D2.4.11 भार्यार्थं (for °र्थे). —^{d}) Ñ1 V1 D1–4.8 राक्षसनंदन.

7 ^{a}) Ś1 Ñ V1.3 B D1–5.7–12 T1 G1.3 M5 महाबाहो (V3 °मात्रो; D1 °सत्त्वो; D3 °बाहुर्) (for मधुर्नाम) —D8 om.(hapl.) from ^{b} up to 8^{a} (see var.). —^{b}) Ś1 D1–4.12 दुरात्मवान्; Ñ2 B2.3 D9 मधुस्तथा; V1.3 B1.4 मधुस्त्वया (for दुरासदः). —^{c}) Ś1 Ñ V1.3 B D1 2.4.12 प्रसह्य (B2 °ह्यो); D3.9 प्रगृह्य; D6 T2.3 नि° (for वि°). Ñ2 B D9 वशगो मु(B3.4 यु)क्तः (for वशमानीतः). —^{d}) D1 कुंभनाशः (for कुम्भीनस्याः). Ñ1 V1.3 B D9 कृते त्वया; D11 भयावहः (for सुखावहः). Ñ1 कुंभनामा महाबलः.

8 D8 om. 8^{a} (cf. v.l. 7). —^{b}) B3 रसालयं (for °तलम्). —^{c}) Ś1 D6 खंखो (sic); Ñ2 V1.3 B D9 पद्मः; D2 संख्ये; D8 शंभो (for शङ्खो). —^{d}) D6 T3 G2 M1.2.5 आगतः (D6 M5 °ताः) (for आहृताः). Ś1 Ñ1 D1–4.8.12 जटी चैव वशी (Ñ1 D2 °शे) कृतः (Ś1 Ñ1 D12 °ताः); Ñ2 V1.3 B D9 शंख (V1 °खः) कर्कोटकादयः. ❀ Cg: जटी सर्पविशेषस्य नाम। त्वया भोगवतीमित्यत्र तक्षकादिभिन्नकर्कोटकादिजयोक्तिरिति न पौनरुक्त्यम्. ❀

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अक्षया बलवन्तश्च शूरा लब्धवराः पुनः ।
त्वया संवत्सरं युद्धा समरे दानवा विभो ॥ ९

स्वबलं समुपाश्रित्य नीता वशमरिंदम ।
मायाश्चाधिगतास्तत्र बहवो राक्षसाधिप ॥ १०

शूराश्च बलवन्तश्च वरुणस्य सुता रणे ।
निर्जितास्ते महाबाहो चतुर्विधबलानुगाः ॥ ११

मृत्युदण्डमहाग्राहं शाल्मलिद्वीपमण्डितम् ।
अवगाह्य त्वया राजन्यमस्य बलसागरम् ॥ १२

जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः ।
सुयुद्धेन च ते सर्वे लोकास्तत्र सुतोषिताः ॥ १३

क्षत्रियैर्बहुभिर्वीरैः शक्रतुल्यपराक्रमैः ।
आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ १४

G. 5. 78. 15
B. 6. 7. 16
L. 5. 78. 14

9 B4 om. 9^{b} – 10^{d}. —^{b}) Ś1 D12 लघुतराः (for लब्धवराः). Ñ1 D1-4.8 तथा; M2 पुरा (for पुनः). —For 9^{ab}, V1.3 subst.; while Ś1 Ñ1 B4 D1-4.8.12 subst. l. 2 only for 11^{cd}:

119* अक्षया बलवन्तश्च वरुणस्य पुरा रणे।
विजितास्ते महाराज चत्वारः सपदानुगाः।

[(l. 1) V1 सुता (for पुरा). —(l. 2) D8 विजयास्. Ś1 महाभाग (for °राज). V1.3 सबलानुगाः. Ś1 B4 D12 L(ed.) चतुर्विधबलान्विताः(L[ed.] °वृताः) (for the post. half).]

—^{c}) D8 G3 संवत्सरे (for °रं). D1-4.8 घोरा (for युद्धा). Ś1 D12 त्वया मम शरेणोग्राः; Ñ1 त्वया सबसवो घोरा. —^{d}) Ś1 D12 जिताः; G2 हताः (for विभो). Ñ1 D1-4.8 दानवाः समरे हताः; Ñ2 V1.3 B1-3 D9 निवातकवचा रणे. —After 9, D1.3 ins.:

120* निवातकवचा घोरा योद्धारो बलदर्पिताः।

[D1 om. from योद्धारो up to 10^{a}.]

10 B4 om. 10 (cf. v.l. 9). D1 om. 10^{a} (cf. v.l. 120*). B3 D9 om.(hapl.) 10-11^{b}. —^{a}) D8 स्वबंशं (for स्वबलं). Ñ1 च समाश्रित्य; D3 °सृत्य (for समुपाश्रित्य). Ñ2 V1 B1.2 स्वकं(B2 °यं) बलमवष्टभ्य. —^{b}) Ñ2 V1 B1.2 सख्यम् (for वशम्). —For 10^{ab}, V3 subst.:

121* निर्जितास्ते महाराज चतुर्विधबलानुगाः।

—^{c}) T3 प्रियाश् (for मायाश्). Ñ2 V1.3 B1.2 विविधास् (for [अ]धिगतास्). —^{d}) D5-7.10.11 T1 G3 M1.2 बह्वयो वै; Cg.k as in text (for बहवो). Ñ2 V1.3 B1.2 प्राप्ता राक्षसपुंगव. ❀ Cg: बहवः बह्वयः। "वोतो गुणवचनात्" इति पक्षे ङीषभावः. ❀ —For 10^{cd}, Ś1 Ñ1 D1-4.8.12 subst.; while V3 cont. after 121*:

122* आहृताश्च बलात्कन्या बह्वयो राक्षसदुर्लभाः।

[Ś1 D12 -दुर्जयाः (for -दुर्लभाः).]

—After 10, M3 ins.:

123* निर्जिताः समरे रोषाल्लोकपाला महाबलाः।
देवलोकमितो गत्वा शक्रश्चापि विनिर्जितः।

[For l. 1, cf. 4^{cd}.]

11 B3 D9 om. 11^{ab} (cf. v.l. 10). —^{b}) G2 वरुणश्च (for °णस्य). B4 पुरा (for सुता). V1 पुरा लब्धवरा पुनः. —For 11^{cd}, Ś1 Ñ1 B4 D1-4.8.12 subst. l. 2 of 119*. —^{c}) Ñ2 V1.3 B1-3 D6.7.9 T2.3 G2 M1.2 महाराज; D10.11 °भाग; G1 °भागाश् (for महाबाहो).

12 ^{a}) B1 D4 G2 मृत्युदंडं; Cr.m.g.k.t as in text (for °दण्ड-). —^{b}) Ś1 Ñ V3 B D1-4.8-12 T2.3 G M3 Cr.g.k.t शालमली(B1.4 D1.12 T2 °लि)द्रुम- (for °द्वीप-). Ñ2 V1 B D9 -कंटकं; V3 -संकटं; D5-7 T M5 Cr -भूषितं (D5 °तां); Cg.k.t as in text (for -मण्डितम्). —After 12^{ab}, D5.7.10.11 T1 G2.3 M3 ins.:

124* कालपाशमहावीचिं यमकिंकरपन्नगम्।
महाज्वरेण दुर्धर्षं यमलोकमहार्णवम्।

[D5 T1 G3 M3 om. l. 2. —(l. 2) G2 महाज्वरौघदुर्धर्षं (for the prior half).]

—^{c}) L(ed.) अवगाहितवान्राजन्. —^{d}) B4 -सादनं (for -सागरम्).

13 ^{a}) G2 विपुलं (for °लः). Ś1 Ñ V1.3 B D1-4.8.9.12 यशश्च विपुलं प्राप्तं. —^{b}) Ñ2 B2 D9 समरे जितः; B1 °रोधितः; B4 D4.7.8 °बाधितः (for प्रतिषेधितः). —^{c}) D6 सुयोधेन. Ñ1 V1.3 D2-4 हि; M5 तु (for च). D1.8 सुयुद्धे निहते सर्वे. —^{d}) D6 T2.3 त्रयो लोकाः (for लोकास्तत्र). Ñ1 D1.2.4.8 स्म; Ñ2 V3 B D9 [ए]व (for सु-). D6 M3 Cg विलोलिताः; Ck.t as in text (for सुतोषिताः). Ś1 D12 लोकाः सुबहुतोषिताः.

14 ^{a}) V3 वीरः; G1 M1.2 शूरैः (for वीरैः). —^{c}) Ś1 Ñ1 V1 D1-4.8.12 कीर्णा (for पूर्णा). —^{d}) Ñ1 D6 T3 पावकैः; D3 दानवैः; D7 G2 पर्वतैः; Cv as in text (for पादपैः). D1 देवदानवै. —After 14, B4 ins. 125*.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 78. 16
B. 6. 7. 17
L. 5. 78. 15

तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे। | प्रसह्य ते त्वया राजन्हताः परमदुर्जयाः ॥ १५

15 [a]) V1 येषां. V1.3 D6 T2.3 G2 M5 -बल- (for -गुण-). —[b]) D6 transp. न समो and राघवो. —[c]) D5 T1.3 प्रगृह्य (for प्रसह्य). —[d]) D7.10.11 समर- (for परम-). —For 15, Ś1 Ñ1 D1-4.8.12 subst.; V1 subst. (preceded by the line of 9[ab]) for 15[cd]; while B4 ins. after 14:

125* ते हताः समरे सर्वे त्वयैकेन बलीयसा।
[D3 निहिताः (for ते हताः).]

—Thereafter all the above MSS. cont.; while Ñ2 V3 D9 ins. after 15:

126* स त्वमेवंविधो राजन्न भयं कर्तुमर्हसि।
किं पुनः फलसंतुष्टा वानरा वनगोचराः।
तौ च दाशरथी वीरौ तापसौ मन्दचेतसौ।
कथं न हन्या राजेन्द्र यस्य ते वीर्यमीदृशम्।
मा विषीद महाबाहो जेष्यामो वानराव्रणे। [5]
प्रकृत्या चपलास्ते हि मानुषौ क्षीणजीवितौ।

[Ñ2 V1.3 B4 D1.3.4.9 om. l. 1. —(l. 1) D8 आदरं; L(ed.) उद्यमं (for न भयं). —(l. 2) Ñ1 B4 फल्गु- (for फल-). Ñ V1.3 B4 D1-4.8.9 -संतुष्टान् (for -संतुष्टा). Ñ1 वानरान्वीर जेष्यसि; Ñ2 V1.3 D2.3.8.9 वानरान्नाव(D2.9 °न्नवि)जेष्यसि; B4 वानरान्राज*ष्यसि; D1 वानरान्वा विजेष्यसि; D4 वानरा वा विजेष्यते (sic) (for the post. half). —(l. 3) Ñ V3 B4 D1.8.9 वा (for च). Ñ2 D1-4.9 वीर (for वीरौ). V1 B4 -तेजसौ; D3 -विक्रमौ (for -चेतसौ). —(l. 4) Ñ2 V3 D9 वध्यौ; B4 जय्यौ; D1.3 हन्याद् (for हन्या). V1 निवृत्या (for न हन्या). D2 राक्षसेंद्र (hypm.) (for राजेन्द्र). Ñ1 बलम् (for वीर्यम्). D1 उत्तमं (for ईदृशम्). —(l. 5) D4 विषीदस्य (sic) (for मा विषीद). D9 महातेज (for °बाहो). Ñ2 V1.3 B4 D1-4.8.9 जेष्यसे (for जेष्यामो). —(l. 6) D1.4 तु (for हि). Ñ V1.3 B4 D8.9 चपलां(Ñ1 V3 D8 °ला)स्तौ च; D3 कृपणौ तौ तु (for चपलास्ते हि). B4 मनुजौ (for मानुषौ). Ś1 क्षण- (for क्षीण-).]

—Ñ2 V1.3 D9 cont.; while B D5-7.10.11 S ins. after 15:

127* तिष्ठ वा किं महाराज श्रमेण तव वानरान्।
अयमेको महाबाहुरिन्द्रजित्क्षपयिष्यति।
अनेन हि महाराज माहेश्वरमनुत्तमम्।
इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः।
शक्तितोमरमीनं च विनिकीर्णाभ्रशैवलम्। [5]
गजकच्छपसंबाधमश्वमण्डूकसंकुलम्।
रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम्।
रथाश्वगजतोयौघं पदातिपुलिनं महत्।
अनेन हि समासाद्य देवानां बलसागरम्।
गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः। [10]
पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा।
गतस्त्रिविष्टपं राजन्सर्वदेवनमस्कृतः।
तमेव त्वं महाराज विसृजेन्द्रजितं सुतम्।
यावद्वानरसेनां तां सरामां नयति क्षयम्।

[(l. 1) Ñ2 V3 D9 त्वं वा; B1-3 त्वं च; B4 त्वं वै; D7 G2.3 त्वं किं; G1 किं वा (by transp.); Cg.t as above (for वा किं). M5 तिष्ठत्वयं. Ñ2 V1.3 B D7.9 महाबाहो (for °राज). D6 T2 प्रसादात्; T3 प्रमाणात्; Ct as above (for श्रमेण). Ñ2 B3 D9 किं प्रभो; V3 B1.2.4 किं विभो (for वानरान्). V1 किं तव प्रभो (for तव वानरान्). —(l. 2) M5 एव (for एको). D5-7.10.11 T G2.3 Ct महाराज(with hiatus) (for °बाहुर्). Ñ2 V1.3 B D9 प्रमथिष्यति (for क्षपयि°). ❀ Ct: महाराजेति द्विरुक्तिरादरात्. ❀ —(l. 3) D10.11 Ck.t च (for हि). B4 अनेन महिमा राजन् (for the prior half). Ñ2 V1.3 B D9 T3 M5 महेश्वरम्; Cm.g.k.t as above. —(l. 4) Ñ2 V1.3 B D9 यज्ञैर्; G2 यज्ञे (for यज्ञं). D9 वरो लब्धो. V3 -दुर्जयः; D9 -दुर्लभो (for -दुर्लभः). —(l. 5) V3 विनिष्कीर्ण- (for विनिकीर्ण-). B1-3 M5 -[अ]भ्र- (for -[आ]भ्र-). D1.9 विनिकीर्णांतसौबलं (for the post. half). —(l. 6) Ñ2 V3 B D9 द्विप- (for गज-). B4 -मकर- (for -मण्डूक-). —(l. 7) Ñ2 B1 D9 चंद्र- (for रुद्र-). G1 -[आ]दित्यं. Ñ2 V1.3 B D9 -भुजंगमं (for -महोरगम्). —(l. 8) Ñ2 V3 B1 D9 -रेणु- (for -गज-). B4 रथाश्वावनुतोयौघं (for the prior half). ❀ Cm.k.t: महत् महान्तम्. ❀ —(l. 9) D5 [ए]व; D6 T2.3 च (for हि). M1.2 समाविश्य (for °साद्य). V3 असमासाद्य देवानां बलं च सागरं महत्. —After l. 9, G2 repeats from l. 6 up to the prior half of l. 8. —G2 om. from l. 10 up to त्रिविष्टपं in l. 12. —(l. 10) D5 T1 G3 देवराजश्च; M1.2.5 दे(M2 दै)वराट् साक्षाल्; Cm.g as above (for दैवतपतिर्). D6 T2.3 साक्षाल्लंकां; M5 लंकायां च (for लङ्कां चापि). Ñ2 V1.3 B D9 लंकायां चोपवेशितः (for the post. half). —(l. 11) Ñ2 B2 D9 तु (for च). D6 T2 संसदि; G1 चैव च; Ck.t as above (for शम्बर-). —(l. 12) D6 T2.3 राजा (for राजन्). Ñ2 V1 B D9 गतः स्व(B2 स)भवनं राजा (Ñ2 °जन्); V3 गतस्त्रिभुवनं शक्रः (for the prior half.) —After l. 12, Ñ2 V1.3 B D9 ins.:

127(A)* न च तेऽस्त्यजितं राजँस्त्रिषु लोकेषु किंचन।
सर्वथाप्रतिहार्यं हि तव वीर्यमनुत्तमम्।

[(l. 1) V3 तेस्त्यजितो. B3 लोकेन (sic) (for लोकेषु). V3 कश्चन (for किंचन). —(l. 2) V1.3 B2 सर्वत्र (for सर्वथा). V3 [अ]प्रतिकार्यं (for °हार्यं). V3 तव वीर्यं सुसंक्रमं (for the post. half).]

—(l. 13) V3 त्वम् (for तम्). Ñ2 V1 M5 एवं; V3 B1.3.4 एनं (for एव). V3 तु (for त्वं). V1 illeg.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

राजन्नापदयुक्तेयमागता प्राकृताज्जनात् ।
हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम् ॥ १६

G. 5. 78. 2
B. 6. 7. 25
L. 5. 78. 2

इति श्रीरामायणे युद्धकाण्डे सप्तमः सर्गः ॥ ७ ॥

---

from -राज up to तं. M5 महाबाहो. Ñ2 B2-4 D9 नियुंक्ष्व (for विसृज). Ñ2 V1.3 B2-4 D9 प्रभो; B1 विभो (for सुतम्). —(l. 14) B3 स हि; B4 यो वै (for यावद्). Ñ2 V3 B D9 परमां (for सरामां).]

—Thereafter B1 cont.:

128* त्वं हि राजन्महाबाहो भव रक्षोधनेश्वर ।
कस्मान्मानुषमात्रे वै विषादमुपगच्छसि ।

16 Ś1 Ñ V3 B D1-4.8.9.12 read 16 after 1. Ñ1 damaged for 16[a] (cf. v.l. 1). —[a]) G2 बुद्धिर्; Ct as in text (for आपद्). Ś1 D1.2.4.8.12 आपद्धीयं महाराज; Ñ2 V1.3 B1(m.).2-4 D3.9 आपदेषा महाराज. —[b]) Ś1 Ñ1 D2.12 प्राप्ता वै; Ñ2 V3 B D9 प्राप्ता या; V1 D1.3.4.8 या प्राप्ता; G2 M5 आगतात् (for आगता). —[c]) Ś1 Ñ1 V1 B4 G2 M5 आगतात् (for आगता). —[c]) Ś1 Ñ1 V1 B4 D1-4.8.12 नैषा; Ñ2 V3 B1-3 D9 नेयं (for नैव). B3 तथा (for त्वया). M3 कार्यं (for कार्या). —[d]) B2 D9 तं (for त्वं). D7 वंचयिष्यसि (for त्वं वधिष्यसि). Ś1 D1-4.8.12 L[ed.] तान्वधिष्याम (L[ed.] °मि) वानरान्; Ñ1 V1.3 B1.3.4 तं वधिष्यामि (B3 °म) राघवं (V1.3 B1 वानरं); T3 यथा तं त्वं वधिष्यसि.

Colophon. Ñ1 V1 D3 om. —*Kāṇḍa name*: Ñ2 V3 B D1.3.4.9 सुन्दरकाण्डं. —*Sarga name*: Ś1 D4.12 रावणस्तवः; Ñ2 B2 D9 मंत्रिवाक्यं; V3 रावणसंस्तवः; B1 रावणव्यवस्थानं; B3 रावणव्यवस्थापनं; B4 रावणस्तवनं; D1 रावणमंत्रिवाक्यं; D2 रावणप्रबोधः; D3 रावणपराक्रमस्तवः. —*Sarga no.* (figures, words or both): B3 D1.2.4.12 om.; Ś1 B1 80; Ñ2 D9 82; V3 70; B2 72; B4 84; D3 85; D5-7.10.11 T1.3 G M 7 (as in text); T2 6. —After colophon, G M1.2 conclude with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

८

G. 5. 79. 1
B. 6. 8. 1
L. 5. 79. 1

ततो नीलाम्बुदनिभः प्रहस्तो नाम राक्षसः ।
अब्रवीत्प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥ १
देवदानवगन्धर्वाः पिशाचपतगोरगाः ।
न त्वां धर्षयितुं शक्ताः किं पुनर्वानरा रणे ॥ २
सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता ।
न हि मे जीवतो गच्छेज्जीवन्स वनगोचरः ॥ ३
सर्वां सागरपर्यन्तां सशैलवनकाननाम् ।
करोम्यवानरां भूमिमाज्ञापयतु मां भवान् ॥ ४
रक्षां चैव विधास्यामि वानराद्रजनीचर ।
नागमिष्यति ते दुःखं किंचिदात्मापराधजम् ॥ ५
अब्रवीच्च सुसंक्रुद्धो दुर्मुखो नाम राक्षसः ।
इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ॥ ६
अयं परिभवो भूयः पुरस्यान्तःपुरस्य च ।
श्रीमतो राक्षसेन्द्रस्य वानरेन्द्रप्रधर्षणम् ॥ ७
अस्मिन्मुहूर्ते हत्वैको निवर्तिष्यामि वानरान् ।
प्रविष्टान्सागरं भीममम्बरं वा रसातलम् ॥ ८

8

Ñ1 V1 D8 cont. the previous Sarga.

1 [a]) Ś1 D7.10–12 -प्रख्यः (for -निभः). Ñ1 V1 D1–4.8 ततो जीमूतसंकाशः. —[c]) Ś1 Ñ1 V1 D1–4.8.12 उवाच (for अब्रवीत्). Ñ1 D1–4.8 भूत्वा (for वाक्यं). —[d]) B2 तथा; D7 ततः (for तदा).

2 D12 om. 2[ab]. —[a]) Ś1 पुरा वै देवताः सर्वे. —[b]) T3 पिशाचाः. Ś1 गंधर्वपतगोरगाः; Ñ2 V1 B2.4 D9 G2 M1.2 पिशाचोरगराक्षसाः; D1.6 °चाः पन्नगोरगाः; D3 M5 °चोरु-(M5 °र)गपन्नगाः; D4 °चोरगकिंनराः; D7 °चाः पन्नगास्तथा; T2 °चाः सासुरोरगाः. —[c]) D8 M5 Ck न त्वा; D10.11 सर्वे (for न त्वां). V2 कर्षयितुं. Ñ2 V1 B1 D10.11 शक्याः (for शक्ताः). —[d]) G1 damaged for किं पुनर्वा-. D10.11 मानवौ (for वानरा).

3 [a]) D3.4 शश्वत् (for सर्वे). G2 विध्वस्ता; Cv.r.m. g.t as in text (for विश्वस्ता). B4 सर्वे प्रमत्तविध्वस्ता. —[b]) Ś1 D2–4.8.12 स्मो; M5 च (for स्म). —[c]) Ś1 Ñ V1.3 B2.3 D2–4.8.9 नो; D1 वो; D12 रे (for मे). Ś1 D2–4.8.12 यततां; Ñ1 मत्ततां; Ñ2 V1 B D1.9 जीवतां; V3 जीवितं; T3 (before corr.) G1 जीवितो (for जीवतो). ❀ Cr.m: जीवत इत्यनादरे षष्ठी।; Ck: वञ्चिताः स्म। विसर्ग-लोपश्छान्दसः। जीवतो म इत्यादि। मयि जीवतीति यावत्।; Ct: हनूमता वञ्चिताः स्म। आर्षो विसर्गलोप इति कतकः। प्रामादिकः परिभवो न न्यूनतायै इति भावः। मे जीवत इत्यार्षी षष्ठी। प्रमादाद्यभावविशिष्टजीवनवति मयि प्रहस्ते सति स जीवन्न गच्छेदित्यर्थः. ❀

4 [a]) Ś1 सर्व-. D1 राक्षस- (for सागर-). —[b]) B1.4 -गोचरां (for -काननाम्). —[c]) T2.3 [अ]वानरीं. Ś1 Ñ V1.3 B D1–4.8.9.12 कुर्मो(Ñ1 D4.8 °र्यां) निर्वानरामुर्वीम्. ❀ Cr: करोमि अचिरादेव (करिष्यामि)। वर्तमानसामीप्य इति भविष्यदर्थे लट्।; so also Cm.t. ❀ —[d]) Ś1 Ñ2 V1.3 B D3.9.12 नो; M3.5 मा (for मां).

5 [ab]) L (ed.) रक्तांश् (for रक्षां). Ñ V1.3 B D2.8 प्रति; D4 च प्र-; M1.2 चापि; Cr as in text (for चैव). Ñ2 V1.3 B विधास्यामश्. D6 राघवाद्; G1 वीरांश्च; M1.2 लंकाया; M5 वरांश्च (for वानराद्). Ñ1 जयतां वर; G1.2 M2.5 रजनीचरान्. Ñ2 V1.3 B D2.4.8 चारं च जयतां वर; L(ed.) चारांश्च जयवर्धनान् (for [b]). Ś1 D12 राक्षसांश्च विधास्याम-श्चारिणो(D12 °रं नो) जयवर्धनाः; D1 राक्षसान्प्रेषयिष्यामो बलिनो जयतां वर; D3.9 रक्षांसि प्रणिधास्यामि(D9 °मश्)-चारांश्च(D9 °रं च) जयतां वर. ❀ Cr: वानराद्रजनीचर इति पाठः. ❀ —[c]) L (ed.) आगमिष्यति. Ś1 Ñ V1.3 B D1–4.8.9.12 नो (for ते). —[d]) V3 D3 आत्मपराजयं; D1 शत्रु-पराजये (for आत्मापराधजम्).

6 Ñ2 V1.3 B D9 read 6–8 (including star passages) after 11. —[a]) V3 अब्रवीत्तं; B1 D7 G2 M3.5 अब्रवीत्तु; M1.2 अथाब्रवीत्. B3 तं तु; G1 अथ (for च सु-). D10.11 अब्रवीत्तमसंक्रुद्धो. —[b]) Ñ2 V1 D9 त्रिशिखो; V3 B त्रिशिरा (for दुर्मुखो). —[c]) Ś1 D12 च; Ñ1 D1.8 मे; Ñ2 V1.3 B D9 नः; D2 वै; D3 तु; D4 ते (for हि). —[d]) Ñ2 B D9 वै; V1.3 वः; D3 च (for नः).

7 Ñ2 V1.3 B D9 read 6–8 after 11. —[a]) L(ed.) अथ (for अयं). Ś1 Ñ V1.3 B D1–4.8.9.12 घोरो; G2 [s]स्माकं; Cg.t as in text (for भूयः). —[b]) Ś1 Ñ V1.3 B D1–4.8.9.12 वानरेण(V3 °राणां [sic]) विशेषतः. —[d]) D6.7 T2.3 G1.2 M Cm वानरेण; Ck.t as in text (for °रेन्द्र-). D7 प्रधर्षितं. Ś1 Ñ V1.3 B1–3 D1–4.8.9.12 पुर(B3 वन)स्यांतःपुरस्य च; B4 वनस्य च पुरस्य च.

8 Ñ2 V1.3 B D9 read 6–8 after 11. —[a]) D10.11 M3 Ck.t गत्वा (for हत्वा). Ś1 Ñ1 D2.4.8.12 तं; Ñ2 V1.3 B D9 [अ]हं; D1.3 [ए]नं; T3 [ए]व; Ck.t as in text (for [ए]को). —[b]) B4 निवर्तयिष्यामि (hypm.). Ñ1 राघवं; D1–4.8.12 वानरं (for वानरान्). ❀ Cr: निवर्ति-ष्यामि निवर्तिष्ये. ❀ —[cd]) G2 भूमिम् (for भीमम्). Ś1 Ñ1 D1–4.8.12 प्रविष्टं सागरं घोरमथवा धरणीतलं. —For 8[cd], Ñ2 V1.3 B D9 subst., while Ś1 D2.8.12 ins. after 11:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततोऽब्रवीत्सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः ।
प्रगृह्य परिघं घोरं मांसशोणितरूषितम् ॥ ९
किं वो हनुमता कार्यं कृपणेन तपस्विना ।
रामे तिष्ठति दुर्धर्षे सुग्रीवे सहलक्ष्मणे ॥ १०
अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् ।
आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम् ॥ ११
कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् ।
अब्रवीत्परमक्रुद्धो रावणं लोकरावणम् ॥ १२
सर्वे भवन्तस्तिष्ठन्तु महाराजेन संगताः ।
अहमेको हनिष्यामि राघवं सहलक्ष्मणम् ॥ १३

G. 5. 79. 14
B. 6. 8. 20
L. 5. 79. 14

129* न ह्यहं धर्षणां घोरां मर्षयिष्यामि भर्तरि ।

[Ś1 D2.8.12 भर्तुर्मर्षयिता प्रभोः(D2.8 °भो) (for the post. half).]

9 a) Ś1 D2.8.12 अथाब्रवीत्; Ñ1 D1.4 अब्रवीत्तु; D3 अब्रवीच्च. D3 स संक्रुद्धो; D8 सुसंघोरं (for सुसंक्रुद्धो). —b) Ś1 D4.12 वक्रदंष्ट्रो (for वज्र°). D4 महाबलं. —For 9ab, Ñ2 V1.3 B D9 subst.:

130* अब्रवीद्वज्रदंष्ट्रस्तु राक्षसो राक्षसेश्वरम् ।

[V3 B4 च (for तु). B3 D9 राक्षसेश्वरः.]

—c) V3 परिगृह्य (hypm.) (for प्रगृह्य). T3 परिघं गृह्य संघोरं. —d) Ñ2 B2.4 D9 -कर्दमं; B3 D7.10.11 Ct -दूषितं; G2 -रूपितः (for -रूपितम्). Ś1 D12 मांसमेदो वि(D12 °दोव)लेपितं; Ñ1 D1–4.8 मांसमेदानु(D2.4 °दोप)-लेपनं.

10 a) Ñ2 V1.3 B D7.9–11 नो; D4.8 G1.2 वा (for वो). —b) Ś1 Ñ V1.3 B D1–4.8.9.12 निशाचराः(V3 B4 D2 °र); M1.2 गतायुषा (for तपस्विना). —D3 om. 10cd. —cd) B4 transp. दुर्धर्षे and सुग्रीवे. Ś1 Ñ V1.3 B D1.4.7.9.12 G1 M1.2 च सलक्ष्मणे; D8 लक्ष्मणे तथा; D10.11 [s]पि सलक्ष्मणे (for सहलक्ष्मणे). D5 T1 ससुग्रीवे सलक्ष्मणे (for d).

11 V1 B2 om. 11ab. —a) Ñ2 V3 B1.3.4 D9 निहत्याहं; D8 च सुग्रीवं (for ससुग्रीवं). —b) Ñ2 B4 ससुग्रीवं; V3 D9 सुग्रीवं च (for परिघेण). B1 सुग्रीवं सहलक्ष्मणं; B3 सहसुग्रीवलक्ष्मणं. —c) T3 [आ]जौ (for [ए]को). Ñ2 V1.3 B D9 परिघेणा(V1 B2 °ण)परान्हनि. Ñ2 V1.3 B D9 read 6–8 after 11. —After 11, Ś1 D2.8.12 ins. 129*; while D5–7.10.11 S ins.:

131* इदं ममापरं वाक्यं शृणु राजन्यदीच्छसि ।
उपायकुशलो ह्येव जयेच्छत्रूनतन्द्रितः ।
कामरूपधराः शूराः सुभीमा भीमदर्शनाः ।
राक्षसानां सहस्राणि राक्षसाधिप निश्चिताः ।
काकुत्स्थमुपसंगम्य बिभ्रतो मानुषं वपुः । [5]
सर्वे ह्यसंभ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ।
प्रेषिता भरतेन स्म भ्रात्रा तव यवीयसा ।
स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ।
ततो वयमितस्तूर्णं शूलशक्तिगदाधराः ।
चापबाणासिहस्ताश्च त्वरितास्तत्र यामहे । [10]
आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् ।
अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ।
एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ ।
अवश्यमपनीतेन जहतामेव जीवितम् ।

[(l. 1) T3 कार्यं (for वाक्यं). D10.11 T G1 यद् (for यदि). —(l. 2) D5 उपाये. D6.7 T2.3 [ए]वं (for [ए]व). D7 अतंद्रितान्. —(l. 3) D6 T3 भीमाः; T2 वीराः (for शूराः). D6 T2.3 सुशूरा (for सुभीमा). D6 T2 भीमविक्रमाः. ❀ Ct: कामरूपेत्यादिषु पुंस्त्वमार्षम्. ❀ —(l. 4) D5 Cv राक्षसा वै; T1 रक्षसां वै; M1.2 राक्षसास्तु; M3 Cm.g राक्षसा वा. M1.2 चोदिताः (for निश्चिताः). ❀ Cv: राक्षसा वै सहस्राणि राक्षसाधिप निश्चिताः इति सामानाधिकरण्यम्। सहस्रशब्दस्य नित्यनपुंसकत्वात्।; so also Cm; Cg: सहस्रशब्दस्य संख्येयपरत्वेऽपि शब्दस्वाभाव्यान्नपुंसकत्वम्. ❀ —(l. 5) D10.11 Ct विवृतं; G2 बिभ्राणा (for बिभ्रतो). G1 damaged for नुषं व. —(l. 6) G1 M5 ससंभ्रमा. G2 गत्वा (for भूत्वा). G2 हरिसत्तमं. —(l. 7) D7.10.11 [ए]व (for स्म). —After l. 7, M3 ins.:

131(A)* तवागमनमुद्दिश्य कृत्यमात्ययिकं त्विति ।

—(l. 9) M2 -खड्ग- (for -शक्ति-). —(l. 10) M5 च महाहवे (for तत्र यामहे). ❀ Cm: यामेति लोडुत्तमपुरुषबहुवचनम्।; so also Cg.k.t. ❀ —(l. 11) D6 आकाशात्. D7 M5 शतशः (for गणशः). D5 हत्वा; M5 गत्वा (for हत्वा). —(l. 12) T2 M1 अस्त्र- (for अश्म-). D6 यमालयं. —(l. 13) T3 अर्दतां; M5 अनयौ (for अनयं). —(l. 14) M1.2 उपनीतेन. T3 M1.2 जहतस्तौ स्म(T3 सु) जीवितं (for the post. half). ❀ Cr: जहतां त्यज्यताम्।; Cm: जहतां त्यजेतामेवेत्यर्थः।; Cg.k.t: जहतां जह्यां(Ck °हे)तामिति यावत् (Cg °तामेवेत्यर्थः). ❀]

12 The sequence of stanzas 12–16 (including star passages) in Ś1 Ñ V1.3 B D1–4.8.9.12 is 14(Ñ1 om. 14cd)–15, 13cd, 12–13b, 16(Ś1 D1.8 om. [hapl.] 12–13b and 16a–d; Ñ1 D2–4.12 om. 16ab). —a) G3 कौंभकर्णस्. M5 कुंभकर्णसुतो वीरो. —b) M1.2 राक्षसः (for वीर्यवान्). —For 12ab, Ñ V1.3 B D2–4.9.12 subst.:

132* कुम्भकर्णसुतो वीरः कुम्भः परमकोपनः ।

[Ñ2 V1.3 B D9 सुतोथ कुंभकर्णस्य (for the prior half). D4 कुद्धः (for कुम्भः).]

13 Ś1 D1.8 om. 13ab (cf. v.l. 12). For sequence in Ś1 Ñ V1.3 B D1–4.8.9.12, cf. v.l. 12. —b) Ñ1

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 79. 12
B. 6. 8. 21
L. 5. 79. 12

ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः ।
क्रुद्धः परिलिहन्वक्त्रं जिह्वया वाक्यमब्रवीत् ॥ १४
स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः ।
एकोऽहं भक्षयिष्यामि तान्सर्वान्हरियूथपान् ॥ १५

स्वस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तु मधुवारुणीम् ।
अहमेको हनिष्यामि सुग्रीवं सहलक्ष्मणम् ।
साङ्गदं च हनूमन्तं रामं च रणकुञ्जरम् ॥ १६

इति श्रीरामायणे युद्धकाण्डे अष्टमः सर्गः ॥ ८ ॥

राक्षसेंद्रेण (for महाराजेन). G1 संवृताः. —For 13^{ab}, Ñ2 V1.3 B D9 subst.:

133* तिष्ठन्त्विमे महाराज सचिवाः संगतास्तव ।

[B1.4 सहसंगताः (for संगतास्तव).]

—^{c}) Ś1 Ñ V1.3 B D1–4.8.9.12 रामं (for एको). Ñ1 D1–4.8 वधिष्यामि (for हनिष्यामि). —After 13^{c}, T2.3 read 16^{a} and 16^{c} for the first time, repeating them in their proper place. —^{d}) Ś1 D1.8.12 सुग्रीवं च स (D1.8 सह)लक्ष्मणं; Ñ1 D2–4 ससुग्रीवं स(D2 सह[hypm.])-लक्ष्मणं; Ñ2 V1.3 B D9 ससहायं रणाजिरे. —After 13, D5–7.10.11 S ins.:

134* सुग्रीवं च हनूमन्तं सर्वांश्चैवात्र वानरान् ।

[D5.7.10.11 T1 G1 M5 स- (for च). G3 ससुग्रीवं (for सुग्रीवं च). M3 एव च (for चैवात्र).]

14 For sequence in Ś1 Ñ V1.3 B D1–4.8.9.12, cf. v.l. 12. —^{a}) Ś1 Ñ1 D2.4.6.12 T2.3 G1.3 यज्ञहनुर्; Ñ2 B M5 यज्ञहनो; V1 यज्ञवहो; V3 D1 यज्ञहरो; D3 महोदरो; D7 वज्रदंतो; D8 [s]ग्रवीद्धनुर्; D9 यज्ञदमो; L (ed.) यक्षहनुर् (for वज्रहनुर्). —^{b}) D8 पवनोपमः; D9 प्रवरोत्तमः (for पर्वतोपमः). —Ñ1 om. 14^{cd}. —^{c}) D10.11 Ct सृक्कां (for वक्त्रं).

15 For sequence in Ś1 Ñ V1.3 B D1–4.8.9.12, cf. v.l. 12. —^{a}) Ś1 Ñ1 D1–4.8.12 कर्माणि (for कार्याणि). —For 15^{ab}, Ñ2 V1.3 B D9 subst.; while Ñ1 D1–4.8 ins. after 15:

135* मोदन्तां राक्षसाः सर्वे प्रियाभिः सह संगताः।

[D2 संहताः (for संगताः).]

—^{d}) Ñ2 V1.3 B D9 सर्वांस्तान् (by transp.). Ś1 Ñ1 D1–4.6–8.10–12 T2.3 G1.2 M1.2.5 तां सर्वां(Ś1 Ñ1 D1–4.8.12 सर्वां तां) हरिवाहिनीं. —After 15, Ñ2 V1.3 B D9 ins.:

136* कामयस्व यथाकामं राक्षसेन्द्र तव प्रियम् ।;

[Ñ2 D9 कामयाशु; B4 काममात्म- (sic) (for कामयस्व). V3 तथाकामं. G (ed.) प्रियां.];

while D7 ins.:

137* ततो महोदरः क्रुद्धो रावणं वाक्यमब्रवीत् ।

16 Ś1 D1.8 om. 16^{abcd} (cf. v.l. 12). For sequence in Ś1 Ñ V1.3 B D1–4.8.9.12, cf. v.l. 12. Ñ1 D2–4.12 om. 16^{ab}. D5 om. 16^{a}. T2.3 repeat 16^{a} and 16^{c} here (cf. v.l. 13). —^{a}) B3 सुस्थाः. D6 तिष्ठंतु; G2 कुर्वंतु; M5 भवंतु (for क्रीडन्तु). D9 T2.3 (both first time) निश्चिताः. T2.3 (both second time) क्रीडंतु निश्चिताः स्वस्थाः. ❀ Cg: स्वःस्था इत्यमङ्गलोक्तिः. ❀ —^{b}) M3 पिबंतो. Ñ2 V1.3 B1.2.4 D9 वर-; B3 पर- (for मधु-). D10.11 T1.3 G3 Ck.t -वारुणं. —D6 om. 16^{c-f}. —^{c}) D5.10.11 T(T2.3 second time) G2 M3 वधिष्यामि; D12 हरिष्यामि; G1 damaged (for हनिष्यामि). T2.3 (both first time) अहं तु तं वधिष्यामि. —^{d}) B3.4 D2.3 ससुग्रीवं सलक्ष्मणं; D4 सुग्रीवं च सलक्ष्मणं. —^{e}) Ś1 Ñ1 B1 D2.4.8.12 अंगदं स-; Ñ2 V1.3 B2–4 D3 सांगदं स-; D1 M3 अंगदं च. —^{f}) Ś1 D2.8.12 अन्यांश्च (D8 सकलान्) कपिकुंजरान्; Ñ1 V1.3 D1.3.4 रामं सकपिकुंजरं; Ñ2 B D9 रामं शत्रुनिबर्हणं(B3 °निषूदनः; B4 °निषूदनं); D10.11 सर्वांश्चैवात्र वानरान्. ❀ Ck: अत्र सर्गमवच्छिन्दन्ति केचित्। नेदं युक्तमुत्पश्यामः। स्वस्वबलप्रकाशनरूपप्रकरणाविच्छेदात्।; Ct: कतकरीत्यात्र सर्गाविच्छेदः. ❀

Colophon: Ñ1 D1 om. V1 reads colophon after 6.9.6. —*Kāṇḍa name*: Ñ2 V1.3 B D3.4.8.9.12 सुन्दरकाण्डे. —*Sarga name*: Ś1 D12 औत्पातिकदर्शनं; Ñ2 V1.3 B D2–4.9 (D2 लंकापर्वणि) मंत्रिवाक्यं; D8 औत्पातिकः. —*Sarga no.* (figures, words or both): B3 D2.4.8.12 om.; Ś1 B1 81; Ñ2 D9 83; V1 77; V3 71; B2 73; B4 85; D3 86; D5–7.10.11 T1.3 G M 8 (as in text); T2 7; G (ed.) L (ed.) 79. —After colophon, D2 concludes with रामः; G M1.2 with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

९

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः ।
सुप्तघ्नो यज्ञकोपश्च महापार्श्वो महोदरः ॥ १
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः ।
इन्द्रजिच्च महातेजा बलवान्रावणात्मजः ॥ २
प्रहस्तोऽथ विरूपाक्षो वज्रदंष्ट्रो महाबलः ।
धूम्राक्षश्चातिकायश्च दुर्मुखश्चैव राक्षसः ॥ ३
परिघान्पट्टसान्प्रासाञ्शक्तिशूलपरश्वधान् ।
चापानि च सबाणानि खड्गांश्च विपुलाञ्शितान् ॥ ४
प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः ।
अब्रुवन्रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५
अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम् ।
कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता ॥ ६
तान्गृहीतायुधान्सर्वान्वारयित्वा विभीषणः ।
अब्रवीत्प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७
अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते ।
तस्य विक्रमकालांस्तान्युक्तानाहुर्मनीषिणः ॥ ८

G. 5. 80. 8
B. 6. 9. 8
L. 5. 80. 9

9

Ñ1 V1 D1 cont. the previous Sarga.

1 [a]) D1 रसभः(meta.) (for रभसः).—G2 transp. [b] and [d].—[b]) Ś1 Ñ1 D1-4.8.12 निशाचरः; T1 विहंगमः (for महाबलः).—[c]) D3 शत्रुघ्नो; D12 सुप्तज्ञो (for सुप्तघ्नो). D5 T1 G1.2 M3.5 यज्ञहा रक्षो (for यज्ञकोपश्च).—[d]) Ś1 Ñ V1.3 B D1.2.4.7-12 महापार्श्वमहोदरौ.

2 [a]) D12 अग्निकोपश् (for °केतुश्). Ñ2 V1.3 B D9 महाबाहू (for च दुर्धर्षो).—D3 reads from रश्मि in 2[b] up to वज्रदंष्ट्रो in 3[b] in marg.—[b]) Ś1 Ñ1 B4 D1-4.8.12 वीर्यवान् (for राक्षसः).—B2 om.(hapl.) 2[c]-3[d].—[c]) Ś1 Ñ V3 B3.4 D1-4.8.9.12 महाबाहुर्; V1 B1 महामायो (for महातेजा). D10.11 इंद्रशत्रुश्च बलवांस्.—[d]) D10.11 ततो वै (for बलवान्). Ñ2 V1.3 राक्षसात्मजः.

3 B2 om. 3; D3 reads up to वज्रदंष्ट्रो in marg. (for both, cf. v.l. 2).—[a]) Ś1 Ñ2 V1.3 B1 D1.2.8.9.12 प्रघसो; Ñ1 प्रजंघो; B3.4 प्रघोषो; D3 उन्मत्तो; D4 प्रसभो (for प्रहस्तो).—[c]) Ś1 Ñ V1.3 B1.3.4 D1-4.8.9.12 [s]थ प्रहस्तश्; D5 T1 च निरूहश्; D7.10.11 G [s]थ(G च) निकुंभश् (for चातिकायश्).—[d]) D5.11 G2 राक्षसाः (for राक्षसः).—After 3, Ś1 Ñ D1-4.8.9.12 ins.:

138* प्रसभो वज्रनाभश्च भूरिवेगश्च राक्षसः।
विद्युज्जिह्वोऽथ त्रिशिखो मेघवर्णः खरस्तथा।

[D4.8.12 om.(hapl.) l. 1.—(l. 1) Ñ1 प्रभवो; Ñ2 D9 असहो; D3 प्रघसो (for प्रसभो). D1 परि- (for भूरि-). D3 वायसः (for राक्षसः).—(l. 2) D1.4 त्रिशिरा(D4 °रो); D3 विशिषो (for त्रिशिखो). D9 विद्युज्जिह्ववज्रशिखौ (for the prior half). D1-3.8.9 L(ed.) मेघवर्णस्व(L[ed.] °ध)-रस्तथा(D1 °दा) (for the post. half).];

while D5 reads 5[cd] after 3.

4 [a]) Ś1 Ñ V1.3 B D पट्टिशान् (for पट्टसान्). Ś1 D12 शक्तीः; Ñ1 बाणान्; Ñ2 B2.4 D9 कुंतान्; V3 B1 पाशान्; D7.10.11 शूलान्; T3 प्रासाः; G2 सर्वान् (for प्रासान्).—[b]) Ś1 D12 खड्ग- (for शक्ति-). D7.10.11 प्रासाञ्शक्ति-; M5 प्रासशूल- (for शक्तिशूल-). Ś1 Ñ V1.3 B D1-4.9.12 -[अ]सिमुद्गरान् (for -परश्वधान्).—[c]) Ñ2 V1.3 B D9 निशितान्बाणान्; D6 L(ed.) विष(L[ed.] शित)बाणानि; D7.10.11 Ck च सुबाणानि (for च सबाणानि).—[d]) Ñ2 V1.3 B1.2.4 D9 गदाश् (for खड्गांश्). Ś1 Ñ1 D1-4.12 M5 विमलाञ् (for विपुलाञ्). D4 शरान्; D7.10 G1.2 M6 शुभान् (for शितान्). Ñ2 V1.3 B D9 कनकांगदाः (B3 °दान्); D8 विमलच्छदान्; D11 विपुलांबुभान्; M1.2 कनकत्सरून् (for विपुलाञ्शितान्). ❀ Ct: सुबाणानीति बहुव्रीहिः। विपुलाम्बुभान्निर्मलजलकान्तीन्. ❀

5 [a]) V3 परिगृह्य (hypm.) (for प्रगृह्य). D1.4 समरे; D8 परमं (for परम-).—D5 reads 5[cd] after 3.—[c]) Ś1 Ñ1 D1-4.8.12 तेब्रुवन् (for अब्रुवन्). D4 राक्षसाः; G2 राक्षसं (for रावणं).—[d]) Ñ2 V1.3 B D9 प्रदीप्तम् (for प्रदीप्ता).

6 [a]) V1 D2 वयं (for अद्य). Ś1 Ñ1 B1 D1-4.8.12 हनिष्यामः; D5 हनिष्यामि (for वधिष्यामः).—[b]) B1.3 D1.2.9 T3 ससुग्रीवं (for सुग्रीवं च). B2.4 D3.4.6.8 T2 M5 सह- (for च स-).—[c]) Ś1 D12 तं (for च).—[d]) D6 कपिं (for लङ्का). V1 D12 येन लंका (by transp.).—After 6, V1 reads colophon of 6.8.

7 [a]) D3 om. तान्. G3 वीरानुदायुधान् सर्वान्. ❀ Cg: तानिति। क्रियाभेदात्तानित्यस्य न पुनरुक्तिः. ❀ —[cd]) Ñ2 सर्वान् (for वाक्यं). V3 पुरः (for पुनः). B3 ससुप- (for प्रत्युप-). Ś1 D12 उवाच वाक्यं वाक्यज्ञः शृण्वतां रक्षसामिदं.

8 Ś1 V1 D12 om. 8.—[a]) D1-3.8 अमि- (for अपि). D6 T3 M1.2 भ्रातर् (for तात). Ñ2 V3 B D9 त्रिभिरार्यै (V3 °रन्यै)रुपायैस्तु(V3 B1 °श्च); D4 अस्त्रिभिस्तात लोके-स्मिन्.—[b]) G1 damaged for योऽर्थः.—[c]) M6 ततो (for तस्य). L(ed.) -कालं (for -कालांस्). Ñ2 V3 B

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 5. 80. 9
R. 6. 9. 9
L. 5. 80. 10

प्रमत्तेष्वभियुक्तेषु दैवेन प्रहतेषु च ।
विक्रमास्तात सिध्यन्ति परीक्ष्य विधिना कृताः ॥ ९
अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम् ।
जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ ॥ १०
समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम् ।
कृतं हनुमता कर्म दुष्करं तर्कयेत कः ॥ ११
बलान्यपरिमेयानि वीर्याणि च निशाचराः ।
परेषां सहसावज्ञा न कर्तव्या कथंचन ॥ १२
किं च राक्षसराजस्य रामेणापकृतं पुरा ।
आजहार जनस्थानाद्यस्य भार्यां यशस्विनः ॥ १३
खरो यद्यतिवृत्तस्तु रामेण निहतो रणे ।
अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम् ॥ १४
एतन्निमित्तं वैदेह्याभयं नः सुमहद्भवेत् ।
आहृता सा परित्याज्या कलहार्थे कृते न किम् ॥ १५

D1-4.8.9 त्रीन् ; L (ed.) तु (for तान्). —[a]) D5.6 T1.3 G1.3 M1.2 उक्तान् (for युक्तान्). Ñ1 प्रवर्दंति; Ñ2 V3 B D1-4.8.9 कथयंति (for युक्तानाहुर्).

9 [a]) Ñ2 B2 D9 प्रथमं तेषु युक्ते(B2 °द्धे)षु. —[b]) Ś1 Ñ1 V1.3 B D2-4.8.9.12 [उ]पहतेषु; D7 T3 G2 M3 Cr.m.g प्रहतेषु; Ct as in text (for प्रहतेषु). D1 देवेनापहतेषु च; M5 दैवतप्रहतेषु च. —[c]) Ñ2 B2 D2.9 T2 तस्य; D6 T3 तत्र; D7 तेषु (for तात). D9 G3 विध्यंति (for सिध्यन्ति). —[d]) Ñ V1.3 B D1-4.8.9.12 विधिवत् (for °ना).

10 [a]) Ś1 Ñ V1.3 B D1-4.8.9.12 रामं; G3 हंत; M5 यूयं (for तं तु). —[b]) Ñ2 बलस्थितं; V3 बलोद्गतं; B1-3 रणे स्थितं; D1 बलोत्थितं; T3 बलान्वितं; G3 उपस्थितं; Cg as in text (for बले स्थितम्). —[c]) Ś1 Ñ V1.3 B D1-4.8.9.12 जातकोपं(D2 °रोषं; D4 °क्रोधं); D6 वीतरोषं; M5 जिष्णुं रोष- (for जितरोषं). Ś1 D12 सुदुर्धर्षं (for दुराधर्षं). —[d]) D2.10.11 T1 G1 M5 तं धर्षयितुम् (for प्रध°). Ñ1 B2.3 D9 M1.2 इच्छसि; Ñ2 V3 अर्हसि; D3 अर्हथ (for इच्छथ). ❀ Cg : इच्छथेति। पूर्वं रावणं प्रति वचनम्, अत्र सर्वान्प्रतीति बहुवचनम्. ❀

11 [a]) B1.3 हि; G2 [अ]थ (for तु). Ś1 Ñ1 D2-4.8.12 लंघयेद्यो वै; D1 लंघयित्वोच्चैर् (for लङ्घयित्वा तु). —[d]) D5 T1 G1.3 M3 वा (for कः). ❀ Cr.m : कृतं हनुमता कर्म दुष्करं तर्कयेत वेति पाठः। (Cr तर्कयेत वा) को वा तर्कयेदित्यर्थः. ❀ —For 11[cd], Ś1 Ñ V1.3 B D1-4.6-12 T2.3 M1.2.5 subst. ; while G2 ins. after 11 :

139* गतिं हनुमतो लोके कश्चिन्तयितुमर्हति ।

[Ś1 Ñ1 D2.3.8.12 वर्षं; D4 बलं; M5 कृतं (for गतिं). Ś1 D3.12 तस्य; D6 T2.3 कोपि (for लोके). Ś1 न कर्तुं कश्चिद्; V3 कश्चिन्न भवितुम् (hypm.); D1 कश्च तं जेतुम्; D12 न कश्चित्कर्तुम् (for कश्चिन्तयितुम्). Ñ1 कश्चित्तस्येह चेच्छसि; D6 T2.3 M5 विद्याद्वा तर्कयेत वा; D7.10.11 M1.2 को(D7 न) विद्यात्तर्कयेत वा; G2 विदित्वा तर्कयेत वा (for the post. half).]

12 [b]) D7 सवीर्याणि; G2 घोराणि च; Ct as in text (for वीर्याणि च). —[c]) B2 [अ]बुद्ध्वा (for [अ]वज्ञा). —[d]) Ś1 D4.8.12 कदाचन.

13 [a]) Ñ2 किं नु; V3 G3 M1.2 किं तु; G1 किंचिद् (for किं च). ❀ Cr : किं चेति। किमिति पदच्छेदः। रामेण च पुरा राक्षसराजस्य किं कृतम्। नापकृतमित्यर्थः। किं तु राक्षसराजस्येति पाठः। ; so also Cm. ❀ —[b]) B1 (also in marg.) [उ]पकृतं (for [अ]पकृतं). B3 त्वया (for पुरा). —[c]) D11 जहार च (for आजहार). —[d]) Ś1 Ñ2 B1.2.4 D1-4.8.9.12 भार्यां यस्य (by transp.); Ñ1 V3 B3 भार्यां तस्य; D7 M5 तस्य भार्यां. Ś1 D1-4.6-8.12 T3 यशस्विनीं; Ñ1 तपस्विनीं; Ñ2 V1.3 B D9 महात्मनः (for यशस्विनः). —After 13, T3 ins. 140*.

14 T3 om. 14. —[a]) T2 च (for तु). B2 यन्मतिकृत्तस्तु (sic); B4 यद्यतिवीर्यश्च; D1 महाबलो नूनं; D8 यद्यनिवर्तस्तु (for यद्यतिवृत्तस्तु). —[b]) Ś1 Ñ1 D1-3.8.12 समरे हतः ; G1 *** रणे (for निहतो रणे). D10.11 स रामेण हतो रणे. —[c]) D12 अवशं (sic) (for अवश्यं). Ś1 Ñ V1.3 B D1-4.8.9.12 प्राणिभिः ; D6.10.11 प्राणिना (for प्राणिनां). G1 दारा; Cr.m as in text (for प्राणा). —[d]) D6 T2 रक्षणीया; Cr.m as in text (for रक्षितव्या). G2 कथंचन (for यथाबलम्). —After 14, D5-7 T1.2 G M ins. ; while T3 ins. after 13 (owing to om.) :

140* अयशस्यमनायुष्यं परदाराभिमर्शनम् ।
50 D4 om. 50ab. —b) T3 राक्षसाढ्ये (for °स्ते). Ś Ñ V B D1-3.8.12.13 न कश्चित्पुरुषो(Ñ2 B2 °रतो)भवत्. —c) D6 T2.3 रक्षोधिप- (for रक्षःपति-). Ś Ñ1 D1.4.8.12 तस्मिन्न(Ñ1 D4 °त्र र)क्षोबलगणे; Ñ2 V B D2.3.13 तस्मिन्न(Ñ2 V1.2 B1-3 °दा र)क्षोगणबले. —d) D9 T3 सर्वे (for ध्यान-). V3 -मूढत्वम् (for -मूकत्वम्). B4 ध्यानमागत्वम् (for °मूकत्वम्). Ś Ñ2 V1.2 B1.2.4 D1-3.8.12.13 आगते; D5 T1 G2 M3 आस्थिताः (for आगताः). Ñ1 D4 हतशेषे समागते; B3 G (ed.) प्रहस्तवशमीय(G [ed.]°माग)ते. —After 50, D5-7.9-11 S ins.:

947* प्राप्ताः शोकार्णवं तीव्रं निःसंज्ञा इव तेऽभवन् ।

[D11 कोशार्णवं (meta.) (for शोका°). T3 तीर्णं; M1.2 मद्यं (sic) (for तीव्रं). D9-11 विसंज्ञा (for निःसंज्ञा).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 32. o
B. 6. 58. 59
L. 6. 34. 51

ततस्तु नीलो विजयी महाबलः
प्रशस्यमानः स्वकृतेन कर्मणा ।
समेत्य रामेण सलक्ष्मणेन
प्रहृष्टरूपस्तु बभूव यूथपः ॥ ५१

इति श्रीरामायणे युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

४७

तस्मिन्हते राक्षससैन्यपाले
प्लवंगमानामृषभेण युद्धे ।
भीमायुधं सागरतुल्यवेगं
प्रदुद्रुवे राक्षसराजसैन्यम् ॥ १
गत्वा तु रक्षोधिपतेः शशंसुः
सेनापतिं पावकसूनुशस्तम् ।
तच्चापि तेषां वचनं निशम्य
रक्षोधिपः क्रोधवशं जगाम ॥ २

51 [a]) V1 D1.13 M1.2 स (for तु). D12 विजये (for विजयी). —[b]) B2.4 प्रशंस्यमानः; D4 पराक्रम (then om. up to णा); D6 प्रसह्यमाणः; D11 प्रशस्त° (for प्रशस्यमानः). Ś Ñ V B1.3.4 D1.5.8–11 सु- (for स्व-). —[c]) Ñ2 V3 B2–4 D1.3.13 च (for स-). D5.7 T1 M3.5 स (M5 च)लक्ष्मणेन च. —[d]) Ñ2 प्रकृष्ट- (for प्रहृष्ट-). Ś Ñ2 V2 B1.2.4 D1–4.8.12.13 [ऽ]थ; Ñ1 [ऽ]भि-; B3 om. (for तु). Ñ1 D4 जगाम यूथपः; Ñ2 V2 B1–3 ययौ हरीश्वरः (for बभूव यूथपः).

Colophon: Ñ V1.2 B1 (after 6.47.3 first occurrence).2.3 D4.13 read colophon after 6.47.3.—*Kāṇḍa name*: Ñ V1 B D2.4.13 लंकाकांडे (D13 adds युद्धपर्वणि). —*Sarga name*: Ś Ñ V B D1–4.8.9.12.13 प्रहस्तवधः. —*Sarga no.* (figures, words or both): Ś1 Ñ1 V3 B2 D2.4.8.12.13 om.; Ś2 Ñ2 V2 D1.3 34; V1 35; B1 31; B3.4 32; D5–7.9–11 T1 G M 58; T2 61; T3 62. —After colophon, B4 ins. (including 911*) a passage relegated to App. I (No. 28). —After colophon, D2 concludes with राम; while G M1.2.5 conclude with श्रीरामाय नमः; whereas K (ed.) reads (within brackets) 948*, 6.47. 4–6 (var.), 951*, and App. I (No. 30) repeating 6.47. 4–6 in their proper place.

47

1 B4 om. 1–3. B1 repeats 1–3, 5–6 (followed by 951*) after App. I (No. 30). —[a]) Ś D8.12 -राजे; Ñ V B1(both times).2.3 D1–4.6.13 T2.3 -नाथे (for -पाले). —[b]) T3 प्लवंगमानाः. Ñ1 D4 अधिपेन (for ऋषभेण). Ñ2 संख्ये (for युद्धे). —[c]) Ś Ñ1 V1.2 D1–4.8.12.13 -तुल्यरूपं; V3 D10.11 -वेगतुल्यं (by transp.) (for -तुल्यवेगं). B3 भीमायुधं युक्तरणाभिलाषं. —[d]) D5.9–11 T M3.5 विदुद्रुवे (for प्र°). B1 (both times) -सैन्यमुग्रं; D13 -सर्वसैन्यं (for -राजसैन्यम्).

2 B4 om. 2; B1 repeats 2 (for both cf. v.l. 1). —[a]) Ñ2 [अ]पि; B1 (both times) [अ]धि-; D5–7 T M1–3 [अ]थ (for तु). Ś D2.8.12 ते नीलहतं; B2 रक्षःपतये; D1.3.13 नीलेन हतं (for रक्षोधिपतेः). Ñ V2 शशंस; D4 सकाशं (for शशंसुः). V3 दौवारिकस्तं निहतं शशंस. —[b]) B2 सेनापतिः (sic); D4 मायाधिपं (for सेनापतिं). Ś V2.3 D1–3.8.12.13 सानुबंधं(V2.3 D1.2 °चरं) प्रहस्तं; D9 पावकसूनुना हतं (for पावकसूनुशस्तम्). —[c]) Ś1 V2.3 B1 (both times) D1 तथापि; Ś2 D2.8.12 तथा हि. G1 [अ]शेषं (for तेषां). Ś Ñ V B1(both times).2 D1–4.8.12.13 स(B1 D13 च) निशम्य वाक्यं (for वचनं निशम्य). B3 श्रुत्वा तु तेषां तरसा स वाक्यं. —D9 om. (hapl.) 2[d]–3[a]. —[d]) T3 क्लेश-; Cr.g as in text (for क्रोध-). Ś D8.12 क्रोधवशो बभूव; V3 illeg. (for °वशं जगाम).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

संख्ये प्रहस्तं निहतं निशम्य
शोकार्दितः क्रोधपरीतचेताः ।
उवाच तान्नैर्ऋतयोधमुख्या-
न्निन्द्रो यथा चामरयोधमुख्यान् ॥ ३
नावज्ञा रिपवे कार्या यैरिन्द्रबलसूदनः ।
सूदितः सैन्यपालो मे सानुयात्रः सकुञ्जरः ॥ ४
सोऽहं रिपुविनाशाय विजयायाविचारयन् ।
स्वयमेव गमिष्यामि रणशीर्षं तदद्भुतम् ॥ ५
अद्य तद्वानरानीकं रामं च सहलक्ष्मणम् ।
निर्दहिष्यामि बाणौघैर्वनं दीप्तैरिवाग्निभिः ॥ ६

G. 6 33. 5
B. 6. 59. 6
L. 6. 35. 7

3 B4 om. 3; B1 repeats 3 (for both cf. v.l. 1). D9 om. 3[a] (cf. v.l. 2).—[a]) Ś Ñ V1.2 B1 (both times).2.3 D1–4.8.12.13 सभ्रातरं(Ñ B1–3 D1 °मातुलं; D4 °भ्रातमजं [sic]) नीलहतं(D12 °वशं) निशम्य; V3 * * * * * * हतं निशम्य (illeg.).—[b]) D9–11 क्रोध- (for शोक-). D6.7.9–11 शोक-; G1.3 M5 कोप- (for क्रोध-). Ś D2.8.12 क्रोधविवृत्तने(D8 °गा)त्रः; Ñ1 V3 D1.3.4.13 °वशा(D13 °शो)भिभूतः (for °परीतचेताः).—[c]) Ñ2 V1 B1(both times).2.3 D10 राक्षस-; D11 राज*- (sic) (for नैर्ऋत-). Ñ1 V1.2 D4 -राज-; D9–11 M5 -यूथ- (for -योध-).—B3 om. (hapl.) 3[d].—[d]) Ś Ñ V B1 (both times) D1–3.8.12.13 [ए]वामर-; D7.10.11 निर्जर- (for चामर-). V1 -राज-; D7.9–11 G3 M5 -यूथ- (for -योध-). V2 B1 (both times) D3 -वीरान् (for -मुख्यान्).—After 3, Ñ V1.2 B1(after first occurrence).2.3 D4.13 read colophon of 6.46; while V3 ins. 948*.

4 Before 4, Ś Ñ V1.2 B D1–4.8.12.13 G1 M5 ins.; while V3 ins. after 3:

948* प्रहस्तस्य वधं श्रुत्वा रावणो भ्रान्तमानसः ।
राक्षसानादिदेशाशु राक्षसेन्द्रो महाबलः ।

[(l. 1) D3 वधात्क्रुद्धो (for वधं श्रुत्वा). B4 वज्रदंष्ट्रं हतं श्रुत्वा; G1 M5 प्रहस्तं निहतं श्रुत्वा (for the prior half). Ñ2 M5 भ्रांतचेतनः; V3 राक्षसाधिपः (for भ्रान्तमानसः).—(l. 2) Ś V3 B2 D1.2.4.8.12 [अ]थ (for [आ]शु). G1 राक्षसानामुवाचाशु (for the prior half).]

—V3 om. 4. K (ed.) reads (within brackets) 948*, 4–6 (var.), 951*, and App. I (No. 30) after 6.46 repeating 4–6 here.—[a]) Ś1 Ñ V1.2 B D1.3.4.13 K (ed.) (first time) कार्या शत्रुषु नावज्ञा; Ś2 D2.8.12 कुर्याच्छत्रुषु नावज्ञां.—[b]) B1.2.4 येनेंद्र- (for यैरिन्द्र-). Ñ2 D9–11 G Ct -सादनः; D8 -सूचनः (sic); Cr.m as in text (for -सूदनः). D4 सूरिदं बलसूदित (sic).—After 4[ab], D13 consecutively repeats 4–7.—[c]) D7 सादितः. T3 शैल- (for सैन्य-).—[d]) D2 सोनुयायी; D4 सानुजातः; D9 °यातः; D13 (both times) °बंधः (for सानुयात्रः). Ś D2.8.12 सबांधवः; D13 (both times) ससैन्यकः.—After 4, Ñ1 V2 B2 D4 ins.:

949* रथैर्हयैर्गजैश्चैव यातुधानैश्च सर्वशः ।

[B2 transp. हयैर् and गजैश्. B4 समंततः (for च सर्वशः).]

5 B1 D13 K (ed.) repeat 5 (cf. v.l. 1 and 4).—[a]) B4 युधि; D13 (both times) शत्रु- (for रिपु-). B2 सोहं रिपूणां नाशाय.—[b]) D6 T1.3 G1 विचारयन् (for [अ]वि°). Ś Ñ1 B3 D2.4.8.13 स्वबलस्य च वृद्धये; Ñ2 V1.2 B1(both times).2.4 D1.3.13 (both times) K (ed.) (first time) विजयस्य च(B1 D1.3.13 °स्य वि-; K [ed.] °स्याभि-) वृद्ध(D1 वर्ध)ये; V3 विजयाय सैन्यस्य च (unmetric).—After 5[ab], Ñ1 (within brackets) V2 D4 ins.; while B2 subst. for 5[cd]:

950* रामलक्ष्मणयोर्वैरं स्वयं निर्यातयामि वै ।

—[c]) D1 [आ]गमिष्यामि.—[d]) D1.4 रणं शीघ्रम्(D1 °र्षम्) (for रणशीर्षं). Ś Ñ2 V B1(first time).3.4 D1–4.8.12.13 (both times) अभित्वरन्; Ñ1 V3 B1 (second time) अतित्वरन् (for तदद्भुतम्).

6 B1 D13 K (ed.) repeat 6 (cf. v.l. 1 and 4). B4 om. 6[ab].—[a]) Ś2 D8.12 अद्यैतद्; B3 अहं तु; D6 T G1 अद्य तं (for अद्य तद्).—[b]) Ñ1 V B1(first time).2.3 D4 K (ed.)(first time) सरामं (for रामं च). Ś D1–3.8.12.13 (both times) सहरामं सलक्ष्मणं.—[c]) Ś D6.8.12 निहनिष्यामि; D1.13 (both times) K (ed.) (first time) प्रधक्ष्याम्येव(D13 °मि च). D4 तद्बाणैः (for बाणौघैर्). Ñ2 V1.2 B3 निर्ध(Ñ2 निध; B3 विध)क्ष्यामि पृषत्कौघैः; B2 निर्धक्ष्यामि शरैर्घोरैः; B4 दिधक्ष्यामि शरोग्रैश्च.—[d]) G1 शुष्कं वनम्; G3 वनं दीप्तम् (for वनं दीप्तैर्). Ś Ñ V B (B1 both times) D1–4.8.12.13 (both times) K (ed.) (first time) शुष्कं वन(V3 °ष्कमूल; B2.3 D3 °ष्कैंधन)मिवानलः.—After 6, Ś Ñ2 V B2–4 D1–4.8.9.12 M3 (only l. 1) ins.; B1 ins. for the first time after 6 (first occurrence), repeating it after 6 (r.); D13 ins. after 6 (first occurrence); while T2 ins. l. 1–2 only after 6:

951* अद्य संतर्पयिष्यामि पृथिवीं कपिशोणितैः ।
रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ।
एवमुक्त्वा महातेजा रावणो लोकरावणः ।
आगच्छत्सहसा क्रुद्धः सर्वसैन्येन संवृतः ।

[Ñ2 D9 om. l. 1–2.—(l. 1) V2 अहं; V3 B2.4 D4 स्वयं; B1 (first time) अयं; T2 अथ (for अद्य). D4 पृथिव्यां

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 33. 1
B. 6. 59. 7
L. 6. 37. 1

स एवमुक्त्वा ज्वलनप्रकाशं
रथं तुरंगोत्तमराजियुक्तम् ।
प्रकाशमानं वपुषा ज्वलन्तं
समारुरोहामरराजशत्रुः ॥ ७
स शङ्खभेरीपटहप्रणादै-
रास्फोटितक्ष्वेडितसिंहनादैः ।
पुण्यैः स्तवैश्चाप्यभिपूज्यमान-
स्तदा ययौ राक्षसराजमुख्यः ॥ ८
स शैलजीमूतनिकाशरूपै-
र्मांसाशनैः पावकदीप्तनेत्रैः ।
बभौ वृतो राक्षसराजमुख्यै-
र्भूतैर्वृतो रुद्र इवामरेशः ॥ ९

(for °वीं).—(l. 2) D4 रामं स-; D13 सरामं (for रामं च). B3 चापि (for चैव). D1 यमालयं (for यमक्षयम्). B1 (second time) प्रेषिष्ये यमसादनं (for the post. half).—(l. 3) Ś D2.8.12 राक्षसेश्वरः (for लोकरावणः).—(l. 4) V2 अवगच्छत् (hypm.); B1(both times).2.3 D1–4 विगच्छत्; D13 अगमत् (for आगच्छत्). Ñ2 V B2.4 D9 सु(V2 स)महाक्रुद्धः; D4.8 महाक्रुद्धः (subm.) (for सहसा क्रुद्धः). Ś D8.12 संयुतः (for संवृतः).]

—Thereafter, Ñ2 V B1(after 951* first occurrence).2–4 D3.4.9 T2 cont.; while T3 ins. after 6 a passage relegated to App. I (No. 30).

7 D13 repeats 7 (cf. v.l 4). D1 reads 7 twice. —a) Ś Ñ1 V B1 D1(both times).2–4.8.12.13 (both times) तु विमानरूपं(B1 °कल्पं); D5 T1 ज्वलनप्रकाशो; D6.7.9 ज्वलनं प्रकाशं.—G2 om. (hapl.) from 7b up to प्रका in 7c.—b) B4 D5–7.9 M3.5 Cm.g -राजयुक्तं; T2 -संप्रयुक्तः; M1.2 -राशि°; Ck.t as in text (for -राजियुक्तम्). Ś Ñ1 V B1 D1(both times).2–4.8.12.13 (both times) रथं तुरंगैर्बहुभिः सु(V3 D1.4.13 °भिः प्र; B1 °भिश्च; D2.3 °भिस्तु)युक्तं.—c) B4 D1 (second time).2.13 (both times) प्रकाशमानो. Ś Ñ V1.2 B4 D1(first time).2.3.8.9.12.13 (both times) परेण; V3 B1–3 D1(second time).4 वरेण (for ज्वलन्तं).—d) B1 -देव- (for -राज-).—After 7, Ñ1(m.).2 V B2–4 D2.9.13 (after 7 [r.]) ins.:

952* आरुह्य तं शस्त्रशतैरुपेतं
दिव्यैस्तथा राक्षसराजपुत्रैः ।
ययौ तदायोधनमुग्रवीर्यो
वेगेन रोषस्य बलेन चैव ।
तमेकवीरं समुदीर्णमन्युं [5]
निशाचरेन्द्रं सुविवृद्धकोपम् ।
तदानुजग्मुर्गिरिराजकल्पा
रक्षोगणाः संयुगजातहर्षाः ।

[(l. 1) Ñ2 D9 बाण-; D13 तूण- (for शस्त्र-). D2 -शैर् (for -शतैर्). Ñ2 D9.13 समेतं.—(l. 2) D2 विज्ञैस्; D13 दिव्यं (for दिव्यैस्). D2 नैर्ऋत- (for राक्षस-).—(l. 4) V3 रक्षोति-; D13 रामस्य (for रोषस्य). V3 तेन (for चैव). —V3 om. l. 5–8.—(l. 5) V2 तद् (for तम्). D2 एव (for एक-). Ñ2 B2 -मृत्युं; B4 -शक्तिं (for -मन्युं).—(l. 7) B2 तथा (for तदा). D2 हरि-; D13 गज- (for गिरि-). B3 -रूपा; D2 -कल्पं (for -कल्पा).—(l. 8) D13 संयुत- (for संयुग-). B3 रक्षोगणाः संप्रति संप्रहर्षाः.]

—After 7 (first occurrence), D1 reads an addl. colophon:

[*Sarga name*: रावणगर्जनं.—*Sarga no.*: 35.]

—Thereafter D1 ins.; while D13 ins. after 7 (first occurrence) a passage relegated to App. I (No. 30).

8 D13 transp. 8 and 9.—a) D13 सहस्रसंख्यैः (for स शङ्खभेरी-). D5.9–11 T1 G2 M3 -पणव- (for -पटह-).—b) Ś V1.2 D8.12 आ(Ś2 D8 अ)स्फोटिता(Ś1 °त)स्फोटित-; Ñ1 B3.4 D1–3 आक्ष्वेडिता(Ñ1 °त)स्फोटित-; Ñ2 B1 °ताक्ष्वेडित-; D4 अक्षोभितप्रस्फुट-; D5.6 T1.2 G M Cm.g.k °तक्ष्वेलित-; Ct as in text (for आस्फोटित-क्ष्वेडित-). D13 भेरीरवैः शंखमहास्वनैश्च.—c) B3 (m. also as in text) बलैर्वृतश्; D4 पुण्योत्सवैश् (for पुण्यैः स्तवैश्). V1 [अ]व- (for [अ]पि). V1 om.; V3 D9–11 सु-; D2 [अ]ति- (for [अ]भि-). B4 -भूयमानस् (for -पूज्य°).—d) B2 -सैन्यराजः; B4 -योधमुख्यैः (for -राजमुख्यः).—After 8, D13 ins.:

953* महाबलै राक्षसजातहर्षैः
परस्परं वाहनवाहितैश्च ।
महाधनैर्वर्मकिरीटकुण्डलै-
र्युयुत्सुभिः शक्तित्रिशूलधारिभिः ।
तेषां तुरंगास्थिरथाङ्गचूर्णितो [5]
रेणुर्दिशः खं द्युमणिं चछाद च ।
गजै रथैरुम्ल(ष्ट?)हयैश्च बृंहितैः
कोलाहलैः सैन्यमहार्णवस्य ।
चचाल भूमिः सहशैलकानन ।
भेरीरवै राक्षससिंहनादैः । [10]

9 D13 transp. 8 and 9.—a) Ñ1 नील- (for शैल-). Ñ V1.2 B3 D7 -कायैर् (for -रूपैर्).—b) Ś D2.4.8.12 महाबलैः(D4 °जवैः); Ñ1 B1.4 D3.13 महास्व(B4 °न; D13 °श)नैः; V3 D1 महासु(V3 °स्व)रैः; D5 T1 M1–3 मांसादनैः(M1.2 °कैः) (for मांसाशनैः). B3 -नेत्रदीप्तैः (by transp.); D6 T2 -दीप्तगात्रैः (for -दीप्तनेत्रैः)-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततो नगर्याः सहसा महौजा
निष्क्रम्य तद्वानरसैन्यमुग्रम् ।
महार्णवाभ्रस्तनितं ददर्श
समुद्यतं पादपशैलहस्तम् ॥ १०

तद्राक्षसानीकमतिप्रचण्ड-
मालोक्य रामो भुजगेन्द्रबाहुः ।
विभीषणं शस्त्रभृतां वरिष्ठ-
मुवाच सेनानुगतः पृथुश्रीः ॥ ११

नानापताकाध्वजशस्त्रजुष्टं
प्रासासिशूलायुधचक्रजुष्टम् ।
सैन्यं नगेन्द्रोपमनागजुष्टं
कस्येदमक्षोभ्यमभीरुजुष्टम् ॥ १२

ततस्तु रामस्य निशम्य वाक्यं
विभीषणः शक्रसमानवीर्यः ।
शशंस रामस्य बलप्रवेकं
महात्मनां राक्षसपुंगवानाम् ॥ १३

योऽसौ गजस्कन्धगतो महात्मा
नवोदितार्कोपमताम्रवक्त्रः ।
प्रकम्पयन्नागशिरोऽभ्युपैति
ह्यकम्पनं त्वेनमवेहि राजन् ॥ १४

G. 6. 35. 8
B. 6. 59. 14
L. 6. 37. 8

—[c]) Ś Ñ V B D1–4.8.12.13 बलैर् (for बभौ). D6 reads in marg. वृतो. Ś Ñ1 B1.4 D2.3.8.12.13 -योधवीरैर् (D2 °रो); Ñ2 V3 B2 -योधमुख्यो; V1.2 D5.6.9–11 T1.2 G1 M3 -राजमुख्यो; B3 D1.4.7 G2.3 -योध° (for -राजमुख्यैर्). —[d]) V1 देवैर्; D3 (marg.) सुरैर् (for भूतैर्). B1 चंद्र (for रुद्र). V3 D4 [आ]बभासे; M3 [अ]सुरेशः (for [अ]मरेशः).

10 [a]) G1 महात्मा (for महौजा). V3 transp. नगर्याः and महौजा. —[b]) V3 D1.13 निःक्रम्य. B3 -सैन्यमुख्यं (for °मुग्रम्). D13 निष्क्रम्य तद्वानरमुग्रसैन्यं. —Ñ V1.2 B2.3 transp. [c] and [d]. —[c]) Ś D1–4.8.12.13 -[अं]भःस्तिमितं; Ñ1 V1.2 B3 -[अं]भःस्तनितं; V3 B1.4 -[अ]भ्रस्तिमितं; G2 M5 -[उ]ग्र° (for -[अ]भ्रस्तनितं). —After 10, G1 ins.:

954* रथैरमेयैस्तुरगैरसंख्यै-
र्गजोत्तमैश्चाग्रसरैः समन्वितम् ।

11 [a]) B4 तद्रथ- (for राक्षस-). D2 अभि- (for अति-). —[b]) D6 T2.3 विलोक्य. Ñ B2.3 [ऽ]मरतुल्य (B2 °राज)रूपः; V1.2 [ऽ]मरराजतुल्यः; B4 [ऽ]द्भुतमुग्रवीर्यः; D1.3.4.13 भुजगाभबाहुः (for भुजगेन्द्र°). B1 रामस्तु दृष्ट्वा भुजगाभबाहुः. —[c]) V1.2 B2 D1.3.13 धर्म-; G2 बुद्धि- (for शस्त्र-). —[d]) Ś Ñ V B D1–4.8.12.13 शैलाग्र- (D13 °व)गतः (for सेनानुगतः). B3 महात्मा; D4 सहश्रीः.

12 [a]) V3 -पताकि-; B4 -पताकं; D4 T2.3 G1 Cr -पताक-; Cg as in text (for -पताका-). Ñ2 -शस्त्रदृसं; B2 D10.11 G2 -छत्रजुष्टं; D1 -संप्रजुष्टं; Cr as in text (for -शस्त्रजुष्टं). V3 B4 D1–4.8.12.13 read 12[d]. —B1 —After 12[a], Ś om. (hapl.) 12[b]. —[b]) Ś D8.12 सप्रास- (for प्रासासि-). Ś2 B3 -शैल- (for -शूल-). Ś Ñ V B2–4 D1–4.7.8.12.13 -[आ]शनि- (for -[आ]युध-). V3 B3.4 D4.7 T1.3 G2 -वज्र-; D5.6.10.11 G3 M3 -शस्त्र- (for -चक्र-). Ñ V1.2 B2 -हस्तं (for -जुष्टम्). —Ñ V1.2 B2.3 D9–11 transp. [c] and [d]. —[c]) Ñ V1.2 B2.3 नागेंद्रराज- (B2 °नाग-); D9–11 M Cm सैन्यं महें (M3 गजें)द्र- (for सैन्यं नगेन्द्र-). V3 -रूपमूर्तिः (sic) (for -नागजुष्टं). ❀ Cr: नानापताकध्वजशस्त्रजुष्टं प्रासासिशूलायुधवज्रदंष्ट्रमिति पाठः।; Cm: प्रासासिशूलायुधशस्त्रजुष्टमायुधानि धनूंषि प्रासासिशूलायुधान्येव शस्त्राणि तैर्जुष्टम्। महेन्द्रोपमनागजुष्टमिति पाठे महेन्द्रपर्वतसदृशगजयुक्तम्।; Cg: प्रथमं शस्त्रशब्द उपात्तः प्रासादिभिन्नपरः। आयुधं धनुः, इन्द्रायुधमित्यादौ तथा प्रयोगात्। प्रासासिशूलायुधरूपैः शस्त्रैर्जुष्टमित्यर्थः। वज्रजुष्टमिति पाठान्तरम्।; so also Ct. ❀ Ck: ध्वजछत्रेति। छान्दसस्तुगभावः।; so also Ct. ❀ —B1 om. (hapl.) 12[d]. —[d]) Ś V3 B4 D1.2.4.8.12.13 [ए]तद् (for [इ]दम्). Ñ V1.2 B2 अभीरुसैन्यं; V3 B3.4 D4.13 अतीवपुष्टं (B3 °सैन्यं; D13 °दुष्टं); G1 अदीनजुष्टं (for अभीरुजुष्टम्).

13 [a]) Ś Ñ V B D1–4.8.12.13 ततः स (Ñ2 V3 °तस्तु) रामस्य वचो निशम्य. —[b]) Ñ2 B1 D1.12.13 शुक्र- (for शक्र-). Ś Ñ V B D1–4.8.12.13 -बुद्धिः (for -वीर्यः). G3 विभीषणः शस्त्रभृतां वरिष्ठः. —[c]) Ś Ñ V B D1–4.7–9.12.13 रामाय (for रामस्य). Ñ V1.2 B2–4 D4 -प्रवीरान्; V3 -प्रयुक्तो; B1 D1.13 -प्रवेकान्; D5.9 T G3 M1.2.5 -प्रवेगं; Cv as in text (for -प्रवेकं). —[d]) Ñ V1.2 B2–4 दुरासदान् (for महात्मनां). Ñ2 V1 B3.4 -पुंगवांस्तान्.

14 V3 om. (hapl.) 14. —[a]) Ś D2.8 [ऽ]यं (for ऽसौ). G2 जग- (meta.) (for गज-). —[b]) Ś D8.12 -दीप्त- (for -ताम्र-). Ñ V1.2 B4 -नेत्रः; B3 D7 T2 -चक्षुः; Cg as in text (for -वक्त्रः). —[c]) Ś B1 D1–3.8–12 संः; B2 आ-; D6.13 T2.3 G1 M5 स (for प्र-). —[d]) D9 [ए]हिम् (sic) (for [ए]नम्). Ñ V1.2 B2–4 प्रवीरबाहुं तम् (B2.4 °हुस्तम्) (for ह्यकम्पनं त्वेनम्). D5 G1.3 M1.2 अवैहि (G1 °ह [sic]) (for अवेहि). D6 reads in marg. हि राजन्. Ś B1 D1–4.8.12.13 राजन्नवे (Ś D3.8.12 °वै)ह्येन (B1 °क्षध्व)मकंपनाह्वं (B1 D4.13 °ख्यं; D3 °कं).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 35. 9
B. 6. 59. 15
L. 6. 37. 9

योऽसौ रथस्थो मृगराजकेतु-
धूर्न्वन्धनुः शक्रधनुःप्रकाशम् ।
करीव भात्युग्रविवृत्तदंष्ट्रः
स इन्द्रजिन्नाम वरप्रधानः ॥ १५
यश्चैष विन्ध्यास्तमहेन्द्रकल्पो
धन्वी रथस्थोऽतिरथोऽतिवीर्यः ।
विस्फारयंश्चापमतुल्यमानं
नाम्नातिकायोऽतिविवृद्धकायः ॥ १६
योऽसौ नवार्कोदिततास्रचक्षु-
रारुह्य घण्टानिनदप्रणादम् ।
गजं खरं गर्जति वै महात्मा
महोदरो नाम स एष वीरः ॥ १७
योऽसौ हयं काञ्चनचित्रभाण्ड-
मारुह्य संध्याभ्रगिरिप्रकाशम् ।
प्रासं समुद्यम्य मरीचिनद्धं
पिशाच एषोऽशनितुल्यवेगः ॥ १८
यश्चैष शूलं निशितं प्रगृह्य
विद्युत्प्रभं किंकरवज्रवेगम् ।
वृषेन्द्रमास्थाय गिरिप्रकाश-
मायाति सोऽसौ त्रिशिरा यशस्वी ॥ १९
असौ च जीमूतनिकाशरूपः
कुम्भः पृथुव्यूढसुजातवक्षाः ।
समाहितः पन्नगराजकेतु-
र्विस्फारयन्भाति धनुर्विधून्वन् ॥ २०

15 [a]) V3 G3 मृगस्थो (for रथस्थो). V3 गज- (for मृग-). —[b]) Ś Ñ V B1.2 D1–4.6.7.9–11.13 T2.3 M1.5 धुन्वन्धनुः; B3.4 धनुर्धरः. B4 शक्र इव; D9 शक्रधनुषः (for शक्रधनुः-). —[c]) Ś D8.12 करोदराति-; D1 G2 करीभवाति (meta.) (for करीव भाति). T3 [अं]ग- (for [उ]ग्र-). B4 D6.9 T2 -विवृद्ध-; T3 M1.2 -विविक्त- (for -विवृत्त-). —[d]) Ś D2.8.12 सुरेंद्रशत्रुः; B1 D1.3 परं स्वधाम (for वरप्रधानः). Ñ V B2–4 D4.13 स इंद्रजिद्राक्षसराजपुत्रः.

16 [a]) B3 D1.9 [ए]व (for [ए]ष). Ś D2.8.12 विक्रांत; Ñ V B1.3.4 विन्यस्त; D1 सुन्यक्त; D7 T3 G1.3 M5 विंध्याद्रि-(G3°ग्नि-) (for विन्ध्यास्त-). Ś Ñ V B4 D1–4.8.12 इवेंद्र-; B1.3 -हरेंद्र- (for -महेन्द्र-). D13 योसौ महावीर्यभुजः किरीटी. —[b]) D13 महाशरीरो. B3 विवृणोति (for ऽतिरथोऽति-). Ś Ñ V B D2–13T G2.3 M5 -वीरः; D1 -धीरः (for -वीर्यः). —[c]) Ñ V1.2 B2–4 G1 अतुल्य(Ñ2 °चिंत्य)नादम् (for °मानं). Ś V3 B1 D1–4.8.12.13 विस्फारयन्वै धनुरु(V3 B1 °र्द्य)ग्रनादम्. —[d]) Ś Ñ2 V B D1–4.8.12.13 एषो; Ñ1 उग्रो (for नाम्ना). B1 च (for ऽति-). Ś V3 B1 D2–4.8.12.13 -विवृत्त(V3 °द्ध)नेत्रः; D1 -विचित्रनेत्रः (for -विवृद्धकायः).

17 [a]) Ś Ñ2 V1.2 B1.3.4 D1–6.8.12.13 T1.2 G2 नवार्कोपम-; D7 °दय-; Cv as in text (for °दित-). B4 -नेत्र; D6 T2.3 -वक्त्र (for -चक्षुर्). ❀ Cr: योऽसौ नलोको(नवार्को?) पमताम्रचक्षुरिति पाठः. ❀ —D4 om. (hapl.?) 17[b] – 18[a]. —[b]) D9.10 -निनदं (for -निनद-). Ś D8.12 -प्रवेके; V3 B4 -प्रणादः; D2 -प्रवेकं (for -प्रणादम्). —[c]) Ś D2.8.12 खरो; Ñ V B D1.13 खरं (for गजं). D13 खरो (for खरं). M1.2 यो (for वै). Ñ V1.2 B2–4 दुरात्मा (for महात्मा).

18 D4 om. 18[a] (cf. v.l. 17). —[a]) Ñ2 [ऽ]यं (for ऽसौ). M5 गजं (for हयं). Ś D8.12 -दण्डम्; D13 -भानुम्; L (ed.) -भाद्रम् (for -भाण्डम्). —[b]) Ś Ñ2 B1.4 D1–4.8.12.13 -घन-; V1.2 -चय- (for -गिरि-). D4.9–11 -प्रकाशः. —[c]) D4 पाशं; D13 शक्तिं (for प्रासं). Ś D8.12 मरीचिकल्पं; Ñ1 °माल्यं; V1 °मानं; B2 °युक्तं; B4 D4 °सत्वं; D2.13 °विद्धं (for °नद्धं). —[d]) Ś V3 B1 D1–4.8.12.13 नरां(B1 D1.3 देवां)तकाख्यो; Ñ2 illeg.; B4 नरांतकोयं च (for पिशाच एषो). B3 हरि- (for ऽशनि-). Ś D8.12 -वेगं; B2 -भीमः (for -वेगः). —After 18, Ñ1 B2.3 ins. 956*.

19 Before 19, Ñ1 B2.3 read 22–23. —[a]) Ñ2 एषः; D6 T2 चैत्र (for चैष). —[b]) Ś Ñ V1.2 B2–4 D2.8.12 किंकिणि-; B1(m. also) पावक-; D1 दारुण-; D3 किंनर-; D9.13 G1 कांचन-; L (ed.) वासव- (for किंकर-). B1 -तुल्य-; D3 -वक्त्र- (for -वज्र-). Ñ1 V1.2 B2–4 -जुष्टं; Ñ2 -दंष्टं; D4 -वेगः; D9 -बंधं; D13 -सारं (for -वेगम्). V3 विद्युत्प्रभं कांचनचित्रलेखं. ☞ Ś D8.12 om. 19[c]–41[b]. —[c]) Ñ2 V B4 D1–4.13 गजेंद्रम्; B3 नागेंद्रम्. Ñ1 D1.3.4.6.7.9–11.13 T2.3 G1.3 M5 शशि-; Cm.g as in text (for गिरि-). B1 गजेंद्रमोक्षाय शशिप्रकाशम्. —[d]) Ñ V1.2 B1.4 D2–4.6.7.9.11.13 T2.3 G2.3 M3.5 यो (for सो). B3 [ऽ]यं (for ऽसौ). V2 B3.4 D1.13 तपस्वी (for यशस्वी). B2 खरस्वनो वै मकराक्ष एषः. ❀ Cr: आयाति योऽसौ त्रिशिरा यतस्विति पाठः. ❀

20 [a]) B2.3 अयं; G3 योसौ; Cg as in text (for असौ). Ñ V1.2 B2–4 D2 G3 M5 तु; D3 हि (for च). B2.3 -कायः (for -रूपः). —[b]) Ñ1 B2.3 प्रतिव्यूढ-; V3 D4 पृथुश्रीश्च; B1 D1 T3 पृथुर्न्यूं(B1 °गूं)ढ-; Cg as in text (for पृथुव्यूढ-). G1 -विशाल- (for -सुजात-). Ñ1 -वक्षः. B4 कुंभोयमायाति सुजातपक्षः. —[c]) T3 -केतुं (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

यश्चैष जाम्बूनदवज्रजुष्टं
दीप्तं सधूमं परिघं प्रगृह्य ।
आयाति रक्षोबलकेतुभूतः
सोऽसौ निकुम्भोऽद्भुतघोरकर्मा ॥ २१

यश्चैष चापासिशरौघजुष्टं
पताकिनं पावकदीप्तरूपम् ।
रथं समास्थाय विभात्युदग्रो
नरान्तकोऽसौ नगशृङ्गयोधी ॥ २२

यश्चैष नानाविधघोररूपै-
र्व्याघ्रोष्ट्रनागेन्द्रमृगेन्द्रवक्त्रैः ।
भूतैर्वृतो भाति विवृत्तनेत्रैः
सोऽसौ सुराणामपि दर्पहन्ता ॥ २३

G. 6. 35. 15
B. 6. 59. 23
L. 6. 37. 18

-केतुर्). —[a]) Ñ1 V2.3 B1.2 D9–11.13 याति; B4 सोति-; D4 एति (for भाति). Ñ V1.2 B D1–4.13 धनुष्मान्; V3 वपुष्मान्; D6.7.9–11 T2.3 विधुन्वन्; G1 विचित्रं; Cg as in text (for विधून्वन्). ❀ Cg: अत्र यच्छब्दाप्रयोगः सन्निहितत्वादिति भाव्यम्. ❀

21 [a]) D4 स एष (for यश्चैष). B1 -पत्र- (for -वज्र-). D4 -गुप्तं; M5 -दंष्ट्रो (for -जुष्टं). —V3 om. (hapl.) 21[b]–22[a]. —[b]) D4 lacuna for दीप्तं. Ñ1 V1.2 B2.3 सुघोरं; L (ed.) सधूम्रं (for सधूमं). D1 निगृह्य; D2.9 विगृह्य (for प्रगृह्य). —B1 reads in marg. 21[c]–22[ab]. —[c]) B4 प्रयाति (for आयाति). B4 -हेतुभूतः; D1 -भूतहेतुः. —[d]) V1.2 एषो; B2 om.; D2 सोयं; D9–11 M5 योसौ; M1–3 त्वसौ (for सोऽसौ). Ñ2 B1 D9–11 -वीरकर्मा; V1.2 B4 D4.6 T3 -भीम°; B2 °रूपः; M5 -रूप° (for -घोरकर्मा). Ñ1 B3 निकुंभ एषोद्भुतरुक्ष (B3 °घोर) रूपः (Ñ1 [m. also] °भीमकर्मा).

22 V3 om. 22[a]; B1 reads in marg. 22[ab] (for both, cf. v.l. 21). Ñ1 B2.3 read 22–23 before 19. —[a]) D3 om. यश्चैष. D4 आयाति (for चापासि-). Ñ2 -वरौघ-; D2.9 -धरौघ-. D4 -युद्धं (for -जुष्टं). —[b]) Ñ V B D1–4.13 -तुल्य- (for -दीप्त-). V3 -विक्रमं; D4 -वेगं (for -रूपम्). —After 22[ab], V2 ins.:

955* खड्गी धनुष्मान्कवची किरीटी
महाबलो राक्षसराजसूनुः ।

—[c]) Ñ1 V1.2 B1–3 D1.13 [उ]द्यं (for [उ]द्यो). —B1 reads 22[d] twice (second time in marg.). —[d]) B1 (first time) D1.13 विद्युत्प्रभो; B4 D2.4 देवांतको (for नरान्तको). Ñ V1.2 B2.3 [स]यं (for सौ). Ñ1 B1 (second time).4 नरसिंह-; B1 (first time) M1 नत (M1 °र) शृंग-; D4 तमसंग- (for नगशृङ्ग-). —After 22, Ñ2 V B1.4 D1–4.13 ins.; while Ñ1 B2.3 ins. after 18:

956* यश्चैष कालानलतुल्यरूपः
खड्गी धनुष्मान्कवची किरीटी ।
गजेन्द्रमास्थाय गिरिप्रकाशं
खरस्वनोऽयं मकराक्षनामा ।

[(l. 1) D4 स (for यश्). B3 -वेगः (for -रूपः). —V3 om. from l. 3 up to 23[ab]. —(l. 3) D13 नागेंद्रम्. D4 आहत्य (for आस्थाय). D2 शशि- (for गिरि-). —(l. 4) B3.4 D2 खरात्मजो. Ñ1 B2 वै; B4 D4 [स]सौ (for सयं). Ñ1 B2 एषः (for -नामा).]

23 V3 om. 23[ab] (cf. v.l. 956*). Ñ1 B2.3 read 22–23 before 19. —[a]) T3 यत्रैष. D1 नानायुध- (for °विध-). Ñ1 -तुल्य- (for -घोर-). —[b]) D4 खर- (for व्याघ्र-). Ñ1 -वृकाश्व-; Ñ2 V1.2 B1 D1.4–6.9–11.13 T1.2 G1 M3.5 -मृगाश्व-; B2.3 -वृषाश्व-; B4 -मुखैः प्र-; D2 -मृगास्य-; T3 -वराह-; L (ed.) -मृगर्क्ष- (for -मृगेन्द्र-). Ñ V1.2 B2–4 D1–4.13 -युक्तैः; B1 -जुष्टः (for -वक्त्रैः). —[c]) Ñ1 B2.3 [स]म्येति (for भाति). D9 विवृद्ध-. Ñ2 B2 D4 -नेत्रो (for -नेत्रैः). —After 23[c], D6 T2.3 ins.:

957* देवैर्वृतो देव इवान्तकारी ।

—[d]) D6.9–11 T2.3 यो (for सो). Ñ V1.2 B2.3 D1 सोयं (V1.2 सोसौ; B2 D4 योसौ) सुदंष्ट्रो वि (Ñ1 ह्य) जिताश्व- (B3 °रि) सूनुः; V3 असौ सुदंष्ट्रो जितशत्रुसैन्यः; B1 D1–3.13 L (ed.) सोसौ (B1 असौ; D2 एषो; D3 योसौ) सुरा (L [ed.] सदं) ष्ट्रो विजिताश्व (D13 °रि) सूनुः (D2 °रिसैन्यः); B4 असौ खराष्ट्रो जितराश्वसूतः (sic). —After 23, Ñ V1.2 B2–4 D13 ins.:

958* यश्चैष घोरं बहुवज्रजुष्टं
सकाञ्चनं पावकदीप्तरूपम् ।
शूलं समुद्यम्य समेति वेगा-
देवान्तकश्चैष नगेन्द्रयोधी ।

[(l. 1) B3 -दंष्ट्रयुक्तं (for -वज्रजुष्टं). —(l. 2) B3 -तुल्य- (for -दीप्त-). —(l. 3) Ñ1 निवेति (sic); B2 विभाति; B3 बलेन (for समेति). —(l. 4) B2 [ए]व (for (ए]ष). G (ed.) [स]सौ नरसिंह- (for चैष नगेन्द्र-).];

while D6 T2.3 ins.:

959* कैलासशैलोद्धतबाहुवीर्यः ।
सुरेभदन्तक्षतरुक्षवक्षा
गजाधिराजेव विभाति ते रिपुः ।

[(l. 2) D6 -रूढ-; T2 -रू*- (for -रुक्ष-). —(l. 3) D6 -राजोति- (for -राजेव).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 35. 20
B. 6. 59. 24
L. 6. 37. 19

यत्रैतदिन्दुप्रतिमं विभाति
छत्रं सितं सूक्ष्मशलाकमग्र्यम् ।
अत्रैष रक्षोधिपतिर्महात्मा
भूतैर्वृतो रुद्र इवावभाति ॥ २४
असौ किरीटी चलकुण्डलास्यो
नागेन्द्रविन्ध्योपमभीमकायः ।
महेन्द्रवैवस्वतदर्पहन्ता
रक्षोधिपः सूर्य इवावभाति ॥ २५
प्रत्युवाच ततो रामो विभीषणमरिंदमम् ।
अहो दीप्तो महातेजा रावणो राक्षसेश्वरः ॥ २६
आदित्य इव दुष्प्रेक्ष्यो रश्मिभिर्भाति रावणः ।
सुव्यक्तं लक्षये ह्यस्य रूपं तेजःसमावृतम् ॥ २७
देवदानववीराणां वपुर्नैवंविधं भवेत् ।
यादृशं राक्षसेन्द्रस्य वपुरेतत्प्रकाशते ॥ २८
सर्वे पर्वतसंकाशाः सर्वे पर्वतयोधिनः ।
सर्वे दीप्तायुधधरा योधाश्चास्य महौजसः ॥ २९

---

24 Ñ1 B4 transp. 24 and 25. —a) Ñ1 V1 B2.3 यस्य ; D13 यच्च (for यत्र). —b) G2 चित्रं ; L (ed.) छन्नं (for च्छत्रं). V2 B2.3 रुक्म- (for सूक्ष्म-). D2 -शशांक° ; D4 -शताक्षमुख्यं (sic) (for -शलाकमग्र्यम्). —c) Ñ2 V2 D5.9–11 T1 G Ct अत्रैव ; B4 D7 T2 त (B4 य)त्रैष ; D2.4 अ(D4 य)त्रैक- ; D6 T3 तत्रैव ; L (ed.) स एष (for अत्रैष). —d) Ñ V B D1–4.13 [अ]भ्युपैति (for [अ]वभाति). —After 24, Ñ1 ins. in marg. an addl. colophon (for Var. cf. v.l. 43); while B1 ins. इत्यार्षे in marg.

25 B1 D1–4.9 om. (hapl.) 25. Ñ1 B4 transp. 24 and 25. —a) Ñ1 V B2–4 D13 योसौ (for असौ). V3 किरीटोंगद* (sic) (for किरीटी चल-). D7 -कुंडलस्थो ; G1 -कुंडलाढ्यो. B3 (marg. also as in text) G (ed.) असौ किरीटी ज्वलदु(G [ed.]°नो)ज्वलास्यो ; M5 असौ महच्चंचलकुंडलावृतो. —b) Ñ1 V B2–4 D13 महेंद्र- ; Ñ2 D6.10.11 T2.3 G1.2 M नगेंद्र- (for नागेन्द्र-). V3 -विंध्योत्तम- ; M5 -वृद्धाचल- (for -विन्ध्योपम-). Ñ2 B4 -तुल्यकायः ; V3 -भीमकल्पः ; B3 -भीमरूपः. —c) V3 -देव- (for -दर्प-). M5 erroneously repeats 24a in place of 25d. —d) Ñ V B2–4 D13 रक्षोधिपः सोयमुपैति ह्(V2.3 B2.4[m. also] दु)ष्टः. —After 25, Ñ2 ins. an addl. colophon (for var. cf. v.l. 43); while B3 G (ed.) ins. an addl. colophon after 25:

[*Kāṇḍa name* : B3 लंकाकांडे. —*Sarga name* : राक्षसा(G [ed.]°वणा)नीकदर्शनं. —*Sarga no.* (figures, words or both) : B3 33 ; G (ed.) 35.]

26 Before 26, Ñ V B2–4 D13 ins. :

960* विभीषणवचः श्रुत्वा राक्षसं प्रति भाषितम् ।

[G (ed.) रावणं ; L (ed.) राक्षसान् (for राक्षसं).]

—a) G1 तदा (for ततो). —b) Ñ2 V B4 D1.3.4.6.7.9–11.13 G1.3 M1.2 अरिंदमः ; B2.3 D2 इदं वचः (for अरिंदमम्). —c) Ñ B2 D9–11 दीप्त- (for दीप्तो). Ñ1 -हुताशभो (for महातेजा). —d) Ñ1 B2.3 D7 G1.3 M5 राक्षसाधिपः ; Ñ2 V B1.4 D1–4.13 लोकरावणः (for राक्षसेश्वरः).

27 a) Ñ2 V D1–3.7.9.13 दुःप्रेक्ष्यो (for दुष्प्रेक्ष्यो). —b) V3 तेजोभिर् ; D2 रक्षोभिर् (for रश्मिभिर्). Ñ1 B2.3 D4 वीर्यवान् ; Ñ2 V B4 D1–3.7 राक्षसः ; B1 D13 भास्करः (for रावणः). ❀ Cg : आदित्य इव रश्मिभिर्दुष्प्रेक्षः प्रेक्षितुमशक्यः । अनयोरर्थयोर्भिन्नवाक्यत्वान्न पुनरुक्तिशङ्का. ❀ —D9 om. 27c–28. —c) Ñ D6.7.10.11 T2 G2 M1.2 Ck.t न व्यक्तं ; B2.3(m. also as in N) नह्यतं (sic) ; M5 अव्यक्तं (for सुव्यक्तं). B1 लक्ष्यते ; D11 न क्षये (for लक्षये). Ñ1 V B D1–3.13 च ; D4 वा (for हि). —d) Ñ V B D1–4.13 -समन्वितं (for -समावृतम्). —After 27, V3 ins. 962* ; while G1 ins. :

961* अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ।
अहो राक्षसराजस्य सर्वलक्षणयुक्तता ।
[= 5.47.17.]

28 V3 D9 om. 28 (for D9, cf. v.l. 27). —a) B1 D1–3.13 दैत्य- (for देव-). D7 M1.2 -यक्षाणां (for -वीराणां). —b) Ñ V1.2 B2–4 D1–3.11.13 M5 एवंविधं ; B1 एवमधः- ; D7 नैतादृशं (for नैवंविधं). Ñ V2 B4 किल ; V1 D1–3.13 कुतः ; B1.2 D4 कृतं ; B3 नु किं (for भवेत्). —c) D4 सदृशं (for यादृशं). —d) D2 एवं (for एतत्). Ñ V1.2 B D1–4.10.11.13 विराजते ; M5 हि राजते (for प्रकाशते). G1 *****जायते (damaged). —After 28, Ñ V1.2 B D2.13 ins. ; while V3 ins. after 27 (owing to om.) :

962* तथैवास्यानुगास्तुल्याः पुत्राः पौत्रास्तथानुजाः ।

[B2 तस्येव. B1.2 [अ]नुगतास् ; D2 [अ]स्य गुणास् (for [अ]स्यानुगास्). B3 (marg. also as above) त्वन्ये (for तुल्याः). B1 पुत्र- (for पुत्राः). Ñ2 D2 तथानुगाः.]

29 a) D1 पर्यंत- (sic) (for पर्वत-). —b) G (ed.) विक्रांत- (for पर्वत-). —M5 om. 29c–30ab. —d) Ñ1 दीप्तास्याः सु- ; Ñ2 V B3 D6.9–11 योधास्तस्य(B3 °श्चान्ये) (for योधाश्चास्य). D9–11 महात्मनः. —After 29, G1 ins. :

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

भाति राक्षसराजोऽसौ प्रदीप्तैर्भीमविक्रमैः ।
भूतैः परिवृतस्तीक्ष्णैर्देहवद्भिरिवान्तकः ॥ ३०
एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान् ।
लक्ष्मणानुचरस्तस्थौ समुद्धृत्य शरोत्तमम् ॥ ३१
ततः स रक्षोधिपतिर्महात्मा
रक्षांसि तान्याह महाबलानि ।
द्वारेषु चर्यागृहगोपुरेषु
सुनिर्वृतास्तिष्ठत निर्विशङ्काः ॥ ३२
विसर्जयित्वा सहसा ततस्ता-
न्गतेषु रक्षःसु यथानियोगम् ।
व्यदारयद्वानरसागरौघं
महाझषः पूर्णमिवार्णवौघम् ॥ ३३
तपापतन्तं सहसा समीक्ष्य
दीप्तेषुचापं युधि राक्षसेन्द्रम् ।
महत्समुत्पाट्य महीधराग्रं
दुद्राव रक्षोधिपतिं हरीशः ॥ ३४
तच्छैलशृङ्गं बहुवृक्षसानुं
प्रगृह्य चिक्षेप निशाचराय ।
तमापतन्तं सहसा समीक्ष्य
बिभेद बाणैस्तपनीयपुङ्खैः ॥ ३५

G. 6. 36. 12
B. 6. 59. 37
L. 6. 37. 31

963* पुत्रैः पौत्रैः परिवृतो द्वित***** (damaged)।

30 M5 om. 30^{ab} (cf. v.l. 29).—^{a}) V3 D4 इति (for भाति). Ñ2 V1.2 B2.3 D3 [s]यं (for sसौ). D9-11 विभाति रक्षोराजोसौ.—^{b}) Ñ1 D3.4 प्रदीप्तो (for प्रदीप्तैर्). V1 -कर्मभिः; D9-11 G1 -दर्शनैः.—^{c}) Ñ1 D3 शूलैः; Ñ2 V B1-3 D1.2.4.13 शूरैः; B4 शरैः; G (ed.) योधैः (for भूतैः). V1.2 अभिवृतो; D9-11 T1.3 परिवृ(D11 °भृ)तैस्. Ñ2 V1.2 B2.3 योधैर्; G (ed.) भूतैर् (for तीक्ष्णैर्). —^{d}) B1 देवताभिर्; D4 देहवद्भैर् (sic) (for देहवद्भिर्). V3 B4 D1-4.13 इवांतकैः. Ñ2 V1.2 B2 यमकालसमप्रभैः (Ñ2 °प्रचोदितैः).—After 30, D5-7.9-11 S ins.:

964* दिष्ट्यायमद्य पापात्मा मम दृष्टिपथं गतः।
अद्य क्रोधं विमोक्ष्यामि सीताहरणसंभवम्।

[(l. 1) D5 -पथं गतं; D6 (in marg.) -पथं मतः; T3 -पदं गतः (for -पथं गतः). ❀ Cr : मद्दृष्टिपथा(°थमा ?)गत इति पाठः ।; Cg : मम दृष्टिपथं गत इति पाठः. ❀ —(l. 2) D11 -संभवः (for °वम्).]

31 ^{b}) B3 आदत्त (for आदाय).—^{c}) B2 सलक्ष्मण- (hypm.) (for लक्ष्मण-). D7 M1.2 -[अ]नुगतस्. G3 रामस् (for तस्थौ).—^{d}) Ñ1 D4 समुद्गृह्य(D4 °द्धृत-); B4 D1-3.13 G1 M5 समुद्यम्य(B4 D2.3 °त-) (for समुद्धृत्य). Ñ2 V1.2 B2.3 श(B2 न)रोत्तमान्; V3 B1.4 D1-4.13 शरासनः(B1 D1.13 °नं). G3 तस्थावुद्धृत्य सायकं.

32 ^{a}) D1 तत्र स्म (for ततः स).—^{b}) D3 जात्या* (sic) (for तान्याह). B1 महावरिष्टः.—^{c}) Ñ1 V1 B D1.2.13 पुर्या; D4 om.; M2 चार्या (sic); L (ed.) पुर्यां (for चर्या-).—^{d}) V2 illeg.; D1.4 निर्वृतास् (for सुनिर्वृतास्). D1 M1.2 तिष्ठति (for °त). —After 32, D5-7.9-11 S ins.:

965* इहागतं मां सहितं भवद्भि-
र्वनौकसश्छिद्रमिदं विदित्वा।
शून्यां पुरीं दुष्प्रसहां प्रमथ्य
प्रधर्षयेयुः सहसा समेताः।

[(l. 4) D5 प्रहर्षयेयुः.]

33 ^{a}) M3 निसर्जयित्वा (sic). D6.7.10.11 T2.3 M1.2 सचिवांस्; M3 सहितांस् (for सहसा). D9 तदा (for ततस्).—^{b}) M5 तथा- (for यथा-).—For 33^{ab}, Ñ V B D1-4.13 subst.:

966* स एवमुक्त्वा त्रिदशेन्द्रशत्रु-
रुद्यम्य चापं सशरं प्रदीप्तम्।

—^{c}) D13 विदारयन्.—^{d}) Ñ1 महाबलः; V3 यथा झषः; B4 महाझषैः; D4 °विषः (for महाझषः). D4 पौर्णम् (for पूर्णम्).

34 M1 reads 34^{a} twice.—^{a}) Ñ2 V B1.3.4 D1-4.13 निरीक्ष्य (for समीक्ष्य).—^{b}) D4 दीप्तांशु- (for दीप्तेषु-). —After 34^{ab}, Ñ1(m.).2 V B D1-4.13 ins.:

967* ततो हरीशः सहसा जगाम
तं रावणं योद्धुमतिप्रकाशम्।

[(l. 1) V2.3 B1 स जगाम तत्र(V3 **); B3 (m. also as above) समुपाजगाम (for सहसा जगाम).—(l. 2) B1 D2.3.13 -प्रचंडः; D1 -प्रचंडं (for -प्रकाशम्).]
—L (ed.) transp. ^{c} and ^{d}.—^{c}) Ñ V B D1-4.13 बलात्. B4 D4 समुद्यम्य (for समुत्पाट्य). D1 महीरुहाग्रं; L (ed.) महीधराग्र्यं.—^{d}) D3 रणाधि- (for रक्षोधि-). Ñ1 V2 हरींद्रः; D2 महात्मा (for हरीशः).

35 ^{a}) B1 तच्छृंगशैलं; B2.3 G (ed.) तं शै(B3 तच्छै)लमु(G [ed.]°म)ग्रं; G1.3 ततस्तु शैलं (for तच्छैलशृङ्गं). B2 -शालसानुं; B4 °शाखं; D1 -सानुवृक्षं; D4 °सांद्रं; D9 -वृक्षसानुषु (for -वृक्षसानुं). ❀ Ct : शृङ्गशब्दोऽर्धचार्दिः पुंस्यपि. ❀ —^{b}) Ñ V B D1-4.13 स रावणाय (for निशाचराय).—D4 erroneously repeats 35^{cd} (var.) after 36^{ab}. M1 reads ^{c} twice.—^{c}) D3.4

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 36. 12
B. 6. 59. 38
L. 6. 37. 31

तस्मिन्प्रवृद्धोत्तमसानुवृक्षे
शृङ्गे विकीर्णे पतिते पृथिव्याम् ।
महाहिकल्पं शरमन्तकाभं
समाददे राक्षसलोकनाथः ॥ ३६

स तं गृहीत्वानिलतुल्यवेगं
सविस्फुलिङ्गज्वलनप्रकाशम् ।
बाणं महेन्द्राशनितुल्यवेगं
चिक्षेप सुग्रीववधाय रुष्टः ॥ ३७

स सायको रावणबाहुमुक्तः
शक्राशनिप्रख्यवपुः शिताग्रः ।
सुग्रीवमासाद्य विभेद वेगा-
द्गुहेरिता क्रौञ्चमिवोग्रशक्तिः ॥ ३८

स सायकार्तो विपरीतचेताः
क्रूजन्पृथिव्यां निपपात वीरः ।
तं प्रेक्ष्य भूमौ पतितं विसंज्ञं
नेदुः प्रहृष्टा युधि यातुधानाः ॥ ३९

ततो गवाक्षो गवयः सुदंष्ट्र-
स्तथर्षभो ज्योतिमुखो नलश्च ।
शैलान्समुद्यम्य विवृद्धकायाः
प्रदुद्रुवुस्तं प्रति राक्षसेन्द्रम् ॥ ४०

(second time) तदा(D4 महा)पतंतं. N V B1.3.4 D1.3.4 (both times).13 प्रसमीक्ष्य राजा (B3 रावणो); D2 सहसा निरीक्ष्य; G3 तरसा समीक्ष्य (for सहसा स°). —[a]) D7.9–11 G1 चिच्छेद (for बिभेद). Ñ V B D1–4(D4 first time).13 यमदंडकल्पैः(B3 °रूपैः; D4 [second time] °कल्पं) (for तपनीयपुङ्खैः).

36 [ab]) G3 प्रवृत्त- (for प्रवृद्ध-). Ñ2 V B1 D1–4 -वृक्षखंडे; B2.3 -शृंगवृक्षे; B4 -शृंगखंडे; D9 T3 -सानुवृक्षैः (D9 °क्ष-); M5 -सानुपृष्ठे (for -सानुवृक्षे). D13 तस्मिन्प्रकृत्ते द्रुमवृक्षखंडे (for [a]). D5.6.9–11 T2.3 विदीर्णे; M1 विशीर्णे (for विकीर्णे). Ñ2 B1–3 D1.3.13 शैले विकी(Ñ2 B3 °दी; B1 °शी)र्णे सुवि(Ñ2 B2.3 बहु; B1 स वि)चित्रसानौ; V B4 D2.4 शैले विशी(V1 D2 °की)र्णोत्तमचित्रधातौ(V1.2 D4 °सानौ) (for [b]). Ñ1 तस्मिन्विशीर्णे तु सशैलशृंगे सवृक्षवेणु-द्रुमचित्रसानौ. —After 36[ab], D4 erroneously repeats 35[cd] (var.). —[c]) B3 महाहिरूपं; D4 om. (hapl.) (for महाहिकल्पं). Ñ V B1.2.4 D1–4.13 उग्रवेगं(Ñ2 °वीर्यं) (for अन्तकाभं). —After 36[c], D4 reads 37[bc]. —[d]) Ñ V D2.5.9–11 T3 M3.5 समादधे (for °दे). Ñ V B1.4 D1–4 -यूथपेंद्रः(V3 D2 °पेशः); B2.3 -सैन्यनाथः; D13 -पुंगवेंद्रः (for -लोकनाथः).

37 V3 om. 37[ab]. —[a]) Ñ2 G1 M1.2.5 [अ]शनितुल्य (M5 °***)वेगं; B2 ज्वलनप्रकाशं; B3.4 [अ]नल° (for [अ]निलतुल्यवेगं). —Ñ1 reads in marg. 37[bc]. D4 reads 37[bc] after 36[c]. M1.2 consecutively repeat 37[bc]. —[b]) B1 D1–5.7.9.13 T1 सविस्फुलिंगं. ❀ Cg: महेन्द्राशनिः वज्रम्। औत्पातिकाशनिव्यावृत्तये महेन्द्रपदम्। यद्वा महेन्द्रसम्बन्धोक्तिः अभ्यासवता मुक्तत्वेनातिवेगद्योतनाय. ❀ —[d])M2 जुष्टः (for रुष्टः). Ñ V B D1–4.13 चिक्षेप राजा हरियूथपा(D1.3 °पुंगवा)य.

38 [a]) B3 (m. also) -चाप-; D3 -बाण- (for -बाहु-). —[b]) Ñ1 -तुल्य-; V3 D5.9–11 -स्पर्श- (for -प्रख्य-). V2 D9–11 -प्रकाशं(V2 °शः) (for -शिताग्रः). —[c]) V3 गात्रं (for वेगाद्). —[d]) D2 गुहेरितां; D4 दीप्ता हवि- (sic) (for गुहेरिता). D9 [इं]द्र- (for [उ]ग्र-).

39 [a]) Ñ1 मूढसंज्ञो (for सायकार्तो). D1 -तेजाः; D5 -वेगाः; M1 -चेतः (for -चेताः). —[b]) Ñ हरींद्रो; V1.2 कपींद्रो; V3 B D1–4.13 व्य(B2.3 त; D4.13 य)थार्तो (for पृथिव्यां). Ñ V B D1–4.13 भूमौ (for वीरः). —[c]) Ñ1 मूढसंज्ञं; Ñ2 B1 D5.9–11 वीक्ष्य भूमौ (for प्रेक्ष्य भूमौ). Ñ1 निरीक्ष्य (for विसंज्ञं).

40 [a]) D6.9–11 T2.3 सुषेणस् (for सुदंष्ट्रस्). —[b]) Ñ V B1 D4 मैंदो नलो; B2 मैंदानलो; B3 मैंदो(also नीला in m.)नलो; D1–3.13 मैंदो गजो; D5–7.9–11 M1.2 त्वथर्षभो (for तथर्षभो). D1 द्योतिमुखो; D4 स्वाति°; D13 चाति°; M1 ज्योत°; G (ed.) ज्योतिर्मुखो; L (ed.) ज्ञाति° (for ज्योतिमुखो). Ñ V1.2 B2.3 [अं]गदश्; D4 [ऽ]नलश्; M3 नभश् (for नलश्). B4 मैंदो मनोज्ञाभिमुखोंगदश्च. —After 40[ab], G1 ins.:

968* तारश्च मैन्दद्विविदौ च वीरौ
संपातिरेते च गजः सुषेणः।

—[c]) Ñ B1.3 D1–4.13 शिलाः (for शैलान्). Ñ2 V1.2 B1–3 D9–11 समुत्पाट्य (for °द्यम्य). V3 D4 विवृत्त-. Ñ1 B2 -कोपाः; D13 -कल्पाः (for -कायाः). —[d]) B1 D4 समाद्रवंस्; D1–3 समार्दयंस् (for प्रदुद्रुवुस्). Ñ1 V1.2 B4 D2.4.9.13 तं(D2.4 ते) युधि; B1 ते सह; D1 संधशो (sic); D3.7 M1.2 संयति (for तं प्रति). V3 समार्दयंस्ते शतशोथ रावणं. —After 40, Ñ D13 ins.:

969* स संप्रहारस्तुमुलो बभूव
रक्षःपतेस्तोयनिधेः समीपे।

[(l. 2) D13 रक्षोधिपस्यापि बलेन सार्धं.]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तेषां प्रहारान्स चकार मोघा-
त्रक्षोधिपो बाणगणैः शिताग्रैः ।
तान्वानरेन्द्रानपि बाणजालै-
र्बिभेद जाम्बूनदचित्रपुङ्खैः ॥ ४१
ते वानरेन्द्रास्त्रिदशारिबाणै-
र्भिन्ना निपेतुर्भुवि भीमरूपाः ।
ततस्तु तद्वानरसैन्यमुग्रं
प्रच्छादयामास स बाणजालैः ॥ ४२
ते वध्यमानाः पतिताग्र्यवीरा
नानद्यमाना भयशल्यविद्धाः ।
शाखामृगा रावणसायकार्ता
जग्मुः शरण्यं शरणं स्म रामम् ॥ ४३

ततो महात्मा स धनुर्धनुष्मा-
नादाय रामः सहसा जगाम ।

तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य
उवाच वाक्यं परमार्थयुक्तम् ॥ ४४

काममार्यः सुपर्याप्तो वधायास्य दुरात्मनः ।
विधमिष्याम्यहं नीचमनुजानीहि मां विभो ॥ ४५

तमब्रवीन्महातेजा रामः सत्यपराक्रमः ।
गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे ॥ ४६

रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः ।
त्रैलोक्येनापि संक्रुद्धो दुष्प्रसह्यो न संशयः ॥ ४७

G. 6. 36. 24
B. 6. 59. 48
L. 6. 37. 43

---

41 Ñ1 reads ^{ab} in marg.—^{a}) Ñ शिलाश्च(Ñ1 °लाः स) तेषां प्र- ; V1.2 B2 शैलान्स(B2 °लांश्च) तेषां प्र- (for तेषां प्रहारान्स). Ñ1 B4 घोरान् (for मोघान्). B3 शिलाश्च तेषां प्रचकर्तु घोरान् (before corr. मोघान्) (sic). —^{b}) Ñ V B D1–3.9–11.13 -शतैः ; D4 -शितैः (for -गणैः). B4 शितोग्रैः. —^{c}) Ñ1 तु बिभेद तीक्ष्णैः (for अपि बाण-जालैर्). —^{d}) Ñ1 प्रतस- (for बिभेद). D4 -बद्ध- (for -चित्र-).

42 ^{b}) D13 भीमा (for भिन्ना). D1.9 भिन्न- (for भीम-). V1 B1 D4.13 -रूपैः ; V2 -वेगाः; V3 D9–11 M1–3 -कायाः (for -रूपाः). —V3 om. 42^{cd}. —^{c}) Ñ1 B2 D1.3.4.13 च (for तु). Ś D2.8.12 तं (for तद्). —^{d}) B1 संच्छादयामास ; G (ed.) संताडयामास. D1.13 च (for स).

43 ^{a}) D13 निवेपमानाः (for ते वध्य°). Ś V B2–4 D2.3.7–13 G1 पतिताश्च शू(D7.9–11 G1 वी)राः; Ñ D1 पतिता(Ñ1 °तो)प्रशूरा ; B1 D4 च कृतार्तनादाः ; D6 T2.3 M3 °ताः प्रवीरा ; M5 °ता ह्यवीर्या (for °ताग्र्यवीरा). —^{b}) Ñ1 विद्राव्यमाना; Ñ2 अविद्य° ; V2 भयार्तनादा ; B2.3 नान-द्रुमाभा (sic); D13 तेनार्द्य° (for नानद्यमाना). G1 भुवि ; G2.3 M5 शर- ; Cm.g.t as in text (for भय-). B3 -संनिरुद्धाः ; D1.13 -शोकविद्धाः. Ś D2.8.12 तेनार्द्यमानाश्च स(D2 स्व)सैन्यमुख्याः ; V1 B1 D4 भयेन शोके(V1 शल्ये) न च विह्वलां(B1 °क्रुवां)गाः. —^{d}) Ś D2.8.12 शतशः (for शरणं). V1 D2.4 च (for स्म). —After 43, D13 ins. ; Ś D8.12 ins. after 50 ; while Ñ1 ins. after 24 ; Ñ2 ins. after 25 ; whereas T3 ins. after 49 an addl. colophon :

[*Kāṇḍa name*: Ñ1 D13 लंकाकांडे. —After Kāṇḍa name, D13 ins. युद्धपर्वणि.—*Sarga name*: Ś Ñ D8.12.13 रावणनिर्याणं(Ñ °णः). —*Sarga no.* (figures, words or both) : Ś1 Ñ D8.12.13 om. ; Ś2 35 ; T3 64.]

44 D11 transp. 44 and 45. D5 om. from 44^{b} up to ण्या in 45^{c}. —Note the hiatus between ^{c} and ^{d}. —^{c}) B3 D4.11 T3 लक्ष्मणं. B3 D4 अभ्युपेति(D4 °तः) (for °पेत्य). —^{d}) Ś Ñ V B D1–4.8.12.13 M5 (to avoid hiatus) प्रो(M5 ह्यु)वाच (for उवाच). D9–11 रामं (for वाक्यं). —After 44, B3 ins. इत्यार्षे इत्यादि in marg..

45 D5 om. up to ण्या in 45^{c} (cf. v.l. 44). D11 transp. 44 and 45. —^{a}) Ś2 Ñ V B D1–4.8.13 अहम् (for कामम्). Ś Ñ V B D1–3.6–13 T G M1.2.5 आर्य (for आर्यः). B4 [अ]द्य; D4 च (for सु-). —^{b}) V3 दुर्मतेः (subm.) ; B1 D4 सु(D4 च)दुर्मतेः (for दुरात्मनः). —^{c}) D9 कथयिष्यामि (sic). D10.11 चैतम् (for नीचम्). Ś Ñ V B D1–4.8.12.13 वधि(Ñ2 V3 B4 हनि)ष्याम्यहमद्यै(Ñ2 B2.3 °मेवै)न(V1 B4 °तः; D2 °व)म्. —^{d}) B2 शत्रुं; D2 अव- (for अनु-). Ñ2 D6.7 T2.3 M3 प्रभो (for विभो). —After 45, Ñ V1.2 B2–4 D13 ins. :

970* मम शत्रुरिपोश्चैव स विमर्दो भवत्वयम् ।
अद्य पश्यन्तु भूतानि पराभूतं मया रिपुम् ।

[(l. 1) B4 समं (for मम). Ñ1 B2.3 सं- (for स). B4 विमर्षो. V1 भवत्वयं; B3 [स]भवद्भयं (sic) (for भवत्वयम्). —(l. 2) B3 परिभूतं (for परा°).]

46 ^{a}) Ś Ñ V B D1–4.8.13 ततो (for तम्). —^{cd}) Ś Ñ V B D1–4.8.12.13 गच्छ त्वं वचनं चेदं निबोध मम लक्ष्मण(D1 वचनं मम).

47 ^{a}) D3 [स]यं; D7 G1 [स]पि (for हि). Ñ2 V B (B3 in m.) D1.3.4.13 महाबाहुर्(D4 °हो). Ś D2.8.12 राक्षसेंद्रो महाकायो. —^{b}) Ś Ñ V B D1–4.8.12.13 महा-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 36. 25
B. 6. 50. 49
L. 6. 37. 44

तस्य च्छिद्राणि मार्गस्व खच्छिद्राणि च गोपय ।
चक्षुषा धनुषा यत्नाद्रक्षात्मानं समाहितः ॥ ४८
राघवस्य वचः श्रुत्वा संपरिष्वज्य पूज्य च ।
अभिवाद्य ततो रामं ययौ सौमित्रिराहवम् ॥ ४९
स रावणं वारणहस्तबाहु-
र्ददर्श दीप्तोद्यतभीमचापम् ।
प्रच्छादयन्तं शरवृष्टिजालै-
स्तान्वानरान्भिन्नविकीर्णदेहान् ॥ ५०
तमालोक्य महातेजा हनूमान्मारुतात्मजः ।
निवार्य शरजालानि प्रदुद्राव स रावणम् ॥ ५१
रथं तस्य समासाद्य भुजमुद्यम्य दक्षिणम् ।
त्रासयन्रावणं धीमान्हनूमान्वाक्यमब्रवीत् ॥ ५२
देवदानवगन्धर्वा यक्षाश्च सह राक्षसैः ।
अवध्यत्वात्त्वया भग्ना वानरेभ्यस्तु ते भयम् ॥ ५३
एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः ।
विधमिष्यति ते देहाद्भूतात्मानं चिरोषितम् ॥ ५४

(B4 D1.2.13 बहु)मायो(Ñ1 °सत्त्वो; D4 °तेजो) महाधनुः (V2.3 B2 D4 °बलः). —cd) Ś Ñ1 B3 D8.12 दुष्प्रधर्षो; Ñ2 B2 दुर्धर्षो वै(B2 हि); V2 D1.2.4.13 दुःप्रधर्षो; B1 D3 दुष्प्र(D3 दुःप्र)धृष्यो; B4 सुदुर्धर्षो; D7.9–11 दुःप्र° (for दुष्प्रसह्यो). V1 रावणे दुर्जयत्वृतः (sic) (for d). V3 त्रैलोक्ये चापि दुर्धर्षः संकुद्धो नात्र संशयः.

48 b) Ñ V B D1–4.13 [अ]भि(D2 °पि)रक्ष च; D6.9–11 T2.3 G1 M5 च ल(D9 T2 M5 र)क्षय; M3 (after corr. as in T3) च लक्ष्मण (for च गोपय). Ś D8.12 T1 स्वस्य छिद्राणि रक्ष च(T1 गोपय). —c) B3 om. (hapl.?) धनुषा. Ś Ñ V B D1–4.8.12.13 चैव; D9–11 [आ]त्मानं (for यत्नाद्). —d) D9–11 गोपायस्व; T3 प्रेक्ष्यात्मानं; M3 रक्ष्या° (sic) (for रक्षात्मानं).

49 b) D1 स परिष्वज्य; T2.3 M3 K (ed.) परिष्वज्य च (K[ed.] °ज्याभि-). Ś V3 B4 D1–3.8.12 पीडितं-(V3 °तः) (for पूज्य च). Ñ V1.2 B2.3 संप्रहृष्टतनूरुहः; B1 D4 परिष्वज्य नि(D4 प्र)पीडितः(D4 °तं); D13 प्रतिपद्याभिनंद्य च. —cd) Ñ1 स रामं तु; B2.3 D6.9–11 T2.3 G1.3 M5 च(B2.3 स) रामाय (for ततो रामं). D3 transp. ततो and ययौ. D3.10.11 आहवे (for आहवम्). B3 सौमित्री रावणं ययौ; D4 ययौ सौमित्रिणा सह (for d). —After 49, T3 ins. an addl. colophon (for var. cf. v.l. 43).

50 a) Ś2 D2.4 T3 G1 M1.2 रावण-(meta.) (for वारण-). Ś1 V3 B1.4 D2.10.11 T3 M1.2 -बाहुं; D4 -युक्त (for -बाहुर्). Ñ1 वारणयूथबाहुं; Ñ2 V1.2 B3(m. also) वानर (B3 राक्षस)यूथमध्ये; B2.3 °यूथपोपमं; D9 °बाहुस्तंभ (sic) (for वारणहस्तबाहुर्). —b) Ś2 B3 D2.8.12 भीमोद्यत-; D4 दीपोपम- (for दीप्तोद्यत-). D7 -दीप्त- (for -भीम-). Ś1 B1 D9–11 transp. दीप्त- and भीम-. B2.3 -कार्मुकं (for -चापम्). D13 हुताशदीप्तोद्भूतभीमचापं. —c) Ś Ñ2 V B D1–4.8.12.13 बाण-; Ñ1 भग्न-; T3 अपि (for भिन्न-). Ś D8.12 -विदीर्ण-; Ñ2 V1.2 B2.3 -विभिन्न-; T3 [अ]वकीर्ण-(for -विकीर्ण-). D1 -चेषान्. ❀ Cr: विकीर्णदेहानिति पाठः. ❀ —After 50, Ś D8.12 ins. an addl. colophon (for Var. cf. v.l. 43).

51 a) V2 M3 समालोक्य; D4 ततोवलोक्य (hypm.) (for तमा°). —c) Ś Ñ2 V B D1–4.8.12.13 भ्रंशयन्; Ñ1 ध्वंसयन् (for निवार्य). —d) Ś V2.3 B1.4 D1–3.8.12 प्रत्ययुध्यत; Ñ V1 B2.3 प्रत्य(B2 पर्य)गच्छत्स; D4 [अ]युध्यत स ह (unmetric); D6.9–11 T3 वि(T3 प्रा)दुद्राव स; D13 प्रतिदुद्राव (for प्रदुद्राव स).

52 a) D3 समास्थाय (for °साद्य). —b) D7.9–11 बाहुम् (for भुजम्). Ś V1.3 B1 D1–4.8.12.13 तोदमा-(D4 प्रमादा [sic])क्षिप्य सारथेः; Ñ V2 B2–4 तोत्रमाक्षिप्य (Ñ2 V2 °च्छिद्य; B3 °च्छाद्य) सारथेः. —c) B4 श्रीमान् (for धीमान्).

53 ab) Ñ1 -गंधर्वाः सयक्षाः; B2 D4 G1.3 M5 -गंधर्वय°; D6.9–11 T2.3 M3 -गंधर्वैर्यक्षैश्च (for -गन्धर्वा यक्षाश्च). Ñ V1.2 B2.3 D13 पन्नगैः; D4 -राक्षसाः (for राक्षसैः). —c) D5 T1 G M5 अवश्यं तु (for अवध्यत्वात्). D6.9–11.13 T2.3 M3 अवध्यत्वं त्वया प्राप्तं(D13 भग्नं); D7 अवश्यं भवता भग्ना. —d) G2 मानुषेभ्यस् (for वानरे°). B3 च (for तु). D8 तद् (for ते). B4 वानरेंद्रात्त्व मिभयं (unmetric).—For 53cd, Ś V3 B1 D1–4.8.12 subst.; while Ñ V1.2 B2–4 D13 cont. after 972*:

971* त्वां भग्नमद्य पश्यन्तु वानरैर्भीमविक्रमैः ।

[Ñ2 V B2.3 D1 transp. भग्नम् and अद्य. Ñ2 V1.2 B2.3 निहतं (for पश्यन्तु). Ñ1 भग्नं त्वां समरे वीरैर् (for the prior half).]

—After 53, Ñ V1.2 B2–4 D13 ins.:

972* तदद्य देवाः पश्यन्तु सयक्षोरगपन्नगाः ।

[Ñ1 यक्षगंधर्व-; V2 यक्षराक्षस- (for सयक्षोरग-). Ñ2 B3 -राक्षसाः.]

54 b) D1 M5 -शाखा-. D4 समन्वितः (for समुद्यतः). —c) Ś Ñ2 V1.2 B2.3 D2.8.12 निहनिष्यति; Ñ1 D1.3 निर्हरि°; V3 B1 D4.13 निरसि°; B4 निवर्ति°; G1 विधमिष्यामि; Cr.m.g.k.t as in text (for विधमिष्यति). Ñ1 B4 देहात्ते (by transp.); B3 D9 T2 ते देहं; D4 देहं ते;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

श्रुत्वा हनूमतो वाक्यं रावणो भीमविक्रमः ।
संरक्तनयनः क्रोधादिदं वचनमब्रवीत् ॥ ५५
क्षिप्रं प्रहर निःशङ्कं स्थिरां कीर्तिमवाप्नुहि ।
ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर ॥ ५६
रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत् ।
प्रहृतं हि मया पूर्वमक्षं स्मर सुतं तव ॥ ५७
एवमुक्तो महातेजा रावणो राक्षसेश्वरः ।
आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥ ५८
स तलाभिहतस्तेन चचाल च मुहुर्मुहुः ।
आजघानाभिसंक्रुद्धस्तलेनैवामरद्विषम् ॥ ५९
ततस्तलेनाभिहतो वानरेण महात्मना ।
दशग्रीवः समाधूतो यथा भूमिचलेऽचलः ॥ ६०
संग्रामे तं तथा दृष्ट्वा रावणं तलताडितम् ।
ऋषयो वानराः सिद्धा नेदुर्देवाः सहासुराः ॥ ६१
अथाश्वस्य महातेजा रावणो वाक्यमब्रवीत् ।
साधु वानर वीर्येण श्लाघनीयोऽसि मे रिपुः ॥ ६२
रावणेनैवमुक्तस्तु मारुतिर्वाक्यमब्रवीत् ।
धिगस्तु मम वीर्यं तु यत्त्वं जीवसि रावण ॥ ६३

G. 6. 36. 41
B. 6. 59. 64
L. 6. 37. 59

D10.11 Ct ते देहे (for ते देहाद्). —[d]) T2 च रोषितं (for चिरो°).

55 D7 transp. [b] and [d]. —[b]) D7 राक्षसो (for रावणो). D5 -कर्मणः (for -विक्रमः). —[c]) G2 -नयनं (for -नयनः). Ñ V1.2 B2-4 D1.3.13 कोपाद्. —[d]) D7 रावणो वाक्यमब्रवीत्.

56 D4 om. 56. —[a]) Ś Ñ1 B3.4 D1-3.8.12 T2 G1.3 M5 निःशंकः (for निःशङ्कं). —[b]) D1 चिरं (for स्थिरां). —[cd]) Ś Ñ V B D1-3.8.12.13 विक्रमं च विदित्वा ते नाशयिष्यामि (V3 °ष्यति [sic]) जीवितं.

57 [b]) Ś Ñ V B D1-4.8.12.13 अभाषत (for वचोऽब्रवीत्). —[c]) Ñ2 V1.2 B4 D2.4-7.9-11 T प्रहृतं. Ś Ñ V2.3 B D1.2.4.8.12.13 ते (for हि). T2 महावीर्यम् (for मया पूर्वम्). —[d]) G2 तु तं (for सुतं). D9-11 transp. स्मर and तव. Ś Ñ V B D1.2.4.8.12 अक्षं सूदयता सुतं (Ñ1 रणे); D3.13 अक्षं ते दयितं (D3 सूदता) सुतं.

58 [a]) Ś D8.12 उक्त्वा (for उक्तो). —[b]) Ś D8.12 रावणं (for रावणो). Ś Ñ V B D2-4.8.12.13 राक्षसाधिपः (Ś D8.12 °पं). D1 राक्षसो रावणस्तदा. —Ś D8.12 om. (hapl.) 58[c]-59[ab]. —[d]) D4 तलेनोनर- (sic) (for °रसि).

59 Ś D8.12 om. 59[ab] (cf. v.l. 58). —[a]) Ñ V B1.2.4 D2-4.13 स तथा(Ñ1 °दा)भि-; B3 स तदा नि-; D1 स हस्ताभि-; M1.2 तलेनाभि- (for स तलाभि-). —[b]) D6 T2.3 संचचाल (for चचाल च). D7 महाहरिः; G1 हरिर्मुहुः. Ñ V B D1-4.13 मुहूर्तं व्यचरत्क(Ñ1 °थितः क; B4 D1-4.13 °चलत्क)पिः. —After 59[ab], D5-7.9-11 S ins.:

973* स्थित्वा मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः ।

[D9-11 स्थितो. D7 G1.3 M1.2 धैर्यं (for स्थैर्यं). M1.2 महाबलः.]

—[c]) Ś B4 D2.8.12 च तं क्रुद्धस्; Ñ1 सुसंरब्धस्; Ñ2 V1.3 B1.2 D1.3-7.9-11.13 च सं°; V2 B3 सु°; G2 [अ]ति° (for [अ]भिसंक्रुद्धस्). —[d]) Ś2 तालेन. D13 सुर- (for [अ]मर-). D7 तलेनामरवैरिणं.

60 M3 om. 60-61. —[a]) Ś Ñ2 V B D1-4.8.12.13 तथा स तेन; D5.6.9-11 T2.3 G3 M5 ततः स तेन (for ततस्तलेन). —[b]) Ś Ñ V B2-4 D1-4.8.12 तर(D3 °प)स्विना (for महात्मना). D13 कपर्दिसमरस्विना. —[c]) Ś Ñ V1.2 B1.2.4 D1-5.8.12.13 T1 समुद्धतो; B3 सुसंस्तब्धो; Cg.k.t as in text (for समाधूतो). B3 (m. also) दशाननः समुद्धतो. —[d]) V3 -चलेन च; D4 -तलेपतत्; D5 -चलाचलाः; Cg.t as in text (for -चलेऽचलः).

61 M3 om. 61 (cf. v.l. 60). —[a]) Ś Ñ V B D1-4.8.12.13 तु (for तं). M5 संग्रामेण. Ñ V B1-3 D4.6.9 T2.3 तदा; B4 ततो (for तथा). —[b]) Ś2 ताल- (for तल-). —[c]) Ś Ñ V1.2 B1.4 D1-4.8.12.13 चारणाः; V3 B2.3 (m. also as in B1) चामराः (for वानराः). —[d]) Ś D2.6.8.9.12 T2.3 तथासुराः(D9 °रैः); Ñ V1.3 B1.2.4 D1.3.13 च सासुराः; V2 महासुराः; B3(m. also as in D7) च सुस्वराः; D4 च ते सुराः; D7.10.11 सुरासुरैः(D7 °राः); G1 सकिंनराः; G2.3 M5 सवासवाः; K (ed.) सहासुरैः (for सहासुराः). —After 61, D4 ins.:

974* साधु साध्विति संप्रोचुर्हनुमन्तमथोत्सुकाः ।

62 [a]) B2-4 D3.5.7.9.13 T G2 M3.5 अथाश्वास्य; G3 आश्वस्य च. —[cd]) Ś Ñ V1.2 B D2.3.8.12 वीर्यं ते (for वीर्येण). Ś Ñ1 D2.8.12 श्लाघनीयं सुरैरपि(Ñ1 °रासुरैः) (for [d]). D4 (in marg.) रणकर्मणि निष्णातो दृष्टवीर्यो रणाजिरे.

63 D4 om. 63[ab]. —[b]) V3 B3.4 D3 हनुमान् (for मारुतिर्). —B3 om. from वा in वाक्यम् up to 75. —[c]) D4 वीर्यम् (for मम). B1 D1.5.7.9-11.13 T1.2 G2 Ct वीर्यस्य; B4 D2.3 T3 वीर्यं च(D3 हि); D4 (in marg.) एतत्तु; D6 G1 M3 वीर्येण (for वीर्यं तु). Ñ V1.2 B2 मम वीर्यं(Ñ1 V2 वीर्यं मम) धिगस्त्वेतद्; V3 धिगस्तु मे बाहुबलं. ❀ Cm.g: वीर्येण वीर्यमित्यर्थः(Cg °णेति द्वितीयाभाव

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 36. 42
B. 6. 59. 65
L. 6. 37. 66

सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे ।
ततस्त्वां मामको मुष्टिर्नयिष्यति यमक्षयम् ।
ततो मारुतिवाक्येन क्रोधस्तस्य तदाज्वलत् ॥ ६४
संरक्तनयनो यत्नान्मुष्टिमुद्यम्य दक्षिणम् ।
पातयामास वेगेन वानरोरसि वीर्यवान् ।
हनूमान्वक्षसि व्यूढे संचचाल हतः पुनः ॥ ६५

विह्वलं तं तदा दृष्ट्वा हनूमन्तं महाबलम् ।
रथेनातिरथः शीघ्रं नीलं प्रति समभ्यगात् ॥ ६६
पन्नगप्रतिमैर्भीमैः परमर्मातिभेदिभिः ।
शरैरादीपयामास नीलं हरिचमूपतिम् ॥ ६७
स शरौघसमायस्तो नीलः कपिचमूपतिः ।
करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ॥ ६८

आर्षः)। ; so also Ck. ❀ —[d]) B4 D2.6.7 T2.3 M3 यस्त्वं (for यस्त्वं). Ś2 V3 B1 D1–4.12.13 राक्षस (for रावण).

64 B3 om. 64 (cf. v.l. 63). —[a]) Ś Ñ2 V1 D8.12 स त्वं तु; Ñ1 V3 सकृत्त्वं; B2 स त्वं मे; B4 D1 असकृत्; D3 शक्त्या तु; D4 शक्यस्तु (for सकृत्तु). —[b]) Ś V3 B1.4 D1–4.8.12.13 विवक्षया (for विकत्थसे). —[c]) D4 यतस् (for ततस्). Ś D1.8.12 G2 त्वा; G1.3 M5 तु (for त्वां). D4.13 मामकी; D5 T1 M3 मामिका (for मामको). —[d]) Ñ अपनेता; V1.2 B2 अयं नेता; G1.3 M5 नेष्यति त्वां (for नयिष्यति). B1 D1.13 यमालयं. V3 B4 D4 नयिता (B4 नेतायं; D4 नेष्यते) यमसादनं. —After 64[cd], V3 wrongly reads 65[c]. —[e]) Ś Ñ V B1.2.4 D1–5.8.12.13 तेन(D5 ततो) वानर- (for ततो मारुति-). ❀ Cg: ततः तेनेत्यर्थः। अन्यथा तदाशब्दोऽतिरिच्येत. ❀ —[f]) Ś Ñ V B1.2.4 D1–4.7–13 कोपस् (for क्रोधस्). Ś D2.8.12 [अ]भवत्तदा; Ñ V B2 व्यवर्धत; B1 D1.13 तदाभवत्; B4 महात्मनः; D3.4 महानभूत्; D9–11 प्रजज्वले; T1.3 तथाज्वलत् (for तदाज्वलत्). —After 64, Ñ V B2 ins.:

975* स क्रोधाग्निपरीतात्मा प्रजज्वाल च रावणः।

[Ñ1 [इ]व (for च). B2 महाकपिः (for च रावणः).]

65 B3 om. 65 (cf. v.l. 63). —[a]) D5 T1 M5 संवृत्त-; T3 स रक्त- (for संरक्त-). Ś B1.4 D1–4.8.12.13 चापि; Ñ V B2 [स]त्यर्थं; D7 M1.2 क्रोधान् (for यत्नान्). —[b]) D6.9–11 T2.3 M5 आवृत्य; D7 M1.2 आवर्त्य (for उद्यम्य). Ñ V B2 दारुणं(Ñ2 °णः); D5 T1 M5 दक्षिणां. Ś B1.4 D1–4.8.12.13 स(B1 तं) मुष्टिमकरोत्तदा. —[c]) D7 गर्वेण; T2 वीर्येण (for वेगेन). —[d]) Ñ2 रावणः (for वीर्यवान्). —After 65[cd], Ñ V B2 ins.; while Ś B1.4 D1–4.8.12.13 cont. after 977*:

976* स तेनाभिहतो गाढं विसंज्ञो विह्वलोऽभवत्।

[Ñ2 erroneously repeats in brackets prior half after 66[ab]. G (ed.) मुष्टिना तेन विद्धस्तु (for the prior half). B1 विद्धवो°; D13 पतितो भुवि (for विह्वलोऽभवत्).]

—[e]) D9 मूढे (sic); G3 क्रुद्धः (for व्यूढे). —[f]) B2 प्र- (for सं-). Ñ V B2 महाकपिः; D9–11 M3 पुनः पुनः; G1 [आ]हतः क्षितौ (for हतः पुनः). —For 65[c–f], Ś B1.4 D1–4.8.12.13 subst.:

977* स मुष्टिं पातयामास वज्रकल्पं महायशाः।
हनुमद्उरसि व्यूढे रावणः परवीरहा।

[(l. 1) D1.3 तं; D13 तां (for स). B1 प्रापयामास. D4 -तुल्यं; D13 -कल्पां (for -कल्पं). D1 बलकल्पोपमं तदा (for the post. half). —(l. 2) D8 व्यूहे रावणं (sic) (for व्यूढे रावणः). B4 D4 सु(D4 स)महाबलः (for परवीरहा).]

66 B3 om. 66 (cf. v.l. 63). —[a]) B1 विसंज्ञं; D13 पतितं (for विह्वलं). Ś B1 D1–3.8.12.13 तु स तं; Ñ V B2.4 तु ततो; D5 तं तथा; M3 तु तदा (for तं तदा). D4 स विह्वलं हतं दृष्ट्वा. —[b]) Ñ V1.2 B2 स रावणः; V3 D5.13 M1.2 महाबलः (for महाबलम्). —[c]) Ñ V1.2 B2 जवेन; V3 वेगेन (for रथेन). Ś B1.4 D1.2.8.12.13 क्षिप्रं (for शीघ्रं). —[d]) Ś B1.4 D1–4.8.12.13 समाद्रवत्; Ñ1 V2.3 D7 G3 M1.2.5 °यात्; D9 °न्नयात् (for समभ्यगात्). G1 नीलमेवाभ्ययात्तदा. —After 66, D5–7.9–11 S ins.:

978* राक्षसानामधिपतिर्दशग्रीवः प्रतापवान्।

67 B3 om. 67 (cf. v.l. 63). —[a]) D11 पन्नगैर्. G3 M5 दीप्तैः (for भीमैः). Ś Ñ V B1.2.4 D1–4.8.12.13 सों(Ś D2.8.12 अं)तक(D13 सोनल)प्रतिमैर्बाणैः. —[b]) Ś D2.8.12 -विभेदिभिः; Ñ1 V1.2 B1.2.4 D5–7.13 G2.3 -[अ]भि°; Ñ2 -[अ]भिवातिभिः; V3 D3 -[अ]व°; D9–11 -[अ]भिभेदनैः; M1.2 -[आ]दिभे°; M3 °दिनः (sic) (for -[अ]तिभेदिभिः). D4 परमर्माणि भेदिभिः; M5 परमैर्मर्मभेदिभिः. —[c]) V B1.2 D3.4.13 क्षिप्रम् (for शरैर्). Ś Ñ B4 D1.2.8.12 क्षिप्रमापीड(B4 °पूर; D1 °दिश)यामास; G (ed.) क्षिप्रमाच्छादयन्नीलं. —[d]) G (ed.) मृधे (for नीलं).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. 13
B. 6. 60. 12
L. 6. 38. 13

एतदेवाभ्युपागम्य यत्नं कर्तुमिहार्हथ ।
राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्धसु ॥ ८
स चाप्रतिमगम्भीरो देवदानवदर्पहा ।
ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् ॥ ९
स पराजितमात्मानं प्रहस्तं च निषूदितम् ।
ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः ॥ १०
द्वारेषु यत्नः क्रियतां प्राकाराश्चाधिरुह्यताम् ।
निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् ॥ ११

याति). —(l. 7) Ś D8.12 दर्पवर- (for दर्पबल-). B3 चान्यथा (for अन्यथा). Ñ1 वर्तितं (for चिन्तितं). B2 अन्यथैव हि चिंतितं (for the post. half). —Ś D1.3.8.12 om. l. 8. —(l. 8) Ñ V1.2 B2.4 D2 परिणतं (for °गतं). V2 D4 -चेष्टितं; B3 -चिंतितैः (for -चेष्टितैः). D2 महद्वैराग्यचेष्टितं; D13 मम घोरात्मचेष्टितं (for the post. half). —(l. 9) B4 D4 नास्ति (for नाति-). D4 भावो (for -भारो). V2 B1 D1.3.13 हि; B4 [ऽ]स्य (for ऽस्ति). Ñ V1 B2.3 D9 [ऽ]पि कृते मया; D3.13 नियता गतिः. —V3 om. l. 10. —(l. 10) B2 दैवात्पौरुष-; B4 दैवीपुरुष-; D2.12 दैवं पौ(D12 पु)रुष-; D9 दैवपुरुष-. Ñ1 B4 D3 नित्यं सिद्धिर् (by transp.).]

—After 7, D3.5–7.9–11 S ins. :

1026* विदितं मानुषं मन्ये रामं दशरथात्मजम् ।
इक्ष्वाकुकुलजातेन अनरण्येन यत्पुरा ।
उत्पत्स्यति हि मद्वंशे पुरुषो राक्षसाधम ।
यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम् ।
निहनिष्यति संग्रामे त्वां कुलाधम दुर्मते । [5]
शप्तोऽहं वेदवत्या च यथा सा धर्षिता पुरा ।
सेयं सीता महाभागा जाता जनकनन्दिनी ।
उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका ।
यथोक्तास्तन्मया प्राप्तं न मिथ्या ऋषिभाषितम् ।

[(l. 1) D10.11 G2 Ck.t तमिमं; M1.2 तदिदं; Cv.r.m.g as above (for विदितं).—(l. 2) Note the hiatus between the two halves. D5.6 T1.3 G2 M3 Cg -नाथेन; Cm as above (for -जातेन). D7 M5 (both to avoid hiatus) अनरण्येन (for अन°). —G2 om. l. 3–5. —(l. 3) M3 Cv.m.g उत्पत्स्यते. B (ed.) मद्वंश-. —(l. 5) G1.3 M5 धर्मात्मा (for संग्रामे). M1.2 स्व- (for त्वां). D3 संयुगे (for दुर्मते). M5 कुलाधम सुदुर्मते (for the post. half). ❀ Cv : अत्र द्वितीयस्त्वां शब्दः प्रथमप्रयुक्तस्य दूरप्रयुक्तस्यानुस्मरणार्थः ।; Cm : त्वामिति द्विरुक्तिराग्रहातिशयेन ।; Cg : यस्त्वामित्यत्र तु आमिति छेदः । आमित्यङ्गीकारे । यस्तु पुरुषस्त्वां संग्रामे निहनिष्यति सः मद्वंशे उत्पत्स्यते । आं निश्चितम् । इति एवं प्रकारेण । ..... । अन्ये तु त्वामिति द्विरुक्तिरनुस्मरणार्थेत्याहुः । अपरे त्वाग्रहातिशयेन द्विरुक्तिरिति । त्वां प्रत्युत्पत्स्यत इति द्वितीयत्वांशब्दान्वय इत्येके. ❀ —(l. 6) D5 G2 M1.2 या मया; D7 T2 G3 M3.5 Cm.g यदा सा; D9 तथा सा; T1 या * * (moth-eaten); Ct as above (for यथा सा). ❀ Cv : वेदवत्या चेति सम्यक्पाठः. ❀. —After l. 6, G1 ins. :

1026(A)* त्वद्वंशनाशनायाहमुद्भविष्यामि राक्षस ।

—(l. 8) D9 om. उमा नन्दी-. —(l. 9) G2 यदूचुस्; M1.2 यमूचुस्; Cv.r.g.t as above (for यथोक्तास्). D5 T1.2 G1 M3.5 Cv.g तपसा प्राप्ता(T2 M3.5 Cv.g °प्तं); T3 तत्तथा प्राप्तं; G3 तु वधप्राप्तिर्; Cm.t as above (for तन्मया प्राप्तं). D3.6.9 यथोक्तस्तु वधः प्राप्तो (for the prior half). D6 मुनि- (for ऋषि-). ❀ Cr : तपसा प्राप्ताः तपसा युक्ताः यथोक्ताः । यथोक्तं तदृषिभाषितं न मिथ्येति संबन्धः । यथोक्तं तन्मया प्राप्तं न मिथ्या ऋषिभाषितमिति पाठः ।; Cm : यथोक्तं तन्मया प्राप्तमिति वा पाठः । एतैर्यथा उक्तं तन्मया प्राप्तमित्यर्थः ।; Ct : 'यदूचुस्तन्मया' इति पाठान्तरम्. ❀]

8 ᵃ) D6.7.9–11 समागम्य (for [अ]भ्युपागम्य). —For 8ᵃᵇ, Ś Ñ V B D1–4.8.12.13 subst. :

1027* सज्जा भवन्तो रक्षन्तु नगरीं वै समन्ततः ।

[D12 संज्ञा (sic) (for सज्जा). Ś D8.12 भवंतु (for भवन्तो). Ś V2 B2.4 D2.8.12 मे (for वै).]

—ᶜ) D4 सराक्षसाश् (hypm.) (for राक्षसाश्). Ś2 B1.4 D1–3.8.12.13 [ए]व (for [अ]पि). D11 संतिष्टं (sic) (for तिष्ठन्तु). —ᵈ) Ś B1.2 D2.4.8.12 पुर-; Ñ V B3.4 D1.3.13 वप्र- (for चर्या-). D1 -मूर्धनि (for -मूर्धसु). L (ed.) पुरगाः पुरमूर्धसु.

9 V3 om. (hapl.?) 9. —ᵃ) Ś V2 B1.4 D1–3.8.12.13 -दर्पोद्य; Ñ V1 B2.3 -सत्त्वोद्य; D4 -सत्त्वश्च; D7.10.11 Ct -गांभीर्यो; Ck as in text (for -गम्भीरो). —ᶜ) Ś Ñ V1.2 B D1.2.4.8.12 च; G3 स (for तु). —ᵈ) Ñ1 V1 B2.3 D1 प्र(D1 नि)बोध्यतां; B4 D4.10 विबुध्यतां (sic). —After 9, D1 reads 13.

10 G3 om. (hapl.) 10–11. —ᵃ) Ś Ñ V B D1–4.6.8–13 Ct समरे जितम् (for स पराजितम्). —ᵇ) Ś B1 D1.2.8.12 जितं(D2 °ते) रणे; Ñ1 V2 B4 D4.13 हतं रणे; Ñ2 V1.3 B2.3 तथा हतं; D3 रणे हतं; M5 [अ]रिसूदनं (for निषूदितम्). —ᶜ) B3 यक्षो- (sic)[(for रक्षो-). ŚÑ1 D10.11 T3 G2 -भीमबलम्; Ñ2 V1.3 B2 D4 -गणं भीमम् (B2 °तम्); M5 -बलं सर्वम् (for -बलं भीमम्). V2 राक्षसानादिदेशाथ. —ᵈ) V2 राक्षसेंद्रो (for आदिदेश). —D9 om. (hapl.) from महाबलः up to कुम्भकर्णं in 12ᵈ. ❀ Ct : एतदुत्तरम्, 'स हि संख्ये' इत्येव श्लोक इति कतकस्वरसः । क्वचित्तु सार्धश्लोकद्वयमधिकं पठ्यते–द्वारेष्वित्यादि. ❀

11 D9 G3 om. 11 (cf. v.l. 10). —ᵃ) L (ed.) यत्नं (for यत्नः). Ś D8.12 कर्तव्यः (for क्रियतां). D3 क्रियतां यत्नः (by transp.). B2 द्वारे यत्नश्च क्रियतां. —ᵇ) Ñ2 B1 D2.6 T3 G2 M5 [अ]व(Ñ2 D2 °पि; T3 °भि)रुह्यतां; V1 [अ]भिरक्ष्यतां; B3 निरुध्यतां. Ñ1 D4

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

नव षट् सप्त चाष्टौ च मासान्स्वपिति राक्षसः ।
तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ॥ १२
स हि संख्ये महाबाहुः ककुदं सर्वरक्षसाम् ।
वानरान्राजपुत्रौ च क्षिप्रमेव वधिष्यति ॥ १३
कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ।
रामेणाभिनिरस्तस्य संग्रामेऽस्मिन्सुदारुणे ।
भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ॥ १४

किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि ।
ईदृशे व्यसने प्राप्ते यो न साह्याय कल्पते ॥ १५

ते तु तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः ।
जग्मुः परमसंभ्रान्ताः कुम्भकर्णनिवेशनम् ॥ १६

G. 6. 37. 22
B. 6. 60. 22
L. 6. 38. 21

प्राकारानधिरोहतां; V₃ प्राकाराभ्रोभिरक्ष्यतां.—B₁ D₁₃ om. (hapl.?) 11^{cd}.—^{c}) Ś Ñ₁ V₁ B₂.₃ D₁–₄.₈.₁₂ M₁.₂ -बल-; V₃ -वशं- (for -वश-). V₃ (m. also as in text) समासाद्य; B₂ D₄ -समादिष्टः. ❀ Cg: निद्रावशसमादिष्टः निद्रावशेन शयानः। सद्यः कर्तव्यत्वाय पुनरुक्तिः. ❀ —^{d}) = 9^{d}. Ś₂ D₁₀–₁₂ निबोध्यतां; Ñ V B₂.₃ D₁ प्र(D₁ व्य)बोध्यतां; B₄ विबुध्यतां (sic); D₂ G₂ [ऽ]पि बो°.—After 11, Ś Ñ V₁.₃ B D₂–₄.₈.₁₃ (B₁ D₁₃ after 11^{ab}, owing to om.) read 13, 14^{cd} and 1031*; D₁₂ reads 13 and 14^{c}–^{f}; D₁ reads 14^{cd} and 1031*; while D₅–₇.₁₀.₁₁ S ins.:

1028* सुखं स्वपिति निश्चिन्तः कालोऽपहृतचेतनः।

[D₆ स्वयं (for सुखं). D₆.₇.₁₀.₁₁ T₂.₃ काम- (for काल-).]

12 D₉ om. up to कुम्भकर्णं in 12^{a} (cf. v.l. 10). V₂ om. 12. G₃ om. 12^{ab}.—^{a}) B₄ D₁.₃.₁₃ दश (for सप्त). Ś Ñ V₁.₃ B₂.₃ D₂.₄.₈.₁₀–₁₂ Ct नव सप्त दशाष्टौ च; B₁ नव षड्दशकाष्टौ च; G₁ षण्णिरंतरमेवैष.—After 12^{ab}, D₅–₇.₁₀.₁₁ T G₁.₂ M ins.:

1029* मत्रं कृत्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि।

[D₆ मंत्रयित्वा. G₂ M₁.₂.₅ च (for तु). G₁ इतः पंचदशेहनि (for the post. half).]

—D₄.₆.₇.₁₀.₁₁ T₂.₃ om. 12^{cd}. G₁ repeats 12^{cd} (var.) after 14.—^{c}) Ś₂ Ñ₁ V₃ B₁.₃.₄ D₁–₃.₈.₁₂.₁₃ तं वि-; D₅ किंतु; T₁ किं नु; G₁ (second time) तं प्र- (for तं तु). B₂ तं विबोधय च क्षिप्रं.

13 Ś Ñ V₁.₃ B D₂–₄.₈.₁₂.₁₃ (B₁ D₁₃ after 11^{ab} owing to om.) read 13, 14^{cd} and 1031* (D₁₂ reads 13 and 14^{e}–^{f}) after 11; while D₁ reads 13 after 9.—^{a}) D₆.₇ T₂.₃ M₃ Cm.g तु; Cv.k.t as in text (for हि). D₁.₁₃ सर्वान् (for संख्ये).—^{b}) D₆.₇.₉ T₂.₃ G₂.₃ M₃.₅ Cm.g ककुदः; D₁₃ कुमुदः; Cr.k.t as in text (for ककुदं). Ś D₂.₈.₁₂ कुंभकर्णश्च (D₂ °र्णः स) राक्षसः. ❀ Cr: सर्वरक्षसां ककुदं सर्वरक्षसां प्रधानम्।; so also Ck.t. Ct adds नित्यनपुंसकं ककुदमिति। तेन स महाबाहुरित्यनेन सामानाधिकरण्यमविरुद्धम्. ❀ —^{c}) B₁ तु (for च).—^{d}) D₄ M₅ एवं. Ś V₁ B₁ D₁–₃.₇–₁₃ G₃ हनिष्यति; D₅ धर्षिष्यति (unmetric) (for वधिष्यति).—After 13, D₅–₇.₉–₁₁ S ins.:

1030* एष केतुः परः संख्ये मुख्यो वै सर्वरक्षसाम्।

[D₅.₆.₉–₁₁ T₃ Ct परं; Ck as above (for परः). D₆ ककुदः (for मुख्यो वै). M₃ मुख्यो वैवस्वतक्षयं (for the post. half).]

14 V₂ reads 14^{ab} after 1031*.—^{a}) Ś D₈ स निद्राति (for सदा शेते).—^{b}) M₁.₂ -सुखोचितः (for -सुखे रतः).—Ś Ñ V₁.₃ B D₂–₄.₈.₁₂.₁₃ (B₁ D₁₃ after 11^{ab}, owing to om.) read 13, 14^{cd} and 1031* (D₁₂ reads 13 and 14^{e}–^{f}) after 11; D₁ reads 14^{cd} and 1031* after 11.—^{c}) D₇ [अ]पि; T₁ G M₃.₅ हि (for [अ]मि-). Ś Ñ V B D₁–₄.₈.₁₃ रामबाणनिरस्तानां.—^{d}) Ś B₄ D₁–₃.₈ संभ्रमे (for संग्रामे).—^{f}) D₇ निबोधिते.—For $14^{e,f}$, Ś Ñ V B D₁–₄.₈.₁₃ subst.:

1031* विधमिष्यति नः क्षिप्रं कुम्भकर्णो महद्भयम्।

[Ñ₂ V B₁ D₄ अपनेष्यति. D₁ यः; D₈ om. (subm.) (for नः). D₄ तत्रासं (for नः क्षिप्रं). B₄ वधिष्यति बलं क्षिप्रं (for the prior half). V₂ B₁ D₄ महाबलः(V₂ °लं); D₁₃ महाभयं (for महद्भयम्).]

—After 14, G₁ repeats 12^{cd} (var.).

15 ^{a}) M₁.₂ [अ]नेनाहं (for [अ]हं तेन).—^{b}) Ñ V B₃ D₃.₄ M₁.₂ वै; B₁.₂ D₁.₁₃ च; B₄ ह (for हि).—^{c}) Ś Ñ V B D₁–₄.₈–₁₃ G₁.₃ M₁.₂.₅ संभ्रमे (D₁₀.₁₁ व्यसने) घोरे; Cm.t as in text (for व्यसने प्राप्ते).—^{d}) Ś D₂.₈.₁₂ [ऽ]भयाय नः; B₄ न सख्याय; D₄ न संध्याय (sic) (for न साह्याय). B₁ न साहाय्यं च कल्पते.—After 15, B₃ ins.:

1032* किं करिष्यति मे तेन कुम्भकर्णेन जीवता।
मृते मयि गते राज्ये विकलं तस्य जीवनम्।
कालो बलीयान्नियतं पौरुषं तु निरर्थकम्।
एकेन वानरेणैव दग्धा लङ्का पुरी मम।
तस्मात्सर्वे विबोधध्वं भयं त्यक्त्वा महाबलाः। [5]
निद्रार्थं शयने सक्तं कुम्भकर्णं महाबलम्।

16 ^{a}) Ś D₂.₈.₁₂ तेपिः; Ñ₂ V B₂.₃ तस्य; D₅ तेन (for ते तु).—^{b}) D₇ राक्षसा रावणाज्ञया.—^{c}) B₄ -संह्रष्टाः (for -संभ्रान्ताः).—^{d}) D₃.₆.₇ -निवेशने.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. 22
B. 6. 60. 23
L. 6. 38. 22

ते रावणसमादिष्टा मांसशोणितभोजनाः ।
गन्धमाल्यांस्तथा भक्ष्यानादाय सहसा ययुः ॥ १७
तां प्रविश्य महाद्वारां सर्वतो योजनायताम् ।
कुम्भकर्णगुहां रम्यां सर्वगन्धप्रवाहिनीम् ॥ १८
कुम्भकर्णस्य निश्वासादवधूता महाबलाः ।
प्रतिष्ठमानाः कृच्छ्रेण यत्नात्प्रविविशुर्गुहाम् ॥ १९

तां प्रविश्य गुहां रम्यां शुभां काञ्चनकुट्टिमाम् ।
ददृशुर्नैर्ऋतव्याघ्रं शयानं भीमदर्शनम् ॥ २०
ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम् ।
कुम्भकर्णं महानिद्रं सहिताः प्रत्यबोधयन् ॥ २१
ऊर्ध्वरोमाञ्चिततनुं श्वसन्तमिव पन्नगम् ।
त्रासयन्तं महाश्वासैः शयानं भीमदर्शनम् ॥ २२

17 ^{c}) D6 गंधं (for गन्ध-). D5.7 तदा (for तथा). D9–11 गंधं (D9 °ध-) माल्यं महच्चक्ष्यं. —^{d}) M1.2 विविधान् (for सहसा). —For 17, Ś Ñ V B D1–4.8.12.13 subst.:

1033* ते तथा तु समादिष्टा राक्षसा भीमविक्रमाः ।
गन्धं माल्यं तथा पानं भक्ष्यं चादाय सत्वराः ।

[B3 स्वयमादिष्टा. B1 D8 -दर्शनाः (for -विक्रमाः). —(l. 2) Ś D2.8 गंधान्माल्यं; D1.13 गंधान्माल्यांस्; D3.4.12 गंधमाल्यं. Ñ V B2.3 D4 च (B2.3 स-) मांसं (V1 पानं) च; D13 तथा पानान् (for तथा पानं). Ñ2 V2.3 B3 D13 भक्षांश्; D1 भक्षं (for भक्ष्यं). Ñ1 B2 D4 आदाय (for चादाय).]

—Thereafter all the above MSS. cont.; G1 ins. after 20^{ab}; while M5 cont. after 1035*:

1034* आसाद्य भवनं तस्य विविशुस्ते नृपाज्ञया ।

[G1 M5 च गृहं (for भवनं). Ñ2 V3 B2.3 प्राविशंस्ते; V1 विविशंस्ते; V2 प्रविशुस्ते; G1 M5 प्रविश्य च (for विविशुस्ते). D4 तदाज्ञया.]

—After 17, G1 M5 ins.:

1035* मृगान्मद्यस्य चषकान्भोज्यान्भक्ष्यांश्च राक्षसाः ।

[M5 घोरान्क्षतजमेव च (for the post. half).]

18 ^{b}) D9 G1 M5 योजनावृतां; T3 दशयोजनां (for योजनायतां). —^{d}) D7.9–11 M1 पुष्प- (for सर्व-). —For 18, Ś Ñ V B D1–4.8.12.13 subst.:

1036* तत्प्रविश्य महाद्वारं सर्वतो योजनायतम् ।
कुम्भकर्णगृहं रम्यं पुण्यगन्धं शुचिं शुभम् ।

[(l. 1) B3 ते; D4 तद्वत् (hypm.) (for तत्). D13 महात्मानः (for °द्वारं). —(l. 2) D4 तस्य (for रम्यं). B1 D2.8 पुण्य (D2 °ष्प) गंध-; B2.4 पुष्पगंधं; D13 पुण्यगंधि. Ñ2 V2 B1.4 शुभं शुचिं (by transp.); V3 B2 D3 शुभं शुचि; D8 -शुचिशुभं (unmetric). Ñ1 D4 पुण्यं (Ñ1 °ण्य-) गंधवहं शुभं; V1 B3 पुष्प (V1 °ण्य-) गंधवहं शुचि; D1 पुण्यगंधोपशोभितं (for the post. half).]

—Thereafter all the above MSS. cont.:

1037* विबोधयिषवः सर्वे तस्थुस्तस्य महागृहे ।

[Ś D8.12 विबोधयंतस्ते; B1.2 निबोधयिषवः; D1.3 नि (D3 वि) बोधयिष्णवः; D13 ते बोधयिषवः. Ñ1 तदा गृहे; Ñ2 V B2.3 गृहे तदा (for महागृहे).]

—Then all the above MSS. read 34.

19 ^{a}) Ś B1 D8.13 निःश्वासैर्; Ñ1 B4 D1–4 निश्वासैर्; B2.3 D6.7.9.12 निःश्वासाद्. —^{b}) D3 T3 अवधूत-. —For 19^{cd}, Ś Ñ V B D1–4.8.12.13 (Ś D8.12 read before 19^{ab}) subst.:

1038* यतमानाश्च कृच्छ्रेण तत्ते प्रविविशुर्गृहम् ।

[V2.3 B1.4 D4 पतमानाश् (V3 °नं) (for यतमानाश्). Ñ V B1–3 तु; D1.3.13 सु- (for च). V2 यत्ते प्र-; B1 D4 पुनस्ते; B4 ततः प्रा-; D1.3 ततः प्र-; D2 तत्त प्र- (for तत्ते प्र-).]

20 ^{b}) D9–11 G2 M1.2 Ct रत्न-; G1 शुभ- (for शुभां). —For 20^{ab}, Ś Ñ V B D1–4.8.12.13 subst.:

1039* संप्रविश्य तदा रम्यं गृहं काञ्चनकुट्टिमम् ।

[Ñ V B2.3 ते (for सं-). B2 प्रविष्टा (for -प्रविश्य). Ñ2 B2 महाद्वारं; B1 महारम्यं; B4 गृहं रम्यं (for तदा रम्यं). V transp. तदा and गृहं.]

—After 20^{ab}, G1 ins. 1034*. —^{c}) Ñ2 V3 B2.3 राक्षस- (for नैर्ऋत-). Ñ1 V1.3 B2–4 D1.7.9–12 -व्याघ्राः. —^{d}) D5 T1 अहि- (for भीम-). Ś Ñ1 V2 B1.3.4 D1–4.6–12 -विक्रमं; D13 -निःस्वनं (for -दर्शनम्). —After 20, G3 reads 23^{ab}.

21 ☞ The sequence of stanzas 21–87 (including star passages and omissions) in Ś Ñ V B D1–4.8.12.13 is 22–23^{b}, 21, 35^{ab}, 36^{ab}, 24–28; 36^{c}–37, 29–30, 38–39, 31–33, 40–44^{d}, 45, 35^{cdef}, 44^{ef}, 46–49, 51, 50, 53, 52, 73–81, 54–57, 60 (Ñ V B2.3 D4 read 60 after 52), 58–59, 61–72, 82–85, 87, 86. M5 reads 21–22 after 23^{a} in marg. —^{c}) B1 D1.13 विपुलं (for विकृतं). Ñ V B2 भीमं; B3 दृष्ट्वा (for सुप्तं). D4 ते तं सुप्तं महाबाहुं; D6 ते तु विकृतं संसुप्तं (unmetric). —^{b}) B1 प्रकीर्णम् (for वि°). D2 पन्नगं (for पर्वतम्). —^{c}) D2 महाकर्णं (for °निद्रं). —^{d}) D9–11 समेताः (for सहिताः). Ś Ñ V B1–3 D1–4.8.12.13 प्रसुप्तं बोधयिष्णवः (V2 °मिच्छवः; B2 °यंत्यथ; D3 °यिष्य च [sic]); B4 बोधनाय प्रचक्रिरे.

22 M5 reads 21–22 after 23 ^{a} in marg. —^{a}) D7.9–11 T2.3 Ct -लोमांचित-; Cg as in text (for -रोमा-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

भीमनासापुटं तं तु पातालविपुलाननम् ।
ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णं महाबलम् ॥ २३
ततश्चकुर्महात्मानः कुम्भकर्णाग्रतस्तदा ।
मांसानां मेरुसंकाशं राशिं परमतर्पणम् ॥ २४
मृगाणां महिषाणां च वराहाणां च संचयान् ।
चक्रुर्नैर्ऋतशार्दूला राशिमन्नस्य चाद्भुतम् ॥ २५
ततः शोणितकुम्भांश्च मद्यानि विविधानि च ।
पुरस्तात्कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः ॥ २६
लिलिपुश्च परार्घ्येन चन्दनेन परंतपम् ।
दिव्यैराच्छादयामासुर्माल्यैर्गन्धैः सुगन्धिभिः ॥ २७
धूपं सुगन्धं ससृजुस्तुष्टुवुश्च परंतपम् ।
जलदा इव चोन्नेदुर्यातुधानाः सहस्रशः ॥ २८
शङ्खानापूरयामासुः शशाङ्कसदृशप्रभान् ।
तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ २९

G. 6. 37. 39
B. 6. 60. 36
L. 6. 38. 38

ञ्चित-). —^{b}) Ñ1 D4 नि(D4 निः)श्वसंतमिवोरगं. —^{c}) D9–11 भ्रामयंतं; T2 श्वासयंतं (for त्रास°). D6.9–11 विनिः(D11 °नि)श्वासैः; D7 °कायं (for महाश्वासैः). —^{d}) D9–11 -विक्रमं (for -दर्शनम्). —For 22^{cd}, Ś Ñ V B D1–4.8.12.13 subst.:

1040* वित्रासयन्तं निःश्वासैः शयानं पिशिताशनम् ।

[Ñ V1 B3.4 D2.12 निश्वासैः. D4 त्रासयंतं रिपुबलं (for the prior half). D4 निःश्वासैः (for शयानं). Ś B2 D8 पिशिताशिनं.]

23 G3 reads 23^{ab} after 20. —^{a}) D9 घन- (for भीम-). Ś Ñ V B D1–4.8.13 भीमप्राणबलं भीमं. —After 23^{a}, M5 reads 21–22 in marg. —^{b}) B2 -विवरानन; D4 -रिपुनाशनं; D6 -विकृताननं (for -विपुलाननम्). —After 23^{ab}, D5–7.9–11 S ins.:

1041* शयने न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम् ।
काञ्चनाङ्गदनद्धाङ्गं किरीटिनमरिंदमम् ।

[(l. 1) D5 T1 G2 M3 शय्यायां; T3 M5 शयानं (for शयने). —(l. 2) G1 कांचनांचितसर्वांगं (for the prior half). D10.11 किरीटेनार्कवर्चसं (for the post. half).]

—Ś Ñ V B D1–4.8.12.13 om. 23^{cd}. —^{c}) D5 om. ददृशुर्. —^{d}) D5.9–11 अरिंदमं (for महाबलम्).

24 ^{a}) V1 B3 तेथ; V2 तत्र; B2 ते तु (for ततश्). Ś Ñ1 B4 D1–4.8.12.13 तत्रोपजह्रुः(D2 °जग्मुः; D4 °चक्रुः) क्षिप्रं ते; Ñ2 M5 तथा च(M5 °तश्च)क्रमेहानादं; V3 तत ****क्षिप्रं (illeg.); B1 तत्रोपचक्रुश्च क्षिप्रं (unmetric). —^{b}) Ñ1 D4 स्थिताः; B3 तथा (for तदा). D9–11 M1.2 कुंभकर्णस्य चा(M1.2 ते)ग्रतः. —V3 om. 24^{c}–25^{ab}. —^{c}) Ś Ñ V1.2 B1–3 D3.12 भक्ष्याणां; B4 D1.2.4.8.13 भक्षाणां; D9–11 भूतानां (for मांसानां). —^{d}) Ś D8.12 -तर्पिणां.

25 V3 om. 25^{ab} (cf. v.l. 24). —^{b}) G2 वानराणां (for वराहाणां). Ś Ñ V2 B2.3 D1.2.4.7.8.12.13 संचयं. —^{c}) Ñ2 V1.2 B2–4 राक्षस- (for नैर्ऋत-). —^{d}) D4 भक्षस्य (for अन्नस्य). B3 राशिं मानुस्यमद्भुतं (sic); D3 स राशीस्त्स्य चाद्भुताः (sic); D12 राशीनन्नस्य चाद्भुतान्.

26 ^{a}) Ñ1 तत्र (for ततः). —D1 om. (hapl.?) from 26^{b} up to लिलिपुश्च in 27^{a}. —^{b}) D9–11 मांसानि; Cg as in text (for मद्यानि). —^{d}) D11 त्रिदिवशत्रवः.

27 D1 om. up to लिलिपुश्च in ^{a} (cf. v.l. 26). —^{a}) Ś D8.12 लेपुश्चैव; V2 लिलिपुः सु-. —^{b}) Ś Ñ V B D1–4.8.12.13 सुगंधिना (for परंतपम्). —^{c}) D7.9–11 G2 Ct भाश्वास(D7 °वतं)यामासुर्. —^{d}) D5.7 T G2 माल्यगंधैः सु-; D9–11 माल्यैर्गंधैश्च; G1 माल्यैः सुरभि-. —For 27^{cd}, Ś Ñ V B D1–4.8.12.13 subst.:

1042* वस्त्रैः प्रच्छादयामासुर्माल्ययोगसुगन्धिभिः ।

[Ś V3 B4 D8.12 च छा(V3 B4 चाच्छा)दयामासुर्; B1 D13 प्रा(B1 आ)च्छादयामासुर्. Ñ1 V3 B1.4 D1–4.13 माल्ययोगैः(Ñ1 D4 °दामैः); Ñ2 V1.2 B2 माल्यगंधैः; B3 माल्यैर्गंधैः. V3 च (for सु-).]

28 ^{a}) B1 धूप-; B4 धूमं (for धूपं). Ñ1 D4 गंधं च; V1 B3 D13 T2.3 सुगंधिं; G1.2 सगंधं. D6 धूपान्गंधांश्च; D7.9–11 धूपगंधांश्च. —^{b}) Ñ1 D4 परस्परं; Ñ2 B3 मनोनुगं; V1.2 मनोगतं; B2 मनोरमं; D1.13 परंतपाः (for परंतपम्). —After 28^{ab}, Ś Ñ2 V B2.4 D1–3.8.12.13 ins.; Ñ1 D4 cont. after 1044*:

1043* कुम्भकर्णं महानिद्रं बोधनाय प्रचक्रिरे ।

[Prior half = 21^{c}. Ś1 D8.12 बोधयानाः (for बोधनाय). Ñ1 D4 [उ]पचक्रमुः; Ñ2 V1.2 B2 प्र(Ñ2 om. प्र [subm.]) चक्रमुः; D1.13 [उ]पचक्रिरे.];

while Ñ1 D4 ins.:

1044* स्वेन निश्वासवातेन कम्पयन्तो महाद्रुमान् ।

Cf. 34 { तस्य निश्वासवातेन भ्राम्यमाणा निशाचराः ।
{ न शेकुरग्रतः स्थातुं कुम्भकर्णस्य राक्षसाः ।

[D4 om. l. 1.]

—^{c}) Ñ1 संनेदुर्; Ñ2 B2 नेदुश्च; V1.2 B3.4 D4.13 ते नेदुर्; V3 D6.9–11 T2.3 चानेदुर्. —^{d}) Ś Ñ V B D1–3.5–13 T M3 ततस्ततः; D4 समंततः (for सहस्रशः).

29 ^{a}) Ś Ñ V B D1–4.8–13 शंखांश्च(Ñ1 D2.3 °श्रा-) पूरयामासुः. —^{b}) Ś2 -सदृशोपमान्; Ñ1 D4 -सदृशांस्तथा; D2 -सदृशान्प्रभान्. —^{c}) ❀ Cr: तुमुलं युगपच्चापीति पाठः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. 40
B. 6. 60. 37
L. 6. 38. 39

नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः ।
कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वनम् ॥ ३०

सशङ्खभेरीपटहप्रणाद-
मास्फोटितक्ष्वेडितसिंहनादम् ।
दिशो द्रवन्तस्त्रिदिवं किरन्तः
श्रुत्वा विहंगाः सहसा निपेतुः ॥ ३१

यदा भृशं तैर्निनदैर्महात्मा
न कुम्भकर्णो बुबुधे प्रसुप्तः ।
ततो मुसुण्डीमुसलानि सर्वे
रक्षोगणास्ते जगृहुर्गदाश्च ॥ ३२

तं शैलशृङ्गैर्मुसलैर्गदाभि-
र्वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च ।
सुखप्रसुप्तं भुवि कुम्भकर्णं
रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ३३

तस्य निश्वासवातेन कुम्भकर्णस्य रक्षसः ।
राक्षसा बलवन्तोऽपि स्थातुं नाशक्नुवन्पुरः ॥ ३४

ततोऽस्य पुरतो गाढं राक्षसा भीमविक्रमाः ।
मृदङ्गपणवान्भेरीः शङ्खकुम्भगणांस्तथा ।
दशराक्षससाहस्रं युगपत्पर्यवादयन् ॥ ३५

❀ —[d]) Ś Ñ V B D1-4.8.12.13 नेदुर्भृशममर्षणाः(Ñ V1.2 B2.3 D4 °र्षिताः; V3 °र्षिणाः; D2 °र्षणं).

30 [a]) Ñ V1 B2-4 D4.9 ते तदा; D3 नेदुश्च (for नेदुर्). B3 [आ]स्फोटयांचक्रुः. D1.13 तेसुराः स्फोटयामासुर्. —[b]) D4 च (for ते). D4 समंततः; M1.2 परंतपाः (for निशाचराः). Ś D2.8.12 चिक्ष्वेडु(D2 °च्छिदु) श्चैव राक्षसाः; Ñ V1 B2.3 क्ष्वेडुश्चापि(Ñ1 चिक्षिपुश्च; B3 क्ष्वेलंतश्च) समंततः; V2.3 B4 D1.3 चिक्ष्वेडु(V2 °च्छिदु; B4 °खिदु)श्चापि राक्षसाः; B1 चिक्रीडु(m. also °क्षिपु)श्चापि राक्षसाः; D13 जघ्नुश्चिच्छिदू राक्षसाः (unmetric). —[c]) D1.3.13 -विबोधाय; D4 -विबोधेन; D7.12 -निबोधार्थं (for -विबोधार्थं). —[d]) Ś Ñ V B2-4 D1.2.4.8.12.13 M1.2 च (for ते). D3 चुक्रुशुः (for चक्रुस्ते). Ś2 Ñ1 B3 D8 T2.3 G2 विपुल-; D3 परमं (for विपुलं). V2.3 D1.9-11 स्वरं (for स्वनम्).

31 [a]) Ś1 Ñ V1.2 B1-3 D1-3.8.12.13 तं; Ś2 V3 B4 D4 ते (for स-). Ś Ñ1 B1 D1-4.8.12.13 -मुरज-; Ñ2 V1.3 -पणह-; B3.4 D6.9-11 G2 M3 -पणव- (for -पटह-). —[b]) Ś Ñ V1.2 B2.3 D1-4.8.12.13 आ(D3 सा; D13 प्र)-स्फोटिताक्ष्वेडि(Ñ2 B2.3 °क्ष्वेलि; D4 °क्षोभि)त-; V3 B4 आक्ष्वेडितास्फो(B4 °तास्फो)टित-; B1 D9-11 सास्फोटित-क्ष्वेलि(B1 °डि)त-; D5.6 S आस्फोटितक्ष्वेलित-. B2.3 D2 -सिंहनादान्(B3 °दैः). ❀ Cg: सिंहनादमित्येकवद्भावः. ❀ —[c]) Ñ1 B4 G1 द्रवंतं; V3 D13 भ्रमंतस् (for द्रवन्तस्). G1 त्रिदिवा; Cm.g.k.t as in text (for त्रिदिवं). Ś Ñ V2.3 B1.2.4 D2.4.8.12 क्रमंतः(Ñ1 V2.3 B4 °तं); V1 भ्रमंतं; B3 भ्रमंतः; T3 G1 किरंतं; M5 स्पृशंतः; Cm.g.k.t as in text (for किरन्तः). D1.3.13 वियदुत्क्रमंतः (for त्रिदिवं किरन्तः). —[d]) D6 विहगाः. V1 विनेदुः (for निपेतुः).

32 V3 om. 32. —[a]) Ś2 D5 T1.3 M5 यथा (for यदा). Ś Ñ1 V1 B1 D1-4.8.12.13 तु तैः सं-; V2 भृशस्तैर्; B4 तु तैस्तैर्; D6.9-11 T2.3 M3 Cg भृशार्तैर्(D11 °र्तो); Cgp as in text (for भृशं तैर्). —[b]) B1 विबुधे (for बुबुधे). D4 न सुप्तः (sic). —[c]) B1.4 D1-3.13 T3 तदा (for ततो). Ś1 Ñ2 V1.2 B1-3 D2.4.6(reads in marg. up to [d]).9-11 G1 Ct भुशुंडीर्(G1 °डी-); Ś2 Ñ1 D8.13 भुसुंडीर्(D13 °डी-); B4 भुषंडीर्; D1.12 भुखंडी-(D12 °डीर्); D3 मुषंढी-; D5 मुसुंडीन्; D7 भृशुंढी-; T1 Cr.m.g.k मुसुं(Cr.k °सृं)ठी-; T3 मुषुंडी-; G2 मुसृंडीर्; M3 भुसृंठीर्; M5 मुसुंडीर्; K (ed.) मुसुंठीर्. Ś D8 मुसुलानि; Ñ1 B1.2 मुषलानि; D1-4.11.13 मुशलानि. Ś Ñ V1.2 B2.3 D2.4.8.12 चैव; B1.4 शूलान्; D1.3 शूरा; D13 घोरा (for सर्वे). —[d]) B1.3 B (ed.) तं (sic) (for ते).

33 [a]) D4 शैलैश्च (for तं शैल-). B4 शृंगशैल- (for शलशृङ्गैर्). Ś D8 मुसुलैर्; Ñ1 D1-4.10.11.13 मुशलैर्. —[b]) Ś D6.8.12 वृत्तैस्तलैर्; V3 D9-11 वक्षस्थले; B3 D7 वक्षस्तले (for वृक्षैस्तलैर्). B2 om. (hapl.) मुद्गर-. B4 om. च. —[c]) G1 सुखं प्रसुप्तं. —[d]) B2 ततो; G1.3 M5 तथा (for तदा).

34 Ś Ñ V B D1-4.8.12.13 read 34 after 1037*. —[a]) Ś V3 B1.2 D3.6-9.13 निःश्वास-. M1.2 -वेगेन (for -वातेन). —[c]) B1 ये; B3 ते; G3 च (for ऽपि). D9-11 कुंभकर्णस्य (for बलवन्तोऽपि). —[d]) Ś Ñ V B D1-3.8.12.13 तदा; D4 तथा; D5 G3 पुनः (for पुरः). D6.9-11 स्थातुं शेकुर्न चाग्रतः.

35 [a]) Ś V1.2 B1 D1.3.6-8.10-13 T2 M3 Cm.g.t परिहि(D13 °ह)ता; Ñ V3 B3 D2 परिवृ(V3 °ग)ता; D4 ते प्रहृता; D9 प्रपूरिता (for ऽस्य पुरतो). B2 ततस्तं स्वापविवशं; B4 जलदा इव ते नेदुः. —[b]) D1.13 भीमदर्शनाः; M1.2 °कर्मणः (for °विक्रमाः). D9 राक्षसैर्भीमविक्रमैः. ❀ Ct: 'ततः प्रपूरिता गाढं राक्षसैर्भीमविक्रमैः' इति पाङ्क्तः पाठः. ❀. —[c]) Ś B1 D6.8.12 T2.3 मृदंगान् (for मृदङ्ग-). Ñ1 V1 B2.3 D7 -भेरीपणवान्; Ñ2 V2 D4 -भेरीपटहान्; V3 B4 -पटहान्भेरीः (for -पणवान्भेरीः). —[d]) V1 B3 -कुंभमुखांस्. D6.7 T2 G2 M3.5 तदा (for तथा). Ś Ñ2 V2.3 B1.4 D1-3.8.12.13 शंखान्कुं(Ñ2 शक्ति कुं)भमुखांस्तथा;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

नीलाञ्जनचयाकारं ते तु तं प्रत्यबोधयन् ।
अभिघ्नन्तो नदन्तश्च नैव संविविदे तु सः ॥ ३६
यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा ।
ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् ॥ ३७
अश्वानुष्ट्रान्खरान्नागाञ्जघ्नुर्दण्डकशाङ्कुशैः ।
भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् ॥ ३८

निजघ्नुश्चास्य गात्राणि महाकाष्ठकटंकरैः ।
मुद्गरैर्मुसलैश्चैव सर्वप्राणसमुद्यतैः ॥ ३९
तेन शब्देन महता लङ्का समभिपूरिता ।
सपर्वतवना सर्वा सोऽपि नैव प्रबुध्यते ॥ ४०
ततः सहस्रं भेरीणां युगपत्समहन्यत ।
मृष्टकाञ्चनकोणानामसक्तानां समन्ततः ॥ ४१

G. 6. 37. 47
B. 6. 60. 48
L. 6. 38. 46

Ñ1 B2 D4 शंखवादित्रनि(B2 °निः)स्वनान्. —[c]) Ś Ñ1 V B2–4 D1–3.5.6.8.12.13 T2 G1.2 M3.5 Cg -साहस्रा. Ñ2 दश रक्षःसहस्राणि; B1 D4 दशसाहस्ररक्षांसि. —[f]) D7.10.11 T3 G2.3 M पर्यवारयत्(T3 M3.5 °यन्); D9 पर्यवादयत्; G1 पर्यपातयन्; Cg as in text (for पर्यवादयन्). Ś Ñ V B D1–4.8.12.13 जघ्नुर्भीमपराक्रमाः. —After 35, Ś Ñ V B D1–4.8.12.13 ins. :

1045* राक्षसानां सहस्रं च शरीरेऽस्य व्यधावत।

[Ś Ñ1 B4 D2–4.8.12 तु (for च). Ś Ñ1 D8.12 परिधावति; V3 B4 D1.13 [ऽ]स्य प्रधावति; B1 D2.3 सं(D3 स)प्रधावति; B3 D4 पर्यधावत (for ऽस्य व्यधावत). B2 शरीरेभ्यः प्रधावत (for the post. half).]

—Then Ñ2 B2 cont. 1050*.

36 [a]) Ś Ñ1 V B D1–4.8.12.13 G1 M3 -चयाकाराः (D4 °र-). Ñ2 नीलाचलचलाकाराः. —[b]) Ś Ñ V B D1–4.8.12.13 कुंभकर्णसमीपगाः(V3 B4 °तः). —After 36[ab], M5 reads 38[cd]. —D6 om. 36[cd]. —[c]) D7 आनिघ्नंतो. —[d]) D7 [ए]वं. D5 यः (for सः). D9–11 न च संबुबुधे तदा; T2.3 नैव संबुबुधे च सः. —For 36[cd], Ś Ñ V B D1–4.8.12.13 subst. :

1046* बिभिदुश्चास्य गात्राणि घ्नन्तोऽथ व्यनदंस्तथा।

[Ñ V1.2 B1–3 D1.13 विव्यधुश्; D4 विव्यधुश् (for बिभिदुश्). Ñ1 B1 निघ्नंतो; Ñ2 B3 घ्नंतोभि-; V2 निघ्नंतोति- (hypm.); D2 घ्नंतोति-; D4 घूर्णश्च (for घ्नन्तोऽथ). Ñ V2 B1.3 D2.12 तदा (for तथा). V1 निघ्नंतोपि नदंस्तदा; V3 निघ्नंतो विविधांस्तथा; B2 निघ्नंतोभ्यनदंस्तदा; B4 घ्नंतोपि च न विव्यधुः; D1.13 घ्नंतोभि(D13 °पि)व्यथयंस्तदा; D3 घ्नंतोत्यंतं च मुष्टिभिः (for the post. half).]

37 [a]) D5 चैनं; D7 चैवं (for चैनं). G3 M5 शक्ताश्च (M5 °स्ते) (for शेकुस्ते). —For 37[ab], Ś Ñ V B D1–4.8.12.13 subst. :

1047* अथ खिन्ना न शेकुस्ते तत्प्रबोधाय राक्षसाः।

[Ś1 प्रतिबोधाय; Ñ1 तस्य बोधाय. V2 रक्षसः (for राक्षसाः).]

—B2 om. 37[cd]. —[d]) Ñ1 D4 सं(D4 च)प्रचक्रिरे; G2 समुपाक्रमाः (sic). Ñ2 V1 B3 चक्रुस्ते प्रति(B3 परि)बोधने.

38 [a]) Ñ1 V2.3 B3.4 D4 उष्ट्रान्हयान्; D6 उष्ट्रानश्वान् (by transp.). Ñ1 D4 तथा (for खरान्). Ś V1 B1 D1–3.8.12.13 उष्ट्रान्खरान्हयान्नागान्(D13 °न्गात्रैर्); Ñ2 B2 उष्ट्रान्नागान्हयान्कोधान्. —[b]) Ś1 Ñ1 D12 -कषा-; B4 -कर- (for -कशा-). B3 दंतनखांकुशैः. —M5 reads 38[cd] after 36[ab]. —[c]) B1 -शंखान्; D13 -शृंग- (for -शङ्ख-). M5 मृदंगपणवान्भेरीः(= 35[c]). —[d]) B1.3 सर्वे (for सर्व-). M1.2 अनादयन्.

39 [a]) D4 निर्जघ्नुश्. B4 पात्राणि (for गात्राणि). —[b]) B4 महाटंक-; G3 महाकार्ष- (sic) (for °काष्ट-). Ś B4 D3.8.12 G2 -कडंग(G2 °क)रैः; B1 -वरंडकैः; D1(*int. lin.* also) -कटंगरैः; D2.13 -कदंबकैः; D7.9 -कटंकटैः(D9 °कैः); L (ed.) -तांडकैः (subm.) (for -कटंकरैः). Ñ1 महाकंटककंटकैः; Ñ2 V1.2 B2.3 महद्भिः कूटमुद्गरैः; V3 महाकाष्ठैः सकंटकैः; D4 महाकर्ण च कर्णकैः (sic). —Ś D8.12 om. 39[cd]. —[c]) Ñ2 V1.2 B2.3 पट्टिशैर् (for मुद्गरैर्). Ñ1 B1–3 D1.2.4.13 मुसलैश्. D6 transp. मुद्गरैर् and मुसलैश्. Ñ2 B4 D7.9–11 G1 [अ]पि (for [ए]व). —[d]) Ñ2 -प्राणैः (for -प्राण-). D9 -समुद्यमैः.

40 [a]) B1 ततः (for तेन). D7.9–11 नादेन (for शब्देन). —[b]) Ś Ñ2 V1.2 B1 D1.8.12 सं(Ñ2 V1.2 सा)परिपूरिता; Ñ1 B2.3 D2–4.13 सं(Ñ1 B2 D4 सा; B3 च)प्रतिपूरिता; D5 समभिपूजिता; D7.9–11 सर्वा प्रपूरिता. —[c]) Ñ1 D4 कृत्स्ना (for सर्वा). —[d]) D7 T2.3 G3 प्र(T2 व्य)बुध्यत (for प्रबुध्यते). Ś V3 B1.4 D1–3.8.9.12.13 स च(Ś D8.9.12 तु) नैव व्य(B1 D9 प्र)बुध्यत; Ñ1 न च स प्रतिबुध्यते; Ñ2 V1.2 D4 न च स(D4 सं-) प्रत्यबुध्यत; B2 नगरी प्रत्यबुध्यत; B3 न च प्रत्यबुध्यत. ❀ Cg : प्रबुध्यते प्राबुध्यत. ❀

41 [a]) B1.2 D1.4 सहस्र-. D7.9–11 ततो भेरीसहस्रं तु. —[b]) Ś2 D9 M5 समपद्यत; V2 समहन्यते; B1 समवादयन्; D11 M1.2 सहमन्यत (meta.). —[c]) D6 घृष्ट-; D13 जुष्ट- (for मृष्ट-). V3 B3 D4 -कोषा(D4 °शा)नाम् (for -कोणानाम्). ❀ Ct : मृष्टकाञ्चनकोणानां मृष्टकाञ्चननिर्मिताः कोणा वादनदण्डा यासां तादृशीनां भेरीणां सहस्रमित्यर्थः। आर्षः समासः. ❀ —[d]) Ś D3.4.6–9 M3 Cr.m.g आसक्तानां; Ñ1 समासक्तं; Ñ2 तदा युक्तं; V1.2 B3 तदासक्तं; B1 असक्तं च; B2 असशिक्तं (sic); D1 आसिक्तानां; D13 स शिक्तीनां

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. 48
B. 6. 60. 49
L. 6. 38. 47

एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यत ।
शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः ॥ ४२
महाक्रोधसमाविष्टाः सर्वे भीमपराक्रमाः ।
तद्रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ४३

अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् ।
केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च ।
न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ४४

(sic); T2 G1 M5 आहतानां (for असक्तानां). ❀ Cr: आसक्तानां समन्तत इति पाठः. ❀

42 [a]) Ñ1 V3 D1–4 स (for तु). —[b]) D6 T2 तदा (for यदा). Ś Ñ2 V1 B1.3.4 D1–3.8.9.12 T2 व्यबुध्यत; V3 B2 D5.6 T1 G M1–3 प्रबुध्यते (for प्रबुध्यत). D4 यदा न प्रतिबुध्यते; D13 स यदा नैव बुध्यत. —[c]) D5 स्वापस्य (for शापस्य). Ś Ñ2 V B1–3 D1–3.8.12.13 G (ed.) L (ed.) शापवश्यतया (Ś B3 D2.8.12 °स्तदा; G [ed.] °स्तत्र; L [ed.] °स्तथा) सुप्तस्; Ñ1 शापसुप्ततया रक्षस्; B4 सोपसव्यतया सुप्तस्; D4 सोयं सुषुप्तः सा रक्षस् (sic). —[d]) Ś Ñ2 V1.2 B2 D8.12 G1.3 M5 तदा (for ततः).

43 [a]) Ś Ñ2 V1.2 B D1–3.8.12 ते तु क्रोध-; Ñ1 D4.13 ततः क्रोध-; V3 D6.7.9–11 ततः कोप- (for महाक्रोध-). —[c]) Ñ1 D4 ततो विबोधनार्थाय; D13 तद्रक्षो बोधयिष्यंतु. —[d]) Ś Ñ V1.2 B D1.3.4.8.12.13 अन्यं (for अन्ये). D13 पराजयत् (sic) (for पराक्रमम्).

44 [a]) Ñ1 V3 D1 भेरीं. D5 समाजग्मुर् (sic). —[b]) B1 D3 चक्रुरन्ये (by transp.). Ś D8.12 पराक्रमं; V3 B1.4 D1 महास्वरान् (V3 °नान्) (for °स्वनम्). —[c]) Ñ1 D4 च (Ñ1 om. [subm.]) लुलुंचुः (for प्रलुलुपुः). Ś V3 D3.8.12.13 केशानस्या (D13 °प्या) रुजंश्चा (V3 °जन्न)न्ये; Ñ2 V1.2 B2–4 D2 केशान्लुलुं (B2.3 °न्मुमु) चुरन्ये च (B4 तु); B1 केशान्व्यारुजतश्चान्ये (sic); D1 केशान्यध्वारुजश्चान्ये (sic). —[d]) Ñ1 D1.3.7.9–11.13 M1–3 कर्णान्. Ñ1 B3.4 D4 चखादिरे; Ñ2 V1.2 तथादशन्; D5 T1 G2 ददंशिरे (for दशन्ति च). B3 तथा चान्येप्यदारयन्. ❀ Cg: दशन्ति अदशन्. ❀ —After 44[cd], G1 ins.:

1048* रोमाण्यन्येऽस्य गात्रेभ्यो ललुपुर्नैर्ऋतर्षभाः ।

—Then G1 cont.; Ñ2 B2 D5–7.9–11 T G2.3 M ins. after 44[cd]:

1049* उदकुम्भशतान्यन्ये समसिञ्चन्त कर्णयोः ।

[D9 अथ कुंभ-; T3 उतशुंभ- (sic). Ñ2 B2 -सहस्रं तु (B2 च); D5.6 T2 G1.3 M -शतान्यस्य. Ñ2 B2 कर्णयोः संप्रसि (B2 परिषि)च्यते (for the post. half).]

—D13 G3 M1.2.5 om. 44[ef]. —[e]) D7 प्रास्पंदन्; G1 पस्पंद (for पस्पन्दे). Ñ2 B2 प्रास्पंदन्न (B2 नाबस्पंदे) च रक्षस्तु. —For 44[ef], Ś Ñ1 V B1 (marg.).3.4 D1–4.8.12 subst.; Ñ2 B2 cont. after 1045*:

1050* कुम्भकर्णस्तदा सुप्तो नैव संप्रत्यबुध्यत ।

[Ñ2 V1.2 B2.3 प्रसुप्तोसौ; V3 B4 तथा सुप्तो (for तदा सुप्तो). D3 [ए]वं (for [ए]व). Ś Ñ1 D8.12 न चैव प्रत्य (D12 °ति)-बुध्यत; Ñ2 V1.2 B2.3 न तथा (B3 °दा) पि व्यबुध्यत; V3 तदा नैव प्रबुध्यत (for the post. half).]

—Thereafter D3 reads 47[ab].

—After 44, B2 ins.; B3 cont. after 1056*; D2 ins. after 46:

1051* ततोऽधिगम्य ते सर्वे रावणं प्रणतास्तदा ।
निवेदयन्ति राजानं सर्वे प्राञ्जलयस्तदा ।
कुम्भकर्णविबोधार्थं यानाज्ञापितवांस्तदा ।
ते वयं सहिताः सर्वे प्रबोधार्थं महाबलम् ।
भेरीशङ्खप्रणादैश्च बोधितो न व्यबुध्यत । [5]
ततोऽस्माभिः शरैः सर्वैस्तर्जितं कूटमुद्गरैः ।
उदकुम्भसहस्राणि कर्णयोः पूरितानि च ।
तथापि न प्रबुद्धः स समनुज्ञातुमर्हसि ।
तेषां तद्वचनं श्रुत्वा क्रोधाविष्टः स रावणः ।
आज्ञापयत संक्रुद्धो यथोपायैः प्रबुध्यताम् । [10]
तस्य तद्वचनं श्रुत्वा पुनरागम्य राक्षसाः ।
आजघ्नुर्मुसलैर्घोरै राक्षसा राजशासनात् ।
बोधयिष्यन्तस्तद्रक्षो न च तस्य रुजाभवत् ।
समवायीकृताः सर्वे संहृत्य पुनरेव च ।

[(l. 1) D2 [ऽ]भिगम्य. B2 सर्वे ते (by transp.). —D2 om. (hapl.) l. 2. —(l. 3) B3 -निबोधार्थम्; D2 -प्रबोधार्थं. B2.3 अस्मानाज्ञापितो भवान् (for the post. half). —(l. 4) D2 महाबलाः. —(l. 5) B3 नावबुध्यते; D2 [ऽ]पि न बुध्यते. —(l. 6) B2 पूर्वः (sic); D2 पुनः (for शरैः). B3 तर्जितः; D2 ताडितः (for तर्जितं). —(l. 8) B3 त्वमनुज्ञातुम् (for समनु°). —For l. 7–8, D2 subst.:

1051(A)* उदकुम्भसहस्रैस्तु कर्णयोः संप्रपूरितः ।
स तथापि प्रबुद्धो न समाज्ञप्तुं त्वमर्हसि ।

(l. 10) B3 तद्रक्षो; D2 ताम्राक्षो (for संक्रुद्धो). B3 प्रबोध्यतां. —(l. 12) B3 बाहुशालिनः (for राजशासनात्). D2 आजघ्नुर्मुशलैर्भूयो राक्षसाधिपशासनात्. —(l. 13) B3 बोधयिष्यंति; D2 विबोधयंतस्. D2 व्यथा (for रुजा). —D2 om. l. 14. —(l. 14) B3 समवायं कृताः.]

—B3 further cont.; G1 ins. after 47[ab]:

1052* राक्षसानां सहस्राणि शरीरेऽस्य प्रजघ्निरे ।
कुम्भकर्णे न संबुद्धः सुखस्पर्शममन्यत ।
बोधयन्ति सहस्राणि राक्षसानां त्रयोदश ।

[(l. 1) G1 विनेदुश्च (for राक्षसानां). —G1 om. (hapl.) from the post. half up to the prior half of l. 3.]

—Thereafter B3 G1 cont. 1054*.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः ।
मूर्ध्नि वक्षसि गात्रेषु पातयन्कूटमुद्गरान् ॥ ४५
रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः ।
वध्यमानो महाकायो न प्रावुध्यत राक्षसः ॥ ४६
वारणानां सहस्रं तु शरीरेऽस्य प्रधावितम् ।
कुम्भकर्णस्ततो बुद्धः स्पर्शं परमबुध्यत ॥ ४७

G. 6. 37. 63
B. 6. 60. 55
L. 6. 38. 62

45 [a]) Ñ1 V B2-4 D1.4.13 M1.2 तु (for च). Ś Ñ1 D4.8.12 तत्र (for तस्य). —[b]) Ñ V1.2 B2.3 D4 महतः (B2 बहवः) कूटमुद्गरान्. —[c]) Ñ1 V1.2 B2.3 D13 गात्रे च; V3 पार्श्वेषु (for गात्रेषु). —[d]) Ś D8.12 ताडयंतोर्द(Ś1 °तोद) यंस्तदा(Ś2 °था); Ñ V1.2 B2.3 D4 निर्दयाः समपात-(V2 B2 °ताड)यन्; V3 B1.4 D1-3.13 निर्दयं समताडयन्. ❀ Cg: पातयन् अपातयन्. ❀ —After 45, D13 ins. 1055*.

46 D13 om. 46-47[b]. D3 ins. l. 1 and l. 2-16 of 1055* before and after 46 respy. —[a]) D9 केचिद्गज्वा बंधनानि (sic); G1 रज्जुबंधं च चक्रुस्ते. —[b]) D5.7.9-11 G1 M2 सर्वशः (for सर्वतः). —For 46[ab], Ś Ñ V B1-3(m.).4 D1-4.8.12 subst.:

1053* रज्जुजालावनद्धाभिर्घातनीभिः समन्ततः ।

[B2 वह्निज्वाला- (for रज्जुजाल-). D4 -जालैश्च (for -जालाव-). Ñ2 -विबद्धाभिर्; V3 -[अ]वरुद्धाभिः; B4 -[अ]नुबद्धाभिर्; D2 -[अ]ववद्धाभिर्. —V3 om. from the post. half up to 47[a]. Ś D12 यातनीभिः (for घातनीभिः). B1 D1.3 च सर्वशः (B1 °तः); B3 च समंततः (hypm.) (for समन्ततः). B3 (m. also) बहुजालवरत्रयी राक्षसैश्च समंततः.]

—[c]) T3 मथ्यमानो; G (ed.) L (ed.) बध्यमानो. Ñ2 D4 महामायो (for °कायो). —[d]) D1 चाबुध्यत; T2.3 M5 प्रबुध्यत. —After 46, Ñ1 V1.2 ins.; while B3 G1 cont. after 1052*:

1054* अथ खिन्नेषु रक्षःसु कालेन महता शनैः ।
स्ववशान्नाभिघातेन प्रत्यबुध्यत राक्षसः ।

[(l. 1) V2 om. अथ. B3 क्षीणेषु (for खिन्नेषु). —V1.2 om. l. 2. —(l. 2) G1 स्वशरीराभिघातार्तः (for the prior half). B3 G1 कुंभकर्णो वि(B3 व्य)बुध्यत (for the post. half).]

—After 46, D1 ins. 1055*; D2 ins. 1051*.

47 D13 om. 47[ab] (cf. v.l. 46). V3 om. 47[a] (cf. v.l. 1053*). Ñ1 D1 om. 47[ab]. D3 reads 47[ab] after 1050*. —[a]) Ś Ñ2 V1.2 B1.3.4 ततो गज-; G1.2 वानराणां(meta.) (for वारणानां). T1 damaged for सह. B2.3 D4-7.9-11 T G M5 च (for तु). —[b]) Ś B1 D2.8.12 संप्रधावति; Ñ2 V B3.4 D3.4 [ऽ]स्य प्रधावति; B2 पर्यधावत; L (ed.) संव्यधावत (for ऽस्य प्रधावितम्). —After 47[ab], Ś Ñ2 V B D2.4.8.12 ins.; while D1.3(ins. l. 1 and l. 2-16 before and after 46 respy.) ins. after 46; D13 ins. after 45(owing to om.):

1055* स मृद्यमानोऽपि तथा न चाबुध्यत राक्षसः ।
ते राक्षसास्ततः खिन्नाश्चक्रुरन्यं पराक्रमम् ।
प्रमदाश्चाह्वयामासुः सुमृष्टमणिकुण्डलाः ।
नागराक्षसकन्याश्च तथा गन्धर्वयोषितः ।
मनुजानां दुहितरः किंनराणां तथैव च । [5]
प्रविष्टा भवनं रम्यं तप्तकाञ्चनकुट्टिमम् ।
ताः स्त्रियो गीतवादित्रैः कुम्भकर्णाग्रतः स्थिताः ।
दिव्या दिव्यैरलङ्कारैर्दिव्यधूपेन धूपिताः ।
दिव्यगन्धाः सुगन्धाश्च क्रीडन्ति भवनोत्तमे ।
ताश्च सर्वा विशालाक्ष्यः सर्वाः काञ्चनसप्रभाः । [10]
सर्वा रूपगुणोपेताः सर्वाभरणभूषिताः ।
सर्वा विस्तीर्णजघनाः सर्वाः पीनपयोधराः ।
सर्वाः कमलपत्राक्ष्यो नीलकुञ्चितमूर्धजाः ।
तासां नूपुरशब्देन मेखलानां रवेण च ।
गीतवादित्रशब्देन स्वरेण मधुरेण च । [15]
दिव्येनैव च गन्धेन स्पर्शेन विविधेन च ।

[D1 om. l. 1. —(l. 1) B2 अदृश्यमाणो (sic) (for स मृद्य-मानो). Ñ2 V2 [ऽ]पि तदा; D3 हस्तीभिर् (sic) (for ऽपि तथा). Ś D2.8.12.13 स मर्द्य(D13 संसृज्य)मानोपि तदा (for the prior half). Ś Ñ2 V3 D2-4.8.12 प्रा(D2 प्र)बुध्यत. —(l. 2) Ś D8.12.13 तदा; V1 तथा (for ततः). B2 भिन्नाश्; D2 चित्ताश् (sic) (for खिन्नाश्). D4 अन्यं चक्रुः (by transp.). —(l. 3) B1 om. from the post. half up to the prior half of l. 4. V1.2 B3 D4 प्रमृष्ट-. —(l. 5) B1 दुहितरश्च (hypm.); D4 तथा कन्याः. —After l. 5, V3 reads l. 8. —(l. 6) Ś D2.8.12 मुख्यं; V3 दिव्यं; B1 पुण्यं; D4 तस्य (for रम्यं). D4 -कुंडलं (for -कुट्टिमम्). —(l. 7) V2 B2 गीतवादित्यः. Ś D2.8.12 कुर्वत्यो गीतवादित्रं (for the prior half). —(l. 8) V1.2 B4 D4 दिव्या दिव्यस्वलंकारा; V3 दिष्टाश्च दिव्यालंकारा; B2 दिव्या दिव्यांबरधरा; B3 दिव्यालंकारधारिण्या (for the prior half). Ñ2 -गंधेन; V2 -रूपेण (sic) (for -धूपेन). —D2 om. (hapl.?) l. 9-11; D3 om. l. 9. —(l. 9) Ś B3 D8.12 दिव्यगंध-(B3 °धैः). D13 दिव्यगंधानुगंधाश्च (for the prior half). Ś Ñ2 B4 D4.8.12.13 क्रीडंत्यो; L (ed.) चिक्रीडुर्. —Ñ2 om. l. 10-13. —(l. 10) B4 om. च (subm.). V3 तप्त- (for सर्वाः). V1 B1.2 -सुप्रभाः; D3.13 -संप्रभाः; D4 -संनिभाः (for -सप्रभाः). —D4 om. (hapl.) l. 11. —(l. 11) Ś D3.8 सर्व- (for सर्वा). B1 D13 सर्वा भूषण-(for सर्वाभरण-). —(l. 12) B3 सर्व- (for सर्वा). —(l. 14) Ś D8.12 om. (hapl.?) from the post. half up to the prior half of l. 16. V2 तु (for च). Ñ2 B3 वसनानां स्वनेन (B3 स्वेण) च (for the post. half). —D13 om. (hapl.)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. o
B. 6. 60. 56
L. 6. 38. 63

स पात्यमानैर्गिरिशृङ्गवृक्षै-
रचिन्तयंस्तान्विपुलान्प्रहारान् ।
निद्राक्षयात्क्षुद्भ्रयपीडितश्च
विजृम्भमाणः सहसोत्पपात ॥ ४८
स नागभोगाचलशृङ्गकल्पौ
विक्षिप्य बाहू गिरिशृङ्गसारौ ।
विवृत्य वक्त्रं वडवामुखाभं
निशाचरोऽसौ विकृतं जजृम्भे ॥ ४९
तस्य जाजृम्भमाणस्य वक्त्रं पातालसंनिभम् ।
ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५०
विजृम्भमाणोऽतिबलः प्रतिबुद्धो निशाचरः ।
निश्वासश्चास्य संजज्ञे पर्वतादिव मारुतः ॥ ५१

l. 15. —(l. 16) Ñ₂ B₃ चैव (by transp.); B₄ [अ]गरु-; D₄ [ए]व सु- (for [ए]व च).]

—Thereafter B₃ cont.:

1056* बोध्यमानो महाकायो न प्राबुध्यत राक्षसः।
ततो रक्षःसहस्रं द्वे शरीरे पर्यधावताम्।
अवसन्नेषु रक्षःसु कालेन महता शनैः।
उदकुम्भसहस्रं तु कर्णयोः संप्रसिच्यते।
प्रास्पन्दन्न च रक्षस्तु महानिद्रावशं गतः। [5]

[For l. 2, 4 and 5, cf. l. 1 of 1054*, 1049* and 44^{e-f} respy.]

—Then B₃ cont. 1051*.

—After 1055*, D₄ cont.:

1057* स्वरसंनादगीतेन प्रत्यबुध्यत राक्षसः।

—After 47^{a-b}, G₁ ins. 1052* (followed by 1054*). —B₃ om. 47^{c-d}. —^{c}) D₇.₉₋₁₁ तदा (for ततो). D₁₀.₁₁ बुद्ध्वा (for बुद्धः). —^{d}) D₄ परस्पर्शम्. Ñ₁ D₄.₆.₇ अमन्यत (for अबुध्यत). —For 47^{c-d}, Ś Ñ₂ V B₁.₂.₄ D₁–₃.₈.₁₂.₁₃ subst.:

1058* विबुद्धः कुम्भकर्णोऽसौ भीमाक्षो भीमदर्शनः।

[B₄ बुबुधे (for विबुद्धः). V B₂.₄ वै (for ऽसौ). B₂ om. (hapl.) भीमाक्षो. B₁ D₁.₃ -विक्रमः (for -दर्शनः). Ś Ñ₂ D₂.₈.₁₂ भीमो(Ś₁ °म-) भीमपराक्रमः (for the post. half).]

48 G (ed.) om. 48. —^{a}) Ñ₁ V B₂–₄ D₄.₁₃ हन्यमानो; G₁ पात्यमानो; Cg as in text (for पात्यमानैर्). Ñ₁ D₄ -कल्पैर् (for -वृक्षैर्). Ś D₁–₃.₈.₁₂ L (ed.) स हन्यमानश्च महेंद्र(D₁ °हाप्र; L [ed.]°हीध्र) वृक्षैर्(D₃ महाप्रहारैर्); Ñ₂ स हन्य * * * * * * * * र् (illeg.). —^{b}) B₂ न चिंतयंस् (for अचिन्तयंस्). Ś Ñ₁ B₄ D₃.₈.₁₂ तुमुल-; Ñ₂ V₁.₂ B₃ अतुल-; D₂ मुशल-; D₆ T₂.₃ M₃ विपुल-; M₁.₂ विविधान् (for विपुलान्). D₁.₁₃ अचिंतयानस्तुमुलान्प्र(D₁₃ °लप्र)हारान्; D₄ अचिंत्य नानामुशलप्रहारान्. —For 48^{a-b}, B₁ subst.:

1059* स वध्यमानोऽपि महाप्रवृद्धै-
र्न चिन्तयामास महाप्रहारान्।

—^{c}) Ś D₁–₃.₈.₁₂ क्षुद्बल-; Ñ V B₂.₄ क्षुत्परि-; B₁ क्ष्वेडित- (for क्षुद्भय-). Ñ₁ सन् (for च). B₃ निद्राक्षयात्सं-परिपूरिताक्षोः; D₄ निद्राक्षयात्मा च निपीडितांगः; D₁₃ निद्राक्षयात्कामबलप्रपीडितो. —^{d}) D₄ स (for वि-).

49 ^{b}) D₇.₁₀.₁₁ जितवज्र-; Cg as in text (for गिरिशृङ्ग-). D₉ -कल्पौ; T₂ -सालौ (sic); Cg as in text (for -सारौ). —For 49^{a-b}, Ś Ñ V B D₁–₄.₈.₁₂.₁₃ subst.:

1060* महाभुजौ वासुकितक्षकाभौ
विक्षिप्य वीरो गिरिशृङ्गसारौ।

[(l. 1) Ś₁ -[आ]ख्यौ; Ñ₂ -[उ]पमौ (for -[आ]भौ). Ñ₁ D₄ तक्षकसंनिकाशौ; V₃ तक्षकवासुकिभाव्(sic). —(l. 2) Ñ B₂.₃ D₄ निक्षिप्य; V₂.₃ उत्क्षिप्य. Ñ V₁.₃ B₂.₃ D₄ वृत्तौ; B₁.₄ D₂.₁₂ वीरौ (for वीरो). V₂ -वृत्तौ (for -सारौ).]

—^{c}) B₄ निवृत्य; D₄ M₃ विवृत्त-; T₁ * * त्य (damaged) (for विवृत्य). D₄ -मुखांतं(sic) (for -मुखाभं). —^{d}) D₇ निशाचरेंद्रो. Ś D₈.₁₂ विजृंभन्; B₁ व्यजृंभत्; B₄ विजृंभे (sic); D₂ T₂ G₃ M जिजृंभे (sic); D₃ जजृंभ (for जजृम्भे). Ñ V B₂.₃ D₁.₄.₁₃ निशाचरेंद्रो(D₁₃ °रेशो) विकृतं व्य(V₁.₃ D₁ वि)जृंभत्(V₂ B₂.₃ D₁₃ °भत).

50 ^{a}) Ś B₂ D₂.₈.₉.₁₃ सं(B₂ वि; D₉ ते [sic]; D₁₃ [ए]वं)जृंभमाणस्य; Ñ V B₃.₄ D₁.₃.₄ तज्जृंभमाणस्य; D₆ जृंभयमाणस्य; T₂ G₃ चा(G₃ वा)जृंभमाणस्य; Cm.g.k.t as in text (for जाजृम्भमाणस्य). B₁ विजृंभमाणस्य तस्य; G₁ तत्तथा जृंभमाणस्य. ❀ Cg: जाजृम्भमाणस्य। यङ्लुक्यात्मनेपदरुगागमाभावावार्षौ।; so also Ck. ❀ —^{c}) B₂.₃ ददृशुर्; D₁.₃ ददर्श (for ददृशे). B₄ -शिखरे; D₂ -शृंगांते. —^{d}) Ś Ñ V B₁–₃ D₂.₄.₆.₈.₁₂ दिवाकरमिवोदि(Ñ₂ V₃ B₂ °त्थि)तं.

51 ^{a}) Ñ₁ D₄.₅.₇.₉–₁₁ T G₂.₃ M₃.₅ स जृंभमाणो. —^{b}) D₉–₁₁ G₁ प्रबुद्धस्तु; Cg as in text (for प्रतिबुद्धो). Ś V₃ B₄ D₈.₁₂ प्र(Ś B₄ प्रा)बुध्यत स(B₄ om. [subm.]) राक्षसः; Ñ V₁.₂ B₁–₃ D₁–₄.₁₃ प्रत्य(V₂ °ति)बुध्यत राक्षसः; D₇ प्रबुद्धो रजनीचरः. —^{c}) Ś B₁.₄ D₇.₈.₁₀.₁₂.₁₃ निःश्वासश्; D₉ *श्वासश्. Ñ₂ V₁.₃ B₂.₃ नि(B₂.₃ निः)श्वासाश्चास्य संजग्मुः. —^{d}) Ś V₂ B₁.₄ D₁.₃.₈.₁₂.₁₃ सं(D₁₂ सां)वर्तक इवान(Ś₁ V₂ D₈.₁₂ °नि)लः; Ñ₁ D₂.₄ संवर्त इव मारुतः(D₂ चानिलः; D₄ पावकः); G₃ पर्वता * * * * तः (damaged).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद्बभौ ।
तपान्ते सबलाकस्य मेघस्येव विवर्षतः ॥ ५२

तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी ।
ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ५३

आदद्भुक्षितो मांसं शोणितं तृषितोऽपिबत् ।
मेदःकुम्भं च मद्यं च पपौ शक्ररिपुस्तदा ॥ ५४

ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः ।
शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ५५

G. 6. 37. 83
B. 6. 60. 64
L. 6. 38. 81

52 V3 om. 52^{ab}. —^{b}) B3 सितदंष्ट्रस्य (for कुम्भकर्णस्य). Ś Ñ V1.2 B D1-4.8.12.13 संभ्रमौ. —^{cd}) B2 D4 उपांते (for तपान्ते). Ś Ñ V B1.3.4 D1.2.8.12.13 L (ed.) उपां(Ś2 Ñ1 D1.13 तपां; B4 D2 कल्पां; L [ed.] तापां)ते सर्वलोकस्य (for °). Ñ V1.2 B2 विवर्षिणोः; B4 D4.12 विवर्षिणः; D3 विवर्धतः; G M5 सविद्युतः (for विवर्षतः). D9 घनस्येवाभिवर्षतः (for °). D6.7.10.11 T2.3 युगांते सर्वभूतानि कालस्येव दिधृ(T3 °द)क्षतः.—After 52, Ñ V B2 D2.4.13 ins. 1067*; while G1 ins.:

1061* ततः पर्वतसंकाश उत्पतन्समुदैक्षत ।

53 ^{a}) D6 M5 [अ]ग्निदीप्ति-; D9-11 T2 G [अ]ग्निदीप्त- (by transp.) (for दीप्ताग्नि-). ❀ Cr : तस्याग्निदीप्तसदृश इति पाठः।; Ct : अग्निदीप्तसदृशे दीप्ताग्निसदृशे. ❀ —For 53^{ab}, Ś Ñ V B D1-4.8.12.13 subst.:

1062* दीप्ताम्रास्यजिह्वस्य विद्युत्सदृशपक्ष्मणी ।

[B1-3 D2 -ताम्राक्ष- (for -ताम्रास्य-). D4 दीप्ताम्रास्यमां जिह्वां (for the prior half). B3 D3 -पक्ष्मणः (for -पक्ष्मणी). B1 विद्युत्समप्रकाशिनी (for the post. half).]

—V3 om. 53^{cd}. —^{c}) Ś Ñ1 B1.4 D2.8.12 भीमे ददृशतुर्नेत्रे; Ñ2 V1.2 B2.3 D4 भीमे च(D4 समीपे) ददृशुर्नेत्रे; D1.3.13 भीमनेत्रे व्यदृश्येतां.—After 53, D5-7.9-11 S ins.:

1063* ततस्त्वदर्शयन्सर्वान्भक्ष्यांश्च विविधान्बहून् ।
वराहान्महिषांश्चैव स बभक्ष महाबलः ।

[(l. 1) G3 तत्र (for ततस्). D7 भक्षान्; T2.3 तस्य; Cg as above (for सर्वान्). M1.2 कुंभकर्णस्ततो दृष्ट्वा (for the prior half). D6 भक्षांश्; D7 सर्वांश्. G M5 transp. सर्वान् and भक्ष्यांश्.—(l. 2) G1 वराह-. D7.9.11 बभक्ष स (by transp.); D10 बभक्ष च; G3 संबभक्ष (for स बभक्ष). ❀ Cg : बभक्ष भक्षयामास. ❀]

54 Ñ2 om. 54. B3 om. 54^{ab}. —^{a}) D5.6 T G3 M3.5 अदन् (for आदद्). Ś Ñ1 B1.4 D1-4.8.12.13 आददे क्षुधितो(Ś1 °तं[sic]; Ñ1 D4 संस्कृतं) मांसं. —^{b}) Ś D8.12 मद्यं च (for शोणितं). D2.13 हृषितो; D4 तृप्यतः (for तृषितो). Ñ1 B4 D4 पपौ; D5.6.13 T1 G1 M3 पिबन्. G3 शोणितांश्च बहून्पिबन्. —For 54^{ab}, V B2 subst.; while D9 ins. after 81:

1064* आददे क्षुधितः क्षिप्रमपिबच्छोणितं तदा ।

[V2.3 तथा (for तदा).]

—Then D9 cont.:

1065* मेदःकुम्भांश्च मद्यं च.

—Thereafter D9 further cont. 1076*.

—V3 om. 54^{cd}. —^{cd}) Ś Ñ1 V1.2 B D1-4.8-13 T1 G M3.5 -कुंभांश्. V1.2 B3 D9-11 G M5 मद्यांश्च. Ś2 ततः; Ñ1 D4 T3 तथा (for तदा). D7 मेदःकुंभान्मद्यकुंभान्कुंभकर्णस्तदापिबत. —After 54, Ñ1 B2 D4.13 ins.; V3 cont. after 1064* (owing to om.):

1066* भुक्त्वा चान्नं बहुविधं किंचिद्धृष्टमना अभूत ।

[B2 स्वादु (for चान्नं). V3 भवत; B2 सकृत; D4 ह्यभूत (for अभूत). D13 किंचित्तृप्त इवाभवत (for the post. half).]
—After 54, V1.2 read 82 for the first time, repeating it in its proper place.

55 D4 om. 55-59. —^{a}) S D8.12.13 तृप्तम्; B4 सुप्तम् (for तृप्त). L (ed.) इव (for इति). —^{b}) Ś Ñ V B2.4 D1-3.8.12.13 समीयुस्ते; B1 समीपं ते (for समुत्पेतुर्). —V3 om. 55^{c}-56. —^{c}) Ñ1 प्रणिपत्य (for च प्रणम्य). —^{d}) D6 परिवारयन्. —After 55, B3 D5-7.9-11 S ins.; while Ñ V B2 D2.4.13 ins. after 52:

1067* निद्राविशदनेत्रस्तु कलुषीकृतलोचनः ।
चारयन्सर्वतो दृष्टिं तानुवाच निशाचरान् ।

[(l. 1) Ñ1 D4 -विमुक्त-; G2 M1.2.5 -विवश- (for -विशद-). M1.2 -गात्रस् (for -नेत्रस्). Ñ1 D4 स (for तु). Ñ2 V B2.3 D2.13 तद्वि(D13 तं वि)निद्रं(B2.3 °नेत्रं) ततो रक्षः (for the prior half). Ñ V B2.3 D2.4.13 कषायीकृतलोचनं (Ñ1 D4 °नः) (for the post half).—(l. 2) Ñ1 B2 D2.4 विहरत् (sic); Ñ2 V2.3 B3 वितरत् (sic); D13 विहसन् (for चारयन्). M1-3 ददर्श (for उवाच). G3 निशाचरः.]

—Thereafter Ñ V B2 D2.4.13 (l. 1 only) cont.; while Ś B4 D1.3.8.13 ins. l. 2 after 57; B1.3 ins. l. 2 after 58 and B3 alone subst. l. 1 for 57^{ab}:

1068* किं निमित्तमहं सुप्तो भवद्भिः प्रतिबोधितः ।
कच्चिद्राक्षसराजस्य न खलु प्रियमागतम् ।

[(l. 1) D4 प्राप्तैर् (for सुप्तो). D2 परि- (for प्रति-). —(l. 2) D3 कश्चिद् (for कच्चिद्). Ś2 V3 B1-3 D1-4.8.13 [अ]प्रियम् (for प्रियम्).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 37. 84
B. 6. 60. 66
L. 6. 38. 82

स सर्वान्सान्त्वयामास नैर्ऋतान्नैर्ऋतर्षभः ।
बोधनाद्विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ५६
किमर्थमहमाहत्य भवद्भिः प्रतिबोधितः ।
कच्चित्सुकुशलं राज्ञो भयं वा नेह किंचन ॥ ५७
अथ वा ध्रुवमन्येभ्यो भयं परमुपस्थितम् ।
यदर्थमेव त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ५८
अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् ।
पातयिष्ये महेन्द्रं वा शातयिष्ये तथानलम् ॥ ५९
न ह्यल्पकारणे सुप्तं बोधयिष्यति मां भृशम् ।
तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ६०

एवं ब्रुवाणं संरब्धं कुम्भकर्णमरिंदमम् ।
यूपाक्षः सचिवो राज्ञः कृताञ्जलिरुवाच ह ॥ ६१

न नो देवकृतं किंचिद्भयमस्ति कदाचन ।
न दैत्यदानवेभ्यो वा भयमस्ति हि तादृशम् ।
यादृशं मानुषं राजन्भयमस्मानुपस्थितम् ॥ ६२

---

56 V_3 $D_{2.4}$ om. 56 (for V_3 D_4, cf. v.l. 55). —[a]) B_1 सर्वान्स (by transp.). —[b]) $\tilde{N}_1$ D_6 राक्षसान्; B_2 marg. (for नैर्ऋतान्). $\tilde{N}_1$ राक्षसर्षभः; $\tilde{N}_2$ D_1 नैर्ऋताधिपः. —B_3 om. 56^{c-d}. —[c]) D_9 विबोधनाद् (hypm.). D_8 om. श्चापि. $M_{1.2}$ [ए]तान् (for [अ]पि). B_2 *** द्विस्मितश्चासौ.

57 D_4 om. 57 (cf. v.l. 55). For 57^{a-b}, B_3 subst. l. 1 of 1068*. —[a]) $\acute{S}_2$ इदम् (for अहम्). $\acute{S}$ $B_{1.4}$ $D_{1-3.8.12.13}$ आगम्य; D_5 M_5 आवृत्य. —[b]) $\tilde{N}_1$ बहुमिः (for भवद्भिः). —V_3 G_3 om. (hapl.) 57^{c}–58. —[c]) $\acute{S}$ $D_{8.12}$ कच्चिद्धि; $\tilde{N}_1$ B_4 D_2 कच्चिच्च; D_6 कच्चित्तु; M_5 किंचित्सु- (for कच्चित्सु-). —[d]) D_{12} कथं (sic) (for भयं). $B_{2.4}$ वो (for वा). $\tilde{N}_2$ $V_{1.2}$ $B_{2.4}$ D_5 T_1 G_2 विद्यते (for किंचन). M_3 भयवानेष वा न किं. —After 57, $\acute{S}$ B_4 $D_{1.3.8.13}$ ins. l. 2 of 1068*.

58 V_3 D_4 G_3 om. 58 (for V_3 G_3, cf. v.l. 57 and for D_4, cf. v.l. 55). D_{12} om. 58. B_4 om. 58^{a-b}. —[a]) $\tilde{N}_2$ $V_{1.2}$ B_2 अस्माकं (for अन्येभ्यो). —[b]) T_3 परं भयम् (by transp.). $\acute{S}$ $\tilde{N}_1$ B_1 $D_{1-3.8.13}$ परमदारु(D$_{13}$ °कार)णं; $\tilde{N}_2$ V_1 B_2 G_1 M_3 परममुत्थितं. —After 58^{a-b}, $\tilde{N}_1$ ins.:

1069* उपस्थितं न जानामि राक्षसेन्द्रस्य धीमतः ।

—[c]) $D_{6.7.9}$ $T_{2.3}$ $G_{1.2}$ M एवं (for एव). G_1 त्वरितं. $\acute{S}$ $\tilde{N}_2$ $V_{1.2}$ $B_{1.2.4}$ $D_{1-3.8.13}$ यदर्थं($\tilde{N}_2$ $V_{1.2}$ D_3 °हं) त्वरितैः (V_2 °तः; B_4 °तं) सर्वैर्; $\tilde{N}_1$ यथाहमेव त्वरितैर्. —After 58, $\tilde{N}_1$ repeats 60 (var.); $B_{1.3}$ ins. l. 2 of 1068*.

59 D_4 om. 59 (cf. v.l. 55). $B_{1.3}$ om. 59^{a-b}. —[a]) D_{12} कश्चिद् (for अद्य). D_5 कच्चि * कुशलं राज्ञो. —[b]) $\acute{S}_2$ $\tilde{N}_1$ $V_{2.3}$ $B_{2.4}$ $D_{1-3.5.8.12}$ उत्साद्यामि; D_6 तं नाशयामि. —[c]) $\acute{S}$ $D_{2.8.12}$ पोथयिष्ये; $\tilde{N}$ V B_2 D_1 G (ed.) शा(G [ed.]घा)तयिष्ये; $B_{1.3}$ $D_{6.7.9-11}$ दा(D_6 वा)रयिष्ये (for पातयिष्ये). V_3 B_2 वै; D_{13} वो (for वा). —[d]) $B_{1.3}$ D_{9-11} शीतयिष्ये; D_6 T_2 (after corr. *sec. m.* as in text).$_3$ शांतयिष्ये; Cg as in text (for शातयिष्ये). D_6 तदानलं; T_2 दवानलं; G_2 तथानिलं; $M_{1.2}$ [ऽ]थवानलं. $\acute{S}$ $\tilde{N}$ V B_4 $D_{1-3.8.12.13}$ भक्षयिष्यामि वा(D_2 चा)नलं($\tilde{N}_1$ वानरान्; $V_{2.3}$ वानरं; $D_{1.13}$ चांतकं); B_2 भक्षयिष्येपि चानलं; G (ed.) शातयिष्यामि वा वनं.

60 D_{12} om. 60. $\tilde{N}_1$ repeats 60 (var.) after 58, reading it here for the first time. —[a]) $\acute{S}_2$ $D_{8.13}$ ह्यल्पे (for ह्यल्प-). $\acute{S}_1$ D_9 न ह्यत्रा($\acute{S}_1$ °ल्पे)कारणं सुप्तं. —[b]) $\acute{S}$ $D_{2.8}$ प्रबोधयति; B_1 D_5 बोधयिष्यंति. $\acute{S}$ $B_{1.4}$ $D_{1-3.8.13}$ मामिह; $\tilde{N}_1$(both times) D_{4-6} T G_1 M_3 मां(D_6 T_3 मे) गुरुः; $\tilde{N}_2$ मामसौ; V_3 B_2 D_{9-11} मादृशं; D_7 मां प्रभुः; $M_{1.2}$ मा भृशं (for मां भृशम्). —[c]) B_4 $D_{1.3.13}$ [अ]द्य (for [अ]र्थ-). T_3 -सत्त्वेन. $\acute{S}$ $D_{2.8}$ तत्क (D$_8$ तान्क)थ्यतां यथार्थेन(D_2 °र्हेण); $\tilde{N}$($\tilde{N}_1$ first time) V $B_{2.3}$ D_4 तदिहाख्यात तत्त्वेन; $\tilde{N}_1$(second time) B_1 तत्त्वमाख्या(B_1 °दाख्याय)त तत्त्वेन. —[d]) $\acute{S}$ $\tilde{N}_1$(second time) $D_{2.8}$ मम (for मत्प्र-).

61 D_4 om. 61–72. —[a]) V_3 $B_{1.2.4}$ G_3 संक्रुद्धं; D_8 संरुद्धं (for संरब्धं). —[b]) $\tilde{N}_1$ V $B_{2.4}$ D_5 T_1 M_3 महाबलं (for अरिंदमम्). —[c]) D_6 यूपाख्यः. D_{13} रक्षः (for राज्ञः). —[d]) $\acute{S}$ $D_{8.12}$ बद्ध- (for कृत-). $\tilde{N}_2$ V B_{2-4} $D_{7.9-11}$ G_1 अभाषत (for उवाच ह).

62 D_4 om. 62 (cf. v.l. 61). —[a]) B_1 हि (for नो). D_6 देवैः कृतं; $T_{2.3}$ $M_{3.5}$ दैव°; G_2 देवभयं (for देवकृतं). —[b]) $\acute{S}$ $\tilde{N}_2$ V $B_{1.2.4}$ $D_{1-3.8.12.13}$ निशाचर (for कदाचन). —After 62^{a-b}, $\tilde{N}_1$ V $B_{2.3}$ $D_{5-7.9-11.12}$ S ins.:

1070* मानुषान्नो भयं राजंस्तुमुलं संप्रबाधते ।

[$V_{1.2}$ B_2 D_{13} वै (for नो). V B_2 D_{13} राज्ञस् (for राजंस्). $\tilde{N}_1$ G_1 संप्रवर्तते; $V_{1.2}$ B_2 D_{13} समुपस्थितं; V_3 समपद्यत; G_3 संप्रबोधने.]

—D_{13} om. $62^{c-d-e-f}$. —[c-d]) $\acute{S}$ $B_{1.4}$ $D_{1-3.8.12}$ गंधर्व-; G_1 न देव- (for न दैत्य-). B_3 D_{9-11} $G_{1.3}$ M_5 न($G_{1.3}$ M_5 हि) नः क्वचित् (for हि तादृशम्). $\acute{S}$ $\tilde{N}$ V $D_{1.2.8.13}$ कुतः($\tilde{N}_2$ V जातं) पतग($\acute{S}_2$ °रम; V_2 °न्नग)भोगिनः(D_2 °भिः); $B_{1.2}$ क्षतः पाताल(B_1 पतग)भोगिनः; B_4 D_3 कुतः पन्नगभोगिनां (for [d]). $M_{1.2}$ दैत्यदानवदेवेभ्यो भयं नास्तीह

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

वानरैः पर्वताकारैर्लङ्केयं परिवारिता ।
सीताहरणसंतप्ताद्रामान्नस्तुमुलं भयम् ॥ ६३
एकेन वानरेणेयं पूर्वं दग्धा महापुरी ।
कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ६४
स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः ।
मृतेति संयुगे मुक्ता रामेणादित्यतेजसा ॥ ६५
यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः ।
कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ६६
स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराजयम् ।
कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत् ॥ ६७
सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम् ।
राघवं च रणे हत्वा पश्चाद्रक्ष्यामि रावणम् ॥ ६८
राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः ।
रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ६९
तत्तस्य वाक्यं ब्रुवतो निशम्य
सगर्वितं रोषविवृद्धदोषम् ।
महोदरो नैर्ऋतयोधमुख्यः
कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ७० G. 6. 37. 98 B. 6. 60. 81 L. 6. 38. 96

न: क्वचित्. —[e]) Ś Ñ V B1.2.4 D1–3.6.8.12 मानुषाद्राज्ञो (Ñ1 °माद्; D6 °जन्). —[f]) Ś B1.4 D2.3.8.12 घोरम्; Ñ V B2 एतद् (for अस्मान्). G (ed.) समुत्थितं (for उपस्थितम्). D1 भयं समुपतस्थितं (sic).

63 D4 om. 63 (cf. v.l. 61). —[b]) Ś D8.12 लंका सु-; B1 D2.3 लंका सं-; B4 पुरीयं (for लङ्केयं). Ñ2 V2.3 B2 अभिचालि(Ñ2 °वारि; B2 °धावि)ता (for परिवारिता). D1 लंका संपरिवर्तिता. —[c]) Ś B1.4 D1–3.8.12.13 -दुःखार्तात्; Ñ2 D9 -संप्राप्तात्; B2 -संतापान् (for -संतप्तात्). —[d]) Ś V1 B1.4 D1–3.8.12.13 परमं; Ñ2 V2.3 सुमहद् (for तुमुलं). B2 नः प्रभो सुमहद्भयं.

64 D4 om. 64 (cf. v.l. 61). —[e]) B2 [ऽ]भिहतश् (for निहतश्). D5 [अ]स्य (for [अ]क्षः). Ś B1.4 D1–3.8.12.13 अक्षः कुमारो नि(Ś2 °रोभि)हतो. —[a]) G1 सकुंजरं. Ś Ñ2 V B1.2.4 D1–3.8.12.13 मंत्रिपुत्राः(D2 °त्रः) सकिंकराः(D2 °रः).

65 D4 om. 65 (cf. v.l. 61). —[ab]) Ñ1 [ए]व; B2.3 [अ]सौ (for [अ]पि). D13 अयमिच्छुस्तथोद्धर्तुं (for [a]). D5 देवकंटकं; D9 देवकंटकैः. Ś B1 D1–3.8.12 स्व(D1 अ)यमिच्छति चोद्धर्तुं पौलस्त्यं देवकंटकं. —[c]) D6.7.9–11 T3 G1 M5 व्रज; Cm.g k as in text (for मृत). Ś Ñ V B D1–3.8.12.13 मृतकल्पो रणे मुक्तो(Ś D2.8.12 °णादार्तो; V3 B1.4 D1.13 °णान्मुक्तो). ❀ Cr: संयुगे मुक्त इति पाठः।; Cm: मृतेति मृतप्राय इति मत्वेत्यर्थः।; Cg: मृतेति। हे मृतेत्युक्त्वा। वस्तुतस्तु मृतेत्यविभक्तिकनिर्देशः। मृत इति कृत्वेत्यर्थः। मृतप्राय इति मत्वेत्यर्थ इत्यप्याहुः।; Ck: मृत जीवन्मृत इत्युक्त्वा. ❀ —[a]) Ś Ñ V1.2 B D1–3.8.12.13 [अ]मित- (for [आ]दित्य-). V3 D5.7.9–11 T1 G1.3 M5 -वर्चसा (for -तेजसा). G2 रावणो दित्यतेजसा (sic).

प्रच्छादयत्येष हि राक्षसेन्द्रः
सर्वा दिशः सायकवृष्टिजालैः ।
एतच्च सर्वं पतिताग्र्यवीरं
न भ्राजते वानरराजसैन्यम् ॥ ४६

आवां तु दृष्ट्वा पतितौ विसंज्ञौ
निवृत्तयुद्धौ हतरोषहर्षौ ।
ध्रुवं प्रवेक्ष्यत्यमरारिवास-
मसौ समादाय रणाग्रलक्ष्मीम् ॥ ४७

ततस्तु ताविन्द्रजिदस्त्रजालै-
र्बभूवतुस्तत्र तदा विशस्तौ ।
स चापि तौ तत्र विषादयित्वा
ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ४८

12.13 नष्टरूपो; D4 राक्षसात्मजो; D6 T2.3 भीमरूपो (for नष्टदेहो). —D4 om. 44^{cd}. —^{a}) B4 विहंतुम्. Ś Ñ V1.3 B D2.3.8.12.13 अस्त्रपाणिः; D1 आत्तशस्त्रः (for उद्यतास्त्रः).

45 V2 om. 45 (cf. v.l. 38). —^{a}) B4 D1.5–7.10.12 G3 M1.2 स्वयंभुर्; Cg.t as in text (for स्वयंभूर्). B2.3 अचिंत्यं; D4 विक्षपन् (sic); D13 विचिंत्य (for अचिन्त्यो). —^{b}) Ñ2 V1.3 B D10.11.13 तस्य; M5 यद् (for यस्य). D13 M1.2 [इ]दम् (for [ए]तद्). M3 योद्य; Cg.t as in text (for योऽस्य). Ñ V1.3 B D1.4.13 प्रभवत्यमोघं (D1 °चिंत्यं); G2 प्रभवप्रभावं (for प्रभवश्च योऽस्य). Ś D2.3.8.12 मन्ये तदस्त्रं (D2 °देकं) हुतभुक्च (D2.3.8 °क्त-) देवः; D6 T2.3 ददेस्त्रमस्मै सुमहत्प्रभावं (D6 °वः). —After 45^{ab}, Ś B3 D2.3.8.12 L (ed.) ins.; while V3 B1 ins. after 45:

1349* त्रयः समस्ता मम वीर्यधैर्ये
मायाबलाच्छादयितुं रणाग्रे ।

[(l. 1) B1.3 एषः (sic) (for त्रयः). B3 समेता; L(ed.) समर्था (for समस्ता). V3 B1.3 वीर्यधैर्यं; D3 धैर्यवीर्यं (for वीर्यधैर्ये). B1 (m. also) नयः समर्थो एषोंबरस्थो (sic). —(l. 2) V3 महा- (for माया-). Ś D2.8.12 छादयतो; V3 B1 D3 छादयते (sic). V3 B1 (m. also रणास्त्रैः) बलाग्रे (for रणाग्रे). B3 मायाबलाच्छादति रावणांते (sic).];

while D4 ins. after 45^{ab}:

1350* तस्यैव बाणैः पतिताश्च वीरा-
स्ते वानरा भीमबलाः सहस्रशः ।

—Ś D2–4.8.12 om. 45^{cd}. —^{c}) Ñ1 V3 B1 D13 G1 M5 -[अ]भिपा (V3 B1 D13 °घा)तांस्; D7.10.11 Ct -[अ]वपातं; D9 -प्रपातं (for -[अ]वपातांस्). Ñ V1 B1.3.4 D1.10.13 T2.3 भी(D10 T2.3 धी)मान्; B2 सर्वान्; D7.9 भीमं; M5 भूमि (sic); Cg.t as in text (for धीमन्). —^{d}) Ñ2 B2 मुहूर्तम्; B1 निहत्य सो; D13 महायशो (for मया सह). D9 मया समागम्य सहस्व धैर्यात्.

46 V2 om. 46^{abc} (cf. v.l. 38). —^{a}) Ś1 B2.3 D1.7.9–11 प्रच्छादयतु. V3 B1 D8.12 [ए]व (for [ए]ष). Ś2 D8.12 च; D5 om. (for हि). M1.2 रविप्रकाशैः (for हि राक्षसेन्द्रः). —^{b}) D9–11 सर्वाधिकः; G1 सदा दिशः (for सर्वा दिशः). Ś B1 D2.3.8.12.13 -शूल-; D1 -सर्व- (for -वृष्टि-). —^{c}) D2 शूर (for सर्वं). Ñ V1.3 B2–4 D6.7.10.11 T2.3 G1.2 M3 Ct -शूरं; G3 -वीर्यं (for -वीरं). Ś B1 D2–4.8.12 प्रवि(D2.3 प्रति; D4 परि)भग्नशूरं(D3 °सैन्यं); D1.5.9 M5 पतिताग्रसा(D5 M5 °वी; D9 °शू)रं; D13 पतिताग्रशूलं. —^{d}) Ś D2.3.6.8.12 T2.3 प्र(D3 सं)मुह्यते; V3 विसृज्यते; B1 प्रमथ्यते (for न भ्राजते).

47 B3 repeats (m.) 47^{ab} after 1351*. —^{a}) Ś D8.12 च (for तु). B3 (second time) जित्वा (for दृष्ट्वा). —^{b}) D5 त्रिवृद्ध- (for निवृत्त-). M5 ब्रह्मास्त्रबद्धौ. B2 त्वति-; D5 T1 M3 गत-; G (ed.) युधि (for हत-). V2 B2 -भीम-वेगौ(B2 °षौ); D6 G3 -रोमहर्षौ; D7.9–11 G1.2 Ct -हर्षरोषौ (by transp.) (for -रोषहर्षौ). Ś V3 B1.3(first time) D2–4.8.12 निवृत्त(V3 B1.3 D4 विवृद्ध)युद्धोत्तमजातहर्षः (B3 °भीमवेषौ); Ñ V1 B3(second time).4 D13 निवृत्तयुद्धोद्य (Ñ1 B3.4 °युद्धोद्ध; D13 °वेगोद्ध)तभीमवेगौ(B3.4 °गः). —^{c}) D1 [अ]मरारिद्य (for [अ]मरारिवासम्). Ñ V1.2 B2.3 D13 ध्रुवं परित्यज्य सुरारिरावाम्(Ñ1 V2 °वीरो); B4 ध्रुवं पराजित्य हरीन्सुरारिर्. —^{d}) B4 आवां; D1 लंकां; D13 अस्त्रे (for असौ). D7.9–11 G1 Ct समासाद्य (for समादाय). Ñ V1.2 B2.3 D6.7.10 T2.3 G2 M3 रणाग्र्य-; B4 समग्र-; Cv.m.g.t as in text (for रणाग्र-). —For 47^{cd}, Ś V3 B1 D2–4.8.12 subst.; while B3 ins.(marg.) after 47^{ab} (first occurrence):

1351* प्रयाति भीमः पुनरेव लङ्कां
प्रहर्षयन्राक्षससैन्यमेतत् ।

[(l. 1) D4 वीरः (for भीमः).]

—Thereafter B3 repeats(m.) 47^{ab}.

—After 47, Ñ V1.2 B2–4 ins.:

1352* प्रदास्यते राक्षसपुंगवाय
समुद्धतः शक्रसुरारिरद्य ।

[(l. 2) Ñ B3 सुहृद्वृतः; B2 स्वकैर्वृतः (for समुद्धतः).]

48 ^{a}) Ś Ñ2 V B1.3.4 D1–4.8–12 G1.2 इंद्रजितोस्त्र- (G2 °तस्तु) (for इन्द्रजिदस्त्र-). —^{b}) D1 तौ च (for तत्र).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

स तत्तदा वानरराजसैन्यं
रामं च संख्ये सह लक्ष्मणेन ।
विषादयित्वा सहसा विवेश
पुरीं दशग्रीवभुजाभिगुप्ताम् ॥ ४९

G. 6. 52. 52
B. 6. 73. 70
L. 6. 53. 49

इति श्रीरामायणे युद्धकाण्डे षष्टितमः सर्गः ॥ ६० ॥

M3 तथा (for तदा). Ś Ñ V D3.8.12 T2.3 विषण्णौ; B1 विशीर्णौ; B2.4 विसंज्ञौ; D2 विभीषणौ; D4 विपन्नौ; D13 विवर्णौ; Cg.k.t as in text (for विशस्तौ). —[c]) B2 शराचितौ (for स चापि तौ). Ñ2 V1.2 B2–4 D13 विषाद्य सद्यो; G1 M3.5 Cg विदर्शयित्वा (for विषादयित्वा). Ś V3 B1 D2.3.8.12 स राघवौ तौ बलिनौ विषाद्य.

49 [a]) V1.2 B4 D6.9–11 T2.3 ततस् (for स तत्). D2 राक्षस- (for वानर-). D5.9–11 T1 G1.3 -सैन्यमेवं (for -राजसैन्यं). —[b]) D1 तु (for च). Ś Ñ V B D2–4.8.12.13 T2.3 सरामसौमित्रिमथा(Ñ1 D13 °त्रिणम; Ñ2 °त्रिमतो; V1 B2.3 °त्रिं ततो; V2 B4 °त्रिकम; V3 B1 °त्रिं तथा)प्रमेयं. —[c]) Ś B1 D2.3.8.12 विषाद्य(B1 [marg. also] °मोह्य; D3 °षह्य) सर्वं (B1 दीनं); Ñ2 V B2–4 विषाद्य सद्यः (V3 सैन्यं); D9–11 निषू(D11 °षे [sic])दयित्वा (for विषादयित्वा). —[d]) B1 लंकां (for पुरीं). Ś D2.8.12 -[अ]ग्र- (for -[अ]भि-). B1 -पालितां (for -गुप्ताम्). —After 49, Ś V3 B1 D2.3.6.8–12 T2.3 ins.; D13 cont. wrongly after l. 1 of 1354*:

1353* संस्तूयमानः स तु यातुधानैः
पित्रे च सर्वं हृषितोऽभ्युवाच ।

[(l. 1) V3 B1 D13 युधि; D3 स च (for स तु). —(l. 2) Ś D2 स्म; B1 हि; D8.12 स (for च). D8 हृषितेति. D13 महाबलैः संयुगजातहर्षैः.]; while Ñ V1.2 B2–4 D4.13 ins.:

1354* ततो रावणमासीनमभिवाद्य कृताञ्जलिः ।
आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ।
स हर्षवेगानुगतान्तरात्मा
श्रुत्वा गिरस्तस्य महारथस्य ।
जहौ ज्वरं दाशरथेः समुत्थं [5]
प्रतीतचित्तश्च ननन्द पुत्रम् ।

[(l. 1) V1 आसाद्य (with hiatus) (for आसीनम्). —After l. 1, D13 cont. wrongly 1353*. —(l. 3) B2.3 -वेगाद् (for -वेगानु-). —(l. 4) B2 गिरं. —(l. 6) Ñ2 B2 -चेताश् (for -चित्तश्). D13 तु (for च).]

Colophon: Ś B1 D2.8.12 om. (cont. the Sarga). —*Kāṇḍa name*: V3 D6 om.; Ñ B2–4 D4.13 लंका°. —After Kāṇḍa name, D13 ins. युद्धपर्वणि. —*Sarga name*: Ñ1 इंद्रजित्कर्मातिशयसैन्यमोहनं; Ñ2 V1.2 B2–4 D3.9 इंद्रजिद्युद्धं; V3 इंद्रजिन्मोहनं; D1 इंद्रजिद्विक्रमः; D4 सैन्यसंमोहनं; D13 इंद्रजित्सैन्यमोहनं. —*Sarga no.* (figures, words or both): Ñ1 V3 B2 D4.13 om.; Ñ2 53; V1 52; V2 51; B3 46; B4 D9 50; D1 54; D3 55; D5–7.10.11 T1 G M3.5 73; T2 78; T3 80; M1.2 74. —After colophon, G M1.2.5 conclude with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

६१

G. 6. 53. 1
B. 6. 74. 1
L. 6. 53. 50

तयोस्तदा सादितयो रणाग्रे
मुमोह सैन्यं हरियूथपानाम् ।
सुग्रीवनीलाङ्गदजाम्बवन्तो
न चापि किंचित्प्रतिपेदिरे ते ॥ १
ततो विषण्णं समवेक्ष्य सैन्यं
विभीषणो बुद्धिमतां वरिष्ठः ।
उवाच शाखामृगराजवीरा-
नाश्वासयन्प्रतिमैर्वचोभिः ॥ २
मा भैष्ट नास्त्यत्र विषादकालो
यदार्यपुत्रावबशौ विषण्णौ ।
स्वयंभुवो वाक्यमथोद्वहन्तौ
यत्सादिताविन्द्रजिदस्त्रजालैः ॥ ३
तस्मै तु दत्तं परमास्त्रमेत-
त्स्वयंभुवा ब्राह्मममोघवेगम् ।
तन्मानयन्तौ यदि राजपुत्रौ
निपातितौ कोऽत्र विषादकालः ॥ ४
ब्राह्ममस्त्रं तदा धीमान्मानयित्वा तु मारुतिः ।
विभीषणवचः श्रुत्वा हनूमांस्तमथाब्रवीत् ॥ ५
एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् ।
यो यो धारयते प्राणांस्तं तमाश्वासयावहे ॥ ६

61

Ś$_2$ B$_1$ D$_{8.12}$ cont. the previous Sarga.

1 ^{a}) Ñ V$_{1.2}$ B$_{2-4}$ D$_{13}$ ततस्तयोः; B$_1$ M$_5$ तयोस्तथा; D$_1$ ततस्तदा (for तयोस्तदा). V$_3$ B$_1$ D$_4$ पातितयो; B$_3$ D$_{13}$ शायितयो (for सादि°). D$_1$ रणाजिरे (for रणाग्रे). Ś D$_{2.3.8.12}$ त(D$_2$ य)योस्तु तत्रार्दितयो रणाग्रे. —^{b}) D$_3$ G$_1$ M$_{1-3}$ -पुंगवानां (for -यूथपानाम्). —V$_3$ om. 1^{cd}. D$_{13}$ reads 1^{cd} twice. —^{c}) D$_7$ -[अं]जन-; G$_3$ -[अं]बुद- (for -[अ]ङ्गद-). Ś B$_1$ D$_{2-4.8.12.13}$ (second time) सर्वे विषण्णा विगतप्रभावा. —^{d}) D$_{1.4}$ कश्चित् (sic); D$_{13}$ (both times) केचित् (for किंचित्). Ś Ñ$_1$ B$_{1.3}$ (*sup. lin.* also as in text) D$_{2-4.6.8.12.13}$ (both times) स्म (for ते).

2 ^{a}) B$_4$ T$_1$ विषण्णः; D$_5$ निषण्णः (for विषण्णं). Ś D$_{7-12}$ सर्वं; M$_5$ सेनां (for सैन्यं). G$_1$ ततो विषण्णं सहसा समेत्य. —^{b}) Ś D$_{2.8.12}$ धर्मभृतां (for बुद्धिमतां). —^{c}) D$_1$ -योधमुख्यान्; M$_{1.2.5}$ -यूथमुख्यान् (for -राजवीरान्). —^{d}) Ś Ñ$_1$ V$_3$ B$_{1.3}$ D$_{2-4.8.12.13}$ आश्वासयन्वाग्भिरदीनसत्त्वः (Ñ$_1$ B$_3$ °नोपमाभिः [sic]; D$_{13}$ °रूपमाभिः [sic]).

3 ^{a}) D$_4$ नाभीष्ट (sic) (for मा भैष्ट). Ś V$_3$ B$_1$ D$_{2-4.8.12}$ -कृत्यं; V$_1$ -हेतुर् (for -कालो). —^{b}) D$_{3.13}$ G$_1$ यद्राज-; D$_9$ G$_2$ यथार्य-; Cr.m.g as in text (for यदार्य-). Ś D$_{1-3.5.8.12}$ M$_{1.2.5}$ Cr.m.k विवशौ; Ñ$_1$ V$_2$ सरणौ; Ñ$_2$ स्ववशौ; V$_{1.3}$ B$_1$ D$_4$ पतितौ; B$_{2.4}$ D$_{7.9-11}$ G M$_3$ Ct ह्यवशौ; B$_3$ स्वबलौ; D$_6$ अवशं; D$_{13}$ om.; Cv.g as in text (for अवशौ). V$_1$ B$_1$ विसंगौ; G (ed.) विसंज्ञौ (for विषण्णौ). —After 3^{ab}, D$_1$ reads 4^{cd} for the first time, repeating it in its proper place. —^{c}) Ś B$_1$ D$_{2-4.8.12}$ अभि(D$_8$ °धि)प्रपन्नौ; Ñ$_2$ V$_{1.2}$ B$_{2.4}$ D$_1$ अनुस्मरंतौ (for अथोद्वहन्तौ). Ñ$_1$ V$_3$ B$_3$ D$_{13}$ स्वयंभुवाक्यं(Ñ$_1$ B$_3$ D$_{13}$ °वोस्त्रं) प्रतिमानयंतौ. —^{d}) Ś D$_{2.3.8.12}$ संछादिताव्; Ñ$_1$ यत्सूदिताव्; Ñ$_2$ V$_{1.3}$ B$_{1-3}$ D$_{4.13}$ प्र(B$_3$ य)च्छादिताव्; B$_4$ उत्सादिताव् (for यत्सादिताव्). Ś Ñ$_2$ V$_{1.2}$ D$_{2.8.12}$ इंद्रजितो; Ñ$_1$ V$_3$ B$_{1.4}$ D$_{1.3.4.7.9-11}$ Cv.t °जिता; Cr.m.g as in text (for °जिद्-). —After 3, G$_2$ ins.:

1355* विभीषणस्तत्र वराद्विधातु-
रासादितोऽस्त्रेण निरीक्षमाणः।
सेनां हरीणां द्रुहिणास्त्रदूनां
स्वस्थं हनूमन्तमुवाच दृष्ट्वा।

4 ^{a}) Ś Ñ V B D$_{2-4.8.12}$ तस्मै हि; D$_{13}$ तस्यैव; M$_{1.2}$ अस्मै तु (for तस्मै तु). V$_3$ एवं (for एतत्). —^{b}) B$_4$ व्रात्यम्; T$_2$ ब्राह्यम् (for ब्राह्मम्). Ś Ñ V B D$_{2-5.7-13}$ M$_5$ -वीर्यं (for -वेगम्). —D$_1$ reads 4^{cd} for the first time after 3^{ab}, repeating it here. —^{c}) D$_1$ (first time) संमानयंतौ. Ñ$_2$ V B$_2$ D$_{6.7.9-11}$ T$_{2.3}$ G$_2$ M$_3$ युधि (for यदि). —^{d}) Ś Ñ$_2$ V$_1$ B$_{2-4}$ D$_{2-4.8.12}$ विषादि(Ś D$_8$ °र्दि)तौ; Ñ$_1$ निषूदितौ; B$_1$ निष्पंदितौ; D$_{13}$ विव्याधितौ (for निपातितौ). Ś B$_1$ D$_{2.3.8.12}$ नात्र; B$_2$ *त्र (for कोऽत्र). V$_{1.2}$ B$_{2.4}$ D$_{13}$ -हेतुः (for -कालः).

5 ^{a}) T$_2$ ब्राह्यम्. Ñ$_2$ V B D$_{9-11}$ G$_1$ M$_3$ ततो (for तदा). Ś D$_{2.3.8.12}$ स ब्राह्ममस्त्रं तद्धी(D$_{12}$ °च्छी)मान्; Ñ$_1$ D$_{4.13}$ ब्रह्मणोस्त्रं ततो धीमान्. —^{b}) Ś D$_{2.8.12}$ T$_2$ स; B$_2$ D$_1$ G$_1$ च; D$_3$ [अ]थ (for तु). —^{d}) Ś Ñ V B$_{1.2.4}$ D$_{1-4.6-13}$ T$_{2.3}$ G$_1$ M$_5$ इदम्; B$_3$ M$_{1.2}$ वाक्यम् (for तमथ).

6 ^{a}) Ś D$_{2.3.8.12}$ अस्मिन्नस्त्र-; Ñ V B D$_{1.4.9-11.13}$ M$_5$ Ct अस्मिन्नस्त्र-; G$_1$ तस्मिन्नस्त्र-; M$_{1.2}$ अस्मिन्निवनि- (for एतस्मिन्नि-). —^{cd}) Ś D$_{2.12}$ धारयति (for धारयते). D$_2$ सम्- (for तम्). Ñ$_2$ V$_{1.3}$ B$_{2-4}$ D$_{1.3.5.8.12}$ आश्वास(D$_1$ °लोक)यामहे; M$_3$ आश्वासयावहै. D$_4$ तं समाश्वासयामहे (for ^{d}). V$_3$ B$_1$ D$_{13}$ ये ये धारयंते प्राणांस्तांस्तानाश्वासयाम्यहं (B$_1$ °महे).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तावुभौ युगपद्वीरौ हनूमद्राक्षमोत्तमौ ।
उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ७
छिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः ।
स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिः समन्ततः ॥ ८
पतितैः पर्वताकारैर्वानरैरभिसंकुलाम् ।
शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुंधराम् ॥ ९
सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् ।
जाम्बवन्तं सुषेणं च वेगदर्शिनमाहुकम् ॥ १०
मैन्दं नलं ज्योतिमुखं द्विविदं पनसं तथा ।
विभीषणो हनूमांश्च ददृशाते हतान्रणे ॥ ११
सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् ।
अह्नः पञ्चमशेषेण वल्लभेन स्वयंभुवः ॥ १२

G. 6. 53. 14
B. 6. 74. 12
L. 6. 53. 62

7 ^{b}) Ś Ñ V B D2-4.8.12.13 वायुपुत्रविभीषणौ; G3 M1.2 हनूमात्राक्षसेश्वरौ(G3 °सोत्तमः). —^{c}) B3 (marg. also as in text) तदा वीरौ; B4 महावीरौ; D1 तदा तौ तु (for तदा रात्रौ). —^{d}) Ñ2 V1.2 B2-4 -मूर्ध्नि; D1.3.7 -शीर्षं; D5 T1 G3 -भूमौ (for -शीर्षे). —After 7, B4 repeats 11^{cd} - 15, 19 - 20^{ab} of 6.60 within brackets.

8 ^{a}) B2.3 D5.7.9-11 T1 G2.3 M3 भिन्न- ; M5 भग्न- (for छिन्न-). Ś V3 B1 D2-4.6.8.12 T2 -हस्तैश्च(D6 T2 °स्तु). Ñ1 D13 छिन्नहस्तोरुलांगूल- . —^{b}) Ś D2.8.12 विप्रकीर्ण- ; Ñ1 B3 D13 -पादांगुष्ठ- ; V3 विनिकीर्णैश्च (hypm.) ; D1 -पादांगुल- ; D3.4 विकीर्णैश्च(D3 °र्ण*) ; G2 -पादपार्श्व- (for -पादाङ्गुलि-). B3 D6 T2.3 -शिरोरुहैः ; M5 -शिरोधराः. B1 विनिकीर्णैः शिखाधरैः . —^{c}) Ś V3 D2-4.8.12 T3 स्रोतोभिः ; M5 बृहद्भिः (for स्रवद्भिः). B2 D13 क्षतजैश् (for क्षतजं). Ś V3 B3 D2-4.8.12.13 चापि; Ñ V1.2 B2.4 चैव (for गात्रैः). B1 स्रोतोभिः क्षतजानां च. —^{d}) Ś D2.8.12 विस्रवद्भिः ; Ñ V1.2 B2-4 D13 वानरेंद्रैः (for प्रस्रवद्भिः). D7 G2 इवाचलैः ; M3 ततस्ततः (for समन्ततः).

9 ^{ab}) Ñ1 स्तनद्भिः (for पतितैः). Ñ2 B2 transp. पतितैः and वानरैर्. B4 अति- (for अभि-). Ś D2.3.8.12.13 -संकुला; D7.9-11 -संवृतां ; G2 -संकुलं (for -संकुलाम्). V3 B1 D4 अतिसंकुला. —^{c}) Ś Ñ V1 B2.3 D1.8.9.12 M1.2 अस्त्रैश्; D13 अश्वैश् (for शस्त्रैश्). D1 दीप्तां; D4 दिव्यैर् (for दीप्तैर्). —^{d}) D1 ददृशुस्तौ (for ददृशाते). G2 रणांगणं (for वसुंधराम्). Ś V3 B1 D2-4.8.12.13 अ(Ś1 ह्य)भिकीर्णा वसुंधरा.

10 Before 10, V3 wrongly repeats 8^{a} (var.). —^{a}) V3 B1 D2 सांगदं; D1 सरभं (for अङ्गदं). —^{b}) Ś1 विनतादीन्हरींस्तथा. —After 10^{ab}, Ś1 ins. 1357*. —Ś1 om. 10^{c} - 11^{b}. —^{c}) D5 T1 M3.5 गवाक्षं च (for जाम्बवन्तं). —^{d}) Ñ2 V1.2 B2-4 D1.6.9-11.13 एव च (for आहुकम्). Ś2 V3 B1 D2.3.8.12 L (ed.) वेगवंतं दरी(L [ed.] °धी)मुखं; Ñ1 D4 वेगदर्शिं च(D4 °र्शिनं [unmetric]) वानरं; M1.2 ऋषभं वेगदर्शिनं. ❀ Cg : आहुक इति कश्चिद्यूथपः। गवाक्षं च सुषेणं च वेगदर्शिनमाहुकमिति पाठः. ❀

11 Ś1 om. 11^{ab} (cf. v.l. 10). —^{a}) Ñ1 D4.13 नीलं (for नलं). D9 ज्योतिर्मुखं. Ś2 V3 B1 D2.3.6.8.12 T2.3 ज्योतिर्मुखं नलं मैंदं; Ñ2 V1.2 B2.4 नलं ज्योतिमु- (B2 °र्मु)खं मैंदं; B3 मैंदं ज्योतिर्मुखं चैव. —^{b}) V3 B1 गयं; D2.3.12 गजं; D5 T1 तदा (for तथा). Ś2 D8 द्विविधं पनसं गजं; Ñ V1.2 B2.4 D1.4.6.9-11.13 T2.3 G1 M5 द्विविदं चापि (V1 चैव) वानरं(B4 °रान्); B3 द्विविदं केशरिं हरिं. —After 11^{ab}, Ś2 D2.3.6.8.12 ins. ; while B1.3(marg.) ins. after 20 :

1356* गवाक्षं गवयं धूम्रमृषभं विनतं हरिम् ।

[B3 शरभं (for ऋषभं). D8 विनितं (for °नतं). Ś2 D2.8.12 हरं (for हरिम्).]

—Thereafter all the above MSS. cont. (B3 marg.); while Ś1 ins. after 10^{ab} (owing to om.) ; Ñ1 V2 B2 ins. after 11^{ab} ; V3 ins. after 20 ; G (ed.) cont. after l. 3 of 1359* :

1357* एतांश्चान्यांश्च सुबहून्वानरेन्द्रान्महाबलान् ।

[V3 D2 om. second च. V2 वान * * न् (for °रेन्द्रान्).] ; whereas Ñ2 V3 B1 ins. after 11^{ab} :

1358* वानरेन्द्रानतिक्रम्य महाकायान्महाबलौ ।

—After 11^{ab}, B3 G(ed.) ins. :

1359* ऋषभं पनसं चैव संपातिं प्रघसं तथा ।
गवाक्षं चन्दनं चैव तथा दधिमुखं हरिम् ।
रम्भं च विनदं चैव सुषेणं तारमेव च ।
एते चान्ये च बहवो वानरा वनगोचराः ।

[(l. 3) G (ed.) विनतं (for °दं) and तारं च नलम् (for सुषेणं तारम्). —G(ed.) om. l. 4.]

—D3 om. (hapl.) 11^{c} - 13^{b}. —^{c}) Ś Ñ V B D2.4.8.12.13 विभीषणहनूमंतौ; M3 एतांश्चान्यांस्ततो वीरौ. —B1 reads in marg. 11^{d} - 12. —^{d}) Ñ2 V1.2 B2.4 D1 रणे हतान् (by transp.); D9 G3 महारणे (for हतान्रणे).

12 D3 om. 12 (cf. v.l. 11). B1 reads in marg. 12 (cf. v.l. 11). —^{a}) G (ed.) चतुःषष्टिर्. ❀ Cg : सप्तषष्टिरिति। वानराणां यूथपवानराणामित्यर्थः। सुग्रीवाङ्गदादिभिः सह पाठात्. ❀ —^{c}) D1.2.8.12.13 पश्चिम- (for पञ्चम-). Ś D2.8 G1 -भागेन; Cv as in text (for -शेषेण). Ñ2 V1.2 B2-4 दिवसस्याष्टमे भागे; V3 B1 पंचमेनाह्नः(B1 °ह्नः)-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 53. 15
B. 6. 74. 13
L. 6. 53. 63

सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम् ।
मार्गते जाम्बवन्तं स्म हनूमान्सविभीषणः ॥ १३
स्वभावजरया युक्तं वृद्धं शरशतैश्चितम् ।
प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १४
दृष्ट्वा तमुपसंगम्य पौलस्त्यो वाक्यमब्रवीत् ।
कच्चिदार्य शरैस्तीक्ष्णैर्न प्राणा ध्वंसितास्तव ॥ १५
विभीषणवचः श्रुत्वा जाम्बवानृक्षपुंगवः ।
कृच्छ्रादभ्युद्गिरन्वाक्यमिदं वचनमब्रवीत् ॥ १६
नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाभिलक्षये ।
पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १७

शेषेण; D_4 आजघान महावीरो. —[a]) $\tilde{N}_2$ $V_{1.2}$ B_4 M_5 वरदानात्; D_4 भल्लेन च (for वल्लभेन). B_3 (marg. also as in $\tilde{N}_3$) राक्षसेन निपातिताः. ❀ Cm.g: स्वयंभुवो वल्लभेन ब्रह्मास्त्रेणेत्यर्थः (Cg °भेन इन्द्रजिता, ब्रह्मास्त्रेण वा). ❀ —After 12, $D_{6.7}$ (D_7 l. 1,2,6 and 4 only) $T_{2.3}$ ins.:

1360* ख्यातानां देवपुत्राणामेताः कोट्यो निपातिताः।
इतरेषां तु यूथानां हतानि शतसंघशः।
शरैरशनिसंकाशैर्बलं सर्वं निपातितम्।
ब्रह्मणो वरदानाच्च हनूमान्वानरोत्तमः।
ब्रह्मास्त्रेणाचितः पूर्वं हनूमान्न हतो रणे। [5]
ब्रह्मास्त्रं जपमानस्तु मुक्तः शस्त्रैर्विभीषणः।
शरैः संनतगात्रस्तु संज्ञयासौ समन्वितः।
पपात प्रथमं वीरः कृच्छ्रप्राणोऽथ जाम्बवान्।
वानराणां बलं सर्वं सुग्रीवं सहलक्ष्मणम्।
सराघवं हतं तेन मेघनादेन रक्षसा। [10]
रुधिराक्ततनू वीरौ वायुसूनुविभीषणौ।
तस्मिन्रात्रिमुखे रौद्रे कबन्धशतसंकुले।
कृष्णेन तमसा चापि छादिते मेदिनीतले।
उल्काहस्तौ तदा तौ तु संमन्त्र्य सहितौ ततः।
किंचित्कार्यं तु कर्तव्यं विचिन्त्य बलसंक्षये। [15]

[(l. 1) T_3 मुख्यानां (for ख्यातानां). —D_6 om. l. 4. T_3 reads l. 4 after l. 6. —(l. 4) D_7 T_3 चापि (T_3 चैव) वानरः (for वानरोत्तमः). —(l. 5) D_6 ब्रह्मास्त्रे ताडितः (sic) (for °स्त्रेणाचितः). T_3 नाहतो (for न हतो). —(l. 6) D_7 मुक्तशस्त्रो (for मुक्तः शस्त्रैर्). D_6 विभीषणैः. —(l. 7) T_3 संसक्त- (for संनत-). —(l. 9) T_2 समुग्रीवं सलक्ष्मणं (for the post. half). —(l. 12) D_6 वीरौ (for रौद्रे).]

13 V_3 D_3 G_2 om. 13^{ab} (for D_3, cf. v.l. 11). —[a]) $\tilde{N}_1$ -[ऊ]र्मि- (for -[ओ]घ-). Ś $D_{1.2.8.13}$ घोरं; $\tilde{N}$ V_1 B_2 D_{13} दृष्ट्वा; B_1 D_4 सैन्यं (for भीमं). —[b]) Ś B_1 $D_{2.4.8.12}$ व्यापादितं; D_1 चोत्सादितं (for बाणार्दितं). B_1 D_4 रणे (for बलम्). $\tilde{N}$ V_1 B_2 G (ed.) भीममुत्सा (G [ed.] त्पा)दितं बलं. —[c]) $D_{6.9-11}$ $M_{3.5}$ च (for स्म). —For 13, V_2 $B_{3.4}$ D_{13} subst.; while Ś $\tilde{N}$ $V_{1.3}$ $B_{1.2}$ $D_{1-4.8.12}$ $T_{2.3}$ subst. l. 2 only for 13^{cd}:

1361* तौ शरौघहतं दृष्ट्वा भीममुत्सादितं बलम्।
विभीषणहनूमन्तौ जाम्बवन्तं ममार्गतुः।

[(l. 1) V_2 -निभं (for -हतं). B_3 D_{13} सागरोर्मिनिभं दृष्ट्वा (for the prior half). D_{13} तन्मृदितं (for उत्सादितं). —(l. 2) $\tilde{N}_1$ विमार्गतुः; $\tilde{N}_2$ $V_{1.2}$ B_{2-4} अपश्यतां; V_3 D_4 समाहतुः; B_1 समाप्लुतः (sic); D_{13} समीहतुः (for ममार्गतुः).]

—Thereafter $T_{2.3}$ cont.; while D_6 ins. after 13:

1362* स च बुद्धिमतां श्रेष्ठो बुद्ध्या तुल्यो बृहस्पतेः।
यां प्रदास्यति बुद्धिं नस्तां करिष्यामहे वयम्।
पतितं रणभूमौ तौ दृष्ट्वा तं हरिराक्षसौ।

[(l. 2) T_3 यां प्रदास्याति बुद्धिर्नो (sic) (for the prior half).]

14 [a]) Ś $D_{3.8.12}$ स्वभावाज् (for स्वभाव-). D_4 -मेधया (for -जरया). —[b]) D_1 -शताचितं; D_3 marg.; D_5 -शतैः श्रितं; G_1 -शितैश्चितं (for -शतैश्चितम्). —[c]) Ś V_3 B_1 $D_{2.3.8.12}$ रुजा परिगतं वीरं. —[d]) Ś $D_{8.12}$ पर्वतं (for पावकम्).

15 D_3 reads in marg. 15^{a-c}. —[a]) Ś $\tilde{N}_3$ $B_{2.4}$ $D_{2.3.8.12}$ अथैनम्; M दृष्ट्वा सम्- (for दृष्ट्वा तम्). $\tilde{N}_1$ B_3 $D_{4.13}$ -गम्याथ; D_1 $M_{1.2}$ -संक्रम्य (for -संगम्य). V B_1 अथैनमुपसंक्रम्य (V_3 °गम्यैवं; B_1 °गम्यैनं); D_6 $T_{2.3}$ जांबवंतमुपागम्य; D_{9-11} G_1 दृष्ट्वा समभिसंक्रम्य. —$Ś_2$ om. (hapl.) 15^c–16. —[c]) $Ś_1$ $D_{2.5.8.12}$ क्वचिद्; $\tilde{N}_2$ V B_{2-4} $D_{1.7.10}$ कश्चिद्; D_{13} कच्चिच्च (for कच्चिद्). $Ś_1$ $D_{2.8.12}$ रौद्रैर्; D_3 घोरैर् (for तीक्ष्णैर्). —[d]) B_4 M_3 प्राणा न (by transp.). $D_{2.3}$ हिंसितास्; D_{13} व्यथितास् (for ध्वंसितास्). V_3 B_1 रणे (for तव). $Ś_1$ $D_{8.12}$ न प्राणिहि हि जांबवन्. —After 15, $\tilde{N}_1$ $B_{2.3}$ $D_{4.13}$ ins.:

1363* कच्चिज्जीवसि ऋक्षेन्द्र कच्चित्ते विपुलं बलम्।

[D_{13} ऋक्षेश (for ऋक्षेन्द्र).]

16 $Ś_2$ om. 16 (cf. v.l. 15). —[b]) $Ś_1$ $\tilde{N}_2$ V $B_{1.4}$ $D_{1-3.8.12}$ T_3 ध्रुव (D_3 °वं)गर्षभः; $\tilde{N}_1$ B_3 $D_{4.7.13}$ ऋक्षपार्थिवः (for ऋक्षपुंगवः). —V_2 om. 16^{cd}. $\tilde{N}_1$ illeg. for [c]. —[c]) $\tilde{N}_2$ उदीरयन्; D_{13} उदीरितं; M_5 अभ्युद्गतं (for अभ्युद्गिरन्). $Ś_1$ V_3 B_1 $D_{2-4.8.12}$ कृच्छ्रेण धारयन्प्राणान्. —B_1 om. (hapl.?) from 16^d up to the prior half of 1364*. —[d]) V_1 B_4 मंदमिव; V_3 D_4 वाक्यमथ (for वचनम्). D_{13} M_5 अब्रवीच्च (M_5 उवाचेदं) विभीषणं.

17 B_1 om. 17 (cf. v.l. 16). B_4 om. $17-19^b$. D_{13} om. $17-18^b$. —[a]) $\tilde{N}_2$ $V_{1.3}$ B_2 राक्षसेंद्र. $\tilde{N}_1$ B_3 D_4 महाबाहो; $\tilde{N}_2$ $V_{1.2}$ B_2 °वीर; M_5 °सत्त्व (for °वीर्य). —[b]) $\tilde{N}_2$ G_1 त्वां हि; D_8 त्वभि- (for त्वाभि-). D_4 सुरेंद्र-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अञ्जना सुप्रजा येन मातरिश्वा च नैर्ऋत ।
हनूमान्वानरश्रेष्ठः प्राणान्धारयते क्वचित् ॥ १८
श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः ।
आर्यपुत्रावतिक्रम्य कस्मात्पृच्छसि मारुतिम् ॥ १९
नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे ।
आर्य संदर्शितः स्नेहो यथा वायुसुते परः ॥ २०
विभीषणवचः श्रुत्वा जाम्बवान्वाक्यमब्रवीत् ।
शृणु नैर्ऋतशार्दूल यस्मात्पृच्छामि मारुतिम् ॥ २१
तस्मिञ्जीवति वीरे तु हतमप्यहतं बलम् ।
हनूमत्युज्झितप्राणे जीवन्तोऽपि वयं हताः ॥ २२
ध्रियते मारुतिस्तात मारुतप्रतिमो यदि ।
वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २३

G. 6. 53. 27
B. 6. 74. 23
L. 6. 53. 76

समविक्रम. —^{c}) D9.11 विध्यमानः; D10 विद्धगात्रः (for पीड्यमानः). Ñ1 B3 D4 शरौघेण; Ñ2 V1.2 B2 शरैस्तीक्ष्णैर्; V3 शतैर्बाणैर् (for शितैर्बाणैर्). —^{d}) V3 D3.12 त्वा (for त्वां). Ñ1 B3 दुःखितः (for चक्षुषा).

18 B1 om. up to the prior half of 1364* (cf. v.l. 16). B4 om. 18; D13 om. 18^{ab} (for both, cf. v.l. 17). —^{a}) D3 अंजनी. Ś2 स- (for सु-). —^{b}) Ñ2 स (for च). Ñ2 V1.2 B2 राक्षस; D9–11 सुव्रत; M5 सुप्रजाः (for नैर्ऋत). —^{c}) D13 हनूमाञ्जीवत्येवं (subm.). —D13 om. 18^{d}–19^{a}. —^{d}) Ñ1 B3 रणे (for क्वचित्). Ñ2 V1.2 B2 D4 कच्चिज्जीवति वीर्यवान्. —For 18^{cd}, Ś V3 B1 D2.3.8.12 subst.:

1364* कच्चिद्धारयति प्राणान्हनुमान्प्लवगर्षभः ।
[Ś D8.12 क्वचिद्. V3 धारयते.]

19 B4 om. 19^{ab} (cf. v.l. 17). D13 om. 19^{a} (cf. v.l. 18). —^{a}) T1 श्रुत्वा* * * * * *म् (damaged). —^{b}) Ś Ñ1 V3 B1.3 D2.3.8.12 अब्रवीत्तं (Ñ1 °त्तु; V3 °च्च; B1 °त्स); D13 तत्रोवाच (for उवाचेदं). —After 19^{ab}, Ś V2.3 B1.3 D2.3.6.8.12 T2.3 ins.:

1365* स्वभावं तस्य जिज्ञासुः प्रज्ञां च प्राज्ञसेविनः ।
क्लिश्यामहे यत्कृते स्म यन्मूलं चैव नो बलम् ।

[(l. 1) Ś D2.8.12 -सत्तमः; D3 -संमतः (for -सेविनः). D6 T2.3 प्रभावं तस्य विज्ञातुं प्राह तं प्राज्ञसंमतः (D6 °तं). —(l. 2) T2.3 क्लिश्यावहे. Ś D8.12 च (for स). V3 मूलं चैव हि (for यन्मूलं चैव).]

—^{c}) V1 B4 D4.7 G2 राज-; Ck.t as in text (for आर्य-). Ś D2.3.8.12 तावार्यपुत्रावुत्सृज्य (D3 °त्क्रम्य). —^{d}) Ś V3 B1 D2.8.12 हनूमंतं हि (Ś D8.12 च) पृच्छसि.

20 ^{a}) D6 T2.3 नापि (for नैव). —^{b}) Ś D2.3.8.12 न च; M3 नैव (for नापि). B4 नांगदे युवराजनि. —^{c}) Ś Ñ2 V1.2 B3.4 D2.8.12.13 आर्येण (for आर्य सं-). D8 आर्येण दर्शनस्नेहोः; T1 * * * * * तः स्नेहो (damaged). —^{d}) Ñ1 B3 D4.13 हरौ; D1 कपौ; G1.3 परं (for परः). Ś V3 B1 D2.3.8.12 हनूमति वि (Ś D8.12 तु) दर्शितः. —After 20, Ś D2.3.8.12 ins.:

1366* वानरेन्द्रान्महावीर्यानतिक्रम्य महाबलान् ।
बहून्यांस्त्वमेकं तु कस्मात्पृच्छसि मारुतिम् ।;

while V3 ins. 1357*; whereas B1.3 (marg.) ins. 1356* and 1357* and then B3 (marg.) cont.:

1367* ऋक्षांस्तानतिक्रम्य (subm.) किं त्वं पृच्छसि मारुतिम् ।

21 Ś1 D12 om. (hapl.) 21. —^{b}) Ś2 D1–3.8 इदम् (for वाक्यम्). —Ś2 D8 om. 21^{cd}. —^{c}) D1.6 T2.3 राक्षस- (for नैर्ऋत-). —^{d}) D2.3 यन्मा (for यस्मात्). D1–3 पृच्छसि (for पृच्छामि).

22 ^{a}) B3 D1.6.9–11 G1 M1.2 अस्मिञ्; D4.13 यदि; D5.7 T1 G3 यस्मिञ् (for तस्मिञ्). Ś Ñ V B D1.4.8.12.13 दुर्धर्षे (D4.13 °र्षो); D2.3 वीरे हि (for वीरे तु). —^{c}) Ś D2.8.12 T2.3 हते सर्वे; B3 [उ]ज्झिते प्राणे; D1 गतप्राणे; D4.7 [उ]द्गतप्राणे; D13 [उ]क्षितप्राणे (sic); G3 [उ]च्छ्वसप्राणे. D9 हनूमत्प्रथितप्राणे. —^{d}) D2 हि (for ऽपि). Ś D2.8.12 हता वयं (by transp.); Ñ V B D1.3.4.9–11.13 मृता वयं (for वयं हताः). —After 22, Ś V3 B1 D1–3.6.8.12 T2.3 ins.:

1368* एतच्छ्रुत्वा शुभं वाक्यं प्रत्युवाच विभीषणः ।
[D6 T2.3 हितं (for शुभं).];

while Ñ V1.2 B2–4 D4 ins.:

1369* श्रुत्वा जाम्बवतो वाक्यं प्रीतिमान्राक्षसोऽब्रवीत् ।
[V2 B4 इदम् (for राक्षसो). B3 अब्रवीत्तं विभीषणः (for the post. half).]

23 ^{a}) D5.7.9–11 T G M3 धरते. D4.5 T1 M6 प्राणान् (D4 M5 sic) (for तात). —^{b}) Ś V3 B1 D2–4.6.8.12 T2.3 जवे; Ñ1 बली; Ñ2 V2 बले; V1 illeg.; B2–4 (B2 *sup. lin.* also as in Ñ2) रणे (for यदि). —V1.3 om. 23^{cd}. —^{c}) Ś Ñ V2 B D2.3.6.8.12 -समं तेजो; D1 -समोजस्को; D13 °स्माकं (for -समो वीर्ये). D4 त्वां द्रष्टुमिच्छते श्रीमान्. —^{d}) Ñ1 जीवितं नस्; G2 जीवितानां (for °ताशा). D1 G2 तदा (for ततो). Ś Ñ2 V2 B D2.3.6.8.12 धारयन्प्लवगर्षभः; D4 मया सार्धं स वानरः. —After 23, Ś Ñ2 B1.2.4 D2.3.8.12 ins.:

1370* त्वामेव मार्गन्नायातो मयेहाद्य सह प्रभो ।

[Ś D12 मृगयन्नास्ते; Ñ2 B4 मार्गणायातो; B1 मृग्यन्नायातो; D8 सुरायन्नास्ते (sic); L (ed.) मार्गयन्नास्ते (for मार्गन्नायातो).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 53. 28
B. 6. 74. 24
L. 6. 53. 77

ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् ।
गृह्य जाम्बवतः पादौ हनूमान्मारुतात्मजः ॥ २४
श्रुत्वा हनुमतो वाक्यं तथापि व्यथितेन्द्रियः ।
पुनर्जातमिवात्मानं स मेने ऋक्षपुंगवः ॥ २५
ततोऽब्रवीन्महातेजा हनूमन्तं स जाम्बवान् ।
आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि ॥ २६
नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा ।
त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कंचन ॥ २७
ऋक्षवानरवीराणामनीकानि प्रहर्षय ।
विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मणौ ॥ २८
गत्वा परममध्वानमुपर्युपरि सागरम् ।
हिमवन्तं नगश्रेष्ठं हनूमन्गन्तुमर्हसि ॥ २९
ततः काञ्चनमत्युग्रमृषभं पर्वतोत्तमम् ।
कैलासशिखरं चापि द्रक्ष्यस्यरिनिषूदन ॥ ३०
तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् ।
सर्वौषधियुतं वीर द्रक्ष्यस्यौषधिपर्वतम् ॥ ३१

Ñ$_2$ मयेवाद्य; G (ed.) मयैवाद्य (for मयेहाद्य). Ñ$_2$ B$_4$ D$_3$ समं; B$_{1.2}$ (with hiatus) इह (for सह).]

24 ^{a}) Ñ$_2$ उक्तो (for ततो). —^{b}) Ś Ñ V B D$_{1-4.7-9.12.13}$ M$_{1.2}$ विनयेन; Cg as in text (for नियमेन). Ñ$_1$ B$_3$ D$_{13}$ [अ]भिवाद्य च. —^{c}) Ś V$_3$ B$_1$ D$_{2-4.8.12}$ जांबवंतं महातेजा; Ñ V$_{1.2}$ B$_{2-4}$ D$_{1.13}$ जग्राह चात्मनो नाम. —^{d}) Ñ$_1$ B$_3$ D$_{1.13}$ पवनात्मजः (for मारुतात्मजः). D$_4$ हनूमंतं स जांबवान् (sic). —After 24, D$_3$ ins.:

1371* अभिवाद्याब्रवीद्वाक्यमेषोऽस्मीहागतः प्रभो ।;

while M$_5$ ins.:

1372* इत्येवमाह मधुरं हनूमानहमस्मि भोः ।;

whereas K (ed.) ins.:

1373* अहमस्मि हरिश्रेष्ठ शाधि मां यच्चिकीर्षितम् ।

25 ^{a}) B$_4$ हनूमद्- (subm.) (for °मतो). —^{b}) Ś V$_2$ B$_3$ D$_{2.3.8.12}$ G$_2$ तथा(B$_3$ °दा) स(G$_2$ वि-); Ñ$_1$ D$_{13}$ तथा प्र-; V$_3$ B$_1$ D$_4$ उवाच; D$_{7.9-11}$ तदा वि-(D$_7$ °पि); G$_1$ श्रुत्वापि; M$_2$ यथापि; Cg as in text (for तथापि). D$_6$ T$_{2.3}$ जांबवान्हृष्टमानसः; M$_5$ तथाप्यव्यथितेंद्रियः. ❀ Ct: विव्यथितेन्द्रियो विशेषेण व्यथितानीन्द्रियाणि यस्य सः. ❀ —^{d}) Ñ$_1$ V$_{1.2}$ B$_{2.4}$ D$_{1.13}$ प्लवगर्षभः (for ऋक्षपुंगवः). Ś V$_3$ B$_{1.3}$ D$_{2.3.8.12}$ मेने प्लवगपुंगवः(B$_3$ °सत्तमः); D$_4$ मेने ऋक्षवरस्तदा; D$_{5.6.9-11}$ T G$_{1.3}$ मन्यते(D$_6$ T$_{2.3}$ मेने स) प्लवगोत्तमः; D$_7$ G$_2$ M$_3$ मन्यते स्मर्क्षपुंगवः; M$_5$ मन्यते जांबवांस्तदा.

26 ^{d}) D$_4$ अर्हति.

27 M$_2$ om. (hapl.) 27–29. —^{a}) Ś D$_{2.3.8.12}$ भवान्; V$_3$ भद्रो; B$_1$ तातः T$_3$ नाद्यो (for नान्यो). Ś Ñ V B D$_{1-4.8.12.13}$ -संपन्नस् (for -पर्याप्तस्). —^{b}) Ś Ñ$_2$ V B$_{1.2.4}$ D$_{2.3.6.8.12}$ T$_{2.3}$ M$_1$ परमा गतिः; D$_{1.9}$ M$_5$ परमः सदा (for परमः सखा). Ñ$_1$ B$_3$ D$_{4.13}$ त्वद्दते(Ñ$_1$ तत्र ते) कपिसत्तम. —^{c}) B$_1$ तत् (for त्वत्-). —D$_6$ reads in marg. from म up to ^{d}. D$_8$ त्वां पराक्रमकालेद्य. —^{d}) V$_3$ D$_1$ किंचन; B$_3$ वानरं (for कंचन).

28 M$_2$ om. 28 (cf. v.l. 27). D$_7$ om. 28^{ab}. —^{a}) Ś D$_{8.12}$ क्षुद्र- (for ऋक्ष-). Ñ$_1$ B$_3$ D$_{13}$ -सैन्यानां (for -वीराणाम्). —^{b}) Ñ$_1$ B$_{2.4}$ T$_3$ प्रहर्षयन्. D$_4$ अनीकेषु प्लवगर्षभ (hypm.). —^{d}) Ś D$_{8.12}$ राघवौ; V B$_1$ D$_{2-4}$ भ्रातरौ (for सादितौ).

29 M$_2$ om. 29 (cf. v.l. 27). —^{a}) B$_2$ स त्वं (for गत्वा). —^{b}) Ś पर्वतान्; D$_{8.12}$ सागरान् (for सागरम्). —^{c}) Ñ$_2$ B$_2$ D$_{7.13}$ M$_5$ गिरिश्रेष्ठं; B$_4$ गिरेः पृष्ठं; D$_6$ T$_{2.3}$ अतिक्रम्य (for नगश्रेष्ठं). —^{d}) D$_6$ T$_{2.3}$ द्रक्ष्यस्यरिनिषूदन. —After 29, D$_6$ T$_{2.3}$ ins.:

1374* हेमकूटं नगश्रेष्ठं नानाशृङ्गशतैर्युतम् ।
परतस्तस्य शैलस्य वृषभो नाम पर्वतः ।
तमतिक्रम्य शीघ्रं त्वं मेरुं द्रक्ष्यसि पर्वतम् ।

[(l. 1) T$_2$ -शृंगं (for -कूटं). —(l. 3) D$_6$ T$_3$ चातिक्रम्य (for अति°).]

30 ^{a}) V$_1$ B$_{3.4}$ M -[उ]च्चम्; D$_7$ G$_2$ -[उ]च्छ्रम्; Ck.t as in text (for -[उ]ग्रम्). —^{b}) Ñ V$_{1.2}$ B$_{2-4}$ D$_{13}$ नाम पर्वतं (for पर्वतोत्तमम्). —For 30^{ab}, D$_6$ T$_{2.3}$ subst.:

1375* काञ्चनं रत्नसंपूर्णं देवानामालयं भृशम् ।

—^{c}) Ś Ñ V B D$_{1-4.6.8.12.13}$ T$_{2.3}$ चैव; D$_{9-11}$ G M$_5$ चात्र (for चापि). —^{d}) Ñ V$_{1.2}$ B$_{2-4}$ D$_{13}$ [अ]तुलविक्रम; G (ed.) [अ]द्भुतविक्रम; L [ed.] रिपुसूदन (for [अ]-रिनिषूदन). —After 30, D$_6$ T$_{2.3}$ ins.:

1376* शृङ्गवन्तं गिरीष्टं च नाम्ना च कनकाङ्गदम् ।
ततः परं शीघ्रवेगो गत्वा लवणसागरम् ।
शाकद्वीपमतिक्रम्य क्षीरोदो नाम सागरः ।
स्थितौ नगोत्तमावन्धौ पर्वतौ तत्र सुप्रभौ ।
चन्द्रश्च नाम्ना द्रोणश्च हनूमन्गन्तुमर्हसि । [5]

[T$_{2.3}$ om. l. 1. —(l. 2) D$_6$ अतिक्रम्य महाबाहो (for the prior half). D$_6$ तदा (for गत्वा). —(l. 5) Post. half = 29^d.]

31 ^{a}) B$_1$ ततः (for तयोः). —^{b}) T$_{2.3}$ अनल- (for अतुल-). B$_3$ विचित्रं ह्यतुलप्रभं; D$_{13}$ चित्रं ह्यतुलविक्रमं.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तस्य वानरशार्दूल चतस्रो मूर्ध्निसंभवाः ।
द्रक्ष्यस्योषधयो दीप्ता दीपयन्त्यो दिशो दश ॥ ३२
मृतसंजीवनीं चैव विशल्यकरणीमपि ।
सौवर्णकरणीं चैव संधानीं च महौषधीम् ॥ ३३
ताः सर्वा हनुमन्गृह्य क्षिप्रमागन्तुमर्हसि ।
आश्वासय हरीन्प्राणैर्योज्य गन्धवहात्मज ॥ ३४
श्रुत्वा जाम्बवतो वाक्यं हनूमान्हरिपुंगवः ।
आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ३५
स पर्वततटाग्रस्थः पीडयन्पर्वतोत्तमम् ।
हनूमान्दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३६
हरिपादविनिर्भिन्नो निषसाद स पर्वतः ।
न शशाक तदात्मानं सोढुं भृशनिपीडितः ॥ ३७
तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः ।
शृङ्गाणि च व्यकीर्यन्त पीडितस्य हनूमता ॥ ३८

G. 6. 53. o
B. 6. 74. 38
L. 6. 53. 91

—^{c}) M$_5$ -[औ]षध- (for -[औ]षधि-). B$_3$ -वरं (for -युतं). Ś$_1$ हे वीर (hypm.); Ñ$_2$ B$_{2.4}$ तत्र; L(ed.) श्रीमद् (for वीर). D$_4$ सर्वौषधिसमायुक्तं. —^{d}) Ś Ñ V B D$_{1-3.5-8.10.12}$ T$_{1.2}$ M$_3$ [ओ]षधि-; G$_1$ [उ]रसि; M$_5$ [औ]षध- (for [औ]षधि-).

32 ^{a}) Ñ$_2$ तत्र (for तस्य). —^{b}) Ś V B$_{1.2.4}$ D$_{1-4.8.12.13}$ सु(D$_{13}$ स)प्रभाः; Ñ$_1$ -संयुताः; B$_3$ -संस्थिताः (for -संभवाः). Ñ$_2$ चतस्रः सूर्यसंनिभाः. —^{c}) D$_9$ G$_3$ M$_{1.2}$ Ck [औ]षधयो; Cv.r.m.g.t as in text (for [ओ]षधयो). Ś V$_{1.2}$ D$_{2-4.8.12}$ ओषधीर्द्र(D$_{8.12}$ °धीं द्र)-क्ष्यसे वीर; Ñ$_2$ B$_{2-4}$ D$_{13}$ त्वं(B$_{2.4}$ D$_{13}$ ता) द्रक्ष्यस्योषधीर्दीप्ता; V$_3$ B$_1$ द्रक्ष्यसे वीर दीप्यंतीर्. —^{d}) Ś D$_{4.8}$ द्योतयंतीर्; Ñ$_2$ V$_{1.2}$ B$_{2-4}$ D$_{2.3.5.7.9-11}$ T$_1$ G$_{1.3}$ Cr.m.g दीपयंतीर्; V$_3$ B$_1$ महौषधीर्(V$_3$ °ष*); D$_{12}$ द्योतयंते (for दीपयन्त्यो). ❀ Cg: ओषधयः ओषधीः। दीपयन्त्यः दीपयन्तीः। व्यत्ययेन द्वितीयार्थे प्रथमा. ❀

33 ^{ab}) Ś$_1$ D$_{12}$ -संजीवनं; D$_4$ -संजीवनी; T$_3$ -संजीविनीं. B$_4$ एकां; D$_1$ नाम; G$_2$ चापि (for चैव). D$_4$ विशल्यकरणी. Ś V B$_{1.3.4}$ D$_{1-4.6.8.12}$ T$_2$ तथा; T$_3$ तदा (for अपि). Ñ$_2$ B$_2$ विशल्यकरणीमेकां मृतसंजीवनीं तथा. —^{c}) Ñ V$_{1.2}$ B$_{2-4}$ D$_{7.11.13}$ G$_2$ M$_5$ Ct सुवर्ण-; V$_3$ B$_1$ D$_{1-4.9.10}$ Ck सवर्ण-; T$_2$ M$_3$ Cg सावर्ण्य-; G(ed.) स्ववर्ण-(for सौवर्ण-). D$_4$ -करणी. G$_2$ चापि (for चैव). Ś D$_{8.12}$ सर्ववर्णकरीं चैव. ❀ Ct: 'सवर्ण-' इति पाठे पूर्ववर्णसमानवर्णकरणीमित्यर्थः. ❀ —^{d}) Ñ$_2$ V$_3$ B$_3$ D$_{1-4}$ संधिनीं(D$_4$ °नी); B$_1$ सगंधीं; Ct as in text (for संधानीं). V$_1$ D$_7$ महौषधीः; B$_1$ D$_2$ G$_2$ °षधिं; D$_4$ °षधी (for °षधीम्). D$_{5.9-11}$ T$_1$ G$_3$ M$_3$ Cg संधानकरणीं तथा; D$_6$ संदधानीं महौषधीं.

34 ^{a}) T$_3$ तान्सर्वान् (for ताः सर्वा). Ś D$_{2.3.8.12}$ गृहीत्वा हनुमन्सर्वाः; Ñ$_1$ B$_3$ D$_{13}$ सर्वाः संगृह्य हनुमच्; Ñ$_2$ V B$_{1.2.4}$ D$_4$ ता(V B$_1$ तां) गृहीत्वा हनूमंस्त्वं; D$_1$ हनूमंस्त्वं गृहीत्वा तां. —^{b}) Ñ$_1$ B$_3$ D$_{13}$ शीघ्रम् (for क्षिप्रम्). V$_{1.2}$ शीघ्रमागमनं कुरु; D$_7$ G$_2$ प्रतिगंतुं त्वमर्हसि. —^{c}) Ś$_2$ आश्वासयन्. Ś D$_{1-3.8.12}$ सर्वान् (for प्राणैर्). Ñ V B D$_{4.13}$ योजयाद्य(Ñ$_1$ D$_{13}$ आयोजय) हरीन्सर्वान्. —^{d}) Ś Ñ V B D$_{2-4.8.12.13}$ प्राणैर् (for योज्य). D$_3$ गंधवाहात्मज (unmetric). D$_1$ प्राणै ऋक्षवरानपि.

35 ^{b}) Ñ$_1$ B$_3$ D$_{13}$ वानरोत्तमः; D$_1$ पवनात्मजः; D$_{10}$ मारुतात्मजः (for हरिपुंगवः). —After 35^{ab}, B$_3$ ins. (marg.):

1377* उत्पपात ततः शीघ्रं हनूमान्मारुतात्मजः।

—^{c}) Ś D$_{8.12}$ आपूर्णोति- (for आपूर्यत). Ś Ñ V$_{2.3}$ B D$_{2-4.8.12.13}$ बलौघेन; V$_1$ बलोत्सेकैस्; D$_1$ बलोत्कर्षैस्; D$_9$ बलादृष्टो; T$_3$ बलाद्धर्षैस्; Cm.g.k.t as in text (for बलोद्धर्षैस्). —^{d}) Ś D$_{2.3.8.12}$ वारि-; D$_{8-11}$ वायु- (for तोय-). Ś$_1$ D$_{12}$ -पूरैर्; Ś$_2$ D$_8$ -पूर्णैर्; G$_1$ -वर्षैर् (for -वेगैर्). D$_4$ तोयौघैरिव सागरः. —After 35, Ñ V$_2$ B$_{2.3}$ D$_{13}$ ins.:

1378* नमस्कृत्य स देवेभ्यः प्रतस्थे प्लवगोत्तमः।

[Ñ$_1$ D$_{13}$ नमस्कृत्वा. Ñ$_2$ B$_2$ पुरुषोत्तमः (for प्लवगो°).]

36 ^{a}) Ñ$_1$ B$_3$ -शिरोग्रस्थः; D$_{13}$ -वना° (for -तटा°). —^{b}) V$_3$ सर्वतो बलं (for पर्वतोत्तमम्). —^{c}) Ñ$_2$ V$_{1.2}$ B$_{2.4}$ T$_{2.3}$ ददृशे (for दृश्यते). M$_5$ वीर्याद् (for वीरो). Ś V$_3$ B$_1$ D$_{2-4.8.12}$ हनूमानभवत्तत्र; Ñ$_1$ B$_3$ D$_{13}$ रराज मारुतिर्वीरो(Ñ$_1$ °तसुतो); D$_1$ अदृश्यत हनूमान्वै.

37 B$_1$ om. 37–38. Ñ$_1$ V$_3$ D$_2$ om. (hapl.) 37^{ab}. —^{a}) Ś V$_{1.2}$ D$_{3.4.8.12}$ -निमग्नश्च(D$_3$ °स्तु); Ñ$_2$ B$_3$ D$_{1.5.9-11}$ T$_1$ M Ct -विनिर्भग्नो; B$_4$ -सुनिर्भिन्नो; D$_{13}$ -तलैः स्पृष्टो; T$_{2.3}$ G$_3$ -प्रनिर्भिन्नो; G$_1$ -विनिर्धूतो; Ck -विनिर्विण्णो (for -विनिर्भिन्नो). —^{b}) B$_3$ D$_{5-7}$ T G$_{1.2}$ विषसाद; Ct as in text (for निषसाद). —Ś D$_{8.12}$ om. 37^{cd}. Ñ$_1$ repeats 37^{cd} after 38^{ab}. —^{c}) Ñ$_1$ D$_{13}$ हि(D$_{13}$ ह) तं सोढुम्; B$_3$ G(ed.) [अ]थ तं सो(B$_3$ वो)ढुम् (for तदात्मानं). —^{d}) D$_{7.9-11}$ T$_{2.3}$ वोढुं (for सोढुं). Ñ$_1$ B$_3$ D$_{13}$ आत्मना(D$_{13}$ °त्मानं) कपिपीडि(D$_{13}$ °लीकृ)तः; Ñ$_2$ B$_{2.4}$ धर्तुं परमपीडितः; V D$_{2-4}$ अवस्थापयितुं ततः. —After क (see var.) in 37^{d}, D$_{13}$ reads 50–52^{b} for the first time, repeating them in their proper place. —After 37, Ñ$_1$ B$_{2.3}$ D$_{13}$ ins.:

1379* निपपात तदा भूमौ विशीर्णशिखरद्रुमः।

38 V$_1$ B$_1$ om. 38 (for B$_1$, cf. v.l. 37). —^{a}) Ñ B$_4$ तस्मात्; M$_{1.2}$ ततः (for तस्य). B$_{2.4}$ नगाद् (sic); B$_3$ नगां (sic) (for नगा). D$_4$ तस्मादुत्पतता नागा.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 53. 43
B. 6. 74. 39
L. 6. 53. 9?

तस्मिन्संपीड्यमाने तु भग्नद्रुमशिलातले ।
न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तमे ॥ ३९
सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा ।
लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४०
पृथिवीधरसंकाशो निपीड्य धरणीधरम् ।
पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४१
पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखम् ।
विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥ ४२
तस्य नानद्यमानस्य श्रुत्वा निनदमद्भुतम् ।
लङ्कास्था राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥ ४३
नमस्कृत्वाथ रामाय मारुतिर्भीमविक्रमः ।
राघवार्थे परं कर्म समैहत परंतपः ॥ ४४

—[b]) Ś Ñ1 V2 B3 D2.3.8.12.13 उरगाश्चापि(D3 °श्च वि-); Ñ2 B2.4 पन्नगाश्चापि; V3 D4 मणयश्चापि; D1 ऊरुवेगाच्च; M1.2 हरिवेगात्प्र- (for हरिवेगाच्च). D13 विह्वलाः (for जज्वलुः). —After 38[ab], Ñ1 repeats 37[cd]. —[c]) Ś V3 D2–4.6.8.12 T2.3 शिलाश्चैव; Ñ1 B4 D5 M3.5 व्यशीर्यंत; D7 G1.3 M1.2 विशीर्यंत; D13 विशीर्यंति (for व्यकीर्यन्त). D1 विशीर्यंत नगा वृक्षाः. —[d]) B3 पीडितानि (for °तस्य). Ś D6.8.12 T2.3 विनिपेतुः समंततः; V3 D2–4 निपेतुश्च (D2.3 °तुः स्म) समंततः.

39 [a]) Ś V B1 D2.4.8.12 प्र-; Ñ1 D13 तु; Ñ2 B2.4 D1 नि-; B3 च; D3 निष्- (for सं-). V3 B1.3 [ऽ]पि (for तु). —[b]) B2 भग्नदर्पाः; D4 भग्ने द्रुम-; D9 समग्रेण (for भग्नद्रुम-). Ś D2.3.8.12 -शिलातटे; Ñ1 D13 -शिलाघने; D4 -शिलोच्चये (for °तले). —B3 reads 39[cd] in marg. —[d]) Ñ2 B2–4 शीर्यमाणे (for घूर्णमाने). D4 घूर्णमानाः शिलीमुखाः. —For 39[cd], Ñ1 D13 subst.; while B3 ins. after 39:

1380* ददृशू राक्षसाः सर्वे घूर्णमानं नगोत्तमम् ।
[D13 चूर्णमानं (for घूर्णमानं).]

40 [a]) Ñ1 V3 B1 D4.9.13 संचू(Ñ1 D9.13 °घू)र्णित-; Ñ2 B2 विघूर्णित-; B4 विनिघूर्ण-; D8 सा चूर्णित- (for सा घूर्णित-). Ñ1 -बृहद्वाराः; B3 -महद्वार-; D13 M5 -गृहद्वार- (M5 °रा) (for -महाद्वारा). B3 (marg. also) सा चूर्णित-महद्वाराः; G (ed.) आघूर्णितपुरद्वारा. —[b]) V3 B1 सं- (for प्र-). D1 -दृढ-; M1.2 -पुर- (for -गृह-). D4 संभग्नमिव गोपुरा (sic). —[c]) Ñ1 सा व्याकुला (for त्रासा°). Ś Ñ2 V B1.2.4 D2–4.8.12 लंका संभ्रां(Ś D8 °क्रां)तर(D3 °वृ)-क्षौघा. —[d]) Ñ1 B4 D12.13 प्रवृत्तेव; V B1–3 D6.10.11 Ct प्रनृत्येव; D7 (marg. also as in V) प्रभग्नेव; Cg as in text (for प्रनृत्तेव). Ś V B1 D2.8.12 बभूव ह; B2.4 तथा(B2 °दा) बभौ (for [अ]भवत्तदा). Ñ2 नृत्यतीव तदा बभौ; D3 सहसैव बभूव ह; D4 प्रणिपत्य बभूव ह(marg. also °त्येदमब्रवीत्); G (ed.) प्रनृत्ते प्राद्रवत्तदा.

41 G (ed.) om. 41. —[a]) D1 धरणी-; D5 पृथ्वी- (subm.) (for पृथिवी-). D3 -संकाशं (for °शो). —[b]) D2 निष्पीड्य (for निपीड्य). Ś Ñ V B D2.3.6–13 T2.3 G1(*inf. lin.* also) पृथिवी- (for धरणी-). D4 -तलं (for -धरम्). —[d]) B1 समग्रां (for सार्णवां). Ñ2 B2.4 वानरर्षभः; D1 पवनात्मजः (for मारुतात्मजः). Ñ1 D13 सत्त्ववान्वानरेश्वरः; B3 वेगेन वानरोत्तमः. —After 41, D1 ins.:

1381* परमं यत्नमास्थाय शत्रुपक्षभयावहम् ।;
while D6 T G1 M3 ins.:

1382* आरुरोह तदा श्रीमान्हरिर्मलयपर्वतम् ।
मेरुमन्दरसंकाशं नानाप्रस्रवणाकुलम् ।
नानाद्रुमलताकीर्णं विकासिकमलोत्पलम् ।
सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम् ।
विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम् । [5]
नानामृगगणाकीर्णं बहुकन्दरशोभितम् ।
सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान् ।
हनूमान्मेघसंकाशो ववृधे मारुतात्मजः ।

[(l. 1) G1 ततः (for तदा). M3 तस्माद् (for श्रीमान्). —(l. 2) D6 T3 गिरिं; G1 हरिर् (for मेरु-). G1 -[आ]युतं (for -[आ]कुलम्). —G1 om. l. 3. —(l. 6) D6 T2 -द्विजमृग-; T3 -द्विजगण- (for -मृगगण-). D6 T2(also as above).3 -किन्नर- (for -कन्दर-). —G1 om. l. 7.]

42 D1 om. 42[ab]. —[a]) Ś D8.12 स; G2 तं (for तु). Ñ B2–4 D13 आक्रम्य; D9–11 G1 आविध्य; M5 उत्पीड्य (for आपीड्य). —[b]) Ś D8.13 -मुखमुन्मुखं; D9 M5 -मुख-संनिभं (for °वन्मुखम्). —[c]) M5 transp. [उ]ग्रं and [उ]च्चैस्. Ś V B1 D2–4.8.12 ननाद स(Ś V1 D8.12 च) विवृत्यो(B1 °त्ता)ग्रं; D1 ननादोच्चैर्भृशं नादं. —[d]) Ñ1 B3 सर्वराक्षसान्; D1.9–11 G1 रजनीचरान् (for इव राक्षसान्). D13 त्रासयामास राक्षसान्.

43 [a]) Ñ1 B3 D13 नानर्दमानस्य; D4 क्रोधय° (sic) (for नानद्य°). —[b]) Ś V B1.3 D2–4.7–12 उत्तमं (for अद्भुतम्). —[c]) Ś V B1 D1–4.8.12 लंकायां(V3 °या). Ñ B2–4 D1.6.9–11 T2.3 G1 राक्षसव्याघ्राः; D5.7 T1 G2.3 °सास्तत्र; D13 °सा व्यग्रा (for °साः सर्वे). —[d]) D4 स्वपितुं; D13 स्पर्धितुं (for स्पन्दितुं). Ñ1 B3 (marg. also as in text) D15 तदा; D9–11 क्वचित् (for भयात्).

44 [a]) Ñ1 V3 B2–4 D1.13 स(Ñ1 D13 तु) देवेभ्यो; D6 T2 (also as in V3) M5 स(M5 च) रामाय; D10.11 T3 M1.2 Ct समुदाय (for [अ]थ रामाय). Ś Ñ2 V1.2

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

स पुच्छमुद्यम्य भुजंगकल्पं
विनम्य पृष्ठं श्रवणे निकुञ्च्य ।
विवृत्य वक्त्रं वडवामुखाभ-
मापुप्लुवे व्योम्नि स चण्डवेगः ॥ ४५
स वृक्षषण्डांस्तरसा जहार
शैलाञ्शिलाः प्राकृतवानरांश्च ।
बाहूरुवेगोद्धतसंप्रणुन्ना-
स्ते क्षीणवेगाः सलिले निपेतुः ॥ ४६
स तौ प्रसार्योरगभोगकल्पौ
भुजौ भुजंगारिनिकाशवीर्यः ।
जगाम मेरुं नगराजमग्र्यं
दिशः प्रकर्षन्निव वायुसूनुः ॥ ४७
स सागरं घूर्णितवीचिमालं
तदा भृशं भ्रामितसर्वसत्त्वम् ।
समीक्षमाणः सहसा जगाम
चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ४८
स पर्वतान्वृक्षगणान्सरांसि
नदीस्तटाकानि पुरोत्तमानि ।
स्फीताञ्जनांस्तानपि संप्रपश्य-
ञ्जगाम वेगात्पितृतुल्यवेगः ॥ ४९

G. 6. 53. 51
B. 6. 74. 49
L. 6. 53. 101

B1 D2-4.8.9.12 नमस्कृत्य स देवेभ्यो(D4 स रामं च; D9.12 समुद्राय). —[b]) Ś D8.12 -दर्शनः (for -विक्रमः). —[c]) Ñ2 यत्नम् (for कर्म). —[d]) Ñ1 B3 D5-7.9-11.13 T1 G M3.5 Ct समीहतः Ñ2 B2 आजहार (for समैहत). G3 परंतपं. Ś V B1 D1-4.8.12 कर्तुमिच्छति(V1 °च्छुः स; B1 °च्छन्स; D3 °च्छन्हि) सत्वरः(D4 [with hiatus] उत्तरं); B4 आजहार समंततः ; T2.3 चिकीर्षुर्हरिपुंगवः .

45 [a]) T2.3 स्व- (for स). D13 उद्गम्य (sic) (for उद्यम्य). —[b]) Ś1 Ñ1 B1 D8.12 विनाम्य; G2 विनम्र- ; M1.2 नियम्य (for विनम्य). G2 -देहे; M5 वक्त्रं (for पृष्ठं). Ś Ñ2 V3 B D1-4.8.12 श्रवणौ; Ñ1 श्रवणं; D13 चरणौ (for श्रवणे). Ñ2 V1.2 B2.3 D3 G2 विकुं(Ñ2 V2 D3 °कु)च्य; V3 B1 विवृण्वन् ; B4 D9-11 निकुच्य; D4 विकुंचन् (for निकुञ्च्य). —[c]) D7 विवृत्त- ; D9 निवृत्य; D12 विवर्त्य; G2 वितत्य (for विवृत्य). Ś Ñ1 V B1 D2-4.8.12.13 भृशमुन्ननाद (for वडवा-मुखाभम्). D1 व्यावृत्य नेत्रे भृशमुन्ननाद. —[d]) G2 स पुप्लुवे (for आपुप्लुवे). Ñ2 B2 व्योम स(B2 सु-) चंड- ; B4 व्योम सुपर्ण- ; D7 व्योम्नि भुजंग- ; M3 व्योमनि चंड- (for व्योम्नि स चण्ड-). Ś V B1.3 D2-4.8.12 खमुत्पपाताद्भुतचंडवेगः (B3 °विक्रमः) ; Ñ1 D13 खमाप्लुवे चाद्भुतचंडवेगः ; D1 संप्लुप्लुवे व्योम्नि स चंडविक्रमः.

46 G (ed.) om. 46. —[a]) V2 B D3.5.7.9.10.13 M2 -खंडांस् ; V3 D1.2.8 -खंडं; D4 -जालान् (for -षण्डांस्). V1 D4 M3 सहसा (for तरसा). Ś D8.12 जिघृक्षन् ; D1 महात्मा (for जहार). —[b]) M1-3 शैलाच् (for शैलाञ्). B1 D1 शिलां; B3 तथा (for शिलाः). Ś V1.3 B1 D2.3.8.12 -पर्वतेभ्यः ; V2 illeg. (for -वानरांश्च). D4 शिलां च तान्प्राकृतपर्वतांश्च. —[c]) Ś D8.12 -पातोद्धत- ; Ñ1 V3 B1 D2-4 -वातोद्ध(Ñ1 D4 °द्धु)त- ; Ñ2 -वेगोद्यत- ; V1.2 M1.2 -पादोद्धत- ; B3 D5.7.10.11 -वेगोद्गत- ; D1 -वेगोन्नत- ; G2 -वेगोत्तम- ; Cv.g as in text (for -वेगोद्धत-). Ñ1 -वेगनुन्नास् ; Ñ2 -वात-पूर्णाः ; B1 D4 M5 -संप्रपन्नास् ; B2.4 -वायुनुन्नास् ; B3 -वायु-शून्यास् ; D1 -संप्रणुन्नं; M1.2 -वातनुन्नास् ; Cv.g as in text (for -संप्रणुन्नास्). D9 बाह्वोरुवेगोद्भवसंप्रणुन्नास् ; D13 बाहु-प्रवातोद्धतसंप्रणुन्नास् . —[d]) Ñ2 क्षीणप्रवेगाः ; D13 ते छिन्न-वेगाः ; T3 ते तीक्ष्णवेगाः (for ते क्षीण°). D2 प्रपेतुः . D1 न्यपातयत्सागरतोयमध्ये; D4 ते तीक्ष्णवेगाज्जलधिं प्रपेतुः .

47 Ñ2 B2-4 read 47 after 49. D4 reads twice 47[a-b]. —[a]) Ś2 D9 स तु; D3 ततौ (for स तौ). D7 -कल्प- (for -भोग-). —[b]) Ñ1 B4 -विकाश- ; D1 -समान- ; D9 -विकासि- (for -निकाश-). Ś V B1 D8.12 -कल्पः ; Ñ2 B2 -धर्मा; B3 (marg. also) -कर्म; B4 -रक्षः (for -वीर्यः). D2 यथा भुजंगौ प्रतिलभ्य कक्षौ; D4 भुजौ भुजंगाधिपतुल्यरूपौ (second time °वेगः). —[c]) Ś Ñ2 B2-4 D2.3.8.12 ददर्श (for जगाम). D4 G3 वेगात् ; D9-11 शैलं (for मेरुं). Ś V1.3 B1 D1-4.8.12 सुरराजकल्पो(V3 B1 D4 °तुल्यो) ; Ñ V2 B2.4 सहसाद्रिराजं ; B3 D13 T2 G3 नगराजमद्रिं (D13 °कल्पं; G3 °मुग्रं (for नगराजमग्र्यं). —[d]) D4 दिशं. V3 D2.13 प्रहर्षन् ; T2.3 प्रकंपन् (for प्रकर्षन्). Ś Ñ2 D8.12 वायुपुत्रः ; D1 °भूतः ; D2 राजपुत्रः (for वायुसूनुः).

48 Ś V B1 D1-4.8.12 om. 48[a-b]. B3 reads in marg. 48-49. —[a]) Ñ B2-4 D13 पूर्णतरंगमीनम् (for घूर्णितवीचिमालं). —[b]) D5-7 T1.2 G M5 तथा भृशं; D9-11 तदंभसा (for तदा भृशं). M1.2 घूर्णित- (for भ्रामित-). Ñ B2-4 D13 अतीत्य संत्रासि(Ñ1 °भ्रामि)तसर्व(B4 °त्व) सत्त्वं. —[c]) Ś V B1 D2.4.8.12 आप्लुत्य वेगात्(V2 वेगं) ; Ñ1 B3 D13 अवेक्ष्य(B3 °क्ष)माणः ; Ñ2 B2.4 D1.3 आदित्य-मार्गं(D1.3 °वेगात्) ; D5.9-11 समीक्ष्यमाणः ; D7 G2 स वीक्ष(D7 °क्ष्य)माणः (for समीक्षमाणः). —[d]) Ś V1 B1 D1-4.8.12 -भुजप्र- ; Ñ B2.3 D13 -करप्र- ; B4 G1 -कराद्रि- ; D7 G2 -करात्प्र- (for -कराग्र-). D1.4 -युक्तं (for -मुक्तम्).

49 B3 reads in marg. 49 (cf. v.l. 48). —[a]) D9-11 पक्षि- (for वृक्ष-). D9 -ग*न् (for -गणान्). —[b]) Ñ1 D1 नद्यस् ; D8.13 G1 नदी- (for नदीस्). Ñ V1.2

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 53. 52
B. 6. 74. 50
L. 6. 53. 102

आदित्यपथमाश्रित्य जगाम स गतश्रमः ।
स ददर्श हरिश्रेष्ठो हिमवन्तं नगोत्तमम् ॥ ५०
नानाप्रस्रवणोपेतं बहुकंदरनिर्झरम् ।
श्वेताभ्रचयसंकाशैः शिखरैश्चारुदर्शनैः ॥ ५१
स तं समासाद्य महानगेन्द्र-
मतिप्रवृद्धोत्तमघोरशृङ्गम् ।
ददर्श पुण्यानि महाश्रमाणि
सुरर्षिसंघोत्तमसेवितानि ॥ ५२
स ब्रह्मकोशं रजतालयं च
शक्रालयं रुद्रशरप्रमोक्षम् ।
हयाननं ब्रह्मशिरश्च दीप्तं
ददर्श वैवस्वतकिंकरांश्च ॥ ५३
वज्रालयं वैश्रवणालयं च ।
सूर्यप्रभं सूर्यनिबन्धनं च ।
ब्रह्मासनं शंकरकार्मुकं च
ददर्श नाभिं च वसुंधरायाः ॥ ५४

B1.2 D1–4.8.9.13 तडागानि (for तटाकानि). —[c]) G3 स्थिताञ्. V3 B1 तांस्तमसि (for तानपि सं-). Ñ2 V1 D12 -प्रपश्य; D5.7.9–11 T1 G M3.5 -प्रवीक्ष्य (for -प्रपश्यञ्). —[d]) Ś Ñ2 V1.2 B1.2.4 D2.3.8.12 अतिचंड-; Ñ1 पितृचंड- (for पितृतुल्य-). D6 -वेगतुल्यः (by transp.). D1 जगाम वेगेन सुचंडवेगः; D13 जगाम वेगात्स कपिप्रवीरः. —After 49, Ñ2 B2–4 read 47; while D13 ins.:

1383* पितृतुल्योऽथ वेगेन हनूमान्कपिकुञ्जरः।

50 D13 reads 50–52[b] for the first time after क (see var.) in 37[d] repeating them here. —[a]) B2 -मार्गम्; D13 -रथम् (for -पथम्). Ś V3 D1.2.8.12 M1.2 आसाद्य; B1.2 D3.7.13 G2 आस्थाय (for आश्रित्य). —[b]) Ñ1 B3 D13 पुनरंबरे; V B1 स ततोंबरे; D4 प्लवगोत्तमः; D6 T2.3 विगतश्रमः; M1–3 स गतक्लमः (for स गतश्रमः). Ś D1–3.8.12 स जगाम ततोंबरं (D2.3.13 °रे); Ñ2 B2.4 जगामोपरि सोंबरे (Ñ2 B2 °रं). —After 50[a–b], D5 (only l. 1).6.7.9–11 S ins.:

1384* हनूमांस्त्वरितो वीरः पितृतुल्यपराक्रमः।
जवेन महता युक्तो मारुतिर्मारुतो यथा।
जगाम हरिशार्दूलो दिशः शब्देन नादयन्।
स्मरञ्जाम्बवतो वाक्यं मारुतिर्वातरंहसा।

[(l. 1) M5 वेगात् (for वीरः). D5.9–11 G1 पितुस् (for पितृ-). —D9 om. l. 2–4. —(l. 2) D10.11 वातरंहसा; M5 मारुतोपमः (for मारुतो यथा). —(l. 3) D6 T2.3 M1–3 पूरयन् (for नाद°). —(l. 4) D7.10.11 भीमविक्रमः; T1 M5 वातरंहसः; G1.3 मारुतात्मजः (for वातरंहसा).]

—[c]) Ś B1 V2.3 D2.3.8.12 महाशैलं; V1 ततः शैलं; D5 सहसा* (for हरिश्रेष्ठो). Ñ B2–4 D1.4.6.7.9–11 T G M3.5 ददर्श सहसा चापि (Ñ1 B3 D4 श्रीमान्; D7 T1 G2.3 गत्वा; G [ed.] चैव); D13 ददर्श स हरिः श्रीमान्. —[d]) Ś Ñ V B D T1 G M3.5 महाकपिः (for नगोत्तमम्).

51 D13 reads 50–52[b] for the first time after क (see var.) in 37[d] repeating them here. —[a]) D5 om. from प्र up to हु in [b]. D4 -वृक्षलता-; D13 -प्रहरण- (for -प्रस्रवण-). T2.3 -[आ]कीर्णं (for -[उ]पेतं). B4 कल्पवृक्षं फलोपेतं. —[b]) D7 T1 G2 नाना- (for बहु-). —[c]) Ś Ñ2 V B1.2.4 D1–4.8.12 श्वेतै रजत- (for श्वेताभ्रचय-). D7.13 G2 -संकाशं (for °शैः). —[d]) Ś V B1 D2–4.7.8.12 G2 -दर्शनं. —After 51, D5–7.9–11 S ins.:

1385* शोभितं विविधैर्वृक्षैरगमत्पर्वतोत्तमम्।

[T3 पर्वतोपमं (for °त्तमम्).]

52 D13 reads 50–52[a–b] for the first time after क (see var.) in 37[d] repeating them here. —[a]) Ś V B1 D1–4.8 ततः; D12 स तत् (for स तं). V3 तमासाद्य; B2.4 समारुह्य (for समासाद्य). —[b]) D3 -प्रवृत्त-. Ñ2 B2 -[उ]द्गत- (for -[उ]त्तम-). Ñ2 B2.4 -चारुशृंगं; V3 B1 -सेवितानि; D6.7.10.11 T2.3 G2 -हेमशृंगं (for -घोरशृङ्गम्). D9 अदभ्रवृष्टोत्तमघोरशृंगं. —V3 B1 om. 52[c–d]. —[c]) Ś Ñ V1.2 B2–4 D2–4.6.8.12 T2.3 तपो- (D6 महा)वनानि; D13 बली बलानि (for महाश्रमाणि). —[d]) Ñ1 B2–4 D4 महर्षि- (for सुरर्षि-). B2 -सिंह- (for -संघ-). D13 महर्षिसंघातसंसेवितानि.

53 [a]) Ñ V B D4.13 -घोषं; G2 -शोकं; L (ed.) -लोकं (for -कोशं). Ñ2 V1.2 B2.4 रजतं; D9 रचित-; T3 भरत-; G (ed.) च जन-; Ct as in text (for रजत-). Ś V3 B1 D2.3.8.12 T2 -[अ]चलं; Ñ2 V1.2 B2.4 गिरिं; D6 -[आ]ह्वयं; Ct as in text (for -[आ]लयं). —[b]) D1 शिवालयं; T3 चक्रायुधं; Cg as in text (for शक्रालयं). B1 वज्र- (for रुद्र-). D1 -शिरःप्रमोक्षं; T3 -शरप्रभावं; G (ed.) -सदः प्रमोदं (for -शरप्रमोक्षम्). —[c]) Ñ2 B4 -शिरश्च तीव्रं; V1 B2.3 D4.9 -शरश्च दीप्तं (B2 तीर्थं); V3 B1 -सरश्च दीप्तं; B3 -शरप्रदीप्तं; D6 T2.3 -शिरःप्रदीप्तं; G3 -शरं च दीप्तं (for -शिरश्च दीप्तं). —[d]) Ś V1.3 B1 D2.3.8.12 -किंकराणां; B2 D1.5 T2.3 -किंनरांश्च.

54 [a]) Ś V B D3.8.12.13 वज्राकरं; Ñ2 हिमाकरं; D7 T1 वज्रयालयं; D10.11 Ct वह्नयालयं; T3 वज्रायुधं (for °लयं). —[b]) B3 om. (hapl.?) from second सू up to भं in 55[b]. T3 कोश- (for second सूर्य-). T2 M3 -निभं धनं; Cg.k.t as in text (for -निबन्धनं). —[c]) D4 ब्रह्माननं; D6.10.11 M1.2 Ck ब्रह्मालयं. —[d]) Ś1 सारं; Ś2 D1–3.8.12

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

कैलासमग्र्यं हिमवच्छिलां च
तथर्षभं काञ्चनशैलमग्र्यम् ।
स दीप्तसर्वौषधिसंप्रदीप्तं
ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ५५
स तं समीक्ष्यानलरश्मिदीप्तं
विसिष्मिये वासवदूतसूनुः ।
आप्लुत्य तं चौषधिपर्वतेन्द्रं
तत्रौषधीनां विचयं चकार ॥ ५६
स योजनसहस्राणि समतीत्य महाकपिः ।
दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥ ५७
महौषध्यस्तु ताः सर्वास्तस्मिन्पर्वतसत्तमे ।
विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ५८
स ता महात्मा हनुमानपश्यं-
श्चुकोप कोपाच्च भृशं ननाद ।
अमृष्यमाणोऽग्निनिकाशचक्षु-
र्महीधरेन्द्रं तमुवाच वाक्यम् ॥ ५९

G. 6. 53. 60
B. 6. 74. 61
L. 6. 53. 111

नासां; Ñ1 V1.2 B1.2.4 देशांश्च; Ñ2 D4 देवांश्च; D13 द्वारांश्च (for नाभिं). V1 D4 वसुंधरायां.—After 54, D7 ins.; while K (ed.) ins. after 55^{ab}:

1386* विघ्नेश्वरं तत्र सनन्दिकेश्वरं
स्कन्दं वृतं देवगणैर्ददर्श ।
उमां सकन्यामथ कन्यकाभि-
र्विलासयन्तीं ददृशेऽप्यवीर्यः ।

[(l. 1) K (ed.) -[ई]शं (for -[ई]श्वरं).—(l. 3) K (ed.) सुदुर्गाम् (for सकन्याम्).]

55 B3 om. up to भं in ^{b} (cf. v. l. 54).—^{a}) Ś Ñ V B1.2.4 D1–4.7–12 G1.2 उग्रं; M5 अद्रिं (for अग्र्यं). —V3 damaged from मग्र्यं up to थर्ष in ^{b}. Ś D2.4.8.9 T3 -शिलाश्च; Ñ V1.2 B4 T1 -शिलाभं; B2 -शिखाभं; Cr.m.t as in text (for -शिलां च). D13 कैलासमुख्यं हिमवच्छिलाभं. —D13 om. 55^b.—^{b}) Ś Ñ V1.2 B1.4 D2–4.8.12 तं चर्षभं; B2 तमप्रभं; D5.7.10.11 T G2.3 M1.2 तं वै वृषं; D9 सूर्यप्रभं; G1 तदर्षभं (for तथर्षभं). Ś D8 -शृंगम्; D1 -तुल्यम् (for -शैलम्). Ś Ñ2 V B1.2.4 D1–4.8.12 उग्रं; D10.11 उग्र्यं (for अग्र्यम्).—After 55^{ab}, D6 T2.3 ins.:

1387* जम्बुद्वीपं पर्वतांश्चाधिगम्य
तत्रोत्तरं वै लवणोदधिं च ।
अतीत्य शाकाह्वयमुत्तमं च
क्षीरोदधिं शीघ्रमगात्कपीन्द्रः ।

[l. 1 unmetric.—(l. 2) T2 -[अं]बुधिं (for -[उ]दधिं).—(l. 3) T3 आदित्य- (for अतीत्य).—(l. 4) D6 reads in marg. from दधिं up to पीन्द्रः. T3 क्षिप्रम् (for शीघ्रम्).]

—Thereafter T2 cont.:

1388* क्षीरोदमध्ये हनूमान्कपीन्द्रः.

—After 55^{ab}, K (ed.) ins. 1386*.

—^{c}) Ś Ñ V1.2 B2–4 D1–4.8.12 दीप्तं च; V3 B1 दिव्यं च; D6.9–11 T2.3 G1.3 प्रदीप्त-; D7 M3.5 Cg संदीप्त- (for स दीप्त-). D1 दीप्तौषधि- (for -सर्वौ°). Ś D2.3.8.12 -संप्रयुक्तं; V3 B1 -पर्वतेंद्रं; D4 -संयुतं च; T2 -संप्रदीप्तः; Cg as in text (for -संप्रदीप्तं). D13 सकांचनं चौषधिसंप्रदीप्तं. —After 55^c, T2 ins.:

1389* स मारुतिर्मारुततुल्यविक्रमो ।

—^{d}) B3 D13 तत्रौषधि-; B4 चैवौ° (for सर्वौ°). Ñ2 V1.2 B D6.13 -पर्वतं च; V3 -संयुतं च (for -पर्वतेन्द्रम्) D4 व्यरोचयच्चौषधयश्च तस्मिन्. —After 55, D13 ins.:

1390* निरीक्ष्यमाणः पवनात्मजस्तदा.

56 D1.9 om. (hapl.) 56^{abc}.—^{a}) D4 एवं (for स तं). Ś V3 B1.3 D2.3.8.12 -संप्रदीप्तं; Ñ1 D4 -दीप्त-(D4 °प्ति)रश्मिम्; D6 T2.3 -रश्मिकल्पं; D7.10.11 राशिदीप्तं; G3 damaged (for -रश्मिदीप्तं).—^{b}) D4 विसिष्मिये वायु-सुतस्तदानीं.—^{c}) D13 आफुल्लितं; M1.2 आसाद्य तं; M3 आवृत्य तं (for आप्लुत्य तं). Ñ1 B3 तत्रौषधि-; G1 सर्वौ° (for तं चौ°). Ñ1 -पर्वतेंद्रे. D13 आफुल्लितं चौषधिपर्वतेंद्रं. —V1 illeg. for ^{d}.—^{d}) D9 T3 निचयं (for विचयं). Ś D2.8.12 विवेश यत्रौषधयश्चतस्रः(D2 °ताः स्म); Ñ V2.3 B D4.13 निशामयामास महौषधीस्ताः(B2 °धिस्तदा; B3 °धिं तां).

57 ^{b}) Ś V B1 D2–4.8.12 समाक्रम्य (for समतीत्य).—^{c}) G1 दिव्यौषध-. B3 -युतं; D4 -वनं; D5 T1 -वरं; M1.2 -धरे (for -धरं). D4 सम्यक्; M1.2 शैले (for शैलं).—^{d}) D1 पवनात्मजः.—For 57^{cd}, Ś Ñ1 V3 B1 D2.3.8.12 subst.; while Ñ2 V1.2 B2–4 D4.13 ins. after 57:

1391* अविश्रान्तो महातेजा व्यचिनोत्स महौषधीः ।

[Ñ V2 B2.4 D4.13 अविश्र(D13 °श्रा)म्य; B3 अधिगम्य (for अविश्रान्तो). Ś D8 विचिकाय; Ñ1 विचिन्वन्स; V1.2 D2.12 स(D2.12 सं-) विचिन्त्य; V3 B1 व्यचिनोत्ता; D3 संनिवेद (sic); D4 स विचिन्वन् (for व्यचिनोत्स).]

58 ^{a}) D1 तु तं दीप्तस्; D9–11 G1 M3 ततः सर्वास्; M1.2 तु ता दिव्यास् (for तु ताः सर्वास्).—For 58^{ab}, Ś Ñ V B D2–4.8.12.13 subst.:

1392* ततस्ताः कामरूपिण्यो महौषध्यो महाकपिम् ।

—^{d}) Ś Ñ2 V2.3 B D1–3.8.12.13 तदा (for ततो).

59 ^{a}) D1 तां; G2 तन् (for ता).—^{b}) D7.9–11 रोषाच् (for कोपाच्).—^{c}) D9 [ऽ]पि (for ऽग्नि-). D7.9–11 -समान- (for -निकाश-).—^{d}) D6 T2.3 पुनरप्यचिन्वन्

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 53. 61
वायुश्चोन्मथते वृक्षान्न च किंचिद्विकत्थते।

[(l. 1) D4 दहति (for तपति).—(l. 2) D4 [उ]न्मृथते (for [उ]न्मथते). V2 (second time) B1 D1-3.13 मथ्नाति पवनो (for वायुश्चोन्मथते). V2 (both times) विकत्थते. B3 न किंचिदपि कत्थते; D4 किंचिद्वायु विकत्थते (for the post. half).]

—Thereafter B3 repeats 13 in marg.

26 a) Ś1 शर-; Ś3 D8.12 [अ]मर- (for पञ्च). Ś D8.13 -बाणानाम्; B1 D1-3.13 -पर्वाणम् (for नाराचान्). D4 (marg.) रावणिं बाणान् (for पञ्च नाराचान्). —b) T3 आकर्णान्. Ñ V1 D6 T G1.2 M3 शितान्; B2.3 हतान् (for शरान्). Ś D8.12 एकमा(D12 °स्या)कृष्य वै धनुः; B1 D1-3 G (ed.) आकर्णात्पू(G [ed.] °र्णपू)रितं शरं; D4 आकर्ण्याकृष्ट-मोचिताः; D7 आकर्णपरिपूरितान्; D13 *** पूरितं धनुः. —c) B3 T1 G1 M1.2.5 विचखान; D7.10.11 G2 विजघान; D9 T2.3 M3 निजघान (for निचखान). Ñ2 V1.2 B2-4 M5 -वेगाल्; B1 D3 -वेगो; D1.2 -वेगं; G1 -तेजा (for -वेगाँल्). Ś D8.12.13 चिक्षेप निशितं वेगाल्. —d) B1 D1-3 रावणा-त्मजे; B3 नैर्ऋतोरसि (for राक्षसोरसि).—After 26, Ñ V1.2 B D4-7.9-11 S ins.:

1668* सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः।
नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा।

[(l. 1) Ñ V1.2 B1 D9.11 सपत्रवाजिता; B4 सुपर्णराजिता; D4 अपत्रा राजिता; T2 सुपत्रा वेगिनो; T3 संपत्रा वेगिनो; M1.2 सुपत्र-वाजिनो; Cm.t as above (for सुपत्रवाजिता). D4 ज्वलंत; G1 श्वसिता (sic) (for ज्वलिता). B3 D4 पावकाः (for पन्नगाः).—B1 om. l. 2.—(l. 2) D4.7 T3 M5 भासंते; G2 भासंति (for [अ]भासन्त). B3 सावित्र- (for सवितू). ❀ Cr: नैर्ऋतोरस्यभासन्त इति पाठः. ❀]

27 a) Ś B1 D1-3.8.12.13 शरेण(B1 D1-3 °णा-) हतस् (for शरैराहतस्).—b) Ś D8.12.13 राक्षसो; B4 शरौघा (sic); D6 G2 सरोषाद् (for सरोषो).—c) Ś D8.12 अप्रमुक्तैस्; Ñ V1 B2-4 D4 सु(D4 स)पर्वभिस्; B1 D1.2 सुप्रमुक्तैस् (D1 °क्तस्); G2 सुप्रयुक्त-; G3 M1.2 सुप्रसन्नैस् (for सुप्रयुक्तैस्). D3 G2 शितैर् (for त्रिभिर्).—d) G3 प्रविव्याध स.

28 a) B1 D1-3 बभौ सु- (for बभूव). M3 तदा (for महा-).—b) Ś D8.12 हरि- (for नर-).—c) B3 G2 तुमुले (for तुमुलो). Ś D1.2.8.12.13 घोरः; B1 D3 भीमः (for युद्धे).—d) Ñ2 D6.7.9-11 T3 M3 -जयैषिणोः (for -वधैषिणोः).

29 D6 om. (hapl.) 29.—a) Ś D8.12.13 उभौ तौ; D10.11 विक्रांतौ (for उभौ हि).—D9-11 om. (hapl.) 29c-d.—c) Ś Ñ V1.2 B D1-4.8.12.13 च (for सु-). D1.2 विख्यातौ (for -विक्रान्तौ).—d) Ś D8.12 उभौ (for सर्व-). Ñ B1.3.4 D2.3.5 M5 -शास्त्रास्त्र-(B1.3.4 D2.5 M5 °र्थ-); D4 -राक्षस- (for -शस्त्रास्त्र-). Ś D8.12 -वेदिनौ (for -कोविदौ). V2 T2.3 सर्वशस्त्रविशारदौ. ❀ Cr: सर्व-शास्त्रार्थकोविदाविति पाठः. ❀

30 Ś D8.12 om. from 30 up to 6.76.8b.—a) Ñ V1.2 B D1-4.13 -दुर्धर्षाव्; D5.7 T G3 M1-3 -दुर्जेयाव् (for -दुर्जेयाव्).—b) Ñ V1.2 B D1-4 उभौ परम-; D13 उभावुत्तम-; G3 तौ तुल्यबल- (for अतुल्यबल-).—D1 om. (hapl.) 30c-31b.—c) Ñ V1 B2-4 D4.13 G2 M1.2 महावीर्यौ; D2.3.7.9-11 G1 M3.5 तदा(D2 °था) वीरौ (for महावीरौ).

31 Ś D8.12 om. 31; D1.13 om. 31a-b (for Ś D1.8.12, cf. v.l. 30).—a-b) V1 B1 D2.3 G1 M5 बलि-; D6 T1 वृष- (for बल-). V1.2 B1 D2.3 -शक्राव्; B4 marg. (for -वृत्राव्). Ñ V1.2 B2.3 D2.3 इवायस्तौ; B1.4 इवा(B4 °व)यांतौ; D5 G1 M3 इवाभीतौ; D6 T2.3 इव युतौ (D6 °धि); T1 इवाहितौ; M5 इव पुरा (for इव हि तौ). G3 बलिपु ***** (damaged); M1.2 बलवृत्रारिसदृशौ (for a). D6 न देवैः; G1.2 M3 युधि तौ (for युधि वै). Ñ V1 B D2.3 दुष्प्रति(B1 °ष्परि)धर्ष(B3.4 °र्धि)णौ; V2 दुष्प्रसहौ च तौ; D7 तौ दुष्प्रचारिणौ (for वै दुष्प्रधर्षणौ). D4 बलवृत्र-वधायस्तौ युध्यतः प्रतिवर्षिणौ. ❀ Cr: बलवृत्राविति। अत्र बल-शब्देन बलारिर्लक्ष्यते दृष्टान्तोपपत्त्यर्थम्।; so also Cm.g.t. ❀ —c) G3 M1.2 -वीर्यौ (for -[आ]त्मानौ).—d) Ñ V1.2 B D1-4.13 व्याघ्र-; D9 यथा; T3 तथा (for तदा).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ ।
नरराक्षससिंहौ तौ प्रहृष्टावभ्ययुध्यताम् ॥ ३२

सुसंप्रहृष्टौ नरराक्षसोत्तमौ
जयैषिणौ मार्गणचापधारिणौ ।
परस्परं तौ प्रववर्षतुर्भृशं
शरौघवर्षेण बलाहकाविव ॥ ३३

G. 6. 67. α
B. 6. 88. 37
L. 6. 66. 34

इति श्रीरामायणे युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

---

32 Ś D8.12 om. 32 (cf. v.l. 30). —$^{a-b}$) B1 D1–3 शितानव-; B3 सुबहूंश्च; D4.5 T1 G3 बहूनि चि-(D4 हि) (for बहूनव-). G1 बाणौघाननवस्थितौ (for ^{b}). D13 शिताञ्छरान्विसृजंतौ मार्गमार्गौ जयस्थितौ. —^{c}) D7.9–11 -मुख्यौ; Ck as in text (for -सिंहौ). B3 सं-; D13 तु (for तौ). —^{d}) G2 -[अ]बुध्यतां; G3 -[अ]धावतां; Ck as in text (for -[अ]युध्यताम्). Ñ V1.2 B2.4 D4 संप्रहृष्टावयुध्यतां; B1 D1–3.13 प्रहृष्टवद(B1 °ष्टौ तावं)युध्यतां. ❀ Ck: नरराक्षससिंहौ तौ संप्रहृष्टावयुध्यताम्। ततः शरान्दाशरथिरित्यादि । अत्र मध्ये पुनरुक्तं श्लोकद्वयं प्रक्षिप्य सर्गमवच्छिन्दन्ति । पुरः पश्चादुभयोस्तुमुलं युद्धमेव केवलं वर्तते न किंचिदर्थान्तरं प्रकरणान्तरम् । अतो(ऽ)युक्तोऽवच्छेदः। ; Ct cites Ck as follows: 'नरराक्षसमुख्यौ तौ प्रहृष्टावभ्ययुध्यताम्" इत्युत्तरं श्लोकद्वयं भिन्नवृत्तं प्रक्षिप्तम्। तदुत्तरं सर्गावच्छेदश्चासंप्रदायः। तयोर्युद्धस्यैवाग्रे सत्त्वेन प्रकरणान्तराभावादिति कतकः. ❀

33 Ś D8.10.12 om. 33 (for all except D10, cf. v.l. 30). D11 om. 33 and colophon. G3 damaged from हृष्टौ in 33^{a} up to 6.76.2^{b}. —^{a}) Ñ V1.2 B2–4 D4 -राक्षसौ तदा; B1 D1–3.7.9.13 -राक्षसौ तौ (for -राक्षसोत्तमौ). —^{b}) Ñ V1.2 B D1–3.13 शरामि(B3 D3 °ति)चंडौ(B1 °तप्तौ; D13 °पन्नौ) शितशस्त्रधारिणौ(V2 B1 D1–3.13 °स्त्रपाणी); D4 स चातिचंडावतिसंप्रहारिणौ. —^{c}) M5 शरं (for भृशं). Ñ V1.2 B D1–4.13 अभीक्ष्णमन्योन्यमुभाववर्षतां(V2 B1 D1–3.13 °मभिप्रपेततुः; D4 °स्वभाववर्षतां [sic]). —^{d}) V2 B1 D2.3 -वेगेन (for -वर्षेण). Ñ V1 B2–4 D4 यथा (for इव). V2 B1 D1–3 यथा बलाहकौ. ❀ Cg: शरौघः, मेघपक्षे जलौघः। शरशब्दो हि जलवाची। शरधिरिति समुद्रपर्यायात्. ❀ —After 33, D5–7.9 S (except G3) ins.:

1669* अभिप्रवृद्धौ युधि युद्धकोविदौ
शरासिचर्मौ शितशस्त्रधारिणौ ।
अभीक्ष्णमाविध्यथतुर्महाबलौ
महाहवे शम्बरवासवोपमौ ।

[(l. 1) D3 अथाभिवृद्धौ; D7.9 अथ प्रवृद्धौ; M5 अभिप्रयुक्तौ (for अभिप्रवृद्धौ). T3 अभिप्रवृद्धायुध-. —(l. 2) D7.9 G2 -[अ]ति-; M5 -[अ]सि- (for -[अ]सि-). M1.2 निशिताग्र- (for शितशस्त्र-). —(l. 3) T3 अभीष्टम्. D9 आविध्य धनुर् (for आविध्यथतुर्). —(l. 4) D5 T1 M3 -वासवाविव.]

Colophon: Ś D3.11.13 om.; G3 damaged colophon (cf. v.l. 30 and 33). —*Kāṇḍa name*: Ñ B D2.4.13 लंकाकांडे. —After *Kāṇḍa name*, D2.13 ins. युद्धपर्वणि. —*Sarga name*: Ñ1 V1 B1 D1–4 आक्षेपयुद्धं; Ñ2 [ऽ]वक्षेपयुद्धं; V2 इंद्रजिदाक्षेपः ; B2 राक्षसयुद्धं; B3 इंद्रजिद्वधे ; B4 [ऽ]स्त्रबाणयुद्धं ; D13 सौमित्रींद्रजिद्युद्धं. —*Sarga no.* (figures, words or both): Ñ1 V2 B2.4 D2.4.13 om.; Ñ2 79; V1 67; B1.3 63; D1 69; D2 71; D5–7.10 T1 G1.2 M3.5 88; D9 64; T2 91; T3 95; M1.2 89. —After colophon, G1.2 M1.2.5 conclude with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

७६

G. 6.68. 1
B. 6.88.37
L. 6. 67. 1

ततः शरं दाशरथिः संधायामित्रकर्शनः ।
ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ १
तस्य ज्यातलनिर्घोषं स श्रुत्वा रावणात्मजः ।
विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २
तं विषण्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् ।
सौमित्रिं युद्धसंसक्तं प्रत्युवाच विभीषणः ॥ ३
निमित्तान्यनुपश्यामि यान्यस्मिन्रावणात्मजे ।
त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४
ततः संधाय सौमित्रिः शरानग्निशिखोपमान् ।
मुमोच निशितांस्तस्मै सर्पानिव विषोल्बणान् ॥ ५
शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ।
मुहूर्तमभवन्मूढः सर्वसंक्षुभितेन्द्रियः ॥ ६
उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः ।
ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ॥ ७
सोऽभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः ।
अब्रवीच्चैनमासाद्य पुनः स परुषं वचः ॥ ८
किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् ।
निबद्धस्त्वं सह भ्रात्रा यदा युधि विचेष्टसे ॥ ९

76

V$_3$ missing up to 9 (cf. v.l. 6.74.15). Ś D$_{8.12}$ om. up to 8^b (cf. v.l. 6.75.30). G$_3$ damaged up to 2^b (cf. v.l. 6.75.33). D$_{11}$ cont. the previous Sarga.

1 ^{a}) Ñ V$_{1.2}$ B$_1$ D$_{1-3.7.9-11.13}$ G$_{1.2}$ M Ck.t शरान्; Cg as in text (for शरं). —^{b}) Ñ$_2$ V$_{1.2}$ B$_{1-3}$ D$_{4.6.10.13}$ [अ]मित्रकर्षणः; B$_4$ [अ]मितविक्रमः. —^{c}) B$_1$ D$_{1-3.13}$ रा(D$_{2.13}$ र)क्षसे घोरान्(D$_{13}$ क्रुद्धो) (for राक्षसेन्द्राय). —^{d}) G$_1$ भूयः (for क्रुद्धः). B$_1$ D$_{1-3.13}$ क्रुद्ध आ(D$_{13}$ घोराना)शीविषोपमान्.

2 ^{a}) D$_4$ अस्य (for तस्य). —^{b}) Ñ V$_{1.2}$ B D$_{1-4.13}$ असहन्; D$_{5.7.9}$ T$_{1.2}$ G$_2$ M$_2$ संश्रुत्वा (for स श्रुत्वा). B$_1$ D$_4$ राक्षसात्मजः; D$_{7.9-11}$ राक्षसाधिपः. —^{c}) M$_5$ विषण्ण- (for विवर्ण-). —^{d}) D$_1$ om. from समुदैक्षत up to प्रत्युवाच in 3^d. Ñ V$_1$ B$_{2-4}$ D$_4$ समुदैक्षत लक्ष्मणं; G$_3$ रावणिः समलक्ष्यत.

3 D$_1$ om. up to प्रत्युवाच in 3^a (cf. v.l. 2). —^{a}) B$_1$ D$_{2.3.5.13}$ T$_1$ G$_1$ M$_{1-3}$ विवर्ण- (for विषण्ण-). B$_4$ दीनं (for दृष्ट्वा). D$_{10}$ विषण्णवदनं दृष्ट्वा. —^{b}) D$_3$ रावणानुजः; D$_3$ राघवानुजः; T$_3$ रावणात्मजः (for रावणात्मजम्). —D$_3$ om. 3^c–4. —^{c}) B$_2$ सत्त्व-; D$_7$ G$_2$ M$_5$ मित्र- (for युद्ध-). V$_{1.2}$ B$_4$ D$_{4.9-11}$ G$_{1.3}$ M$_{3.5}$ Cm.k.t -संयुक्तं; B$_3$ -संबंधम्; D$_6$ -संक्रुद्धं; D$_7$ G$_2$ -संपन्नं; T$_{2.3}$ -संरक्तं (for -संसक्तं). —^{d}) Ñ$_2$ V$_{1.2}$ B$_{2-4}$ D$_4$ इति (for प्रति-).

4 D$_3$ om. 4 (cf. v.l. 3). —^{a}) Ñ V$_{1.2}$ B D$_{1.2.4.13}$ इंगितानि (for निमित्तानि). D$_{6.10.11}$ M$_2$ [उ]पपश्यामि; Cm.g as in text (for [अ]नु°). —^{c}) Ñ V$_2$ B D$_{1.2.4.13}$ G (ed.) त्वर(G [ed.] युध्य)स्व (D$_{4.13}$ त्वरयस्व [hypm.]) नरशार्दूल. ❀ Cm: अस्मिन् यानि मुखवैवर्ण्यादीनि निमित्तान्यनुपश्यामि तैरयं भग्न इति जाने। तेन कारणेन त्वर त्वरस्वेत्यर्थः।; so also Cg.k.t. ❀ —^{d}) M$_5$ हन्य (for भग्न). B$_3$ D$_{11}$ एव (for एष). Ñ V$_{1.2}$ B D$_{1.2.4.13}$ निशाचरः (for न संशयः).

5 ^{b}) D$_{5.6}$ T M$_{3.5}$ बाणान् (for शरान्). Ñ V$_{1.2}$ B$_{2-4}$ D$_{4.7.9-11}$ G$_2$ आशीविषोपमान्. —^{c}) B$_{2.3}$ D$_{9-11}$ विशिखांस् (for निशितांस्). Ñ$_1$ तीक्ष्णान्; D$_{5.6.9-11.13}$ T$_1$ G$_3$ M तस्मिन् (for तस्मै). —^{d}) D$_3$ सपांसव- (for सर्पानिव). Ñ V$_{1.2}$ B$_{1.2.4}$ D$_{1-3.5.6.13}$ T G$_3$ M महाविषान्; D$_4$ जितेंद्रियः (for विषोल्बणान्). B$_3$ शरानाशीविषोपमान्.

6 D$_4$ om. (hapl.) 6–7^b. —^{a}) G$_3$ क्रोध- (for शक्र-). D$_{1-3.13}$ स शक्राशनिसंस्पर्शैर्. —^{b}) D$_{1.5}$ T$_1$ हतः (for [आ]हतः). —^{c}) D$_1$ युद्धं (for मूढः). —^{d}) Ñ V$_{1.2}$ B$_{2.3}$ शक्रजित्; B$_1$ सर्वतः; B$_4$ इंद्रजित्; M$_{1.2}$ वीरः सं-; Cm.g as in text (for सर्वसं-). D$_1$ मोढाखिलसंक्षुर्तेंद्रिः (corrupt). ❀ Cm.g.t: सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः. ❀

7 D$_4$ om. 7^{ab} (cf. v.l. 6). D$_{10.11}$ T$_1$ om. (hapl.) 7^{ab}. —^{a}) B$_4$ मुहूर्तं तु (for मुहूर्तेन). —^{b}) G$_1$ M$_{1.5}$ प्रत्याहर्तेंद्रियः. —^{cd}) D$_2$ [अ]थ (for [अ]व-). D$_{13}$ ददर्शावस्थिततरम् (for ^{c}). Ñ V$_{1.2}$ B D$_{1-4.7.9-11.13}$ G$_{1.2}$ आजौ (for वीरो). D$_5$ T$_1$ M$_5$ transp. वीरं and वीरो.

8 ^{a}) B$_{3.4}$ [ऽ]ति- (for ऽभि-). D$_5$ T$_1$ सौमित्रिर्मिंद्रजिद्रोषात्. —^{b}) Ñ V$_1$ B$_{2-4}$ रोषरक्तांत-; V$_2$ B$_1$ D$_{1-4.13}$ क्रोध(D$_{13}$ कोप)संरक्त-; D$_5$ T$_1$ संरक्ततर- (for रोषात्संरक्त-). —^{c}) G$_1$ पुनर् (for चैनम्). —^{d}) D$_3$ च (for स).

9 ^{a}) Ś D$_{8.12}$ मे युद्धे; B$_{1.3}$ D$_6$ M$_5$ दुर्बुद्धे; D$_{2.4.5}$ T$_1$ G$_3$ तं(D$_4$ मां) युद्धे; D$_{13}$ यद्युद्धे (for तद्युद्धे). —Ś D$_{8.12}$ om. (hapl.) 9^b–10^a. —^{b}) D$_4$ प्रथमं. B$_1$ D$_5$ G$_3$ तत्; B$_4$ D$_{6.13}$ T$_{2.3}$ यत् (for मत्-). D$_2$ प्रदृष्टो मत्पराक्रमः. —^{c}) Ñ V$_1$ B$_{3.4}$ D$_{1-4.13}$ निरस्तस्त्वं. —^{d}) V$_2$ D$_{9.13}$ G$_2$

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

युवां खलु महायुद्धे शक्राशनिसमैः शरैः ।
शायितौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ ॥ १०
स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम् ।
गन्तुमिच्छसि यस्मात्त्वं मां धर्षयितुमिच्छसि ॥ ११
यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः ।
अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ १२
इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ।
दशभिश्च हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ १३

ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् ।
क्रोधाद्विगुणसंरब्धो निर्बिभेद विभीषणम् ॥ १४
तद्दृष्ट्वेन्द्रजितः कर्म कृतं रामानुजस्तदा ।
अचिन्तयित्वा प्रहसन्नैतत्किंचिदिति ब्रुवन् ॥ १५
मुमोच स शरान्घोरान्संगृह्य नरपुंगवः ।
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि ॥ १६
नैवं रणगताः शूराः प्रहरन्ति निशाचर ।
लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव ॥ १७

G. 6. 68. 17
B. 6. 88. 52
L. 6. 67. 16

M5 यथा (for यदा). D3 युद्धे. D11 निवेष्टसे (for विचेष्टसे). Ñ V1 B2-4 यथा(Ñ1 °दा) पांशुष्वचेष्टथाः; D6 T2.3 रणे नागमयैः शरैः; M3 यथा भुवि विचेष्टसे.

10 Ś D8.12 om. 10^{a} (cf. v.l. 9). For 10-11^{ab}, cf. l. 1-3 of 1661*. —^{a}) Ñ2 पुरा (for युवां). Ñ1 V1 B2.4 तदा; Ñ2 B1 D2.3.5.13 T1 G1.3 M1-3 मया; D1 om.; D4 यदा (for महा-). G2 युवां *थमे युद्धेन. —^{b}) Ś Ñ V1.2 B2-4 D1-4.7-13 G1.2 वज्र- (for शक्र-). B3 शितैः (for शरैः). —^{c}) Ś Ñ V1.3 B2 D8.12 तौ (Ñ1 B2 स्थो; V1 तु) मया (for प्रथमं). V2 D5 T1 G3 M1.2 वीरौ; V3 युद्धे (for भूमौ). —^{d}) Ñ1 V3 B4 निःसंज्ञौ (for विसंज्ञौ).

11 For 10-11^{ab}, cf. l. 1-3 of 1661*. —^{ab}) B1 D1 वै (for वा). G2 न तेस्ति वा (by transp.) (for वा नास्ति ते). B1 D1.3 व्यक्तं; D4 मन्युर् (for मन्ये). L (ed.) सुव्यक्तं (for व्यक्तं वा). B1 कुरुषे चाप-संग्रहं (for ^{b}). Ś D8.12 स्मृतिस्ते नास्ति तेनाद्य गमिष्यसि यमक्षयं; D2.13 स्मृतिर्नैवास्ति मे(D13 ते) व्यक्तं यास्यसे(D13 भ्रातुश्च) यमसादनं. —Ś D8.12 G1 om. 11^{cd}. V3 damaged from 11^{c} up to यु in 12^{a}. —^{c}) Ñ V1.2 B D1-4.13 येन; D7.9-11 यन्मां (for यस्मात्). —^{d}) D9-11 आ- (for मां). Ñ V1.2 B2-4 योधयितुम् (for धर्षयितुम्).

12 V3 damaged up to यु in ^{a} (cf. v.l. 11). —^{a}) B1.4 D1.2.9.11.13 G2 प्रथमं; Cm.g.t as in text (for प्रथमे). —^{b}) B4 D13 मे (for मत्-). —^{c}) D13 अथ (for अद्य). Ś V1 B1 D1-5.8.12.13 G3 M3 ते (for त्वां). —^{d}) Ś V2 B1 D1-4.8.12.13 स्थिरो भव; Ñ V1.3 B2-4 ममाग्रतः (for व्यवस्थितः).

13 ^{a}) D6 स त्रिभिर् (for सप्तभिर्). —^{b}) G (ed.) अरिं (for अभि-). —V3 damaged for 13^{cd}. —^{c}) D7.9-11 G1.2 M3 तु (for च).

14 ^{a}) T2 M3 शत-; M5 शित- (for शर-). Ñ V B2-4 -सहस्रेण; M5 -शरेणैव (for -शतेनैव). —^{b}) Ś B1 D1.2.4.8.12.13 वि(B1 सं; D1.2 सु; D4 क्षि)प्रमु(D4.13 °यु)क्तेन (for सुप्रयुक्तेन). Ñ V B2-4 क्षिप्रहस्तो निशाचरः. —^{c}) Ñ V1.3 B2-4 -रक्ताक्षो; D1 -संरब्धः; D8.12 -संरंभो; G2 -संक्रुद्धो; Ct as in text (for -संरब्धो). —^{d}) Ś2 M1 विभीषणः.

15 ^{a}) T3 तं (for तद्). Ñ V1.3 B2-4 D9-11 G1.2 M3 [इं]द्रजिता. Ś V2 B1 D1-4.8.12.13 स(D13 तं) दृष्ट्वा राक्षसेंद्रस्य; D5 ततो दृष्ट्वेंद्रजित्कर्म. —^{b}) Ś V2 B1 D1-4.8.12.13 कर्म (for कृतं). V1.2 B1.2 D1 T2 M5 तथा (for तदा). —^{cd}) V3 damaged for अचिन्तयित्वा. Ñ1 B4 व्यसनं; Ñ2 B2.3 व्यहसन्; G2 सहसा (for प्रहसन्). B4 D5 T1 नैव; D9 अपि; Cm.g.k.t as in text (for नैतत्). V1.3 चित्रमिति; B1.3 किंचिदपि(B3 °भि-). D5-7.9 T1 G1.3 M1.2.5 Cm तदा(D6.9 °था)ब्रवीत्; Cg.k.t as in text (for इति ब्रुवन्). Ś D8.12 L (ed.) चिंतयित्वा प्रहसन्नैनं (L [ed.] °सन्नैव न) किंचिदिति स ब्रुवन्.

16 ^{a}) Ñ V B D1-3.13 अब्रवीच्च(Ñ1 B2 °त्स; Ñ2 °त्तु); D1 आददे च; D5-7.9-11 T1.3 G M1.2.5 मुमोच च (for मुमोच स). M5 तीक्ष्णान् (for घोरान्). Ś D8.12 अब्रवीद्वचनं घोरम्. —^{b}) Ś V2 B1 D1-4.8.12.13 उद्यम्य; Ñ V1.3 B2.4 उद्धृत्य; B3 संवृत्य (for संगृह्य). B1 रघु-(for नर-). —^{c}) Ś B1 D1-4.8.12.13 T2.3 अभीतवद्संरब्धो (D2 °संहृष्टो; T2.3 °तिक्रुद्धो). —^{d}) D7 [ऽ]वदत्; T2.3 G1 M5 [ऽ]ब्रवीत् (for युधि). D5 T1 G3 रावणिं वाक्यमब्रवीत्.

17 ^{a}) Ñ2 बल-; V3 शर- (for रण-). G2 क्रूराः (for शूराः). Ś B1 D1-4.8.12.13 नैवं शूरा रणे(D8.4 °णं) गत्वा; V2 नैवं शूरं रणे हत्वा. —^{b}) B3(before corr. as in text) D4 प्रहसंति; D8 प्रवदंति; K (ed.) प्रहरंते (for प्रहरन्ति). M1.2 कदाचन (for निशाचर). —^{c}) M1.2 लाघवाच्; Cm.t as in text (for लघवश्). Ś D8.12 स्वल्प- (for चाल्प-). M1.2 -वीर्याच् (for -वीर्याश्). D13 लघुवद्वापि वीर्याश्च(sic). —^{d}) D1.5 हि मे (for हीमे). D6 सुखार्हा मे. V3 B1 D1-3.9-11.13 G1.2 Ct transp. सुखा and शरास्. Ś D8.12 शरा हेममुखास्तव; Ñ V1.2 B2-4 D4 शरा हीमे यथा तव(B2 भवान्); B2 (m. also) हसंति युद्धदारुणे.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 68. 18
B. 6. 88. 53
L. 6. 67. 17

नैवं शूरास्तु युध्यन्ते समरे जयकाङ्क्षिणः ।
इत्येवं तं ब्रुवाणस्तु शरवर्षैरवाकिरत् ॥ १८
तस्य बाणैस्तु विध्वस्तं कवचं हेमभूषितम् ।
व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ १९
विधूतवर्मा नाराचैर्बभूव स कृतव्रणः ।
इन्द्रजित्समरे शूरः प्ररूढ इव सानुमान् ॥ २०
अभीक्ष्णं निश्वसन्तौ हि युध्येतां तुमुलं युधि ।
शरसंकृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥ २१

18 [a]) Ñ B2.4 एवं; B1 मैवं (for नैवं). Ś2 D8 शूरा वि-; Ñ2 B2 शूरा न; B1 D1-3.13 तु शूरा (by transp.); B4 D4 शूराश्च; D12 शूरा हि (for शूरास्तु). —[b]) D7.9-11 G1 युद्ध- (for जय-). Ś Ñ V B D1-4.8.12 युद्धे (Ñ V1.3 B2-4 रणे) विजयकांक्षिणः; D13 प्रहरंति रणाजिरे. —[c]) D5 T1 G1.3 ब्रुवन्वीरः; D7.9-11 ब्रुवन्धन्वी; G2 वदन्वीरः (for ब्रुवाणस्तु). —[d]) D7.9-11 G1.2 शरैरभिववर्ष ह.—For 18[c-d], Ś V2 B1 D1-4.8.12.13 subst.:

1670* इत्येवमुक्त्वा वचनं शरैरेनमवाकिरत् ।;

while Ñ V1.3 B2-4 subst.:

1671* एवमुक्त्वा ततो वीरः शरैर्भृशमताडयत् ।

[Ñ1 शरैर्वीरं ततो (for ततो वीरः शरैर्).]

19 [a]) Ñ V1.3 B2-4 तद्बाण-; D5.7.9-11 G1 M1-3 बाणैः सु- (for बाणैस्तु). Ś V2 B1 D1-4.8.12.13 अपध्वस्तं (for तु विध्वस्तं). —[b]) Ś Ñ V B D1-4.7-13 G1.2 कांचनं महत्; D6 T2.3 M1.2.5 कांचनप्रभं (for हेमभूषितम्). —V3 repeats 19[c] – 20[a] consecutively. —[c]) B1 न्यस्तीर्य च; G1 विशीर्यत (for व्यशीर्यत). Ś D8.12 च निर्मुक्ते; Ñ1 रथोपस्थान् (for रथोपस्थे). —[d]) Ś Ñ1 V1.3 (both times) B2-4 D8.12 [अं]बरे (for [अ]म्बरात्).

20 V3 repeats 20[a] (cf. v.l. 19). Ś1 om. 20-30[b]. —[a]) Ś2 B4 D8.12 विध्वस्त-; B1 विधूय; D2 निकृत्त- (for विधूत-). B1 वर्म; D3 -मर्म. —[b]) Ñ V1.3 B2-4 स बभूव (by transp.); D3 बभूव च; G1 लक्ष्मणेन (for बभूव स). —[c]) Ñ V1.3 B2-4 D7.9-11 G1.2 M3 वीरः; V2 क्रुद्धः (for शूरः). —[d]) Ñ V B2-4 प्रफुल्ल इव किंशुकः; B1 प्रकट इव सानुमान्; D4 सप्रौढ इव भानुमान्; D9-11 Ck.t प्रत्यूषे भानुमानिव; G1.2 प्रत्यूष इव भानुमान्.—After 20, D5-7.9-11 S ins.:

1672* ततः शरसहस्रेण संक्रुद्धो रावणात्मजः ।
बिभेद समरे वीरं लक्ष्मणं भीमविक्रमम् ।
व्यशीर्यत महद्दिव्यं कवचं लक्ष्मणस्य तु ।
कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ।

[(l. 2) D7.9-11 G1 वीरो; G2 क्रूरो; M1.2.5 शूरं (for वीरं). D9-11 G1 भीमविक्रमः. —(l. 3) D5 G1 विशीर्यत. D6 महादिव्यं; T1 महद्दीप्तं; M1.2 तदा भूमौ (for महद्दिव्यं). G2 M3 च (for तु). —(l. 4) D9 G2 M5 कृतप्रतिकृते; Cm.g.t as above (for °प्रतिकृत-). ❀ Cm: कृतप्रतिकृतान्योन्यं कृते प्रतिकृतम् अन्योन्यं यस्मिन् कर्मणि तत्तथा।; so also Cg; Ct: अन्योन्यं कृतप्रतिकृता। आर्षो ङा। कृतप्रतिकृते यत्तौ बभूवतुरित्यर्थः. ❀ D7 G2 M1.2 अरिंदमौ (for अभिद्रुतौ).]

21 Ś1 om. 21 (cf. v.l. 20). —[a]) Ś2 Ñ2 V1 B D1.3.5-13 निःश्वसंतौ. Ñ V B2-4 D8.4 M1-3 तौ; D5.10.11 वै; D13 च (for हि). —[b]) G2 युध्यंतौ. D6 तुमुले; D10 T1 तुमुलौ. Ś2 V2 B1 D1.2.4.8.12.13 युध्यमानौ महामृधे (Ś2 D8.12 °रणे; D13 °हवे); Ñ V1.3 B2-4 प्रायुध्येतां महाबलौ; D3 युयुधाते महामृधे. ❀ Cg: युध्येताम् अयुध्येताम्. ❀ —[c]) Ś2 V2 B1 D1-4.8.12.13 T2 श (T2 नि)रसंवृत्त- (V2 B1 D2 °त-); Ñ V1.3 B2-4 शरैः संवृत-; D7 शरसंकृत- (for शरसंकृत्त-). —After 21, Ś2 V1 B1 D1-4.8.12.13 ins.; Ñ2 B3 cont. after 1674 (A)*:

1673* बभूव रूपं सृजतोर्मार्गणान्भीमकर्मणोः ।

[D13 सृजतो रूपं (by transp.).];

while D5-7.9-11 S ins. after 21; Ś2 D1-3.8.12.13 cont. l. 7 only after 1673*; Ñ V2.3 B2-4 ins. l. 1 and l. 3-5 after 22[a-b] (V2 after 22[a-b] first time) and l. 6-7 after 21; V1 B1 D4 (om. l. 5) ins. l. 1 and l. 3-5 after 22[a-b] (B1 after 22[a-b] first time) and cont. l. 7 after 1673*:

1674* सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः ।
ततक्षतुर्महात्मानौ रणकर्मविशारदौ ।
बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ ।
तौ शरौघैस्तदाकीर्णौ निकृत्तकवचध्वजौ ।
स्रवन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव । [5]
शरवर्षं ततो घोरं मुञ्चतोर्भीमनिस्वनम् ।
सासारयोरिवाकाशे नीलयोः कालमेघयोः ।
तयोरथ महान्कालो व्यतीयाद्युध्यमानयोः ।
न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ।

[(l. 1) D4 -काले (for -कालं). Ñ1 धीरौ (for वीरावृ). Ñ V B D4 युध्यमानौ विचेरतुः (for the post. half). —(l. 2) D6 ततः क्षितौ; T2.3 ररक्षतुर्; Cg as above (for ततक्षतुर्). —(l. 3) B4 [अ]नुजये; D4 समरे (for [आ]त्मजये). B2 मत्तौ (for यत्तौ). D4 दुर्गौ भीमविक्रमौ (subm.) (for the post. half). —(l. 4) V3 damaged for शरौघैस्तदा. Ñ1 V2 B3 D5.7.9-11 G1 तथा (for तदा). B1 निवृत्त-; D4 निकृंत- (for निकृत्त-). D7 G1 निकृत्ता (D7 °कृंता) विव च ध्वजौ (for the post. half). —V2 B1 om. l. 5. D6 reads l. 5 (except स्रवन्तौ रुधिरं) in marg. —(l. 5) D9-11 G1 सृजंतौ; G2 स्रवंतं (for स्रवन्तौ). Ñ V1.3 B2-4

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः ।
शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः ॥ २२
व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च ।
उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ २३
तयोः पृथक्पृथग्भीमः शुश्रुवे तलनिस्वनः ।
सुघोरयोर्निष्टनतोर्गगने मेघयोरिव ॥ २४
ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि ।
असृग्दिग्धा विनिष्पेतुर्विविशुर्धरणीतलम् ॥ २५
अन्यैः सुनिशितैः शस्त्रैराकाशे संजघट्टिरे ।
बभञ्जुश्चिच्छिदुश्चापि तयोर्बाणाः सहस्रशः ॥ २६

G. 6. 68. 30
B. 6. 88. 69
L. 6. 67. 27

प्रसुस्रुवाते रुधिरं (for the prior half). V3 B4 प्रस्रवणाद्. —After l. 5, V3 ins. 1675*. —(l. 6) D6 तदा; T2.3 M1.2 तयोर् (for ततो). D7 G1.2 मुंचंतौ (for मुञ्चतोर्). D5.6.9.10 -निःस्वनं; D7 G2 -निस्वनौ (for -निस्वनम्). —For l. 6, Ñ V2.3 B2–4 subst. :

1674(A)* ततः शरौघान्विविधान्मुञ्चन्तौ भीमविक्रमौ ।

[B2 मुंचंतौ विविधान् (by transp.).]

—(l. 7) D9 आसारयोर् (for सासारयोर्). Ś2 Ñ2 V1.3 B1.3 D1–3.8.12.13 प्रवृष्ट (Ś2 D8.12 प्रवृद्ध; B1.3 D2 प्रविष्ट; D3 प्रदृष्ट; D13 अदृष्ट)योर्यथाकाले (Ñ2 V1.2 °जे); Ñ1 V3 B2.4 सधारयोः समावास्तां; D4 प्रवर्षतौ यथाकाले (for the prior half). —(l. 8) M3 व्यत्ययाद्. —After l. 8, D7 reads एकादशापहारः समाप्तः. —(l. 9) D7.9–11 क्रमं (for भमं). D5.7.9–11 च (for वा). D9 व्युपजग्मतुः.]

22 Ś1 om. 22 (cf. v.l. 20). Ś2 V2 B1 D1.2.8.12.13 repeat 22^{ab} (followed by 1679*) after 28. —^{a}) Ś2 D8.12 (all first time) अस्त्रास्त्रमस्त्रदां श्रेष्ठौ (Ś2 °विच्छ्रेष्ठौ). —^{b}) Ñ V B2–4 D7 G2 परस्परं. —After 22^{ab}, Ñ V B D4 (om. l. 5) ins. l. 1 and l. 3–5 of 1674* (V2 B1 after 22^{ab} first time). —V3 om. 22^{c}–24^{b}. —^{c}) Ś2 V2 B1 D1–4.8.12.13 शरैरुच्चावचाकारैर्. —^{d}) D1–4.13 अंतरिक्षं; D6 अंतरीक्षे. Ñ V1 B1–3 निजघ्नतुः; B4 [s]भिजघ्नतुः; D4 व्यवर्धतुः; L (ed.) प्रजघ्नतुः (for बबन्धतुः). Ś2 D8.12 अंतरिक्षमयं धनुः.

23 Ś1 V3 om. 23 (cf. v.l. 20 and 22 respy.). D3 reads from 23 up to शुश्रुवे in 24^{b} in marg. —^{a}) D6 -रोषम् (for -दोषम्). Ś2 B1 D1–4.8.12.13 T2.3 अन्योन्यं; Cg as in text (for अस्यन्तौ). B4 व्यपेतं तौ समस्यंतौ. —^{b}) D13 सूक्ष्म (sic) (for सुष्ठु). —^{c}) T3 उवाच (sic); M3 उभौ तौ (for उभौ तु). G2 M1.2 युद्धं (for घोरं). Ś2 Ñ V1.2 B D1–4.8.12.13 दर्शयंतौ महा(Ñ V1 B2–4 D4 बलं)भीमं(Ś2 D8.12 °मे; D2 °मौ). —^{d}) Ś2 Ñ V1.2 B D1–4.8.12.13 संग्रामे(B1 D1–3.13 °मं); D6 T2.3 चेरतुर् (for चक्रतुर्).

24 Ś1 om. 24 (cf. v.l. 20). V3 om. 24^{ab} (cf. v.l. 22). D3 reads up to शुश्रुवे in ^{b} in marg. (cf. v.l. 23). —^{b}) G2 शुश्राव. D6 T2.3 तत्र (for तल-). Ś2 B3 D1.8.12.13 त(D12 ब)लनिःस्वनः; D7.9–11 तुमुलः स्वनः. —After 24^{ab}, Ñ V1 B2–4 D4–7.9–11 S ins.; V3 ins. after l. 5 of 1674* :

1675* प्रकम्पयञ्जनं घोरो निर्घात इव दारुणः ।
स तयोर्भ्राजते शब्दस्तदा समरमत्तयोः ।

[(l. 1) G1 प्रमोहयन्. D5 T1 G3 जगद् (for जनं). Ñ V1.3 B2–4 D4.7 G2 प्रकंपजननो भीमो (B4 °नोतीव; D7 G2 घोरो); D9–11 स कंपं जनयामास (for the prior half). —(l. 2) D9–11 तयोः स (by transp.). Ñ V1.3 B2–4 D4 बभ्राज (Ñ1 D4 °जे) स तयोः (for स तयोर्भ्राजते). Ñ2 V1.3 B2 D5.6.9–11 तथा (for तदा). V3 D9.10 M1.2 -य(V3 damaged after य up to मेघ in ^{d})त्तयोः; D5 T1 G3 M3 -सक्तयोः (for -मत्तयोः).]

—^{c}) B4 शूरयोर्वि-; D1 सुघोषयोः; D4 सुवर्षतोः (for सुघोरयोर्). Ś2 V2 B1 D1–4.8.12.13 शब्द(V2 B1 D1 °र)वतोर्; Ñ V1 B2–4 D6.9–11 T2.3 M5 निः(B4 D9–11 T2.3 M5 नि)स्वनतोर् (for निष्टनतोर्). —^{d}) D6 T2.3 M3.5 यथा (for इव). Ś2 D8.12 यथा वै कामपर्वयोः; V2 B1 D1–4.13 यथा खे (V2 D2 वै) कालमेघयोः. —After 24, B1 ins. :

1676* बभूवतुर्महेष्वासौ नरराक्षसपुंगवौ ।

—Thereafter B1 cont.; Ś2 V2 D S ins. after 24 :

1677* सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ ।
प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ ।

[(l. 2) D6 T2.3 जये रतौ; D9 जयैषिणौ; Cm.g.t as above (for जये धृतौ). Ś2 V2 B1 D1–4.8.12.13 जलं प्रस्रवणादि (Ś2 D1.4.8.12 °वि)व (for the post. half).]

25 Ś1 om. 25 (cf. v.l. 20). —^{a}) Ś2 D8.12 प्रमुक्ताः शत्रु(D8 °क्र)जिह्वात्रैः; Ñ1 V B D1–4.13 तयोस्तु (V2.3 B1 D1.2.13 °योः सु-) मुक्ता गात्रेषु; Ñ2 तयोर्महात्मनोः संख्ये. —V3 om. 25^{cd}. —^{c}) B1 अश्वान्दिव्यान्; B3 असृग्धारा; D8 असृग्विदग्धा (hypm.); M3 असृङ्मद्धा (for असृग्दिग्धा). Ñ1 B2.3 M3 विनिष्पत्य (B3 °द्य); B1 D1–4.8.12.13 विनिर्भिद्य; B4 च निसृत्य (for विनिष्पेतुर्). —^{d}) Ś2 D8.12 वसुधा- (for धरणी-). G1 -तले.

26 Ś1 om. 26 (cf. v.l. 20). —^{a}) Ñ V1.3 B2–4 अन्योन्यं; D9–11 T1 M3 अन्ये सु-; Cg as in text (for अन्यैः सु-). Ñ1 B4 D5 T1 G2.3 M1.2.5 अस्त्रैर् (for शस्त्रैर्). Ś2 V2 B1 D1–4.8.12.13 T2.3 अन्ये तु (Ś2 T2.3 अन्ये सु-; D3 आजौ तु; D8.12 अन्योन्यं) निशिता बाणाः G (ed.)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 68. o
B. 6. 88. 7o
L. 6. 67. 28

स बभूव रणे घोरस्तयोर्बाणमयश्चयः ।
अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ॥ २७
तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः ।
सपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ ॥ २८
चक्रतुस्तुमुलं घोरं संनिपातं मुहुर्मुहुः ।
इन्द्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ ॥ २९
लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् ।
अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रत्यपद्यताम् ॥ ३०
बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ ।
शुशुभाते महावीरौ विरूढाविव पर्वतौ ॥ ३१
तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम् ।
बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ३२

अन्योन्यं मिश्रितैः शस्त्रैर्. —[b]) Ñ B3 आकाशैः; D3 वियति (for आकाशे). Ś2 D8.12 [s]प्यवघट्टिताः; B4 संप्रजघ्निरे; D1.2 ज्यावि(D2 °व)घट्टिताः; D3 व्यावघट्टिताः; D4 नाविघट्टनात् (sic); T3 व्यवघट्टिताः; Cg as in text (for संजघट्टिरे). V1 संर * ते नभस्तलं; V2 B1 D13 आ(B1 ह्या)काशेष्व(V2 B1 °षु)विघट्टिताः; V3 समुतते नभस्तलं (sic); B2 संरक्ताते नभस्तलं (sic). —[c]) Ñ V B2–4 D7 G2 M3] [अ]न्ये; B1 D1–4.9–11.13]][ए]व (for [अ]पि). Ś2 D8.12 समवर्तत दुःखेन. —[d]) D2 ततो (for तयोर्). —V3 damaged after तयो up to परस्प in 1678*. B1.2 D1–4 बाणान् (for बाणाः).

27 Ś1 G(ed.) om. 27 (for Ś1 cf. v.l. 20). —[a]) D7.9 रणे; T2.3 तदा (for रणे). Ś2 B1 D1–4.8.12.13 सं(D1.4 स)बभूवुः समंतात्तु(Ś2 D8.12.13 °च्च). —[b]) Ś2 D3.8 बाणसमाश्रयाः; B1 D1.2.4.12.13 °मयाश्रयाः; D9 °समुच्चयः (for °मयश्चयः). —For 27[ab], Ñ V B2–4 subst.:

1678* समीयुस्ते मुहूर्तं तु तयोर्बाणाः परस्परम् ।

[V3 damaged up to परस्प (cf. v.l. 26). V2 मुहूर्ते. Ñ2 V1 च (for तु).]

—D13 om. (hapl.) 27[cd]. —[c]) Ñ1 B3 अति-; Ñ2 V1.3 B2.4 अभि- (for इव). —V3 illeg. from दीप्ताभ्यां up to [d]. D7 G2 यथाग्निभ्यां प्रदीप्ताभ्यां. —[d]) Ś2 D1–4.8.12 यज्ञे कुशमयाश्च(Ś2 D8.12 °श्र)याः; Ñ1 V1 B2–4 यथा काष्ठमयाश्चयाः; Ñ2 यथा काष्ठमहाचयाः; V2 B1 यज्ञैर्हुतमयाश्र-(V2 °श्र)याः. —After 27, V3 ins. l. 3 only of 1679*.

28 Ś1 om. 28 (cf. v.l. 20). V3 om. from 28 up to l. 2 of 1679*. —[c]) Ś2 Ñ V1.2 B2–4 D1.5.6.9–11 T2 G1 M5 सुपुष्पाव् ; D4 सुदुःखाद् ; G2 M1.2 पुष्पिताव् (for सपुष्पाव्). B3 D2.6 निष्पन्नौ (for निष्पत्रौ). —[d]) Ś2 V2 B1 D1–4.8.12.13 यथा (for वने). D7.9–11 G1 वने किंशुकशाल्मली. —After 28, Ś2 V2 B1 D1.2.8.12.13 repeat 22[ab] and then ins.; while Ñ V1.3(l. 3 only after 27 owing to om.) B2–4 D3.4 ins. after 28:

1679* तयोर्गात्रेषु संलग्ना भान्ति नाराचपङ्क्तयः ।
नक्षत्रपङ्क्तयो व्योम्नि विमले वै यथोदिताः ।
उभौ हि परमेष्वासावुभौ शस्त्रविशारदौ ।

[(l. 1) B1 संविग्ना; D1 संभग्ना (for संलग्ना). D4 तयोर्गात्रे सुसंलग्ना (for the prior half). Ñ V1 B2–4 बभुर् (for भान्ति). —V1 om. l. 2. —(l. 2) Ñ B2–4 निरभ्र(Ñ1 B2 °भ्रे; B3 °रजे)विमले व्योम्नि यथा नक्षत्रपंक्तयः. —(l. 3) Ś2 D8.12 तौ; V1.3 तु; V2 om. (subm.) (for हि). D13 उभौ संग्रामनिपुणौ (for the prior half). Ś2 D3 शास्त्र-; B4 अस्त्र- (for शस्त्र-).]

29 Ś1 om. 29 (cf. v.l. 20). —[a]) M1.2 युद्धं (for घोरं). Ś2 V2 B1 D1–4.8.12.13 तयोर्बभूव तुमुलः; Ñ1 V1.3 B2–4 विचक्रतुस्तौ तुमुलं. —[b]) Ś2 B1 D1–4.8.12.13 M1.2 संनिपातो(M1.2 °त्य). —After 29[ab], D13 ins.:

1680* उभौ विद्यास्त्रविदुषावुभौ परमशोभितौ ।

—Ś2 Ñ V B D1–4.8.12.13 om. 29[cd]. —[d]) D5 T1 G1 M3.5 -वधैषिणौ (for -जयै°).

30 Ś1 om. 30[ab] (cf. v.l. 20). V3 damaged after लक्ष्मणो in [a] up to वभि in [c]. —[a]) V2 B3 क्रुद्धो (for युद्धे). —[b]) Ñ2 B2 युधि (for चापि). —[c]) Ś B1 D1.2.4.8.12.13 तौ(D13 च) विनिघ्नंतौ ; B4 अभिनिघ्नंतौ; D3 तौ निजघ्नंतौ; D6 चाभिनिघ्नंतौ (for तावभिघ्नन्तौ). —[d]) Ñ1 V1.3 B2.4 समुपेयतुः; Ñ2 ययतुस्तदा; V2 अभिजग्मतुः; B3 तौ समीयतुः; D5.6.9–11 M5 प्रतिपद्यतां; Cg as in text (for प्रत्यपद्यताम्). Ś D8.12 न ग्लानिं चाधिगच्छतः; B1 D1–3.13 न ग्लानिमभि(D1 °मुप ; D13 °धि)जग्मतुः; D4 नास्यं समभिजग्मतुः (sic). ❀ Cg: प्रत्यपद्यतां प्रत्यपद्येताम्. ❀

31 [c]) D5 सुशुभौ तौ. Ś B1 D1–3.8.12.13 रणगतौ; Ñ V B2–4 D6.9–11 T2.3 G1 M महावीर्यौ; D4 गतौ युद्धे; D5 T1 G3 महात्मानौ (for महावीरौ). —[d]) Ś Ñ V B D1–3.6.8.10–13 T2.3 M3 प्ररूढाव् (V3 damaged after प्ररू up to सं in 32[b]) (for वि°). Ñ2 किंशुकौ (for पर्वतौ). D4 प्रौढाविव सुपर्वतौ.

32 V3 damaged up to सं in [b] (cf. v.l. 31). —[a]) D6.9–11 T2.3 ततो (for तयो). Ś V2 B1 D1–4.8.12.13 शोणित- (for रुधिर-). Ś D8.12 -दिग्धानि; T3 -सक्तानि (for -सिक्तानि). —[b]) Ś D8.12 T2.3 संभृतानि; D1.4 संवृत्तानि ; D6 संहतानि ; M1.2 संव्रणानि (for संवृतानि). Ś D8 परैर् (for शरैर्). V1 वृतं. —[c]) Ś Ñ V

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तयोरथ महान्कालो व्यतीयाद्युध्यमानयोः ।
न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ॥ ३३

अथ समरपरिश्रमं निहन्तुं
समरमुखेष्वजितस्य लक्ष्मणस्य ।
प्रियहितमुपपादयन्महौजाः
समरमुपेत्य विभीषणोऽवतस्थे ॥ ३४

G. 6. 68. o
B. 6. 88. 77
L. 6. 67. 36

इति श्रीरामायणे युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

B D1-4.8.12.13 विरेजुः (for बभ्राजुः). ❀ Cg: बभ्राजुः। आर्षं परस्मैपदम्. ❀ —[d]) Ś B1 D1-4.8.12.13 ज्वलिता (for ज्वलन्त). Ñ V B2-4 ज्वलितानीव वह्निना.

33 [a]) Ś V2 B1 D1-4.8.12.13 तु सु-; Ñ V1.3 B2-4 एवं; G (ed.) एव (for अथ). B4 D12 महा- (for महान्). —[b]) Ś Ñ V1.2 B D1-4.8.12.13 व्यतीतो; G2 M3 व्यत्ययाद् (for व्यतीयाद्). Ś V2 B1 D2-4.8.12.13 युध्यतो रणे (for युध्यमानयोः). —V3 damaged from तौ in [c] up to वा in [d]. —[c]) G2 गतौ (for च तौ). Ś D8.12 युधि (for युद्ध-). D3 -वैषम्यं; G2 -वैमुख्यौ. D4 न च तौ योधनौ मुख्यौ. —[d]) Ś V2 B1 D1-4.8-13 G1 चा(B1 D3 G1 वा)प्यभि-; V1 B4 चाप्युप- (for वाप्युप-). —After 33, Ñ2 D13 (l. 1 only) ins.:

1681* इङ्गितज्ञस्तदा तस्य लक्ष्मणस्य महात्मनः।
विभीषणो धनुष्पाणिस्त्वरयामास तद्बलम्।

34 [a]) Ś B2 D1.3.7.8.12 G2 विहंतुं; B1 विहातुं; B4 विनिहंतुं; D5 om. (for निहन्तुं). D4 अथ विहेर समरं विहर्तुः (corrupt). —[b]) Ś D8.12 -मुखे व्रणितस्य; Ñ1 B4 -मुखेषु जितस्य; B1 -मुखेंद्रजितश्च (for -मुखेष्वजितस्य). —[c]) G1 प्रियस्य तम् (for प्रियहितम्). Ñ V1.3 B2-4 D7.9-11 महात्मा (for महौजाः). —[d]) Ñ V1 B2.4 अवाप्य; B3 अपास्य (for उपेत्य). B4 [ऽ]भितस्थे; D6.8 [ऽ]पतस्थे; G2 वितस्थे (for ऽवतस्थे).

Colophon. —*Kāṇḍa name*: Ñ B D4.13 लंकाकांडे; D2 सुंदरकांडे. —*Sarga name*: Ś1 Ñ2 V B1.2.4 D2.3.12.13 संसक्तयुद्धं; Ś2 D8 रावणिलक्ष्मणयोः संसक्तयुद्धं; Ñ1 D4 संकुलयुद्धं; B3 इंद्रजिद्वधे संकुलयुद्धं; D1 संसर्गयुद्धं. —*Sarga no.* (figures, words or both): Ś1 Ñ1 V3 B2.4 D2.4.8.12.13 om.; Ś2 67; Ñ2 D1 70; V1.2 68; B1.3 64; D3 72; D5-7.10.11 T1 G M3.5 89; D9 65; T2 92; T3 96; M1.2 90. —After colophon, D2 concludes with राम; G M1.2.5 श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

७७

G. 6. 69. 1
B. 6. 89. 1
L. 6. 68. 1

युध्यमानौ तु तौ दृष्ट्वा प्रसक्तौ नरराक्षसौ ।
शूरः स रावणभ्राता तस्थौ संग्राममूर्धनि ॥ १
ततो विस्फारयामास महद्धनुरवस्थितः ।
उत्ससर्ज च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥ २
ते शराः शिखिसंकाशा निपतन्तः समाहिताः ।
राक्षसान्दारयामासुर्वज्रा इव महागिरीन् ॥ ३
विभीषणस्यानुचरास्तेऽपि शूलासिपट्टिसैः ।
चिच्छिदुः समरे वीरान्राक्षसान्राक्षसोत्तमाः ॥ ४
राक्षसैस्तैः परिवृतः स तदा तु विभीषणः ।
बभौ मध्ये प्रहृष्टानां कलभानामिव द्विपः ॥ ५
ततः संचोदयानो वै हरीन्रक्षोरणप्रियान् ।
उवाच वचनं काले कालज्ञो रक्षसां वरः ॥ ६

77

[लंकाकांडे युद्धपर्वणि विभीषणयुद्धं.]

1 [a]) V2 B2 D2.6.7.9–11 ततो; B1 D4 च तौ (for तु तौ). G1 दृष्ट्वा तौ (by transp.). —[b]) Ś V2 D1–4.8. 12.13 संसक्तौ; B1 सक्तौ च (for प्रसक्तौ). —After 1[ab], Ñ V B D5–7.9–11 S ins. :

1682* प्रभिन्नाविव मातंगौ परस्परवधैषिणौ ।
तौ द्रष्टुकामः संग्रामे परस्परगतौ बली ।

[V3 om. l. 1. —(l. 1) M5 विभिन्नाव्. B3 D7.9–11 G2 -जयैषिणौ. —(l. 2) D9 समरे (for संग्रामे). D10.11 तयोर्युद्धं द्रष्टुकामो (for the prior half). Ñ V B D9–11 वरचापधरो (Ñ1 B4 D9 °रौ) बली; G2 परस्परगतं बलं (for the post. half).]

—[c]) T3 रावणिभ्राता (sic). —[d]) B4 -मूर्ध्नि (subm.) (for -मूर्धनि). ❀ Ck: शूरः स रावणभ्राता समरमूर्धनि युयुत्सया तस्थौ. ❀

2 [a]) Ñ2 V3 तथा (for ततो). —[b]) B1 इवास्थितः. —D13 om. 2[cd]. —[cd]) Ś D8.12 विससर्ज शरांस्तत्र तीक्ष्णान्कर्मारमार्जितान्; V2 B1 D1–4 उत्ससर्ज च तांस्तीक्ष्णान्शरान्बर्हिणवाससः.

3 [a]) Ś V2 B1 D3.4.8–12 G1 शिखिसंस्पर्शा; D1 शिनः *स्पर्शा (sic). —[b]) Ñ1 संपतंतः; Ñ2 V1 B4 प्रपतंतः; V3 B2.3 प्रतपंतः; D4 निःपतंतः; D5 निपतंति; D8 निवर्तंतः. —V3 om. 3[cd]. —[c]) Ś D8.12 ताडयामासुर्; D3 दारयंति स्म; T3 दारयामास (sic); G3 वारयामासुर्. —[d]) D6 T2.3 M3 Cm.g वज्राणीव. Ś Ñ V1.2 B D1–4.8.9.12.13 G1 वृक्षानशन (B4 °न्शलभ [sic])यो यथा. ❀ Ct: वज्रा वज्रपाताः. ❀ —After 3, D13 ins. :

1683* राक्षसान्सप्त पञ्चैव शरेणैकेन राक्षसः ।
ममन्थ राक्षसानीकं विभीषणरिपुंजयः ।
गतास्तुरंगाः सरथाः पदातयः
सारोहवाहा विहता विखण्डिताः ।
निकृत्तबाहूरुशिरोधराङ्घ्रय- [5]
श्छिन्नध्वजावासतनुत्रभूषणाः ।

—Then ins. an addl. colophon.

4 [ab]) D1 त्रि- (for sपि). Ñ V B D1–7.9–11.13 -पट्टिशैः. Ś D8.12 विभीषणशरांस्तेपि प्रासशूलासिपट्टिसैः (Ś1 °शैः). —[c]) Ś Ñ2 B2.3 D1.2.8.12 वीरा; D13 धीरा; G1 शूरा (for वीरान्). —[d]) Ś B2.3 D4.8.12 राक्षसा सुमहाबलाः (B2.3 D4 राक्षसोत्तमान् [B2 °माः]).

5 [a]) D3 अभिवृतः (for परि°). —[b]) Ś V2 D1–4.8. 12.13 स तदाभूद्; B1 तदाभूच्च; D6 सर्वदा च (for स तदा तु). —[cd]) Ñ V D2.4.13 स्व (Ñ V स)यूथानां; B2 स मुख्यानां; D1 स्वयुद्धानां (sic); D7 प्रसुप्तानां; D10.11 G1 प्रयू (G1 °कृ)ष्टानां (for प्रहृष्टानां). Ś D8.12 यथैव मध्ये यूथस्य; B1 बभौ मध्येषु यूथानां; B4 बभौ युद्धे स यूथस्य; D3 बभौ च मध्ये यूथानां (for °). V3 B1 करभानाम्. Ś2 D8.12 महा- (for इव). B3 बभौ युद्धे स यूथानां शरभो वा द्विपायिनां.

6 V3 om. 6. —[a]) D7 संचोदयामास; D9 संबोधमानो वै; D10.11 T1 G M1.2 Ct सं (T1 स)चोदमानो वै. ❀ Ct: संचोदमानः संचोदयमानः. ❀ —[b]) D5.9 G3 -गण-; D6 T2.3 -गणान्; D7.10.11 T1 -वध- (for -रण-). G1 -प्रियः (for -प्रियान्). ❀ Cv.r: 'ततः संचोदयामास हरीन्रक्षोवध (Cv °यानो हरीन्रणगण)प्रियान्' इति पाठः. ❀ —For 6[ab], Ś B1 D1–4.8.12.13 subst. :

1684* स संचोदयमानस्तु हर्यृक्षान्वानरान्रणे ।

[B1 स संदेशयमानस्तु; D1–3 स संनो (D3 °मो)दयमानस्तु; D4 स च (च *sup. lin.*) संचोदयामास (for the prior half). D13 हर्षयन् (for हर्यृक्षान्). B1 वारयन् (for वानरान्).];

while Ñ V1.2 B2–4 subst. :

1685* संचोदयन्नसावृक्षान्वानरान्रणगर्वितान् ।

[B3 संप्रेरयन् (for संचोदयन्). B4 महासत्त्वान्; G (ed.) सवृक्षान्स (for असावृक्षान्). B3 बल- (for रण-). V1 (*int. lin.* also) B2 -मूर्धनि; V2 -दर्पितान् (for -गर्वितान्).]

—[c]) Ś D8.12 तत्र (for काले). —[d]) Ñ1 स विभीषणः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एकोऽयं राक्षसेन्द्रस्य परायणमिव स्थितः ।
एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः ॥ ७
अस्मिन्विनिहते पापे राक्षसे रणमूर्धनि ।
रावणं वर्जयित्वा तु शेषमस्य बलं हतम् ॥ ८
प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः ।
कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः ॥ ९
अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः ।
कम्पनः सत्त्ववन्तश्च देवान्तकनरान्तकौ ॥ १०

G. 6. 69. 14
B. 6. 89. 14
L. 6. 68. 10

7 [a]) Ñ1 एषोयं; D13 कोपाद्वै (for एकोऽयं). G2 राक्षसेंद्रश्च. —[b]) B3 प्राणप्रायम्; D13 पराङ्मुखम् (for परायणम्). Ś D8.12 इति स्थितिः(Ś1 °तः); Ñ V B D1-4.7.9-11.13 G1.2 अवस्थितः. —G1 damaged for °. —[c]) Ś D8.12 एकस्यैव; B1 एतच्छेष्ठ-; D5.7 एतच्छेष-. Ñ V1 B4 चाद्य; V3 B2.3 चास्य (for तस्य). —[d]) Ś V2 B1 D1-4.8.12.13 तिष्ठध्वं किं(Ś D8.12 वै; B1 च) प्लवंगमाः; Ñ V1.3 B2-4 किं तिष्ठथ(Ñ1 °ध्वं; Ñ2 V1 B2 °त) वनौकसः; G (ed.) तिष्ठध्वं च वनौकसः.

8 [a]) B1 D6 एतस्मिन्; D2 यस्मिन्वि-; D9-11 तस्मिंश्च (for अस्मिन्वि-). —[c]) Ś Ñ V1.2 B D1-4.8.12.13 रावणो वै(Ś Ñ V1.2 D8.12 वि-) निहंतव्यः; V3 रावणो ***** (damaged). —[d]) Ñ1 V1 B2.4 तस्य (for अस्य). V2 B1 D2-5.13 T1 G3 M3 हतं बलं (by transp.). Ś Ñ2 D8.12 शेषं चाप्यबलं महत्(Ñ2 हतं); B3 स हि तस्य बलं महत्.

9 Ś1 om. 9-14. —[a]) D2 धीरो (for वीरो). —V3 om. 9[cd]. —[cd]) B3 महारक्षो (for च कुम्भश्च). B4 कुंभश्च कुंभकर्णश्च (for [c]). Ś2 V2 B1 D1-4.8.12.13 transp. कुम्भश्च and धूम्राक्षश्च and read [ए]व (for third च). Ñ V1 B2-4 [ए]व राक्षसः; D6.7 T2.3 G2 महाबलः (for निशाचरः). —After 9, Ñ V1.3(after 9[ab] owing to om.) B2-4 D5-7.9-11 S ins.; while B1 ins. only l. 1 after 9:

1686* जम्बुमाली महामाली तीक्ष्णवेगोऽशनिप्रभः ।
सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः ।
संह्रादी विकटो निघ्नस्तपनो नाम एव च ।
प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च ।
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् । [5]
विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः ।

[(l. 1) G1 damaged from second -माली up to -वेगो. Ñ2 महावीर्यस; V3 °कायस्; B2 °मायस्; G (ed.) °पार्श्वस् (for महामाली). B2 तीव्रवेगो. B4 महाबलः (for ऽशनिप्रभः). —(l. 2) V3 damaged from कोप up to 10[b]. B4 यज्ञकेतुश् (for °कोपश्). —(l. 3) D5.7 T1 G2.3 संह्रादिर्. D5.6 G1.3 M5 विकचो; T2 विकलो (for विकटो). Ñ V1 B2-4 चैव; D6.7.10.11 M5 [s]रिघ्नस्; G1 M1 निंबस् (for निघ्नस्). D9 संह्रदी निककंपश्च(sic) (for the prior half). Ñ V1 B2-4 काल; D5 T1 G3 M3 दम; D7.9-11 मंद; G2 M5 नाद (for नाम). G (ed.) एत (sic) (for एव). —B2 D9 om. (hapl.) l. 4. —(l. 4) B4 प्रहसः; M5 प्रहस्तः (for प्रघासः). T2 G3 प्रघनश् (for प्रघसश्). Ñ1 V1 B3 प्रघसः प्रहसश्. —(l. 6) G1 damaged for the prior half. D5 T1 G3 M5 [s]ग्निजिह्वश्; T2.3 विजिह्वश् (for द्विजिह्वश्). Ñ2 V1 B2-4 -चक्षुश् (for -शत्रुश्). Ñ1 सूर्याक्षश्चापि राक्षसः; D6 T2.3 सूर्यजिह्वो महोदरः (for the post. half).]

10 Ś1 om. 10 (cf. v.l. 9). V3 damaged up to 10[b] (cf. v.l. 1686*). D6 T2.3 om. (hapl.?) 10[ab]. —[a]) Ś2 V2 B1 D1-3.8.12.13 अकंपनसुपार्श्वौ च. —D9 om. (hapl.?) 10[bc]. —[b]) Ś2 D8.12 चक्रसैनिश्च(D8 °क-); Ñ V1.2 B1-3 D1.2.4.13 चक्र(V2 B1 D4 वज्र)मौलिश्च (for चक्रमाली च). B4 मकराक्षो महाबलः; D3 चक्रमूलिश्च कंपनः. —After 10[ab], Ś2 V2 D1.8.12 ins.(except V2 all owing to om.); while B1 D2-4.13 (only l. 5) cont. after 1689*; L (ed.) cont. after 1688*:

1687* महोदरश्च रक्ताक्षो लम्बकर्णो महाहनुः ।
मकराक्षातिकायौ च त्रिशिराश्चातिवीर्यवान् ।
प्रवसो जम्बुमाली च महापार्श्वश्च वीर्यवान् ।
यज्ञकोपो विरूपाक्षो वज्रमुष्टिश्च राक्षसः ।
सुप्तघ्नश्चाग्निकेतुश्च रश्मिकेत्वादयस्तथा । [5]

[(l. 1) D3 महोदरमहापार्श्वौ (for the prior half). —(l. 2) Ś2 D4.8.12 मकराक्षोतिकायश्च (for the prior half). Ś2 D8.12 [अ]पि (for second [अ]ति-). —(l. 3) V2 D2-4 च(D2 [अ]ति-) वेग-(for च वीर्य-). —(l. 4) Ś2 D8 यज्ञकोपी; D2 वज्रकोपो. Ś2 वीर्यवान् (for राक्षसः). —(l. 5) Ś2 D8.12 सुमुखश्. D2 शांति- (for चाग्नि-). D1 om. रश्मिके. V2 तदा (for तथा).]

—Ś2 D1.8.12 om. 10[cd]. —[c]) B1 D2.7.13 सत्त्वसंपन्नो. Ñ1 V1.3 B2-4 त(B4 अ)थापरौ सत्त्ववंतौ; Ñ2 मकराक्षो महेश्वासो; D3 सुदृढं सत्त्वसंपन्नो; D4 अकंपनस्तु संपन्नो; D6 T2.3 G2 M1.2 अकंपनः सत्त्ववंतौ; T1 G1.3 M3.5 कंपनः सत्त्ववंतौ च(M3 तौ). —After 10, Ñ V1.3 B2-4 L (ed.) ins.:

1688* अतिकायो महावीर्यस्त्रिशिराश्चापि कोपनः ।

[Ñ1 B2 [अ]ति-; V3 B3 [इ]ति (for [अ]पि).]; while B1 D2-4.13 ins.:

1689* प्रजङ्घः प्रघसश्चैव शोणिताक्षश्च राक्षसः ।

[D4 प्रहसश् (for प्रघसश्). D2 प्रजंघः प्रहसश्च (unmetric); D3 प्रघसश्च महातेजाः (for the prior half). D13 स (for च).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 69. 15
B. 6. 80. 15
L. 6. 68. 13

एतान्निहत्यातिबलान्बहून्राक्षससत्तमान् ।
बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥ ११

एतावदिह शेषं वो जेतव्यमिह वानराः ।
हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥ १२

अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम ।
घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥ १३

हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुध्यते ।
तदेवैष महाबाहुर्लक्ष्मणः शमयिष्यति ।
वानरा घ्नन्तु संभूय भृत्यानस्य समीपगान् ॥ १४
इति तेनातियशसा राक्षसेनाभिचोदिताः ।
वानरेन्द्रा जहर्षिरे लाङ्गूलानि च विव्यधुः ॥ १५

ततस्ते कपिशार्दूलाः क्ष्वेडन्तश्च मुहुर्मुहुः ।
मुमुचुर्विविधान्नादान्मेघान्दृष्ट्वेव बर्हिणः ॥ १६

---

11 Ś1 om. 11 (cf. v.l. 9). —[a]) D6 T2.3 हत्वा हि; D13 महति (for निहत्य). V2 तान्निहत्य च (for एतान्निहत्य). Ś2 V2 B1 D1–4.8.12.13 संग्रामे; Ñ V1.3 B2–4 बलिनो (for [अ]तिबलान्). —[b]) Ś2 Ñ1 V3 D8.12.13 G1 -पुंगवान्; G3 -संमतान् (for -सत्तमान्). V2 सुबहून्राक्षसोत्तमान्. —V3 damaged for 11[c] – 12[c]. —[d]) V2 B1 D1 लंघितं (B1 °तुं) (for लङ्घ्यतां). V2 D1.2 गोपदं; D3.4.13 गोः पदं (for गोष्पदं). Ś2 D8.12 यथा (for लघु).

12 Ś1 om. 12 (cf. v.l. 9). V3 damaged for 12[abc] (cf. v.l. 11). —[a]) Ñ B2–4 एतच्; B1 D1–4.6.9–11.13 T2.3 M3 एव (for इह). D4 ते (for वो). Ś2 D8.12 इदमेवावशिष्टं वो. —[b]) Ś2 D1–4.8.13 हंतव्यम्; B1 हंतव्या; D12 हर्तव्यम् (for जेतव्यम्). Ś2 Ñ V1.2 B1–3 D3–5.8–12 T1 G इति; B4 इ* (for इह). —[c]) Ś2 Ñ1 V1.2 B1 D8.12 घ्नत; D1–4.13 घ्नंतः (for हताः). B4 समाशस्य (sic); G2 समागत्य. —[d]) Ś2 B1 D1–4.8.12.13 राक्षसं बलदर्पितं.

13 Ś1 om. 13 (cf. v.l. 9). —[a]) Ñ V3 B2.4 निधने. Ś2 Ñ V1.3 B D1–4.8.12.13 कार्यं (for कर्तुं). —[b]) M5 च पितुर् (for जनितुर्). Ś2 V1.2 B1 D1–4.8.12.13 मया पुत्रस्य वानराः; Ñ V3 B2–4 पुत्रस्य यतितुं भया. —After 13[ab], Ś2 Ñ V B2.4 D1–4.8.12.13 ins.:

1690* न तु मे रामतुष्ट्यर्थमकार्यं भुवि विद्यते ।
वधोपायो वधश्चेति सममाहुर्मनीषिणः ।
तत्पातकमुपातिष्ठे रामसिद्धिं प्रयोजनम् ।

[(l. 1) Ś2 D8.12 ननु (D8 न*) मे; Ñ V1.3 B2.4 अथवा; D3 न तु तद् (for न तु मे). Ś2 D8.12.13 य(D13 म)त्कार्यं (for अकार्यं). D13 वर्तते (for विद्यते). Ñ V1.3 B2.4 किं न कुर्या वि(V3 °र्याद्धि; B4 °र्या हि)गर्हितं (for the post. half). —(l. 2) V3 damaged from पापो up to पु (see var.) in l. 3. D4 बलोपायो. Ñ V1 B2.4 [ए]व (for [इ]ति). Ñ V1.2 B2.4 D1–4.13 तुल्य(V2 D1–4.13 सम)दोषमिदं द्वयं (for the post. half). —(l. 3) Ś2 D4.8.12 उत्- (for तत्). D3 उपातिष्ठत. D3.13 -सिद्धि- (for -सिद्धिं). D1.2.12 प्रयोजयन्. Ñ V1.3 B2.4 तत्पापमुपतिष्ठेयं पु(V3 damaged up to पु)त्रस्य निधनं प्रति.]

—[c]) Ś2 D8.12 त्यक्त्वा च (for अपास्य). D7 G2 रामार्थं. —D6 reads from 13[d] (except नि) up to 14[d] in marg. —[d]) Ś2 V2 B1 D1–4.8.12.13 हनिष्ये; Ñ V1.3 B2–4 निहन्मि (for निहन्यां). D2 रावणात्मजं.

14 Ś1 om. 14 (cf. v.l. 9). D6 reads in marg. up to 14 [d] (cf. v.l. 13). V3 om. 14[ab]. —[a]) G1.2 बाष्पश्; Cm.g.t as in text (for बाष्पं). M5 प्रहर्तुमद्य मे बाष्पश्. —[b]) D5 T1 G3 [अ]पि (for [ए]व). D5.6.9–11 T1 G M Cm.g.t निरु(G1 °ब)ध्यति (for निरुध्यते). ❀ Cm.g.t: निरुध्यति निरुणद्धि. ❀ —For 14[ab], Ś2 Ñ V1.2 B D1–4.8.12.13 subst.:

1691* प्रहर्तुकामस्य तु मे वैक्लव्यं जायते महत् ।

[Ñ V1 B2–4 हि; D1 च (for तु). Ś2 D8.12 वै; D4 om. (subm.) (for मे). Ś2 D8.12 वक्तव्यं (for वैक्लव्यं). Ñ V1 B2–4 चक्षुर्बाष्पेन रुध्यते (B2 बध्यति) (for the post. half).]

—[c]) Ś2 D8.12 तमिमं वा; Ñ V B1.4 तदेनं वै; B2.3 तमेनं वै(B3 स); D1.2 तदेतं हि(D2 वै); D3.4 तदेतद्वै; D5–7.10.11 T1 G M3 तमेवैष; D13 तदेवं वो; T2 तदेषैव (archaic); T3 तदेष एव(hypm.); M5 तमेष वै. —V3 damaged from म in [c] up to [f]. —[e]) Ś2 Ñ V1.2 B1.2 D1.4–7.9–13 M3 Ct घ्नत; B3.4 T2.3 हत; D8 चूत(sic) (for घ्नन्तु). B3 भूयिष्ठान्; D4 संस्तूय (for संभूय). ❀ Ck: घ्नत इतेति यावत्। अनुनासिकलोपाद्यभावश्छान्दसः।; so also Ct. ❀ —[f]) B2 D4 तस्य; D13 ज्ञातम- (for अस्य).

15 [a]) Ś V1 B1 D1–4.8.12.13 [अ]थ(D1 [अ]भि-)तर(V1 सह)सा; B4 D11 [अ]भि(D11 [अ]पि)यशसा (for [अ]तियशसा). —[b]) B1 [अ]भिदेशिताः; D1.2 [अ]भिनोदिताः. B2 रक्षसा चाभिचोदिताः. —[c]) B3 वानरा जहृषुश्चैव; D13 वानरेंद्राश्च जहृषुर्. —Ś V2 B1 D1–4.8.12.13 transp. 15[d] and 16[d]. —[d]) B1 D3.4 वि- (for च). Ś V2 B1 D1–4.8.12.13 चिक्षिपुः (for विव्यधुः). Ñ V1.3 B2–4 समारोपितविक्रमाः.

16 [a]) Ñ2 V3 B2.3 D9–11 तु (for ते). Ś V2 B1 D1–4.8.12.13 ते लब्धलक्ष्याः(D1–4.13 °क्षाः) कपयः. —[b]) D5–7 T G2.3 M1–3 क्ष्वेलंतश्च. D9–11 पुनः पुनः (for मुहुर्मुहुः). Ś Ñ V(V3 damaged except प्रे) B-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

जाम्बवानपि तैः सर्वैः स्वयूथैरभिसंवृतः ।
अश्मभिस्ताडयामास नखैर्दन्तैश्च राक्षसान् ॥ १७
निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः ।
परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः ॥ १८
शरैः परशुभिस्तीक्ष्णैः पट्टसैर्यष्टितोमरैः ।
जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम् ॥ १९
स संप्रहारस्तुमुलः संजज्ञे कपिरक्षसाम् ।
देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥ २०
हनूमानपि संक्रुद्धः सालमुत्पाट्य पर्वतात् ।
रक्षसां कदनं चक्रे समासाद्य सहस्रशः ॥ २१
स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्युधि ।
लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत ॥ २२

G. 6. 69. 29
B. 6. 89. 27
L. 6. 68. 27

D1–4.8.12.13 प्रेक्ष्य युद्धं विभीषणं. —[c]) M1.2 विपुलान् (for विविधान्). Ś V2 B1 D1–4.8.12.13 भूयो जहृषिरे कामं; Ñ V1.3 B2–4 बभूवुर्हृष्टमनसो. —Ś V2 B1 D1–4.8.12.13 transp. 15[d] and 16[d]. —[a]) Ñ1 B3.4 G2 M1.2 मेघं. Ś1 V2 B1 D2–4.5.7.13 T2.3 G1.3 [ए]व (for [इ]व).

17 [a]) B3 ऋक्षैः; D1.2.4.13 सार्धं (for सर्वैः). —[b]) Ś V2 B1 D1–4.8.12.13 यूथपैर्; Ñ2 V1.3 B2.4 D5.6 T2.3 स(D6 सु)यूथैर्; D10 सयूथ्यैर् (for स्वयूथैर्). B2.3 D13 T3 G2 M5 अपि (for अभि-). D11 सर्वयूथैः स संवृतः. —Ś D8.12 om. 17[c–d]. —[c]) D5.10.11 तेऽभिभिस्. V3 D6.9–11 M5 ताडयामासुर्. B1 D1–4.13 असूदयत्पर्वताग्रैर्. —[d]) D1 तलैर् (for नखैर्).

18 V3 om. 18[a–b]. —[a]) G3 ते निघ्नन् (for निघ्नन्तम्). —[b]) G3 सु- (for ते). Ś B1 D1–4.8.12.13 राक्षसाः सचिवैः सह. —[c]) B4 D9–11 परिभर्त्स्य; D6 T2.3 M5 परिसस्रुर्; M1.2 प्रजह्रुश्च (for परिवव्रुर्). —[d]) Ś D8.12 तमेकं विबुधारयः; B1 D13 तमेकं(D13 ते नैक-) विविधायुधाः.

19 V3 om. 19[a–b]. —[a]) Ś B1 D1–4.8.12.13 घोरैः (for शरैः). G2 परश्वधैस्. —[b]) D5–7.9–11 पट्टि(D5 °ट्ट)शैर्. D6.7 T2.3 मुष्टि- (for यष्टि-). Ś Ñ V1.2 B D1–4.8.12.13 भिन्दि(Ñ V1.2 B D4 °दि)पा(D1 °डमा; D3 °डिमा)लैश्च राक्षसाः. —[c]) Ñ V B2–4 रणे (for मृधे). Ś B1 D1–4.8.12.13 आजघ्नु(D13 °चक्षु [sic])र्ऋक्षाधिपतिं. —[d]) D6 T2.3 घोरा वै राक्षसास्तदा.

20 [a–b] = 6.73.8[a–b]. —[a]) D2 संप्रहारस्तु तुमुलः. —[b]) G1 हरिरक्षसां. —[c]) T2.3 युद्धानां(sic); M1.2 योधानां (for क्रुद्धानां). —[d]) D6 तथा. Ś Ñ(Ñ1 marg. also; orig. [as in V) B1 D1–4.8.12 पुराभवत्; B3 पराक्रमः (for महास्वनः). V B2.4 यथा भीमपराक्रमः.

21 [a]) Ñ V B2.4 D2–4.13 चापि; B1 चैव (for अपि). —[b]) Ñ तानुद्यम्य सः; V1 B D1–4.13 शा(V1 D1 सा)ल (B3 सानु; B4 शिला)मुद्यम्य(D4 °त्पाट्य); V2.3 D5–7.9–11 T1 M5 सानुमुत्पाट्य. B3 युध्यतां; B4 D4.7.13 G2 M3 वीर्यवान् (for पर्वतात्). G1 समुत्पाट्य च पर्वतान्. —After 21[a–b], D7.9–11 G1 ins.; while M1.2 ins. after 21:

1692* स लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः।

—V3 om. 21[c–d]. —[d]) D7 G2 शतशोथ; D9–11 Ct दुरासा-(D9.11 °स [unmetric])दः; G1 M1.2.5 दुरासाद्यं(G1 °साद्यः; M5 °वारः) (for समासाद्य). Ś D1.8.12 दंडपाणिरिवांतकः; Ñ V1.2 B2–4 संग्रामे लोमहर्षणं(Ñ1 V1.2 B4 °णे); B1 D2–4.13 दंडहस्त इ(D4 ए [unmetric])वांतकः; D6 T2.3 सर्वभूतभयावहं. ❀ Ct: दुरासादः। परैर्दुरासद इत्यर्थः. ❀ —After 21, Ś Ñ V(V3 ins. only l. 3 after 21[a–b] owing to om.) B1.2.4 D1–4.8.12.13 ins.:

1693* गिरेरुत्पाट्य शिखरं प्रचिक्षेप स वीर्यवान्।
तेनाहतातिवेगेन रक्षसां विंशतिस्तदा।
विभीषणश्च संक्रुद्धो धनुष्पाणिर्महाबलः।
सामात्यस्तत्र संग्रामे जघ्ने रक्षोगणांस्तदा।

[Ñ V1 B2.4 D1–3.13 om. l. 1–2. —(l. 2) V2 B1 D4 हतानि तस्य वेगेन शतानि दश रक्षसां. —Ś1 om. from l. 3 up to 32. —(l. 3) V1 सु-; D2 तु (for च). B4 अवस्थितः (for महाबलः). —(l. 4) D3 समेत्य; D4 स मान्यस् (for सामात्यस्). V1 illeg. for जघ्ने रक्षोगणां. Ñ2 B2 [ऽ]हनद्; V2 B4 जघ्नु(sic) (for जघ्ने). V2 B1.2.4 तथा (for तदा). Ñ1 न्यहनद्रक्षसो गणान् (for the post. half).]

—Then D13 cont.:

1694* ततस्तौ च महात्मानौ समरे राक्षसर्षभौ।
अन्योन्यमभिनिघ्नन्तौ मेघनादविभीषणौ।
तद्युद्धमभवद्घोरं समेत्यान्योन्यमोजसा।
जीमूतयोरिवाकाशे शब्दो वातुलयोस्तथा।
धनुर्मुक्तः स्वनोत्कृष्टः श्रूयते हि रणाजिरे। [5]
देवदानवगन्धर्वाः किंनराः समहोरगाः।
अन्तरिक्षगतास्तस्थुर्द्रष्टुकामास्तदद्भुतम्।
विद्धमन्योन्यगात्रेषु द्विगुणं बध्यतेऽपरः।
कृतप्रतिकृतान्योन्यं चक्रतुस्तौ रणाजिरे।
बाणौघसक्तमाः सर्वा दिशः सविदिशस्तथा। [10]
संक्षुब्धा वसुधा चैव समन्तान्न प्रकाशिरे।

22 Ś1 om. 22 (cf. v.l. 1693*). —[a]) Ś2 D8.12 कृत्वाथ; V2 B1 D1–4.13 दत्त्वाथ(V2 D3 °त्त्वा सु-; D13 °त्त्वा तु) (for स दत्त्वा). —[b]) Ś2 Ñ V2 B1 D1–3.8.12.13 तदा; V1.3 रणे; B2–4 D4 तथा; D7.9–11 बली (for युधि). —[c]) V3 D9–11 परवीरघ्नः. —[d]) Ś2 D8 व्यधावत; D1 [अ]भ्यवर्तत. D2 पुनरभ्यवधावत.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 69. 30
B. 6. 89. 27
L. 6. 68. 28

तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ ।
शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् ॥ २३
अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ ।
चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ ॥ २४
न ह्यादानं न संधानं धनुषो वा परिग्रहः ।
न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः ॥ २५
न मुष्टिप्रतिसंधानं न लक्ष्यप्रतिपादनम् ।
अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ॥ २६
चापवेगप्रमुक्तैश्च बाणजालैः समन्ततः ।
अन्तरिक्षेऽभिसंछन्ने न रूपाणि चकाशिरे ।
तमसा पिहितं सर्वमासीद्भीमतरं महत् ॥ २७

23 Ś1 om. 23 (cf. v.l. 1693*). —[a]) B3 प्रसक्तौ; D2 M1.2.5 °युक्तौ; D4 °बृद्धौ; G1 °सिद्धौ (for प्रयु द्धौ). Ś2 D8.12 युयुधाते; Cm.t as in text (for तौ प्रयुद्धौ). Ñ V B D1–4.12 पुनर् ; G1 महा- (for तदा). —[b]) Ś2 V2 B1 D1–4.8.12.13 रणे; D6 T2.3 युधि; G1 उभौ; M1.2 युद्धे (for मृधे). Ñ B2–4 राक्षसलक्ष्मणौ (by transp.). —[c]) Ś2 D8.12 शरवर्षेण वर्षतौ; V2 B1 D1–4.13 शरवर्षैर्वि (V2 B1 D4 °र्षं वि)वर्षतौ. —[d]) B1 च (for तौ). Ñ1 गर्जतौ च; Ñ2 B2.3 विनिघ्नतौ; V1 B4 निघ्नतौ च (for जघ्नतुस्तौ).

24 Ś1 om. 24 (cf. v.l. 1693*). —[a]) Ś2 D8.12 अन्योन्यम् (for अभीक्ष्णम्). D4 तदधतुस्तौ (for अन्तर्दधतुः). —[b]) B1 D4.13 शरवर्षैर् (D4 °र्षं) (for °जालैर्). —D4 om. 24[c–d]. —[d]) Ś2 D8.12 घन-; Ñ V1 B2.3 महा-; D3 तथा; G3 यदा (for यथा). B1 D7.9.11 मेघौ (for मेघैस्). Ñ V2.3 B2–4 समावृतौ; V1 इव वृतौ (for तरस्विनौ). D6.13 T2.3 यथा मेघांतरस्थितौ. —After 24, Ś2 V2 B1.2 D1–3.8.12.13 ins.:

1695* शरौघान्विसृजन्तौ तु शुशुभाते शुभाननौ।
विवर्षन्तौ च सलिलं मेघाविव महाबलौ।

[(l. 1) V2 च; D2 हि; D12 तौ (for तु). D13 सुशोभनौ. —(l. 2) Ś2 D3.8.12 प्रव(D3 विक)र्षंतौ. Ś2 D2.8.12 हि; B1 तु (for च).

25 Ś1 om. 25 (cf. v.l. 1693*). —[a]) B4 ह्यादाने; T2 ह्याधानं. Ś2 V B1 D1.3.4.8.12.13 नादाने नैव(Ś2 D8.12 न च) संधाने; Ñ B2.3 न ह्यादाने न संधाने; D2 निदाने नैव संधानं. —D5 om. (hapl.) 25[b] – 26[a]. —[b]) B1.4 D1.4 धनुषोर्; B3 न धनुर् (for धनुषो). Ś2 Ñ V B D1–4.8.12.13 न(Ñ V B2–4 वा) परिग्रहे(D13 विकर्षणे). —V3 om. 25[c] – 26[b]. V1 om. (hapl.?) 25[c–d]. —[c]) Ś2 Ñ2 V2 B2–4 D1–3.8.12.13 विप्रमोक्षे(Ś2 °*[moth-eaten]); B1 D4 विमोक्षे च (for विप्रमोक्षो). —[d]) D7.9 M1.2 संग्रहः (for विग्रहः). Ś2 Ñ B D1–4.8.12.13 न वि(B2 विप्र; B4 न च; D4 परि)कर्षे न वि(Ñ B2–4 सं)ग्रहे.

26 Ś1 om. 26 (cf. v.l. 1693*). V3 om. 26[a–b]; D5 om. 26[a] (for both cf. v.l. 25). —[a]) Ś2 Ñ V1.2 B D1–4.8.12 -संधाने (for -संधानं). D13 न च मुष्टिप्रसंधाने. —D1 om. 26[b]. —[b]) D3–5.9.13 T1 G M5 लक्ष- (for लक्ष्य-). Ñ V1.2 B D2–4.13 -प्रतिपादने. Ś2 D8.12 न च लक्ष्यप्रभेदने. —[c]) M1.2 अलक्ष्यत. Ś2 D8.12 शैघ्र्ये; Ñ V B1–3 D1–4.13 शैघ्र्याद् ; B4 शैघ्र्यं (for तत्र). —[d]) Ś2 Ñ V B D1–4.8.12.13 पाणि(Ñ V1.2 B2–4 हस्त)लाघवं.

27 Ś1 om. 27 (cf. v.l. 1693*). —[a]) B4 वायु- (for चाप-). B1.3 तु (for च). Ñ2 V1.3 B2.4 D4–7.10.11 G3 Ct -प्रयुक्तैश्च ; M1–3 -विनिर्मुक्तैर्(M3 °क्त-) (for -प्रमुक्तैश्च). D13 चापादागत्य मुक्तैश्च. —[b]) V3 damaged for जालैः समन्ततः. —D6 reads 27[c–d] (except अन्त) in marg. —[c]) B1 D4.6 अंतरीक्षे. Ś2 Ñ V B1.2.4 D1–4.8.12.13 G2 प्रतिच्छन्ने(D13 °क्षैर्) ; B3 च प्र°; D7 [s]पि सं° ; D9–11 °संपन्ने; G1 M3.5 हि सं°; M1.2 [s]ति° (for ऽभिसंछन्ने). —[d]) M5 रूपाणि न (by transp.). —After 27[c–d], D5–7.9–11 S ins.; Ñ V(V3 after 28[c–d], owing to om.) B2–4 G (ed., l. 1–2) ins. only l. 1–3 after 28:

1696* लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम्।
अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे।
ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः।
निरन्तरमिवाकाशं बभूव तमसावृतम्।
नरः प्रत्युपकाराणामापत्सु लभते फलम् ।
एवमुक्त्वा ससौमित्री राघवः सुमहायशाः ।
पर्यष्वजत संश्लिष्टं तं हरिं पवनात्मजम् ।

[T2.3 om. l. 1–2. —(l. 2) D9 सबाष्पं (for स वाक्यं). —(l. 3) T2.3 भो भ्रातस् (for सौमित्रे). D9 अव्ययं (for अव्रणम्). —(l. 4) D9 जीवंतं (for जीवितं). —(l. 7) D4 शशिनं मुदितं यथा (for the post. half). —(l. 8) T2.3 हनूमंतं च सुग्रीवं (for the prior half). —(l. 10) D9 प्रदास्यामि (for प्रयच्छामि). D4 ममावस्थेयमीदृशी (for the post. half). —(l. 11) T2 जरां यातं. D9 प्रभो (for कपे). —(l. 13) T2.3 समालिंग्य (for ससौमित्री). D9 तं कपिं; T2*** (moth-eaten) (for राघवः). T2.3 स (for सु-). —(l. 14) D9 सुप्रीतस; T2.3 सौमित्रिम् (for संश्लिष्टं). D9 कपिं (for हरिं).]

—Then they cont. a passage relegated to App. I (No. 61). —After 25, D13 ins. 2054*.

26 G2 om. 26^{ab} (cf. v.l. 24). G1 om. 26 (cf. v.l. 25). Ñ1 repeats 26^{ab} here (cf. v.l. 24). D3 reads 26–34 (including colophon) before 2035(A)*. T2.3 repeat $26–27^{b}$ after App. I (No. 61). —^{ab}) D4 [इ]त्यब्रः; D9 [अ]ब्रेति (for [ए]हीति). Ś D2.8.12 प्रीतो; Ñ1 (first time) V2.3 B2–4 चैव; V1 चैवं; B1 चैनं (for रामो). Ś D1–4.8.9.12 T2.3 (both second time) M2 शुभलक्ष (Ś D4.8 M2 °क्ष्म)णं; Ñ1 (first time) V1.2 B राघवस्तदा (for परवीरहा). V3 ******स्तदा (damaged for ^{b}). Ñ2 एह्येहि लक्ष्मणेत्येवमब्रवीद्राघवस्तदा. —V3 om. 26^{cd}. —^{c}) D13 स (for च). Ś D2.3.8.12 सस्वजे (D2.3 सस्नेहं) सस्वजे गाढं; D7.10.11 G2 सस्वजे गाढमालिंग्य; D9 स स्वजन्नेव गाढं तु. —^{d}) D1 -[ई]क्षणं (for -[ई]क्षणः). Ñ2 V1.2 B बाष्पव्याकुललोचनः. —After 26, Ñ2 V1.2 B ins.; while V3 ins. after 26^{ab} (owing to om.):

2063* अजिघ्रच्चास्य मूर्धानं हर्षादश्रूण्यपातयत् ।

[B2.3 आजिघ्रच्. Ñ2 B1.4 [अ]वर्तयत् (for [अ]पातयत्.]

27 For sequence in D3, cf. v.l. 17. T2.3 repeat $26–27^{b}$ after App. I (No. 61). B3 repeats 27 after App. I (No. 61). —^{ab}) D2.3 सौमित्रे. M2 वचः (for तदा). B3 (second time) D1.3.4 T2.3 (both second time) रघुनंदनः (for राघवस्तदा). D9 अब्रवीत्पश्य सौमित्रे दिष्ट्या मां पुनरागतः. —After 27^{ab} (first occurrence), T2.3 ins. 2062* (followed by App. I [No. 61]). —Ñ1 repeats 27^{cd} here (cf. v.l. 24). —^{c}) M2.5 त्वा (for त्वां). B1 पश्यामो. —^{d}) D4 रावणात् (for मरणात्). Ś D2.8.12 उत्थितं (for आगतम्). —After 27, Ñ1 (after second occurrence) D13 ins.:

2064* हनूमन्तं तु संप्राप्य तेन ते जीवितं ध्रुवम् ।

[D13 जीवितं तेन ते (by transp.).]

—After 27, Ñ2 V B (B3 after the first occurrence of 27) read 25. —After 27(second occurrence), B3 ins. within brackets l. 2–3 of 2066*.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 85. 6
B. 6. 101. 48
L. 6. 81.183

न हि मे जीवितेनार्थः सीतया च जयेन वा ।
को हि मे जीवितेनार्थस्त्वयि पञ्चत्वमागते ॥ २८
इत्येवं वदतस्तस्य राघवस्य महात्मनः ।
खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ २९
तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम ।
लघुः कश्चिदिवासत्त्वो नैवं वक्तुमिहार्हसि ॥ ३०
न प्रतिज्ञां हि कुर्वन्ति वितथां साधवोऽनघ ।
लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥ ३१
नैराश्यमुपगन्तुं ते तदलं मत्कृतेऽनघ ।
वधेन रावणस्याद्य प्रतिज्ञामनुपालय ॥ ३२
न जीवन्यास्यते शत्रुस्तव बाणपथं गतः ।
नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ३३

28 For sequence in D3, cf. v.l. 17. V3 om. 28. —a) Ś Ñ1 V2 B1 D1-4.8.9.12.13 T2.3 न मे वीर जयेनार्थः. —b) D7 सीतायाश्. Ś D2.4.8.9.12.13 T2.3 जीवितेन वा (D2.13 च); Ñ1 विजयेन वा; D5-7 T1 G M चा(M1 वा)पि लक्ष्मण (for च जयेन वा). V2 B1 D1.3 न मैथिल्या (B1 मैथिल्या च) न चात्मना.—For 28ab, Ñ2 V1 B2-4 subst.; Ś D2.8.12 cont. after 2066*:

2065* नैव मे विजयेनार्थो न मैथिल्या न चात्मना ।

—Ñ2 V1 B2.4 om. 28cd. —c) Ś D2.8.12 च; G2 [ऽ]पि (for हि). D5.6 T1 G M3.5 विजयेन (for जीवितेन). —After 28, Ś D2.8.12 ins. (followed by 2065*); while Ñ2 V B1.2.4 ins. l. 2-3 only after App. I (No. 61); whereas B3 ins. l. 2-3 only within brackets after 27 (second occurrence):

2066* एवमाभाष्य सौमित्रिं रामो मारुतिमब्रवीत् ।
पश्यामि भवतो वीर्याल्लक्ष्मणं शुभलक्षणम् ।
पञ्चत्वं यद्ययं यातो मारुते लक्ष्मणो मम ।

[(l. 1) D2 आश्वास्य (for आभाष्य) and राघवो मारुतिं तदा (for the post. half). —(l. 2) Ś D2.8.12 त्वत्प्रसादेन पश्यामि (for the prior half). V3 B3 D8 शुभलक्ष्मणं. —(l. 3) B1 प्रत्ययं (for यद्ययं). Ñ2 V2 प्राप्तो; V1 यायान् (for यातो). Ś D8.12 लक्ष्मणो मारुते (by transp.).]

—Thereafter, B3 cont. a passage relegated to App. I (No. 64) and then reads for the first time 6.90.2-3 (including 2079*).

29 For sequence in D3, cf. v.l. 17. D12 om. 29ab. —a) B3 D9-11 ब्रुवतस्; T3 नंदतस् (for वदतस्). M1 इत्येवं वचनं श्रुत्वा. —b) G1 महाबलः (for °त्मनः). B1 रामस्य प्रतिपालनं; D1.3 प्रतिज्ञां(D1 °ज्ञा-) परिपालयन् (D1 °लनं).—After 29ab, Ś D2.8.12(before 29cd owing to om.) ins. l. 5-15, 17, 19, 20, 79, 80 and 77 only of App. I (No. 61). —c) Ś D8.12 भिन्नः; Ñ2 V B श्रुत्वा; D1.3 स्मृत्वा (for खिन्नः). T2.3 शश्वत्प्रश्रितया वाचा. —d) Ś D2.8.12 सक्रोधो रावणं प्रति.

30 For sequence in D3, cf. v.l. 17. —a) T3 त्वं; Cr.m.g.t as in text (for तां). Ś D8.12 प्रतिज्ञातं; D2 प्रतिज्ञां च (for तां प्रतिज्ञां). —b) Ś D8.12 पुनः; D6 पूर्वं (for पुरा). Ś1 B1.3 D1.3.4.8.9 G1 -पराक्रमः. —After 30ab, G2 ins.:

2067* राजानं त्वां करिष्यामि लङ्कायां राक्षसेश्वर ।

—V3 om. 30cd. —c) Ś V1 B2-4 D1-3.8.12 [अ]तेजास्; D6 [अ]शक्तो (for [अ]सत्त्वो). Ñ1 D13 लघुसत्त्व इवाकस्मात् (D13 °कर्म); Ñ2 V2 B1 दिव्याश्चो दिव्यतेजाश्च. —d) D4 त्वम् (for इह). Ś D8.12 तेनैवं वक्तुमर्हसि; Ñ V1.2 B D1-3.6.7.9-11.13 M1 नैवं(Ñ1 D1.13 नैव; D2 तेन) त्वं वक्तु (D3 कर्तु)मर्हसि. —After 30, M2 ins.:

2068* साधवः शुभकर्माणि कुर्वन्ति हितमात्मनः ।

31 For sequence in D3, cf. v.l. 17. —a) Ś Ñ2 D2.8.12.13 तु (for हि). B1 D5-7.10.11 G2 M3 न हि (D6 तु) प्रतिज्ञां कुर्वति. —b) Ñ2 V B2-4 सदा (for ऽनघ). B1 साधवो वितथां नृप; D4.9-11 T2.3 वितथां सत्यवादिनः; D13 वितथं साधनं नयं (sic). —Ñ1 om. 31c-32b. —cd) Ś Ñ2 V1.3 B2-4 D8.12.13 तु; V2 B1 च (for हि). D2 महत्तेषां; M2 महत्तस्य (for महत्त्वस्य). Ś B2.3 D2.8.11 -प्रति- (for -परि-). B4 प्रतिज्ञां प्रतिपालय (for d). D4 लक्ष्मणो हि महांस्तस्य कृतं वै प्रतिपालनं (sic?).

32 For sequence in D3, cf. v.l. 17. Ñ1 om. 32ab (cf. v.l. 31). —a) D10.11 च (for ते). —b) D10.11 Ct नालं ते (for तदलं). —For 32ab, Ś Ñ2 V B D1-4.8.9.12.13 subst.:

2069* तदलं मत्कृते नैव नैराश्यमुपगम्यते ।

[D1 इदं (for अलं). D3 नैवं; D4.9 वीर (for नैव). V2.3 B1.2 मत्कृतेनैव; D13 यत्कृतं सौम्य (for मत्कृते नैव). D4 वैराग्यम्; D9 वैक्लव्यम् (for नैराश्यम्). V2.3 B1.2 D9 उपगम्य वै(B2 हि; D9 च) (for उपगम्यते). D13 गिरासमवगम्यते (sic) (for the post. half).]

—cd) Ś D8.12 [अ]थ (for [अ]द्य). Ñ2 V B1 D3 M2 परि-; B4 D2.12 प्रति-; D1 om.; Ct as in text (for अनु-). Ś D8 प्रतिज्ञापरिपालनं (for d). Ñ1 D13 प्रतिज्ञां पालय विभो जहि शत्रुं कृतागसं.

33 For sequence in D3, cf. v.l. 17. —a) D4 transp. न and जीवन्. Ñ2 B3 D4 T2.3 राम; V1.2 B2.4 पाप (for शत्रुस्). Ñ1 D13 यास्यति रिपुस्. Ś B1 D1-3.8.12 न हि जीविष्यते राम. ❀ Cg: यास्यते यास्यति. ❀ —b) D13

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः । | यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥ ३४

G. 6. 85. 12
B. 6. 101. 54
L. 6. 81.203

इति श्रीरामायणे युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

तत्र (for तव). Ś D3.9.12 चाप- ; T2.3 दृष्टि- (for बाण-). B2 D7.9–11 -वशं (for -पथं). —[c]) Ś1 V2.3 D2.8.12 नदतस्. —[d]) M1 [इ]तरे मृगाः (for महागजः).

34 For sequence in D2, cf. v.l. 17. —[a]) Ñ V B2–4 अहं हि; D13 निहत्य. T2.3 हंतुम् (for वधम्). —[b]) Ś B1 D4.8.9.12.13 T2.3 तस्य; D3 अद्य (for अस्य). D4 महात्मनः . —After 34, Ś Ñ V B D1–4.8.12.13 T2.3 M2 (Ś D8.12 M2 only l. 1–4) ins. :

2070* तम इव किरणैः सहस्ररश्मिः
शरकिरणैर्जहि रावणं सुतीक्ष्णैः ।
रणशिरसि निपातितस्य वक्त्रं
मुदितमनाः समुदीक्षितुं त्वरामि ।
श्रुत्वा तु रामो वचनं महात्मनः [5]
प्रचक्रमे तस्य वधाय रक्षसः ।
दृष्ट्वैव रामं स च रावणस्तदा
रणाभिनन्दी प्रमुखे व्यवस्थितः ।

[Before l. 1, B3 ins. in marg. :

2070(A)* तावदेनं हनिष्यामि रावणं सहबान्धवम् ।

—(l. 2) D13 -निकरैर् (for -किरणैर्). V3 B1 राघवं (sic) ; D4 T2.3 राक्षसं (for रावणं). B4 सुतीक्ष्णं; D3 सुतीव्रैः ; M2 रथस्थं. —(l. 3) Ś2 निपात्य तस्य; D4 निपातितं तस्य (for निपातितस्य). D13 रक्षो (for वक्त्रं). —D4 om. from समुदीक्षितुं in l. 4 up to रणाभिनन्दी in l. 8. V3 damaged from तुं in l. 4 up to प्रचक्र in l. 6. —(l. 4) D13 विहितमनाः . Ś D2.8.12 स(D2 त)मवेक्षितुं; Ñ1 D3.13 T2 प्रसमीक्षितुं. Ś D1–3.8.12 T2 त्व(D2 च)रेहं(T2 °यं) ; B1 सुबाहुं (for त्वरामि). —For l. 3–4, T3 subst. :

2070(B)* कुरु सफलां च विभीषणे प्रतिज्ञां
चरमगिरिं च न यावदेति सूर्यः ।

—Thereafter T3 cont. ; while T2 ins. after l. 4 :

2070(C)* लक्ष्मणस्य तु तद्वाक्यं श्रुत्वा राजा विभीषणः ।
उवाच हितमत्यर्थं राघवं रघुनन्दनम् ।
एवमेतन्महाबाहो यथा वदति लक्ष्मणः ।
कर्तुं प्रतिज्ञां नेच्छन्ति वितथां साधवो जनाः ।
प्रतिज्ञातस्त्वया यावद्रावणस्य वधोऽस्य च । [5]
भव सत्यप्रतिज्ञस्त्वं सत्यमेतद्ब्रवीम्यहम् ।
विध्वंसय शरैस्तीक्ष्णैर्दिवसो ह्यतिवर्तते ।
प्रतिज्ञां रघुशार्दूल सफलां कुरु राघव ।

[T3 om. l. 1–2. —(l. 5) T2 तावद् (for यावद्) and नृप (for ऽस्य च).]

—(l. 5) T2 कृत्वा (for श्रुत्वा). Ñ1 marg. ; Ñ2 om. ; B1.2 D13 च (for तु). B1 D1.13 महात्मा; D2 महामना (for महात्मनः). —(l. 6) Ñ1 मनः प्रचक्रे निधनाय रक्षसः ; B1 D1.2.13 T2.3 मनः प्र(B1 मनश्च)चक्रे वध एव तस्य. —(l. 7) B4 तु (for च). B1 तु; D1 तं (for तदा). Ñ2 D2.3 प्रगृह्य चापं स महात्मन(D3 °मना)स्तदा; D13 ज्ञात्वैव रामः स च रावणस्य; T2.3 प्रगृह्य चापं सुमहान्महाद्युतौ. —(l. 8) B1 वचने (for प्रमुखे). D4 पुनरेव संस्थितः (for प्रमुखे व्यवस्थितः). V3 रणाभिमुख्ये प्रययौ निशाचरः ; D3 T2.3 रणाय धन्वी पुनरेव सं(D3 चा)स्थितः .]

—M2 cont. ; D6.7.9–11 G1.2 M1.3.5 ins. after 34 :

2071* यदि वधमिच्छसि रावणस्य संख्ये
यदि च कृतां त्वमिहेच्छसि प्रतिज्ञाम् ।
यदि तव राजसुताभिलाष आर्य
कुरु च वचो मम शीघ्रमद्य वीर ।

[(l. 1) D10 om. यदि वध. —(l. 2) G1 om. ; M5 ह (for च). D7.10.11 हि तव (for त्वमिह). —(l. 3) D7.10.11 यदि च (for यदि). D6.7.9–11 M1.5 -[अ]भिलाषम्. D7 अस्ति (for आर्य). M3 यदि तव राजवरात्मजाभिलाषः . —(l. 4) D11 om. च and वीर.]

Colophon : V2 mostly illeg. —*Kāṇḍa name* : Ś1 V3 om. ; Ñ B1.3.4 D2.4.13 लंका°. —After Kāṇḍa name, D2 ins. युद्धपर्वणि. —*Sarga name* : Ś D2.8.12 लक्ष्मणसंजीवनं(D2 °नः) ; Ñ V1.3 B2–4 हनुमत्प्रत्यागमनं; B1 शैलनिवेशनं; D1.3 औषध्यानयनं; D4 ओषध्यानयनं लक्ष्मणसंजीवनं; D13 लक्ष्मणवाक्यं. —*Sarga no.* (figures words or both) : Ś1 Ñ1 V3 B2.4 D2.4.8.12.13 om. ; Ś2 B1.3 81 ; Ñ2 87 ; V1 84 ; D1 83 ; D3 88 ; D5–7.10.11 T1 G M3.5 102 ; D9 82 ; T2 108 ; T3 112 ; M1.2 103; B(ed.) 101; G(ed.) 85. —After colophon, D3 ins. l. 3–4 (preceded by 2035(A)*) of 2035*. —After colophon, G M1.2.5 conclude with श्रीरामाय नमः, while D4.9 T2.3 ins. a passage relegated to App. I (No. 62).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

९०

G. 6. 86. 1
B. 6. 102. 1
L. 6. 82. 1

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः ।
रावणाय शरान्घोरान्विससर्ज चमूमुखे ॥ १

दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः ।
आजघान महाघोरैर्धाराभिरिव तोयदः ॥ २

90

1 D9 om. 1. V3 damaged for 1^{ab}. B2 repeats 1^{ab} after App. I (No. 63). —^{ab}) Ś Ñ2 B1 D1-3.8.12 लक्ष्मणस्य (for °णेन). Ñ1 B2 (second time) हि तद्; B4 D5.6 T1 G1.3 M5 च तद्; D13 हितं (for तु तद्). B1 D1.3 श्रुत्वा तत्र (for उक्तं श्रुत्वा). Ś1 D3 [श] थ; Ś2 D2.8.12 तु; D13 G1 M5 च (for स). D4 T2.3 लक्ष्मणस्य वचः श्रुत्वा संदीपि(D4 °पीडि)तमनास्तदा. —After 1^{ab}, Ś Ñ2 B2 (after first occurrence of 1^{ab}) D2.8.12 ins. a passage relegated to App. I (No. 63); After 1^{ab}, Ñ1 V2 B2 (after second occurrence of 1^{ab}) D13 ins. a passage relegated to App. I (No. 64). —After 1^{ab}, B1.3 D1.3 ins.:

2072* रावणस्य वधे धीमान्महात्मा मतिमादधे ।;

while, D5-7.10.11 T1 G M ins.:

2073* संदधे परवीरघ्नो धनुरादाय वीर्यवान् ।

[G1 परवीरघ्नं. G2 M2 आयम्य (for आदाय).]

—Ñ1 V2 B1 D1.3 om. 1^{cd}. —V3 damaged for ^{c}. —^{c}) Ś D3.12 रावणस्य (for °णाय). T2.3 शेषेणाथ शरान्वीरो. —^{d}) T1 damaged for विससर्ज. D6 च राघवः; T2.3 च (T3 स) संमुखे; M2 महाबलः (for चमूमुखे). —After 1, Ñ2 V (V2 before 2 [owing to om.]) B2-4 D2(l. 5-6 only) ins.; B1 D1.3 cont. after 2072*:

2074* दशग्रीवस्त्वपक्रम्य मायया राक्षसर्षभः ।
कल्पयामास रुचिरं रथं पावकसंनिभम् ।
युक्तं मनुष्यवदनैर्हयैः परमशीघ्रगैः ।
सर्वशस्त्रायुधोपेतं कालान्तयमदर्शनम् ।
मनःसंकल्पगं स्वक्षं सुचक्रं सुवरूथिनम् । [5]
प्राज्ञसूतयुतं श्रीमत्सर्वं हेमविभूषितम् ।

[(l. 1) B1 D1.3 स्वपा(B1 °ति)क्र(D1 ग)म्य (for स्वपक्रम्य). —After l. 1, B4 ins. l. 8-12 and 16-17 of App. I (No. 64). —(l. 2) Ñ2 V B3.4 कल्पयामास. V3 -संजितं (for -संनिभम्). —V1.3 om. l. 3-5. —(l. 4) Ñ2 कालाग्निसम-; V2 वर्णादित्यम-; B2 D1 कैलासतम-; B4 कालांतसम-; D3 क्रव्यादसम- (for कालान्तयम-). B3 मेघस्तनितनिःस्वनं (for the post. half). —(l. 5) B1 D3 मनःसंकल्पजं; D1 मनः-संकल्पितं. V2 B2-4 दिव्यं (for स्वक्षं). Ñ2 मनसस्तुल्यगं दिव्यं; D2 मनःसंकल्पजं स्वरथं (for the prior half). —Ñ2 illeg. for l. 6; V3 damaged for l. 6 (except प्राज्ञसूत). —(l. 6) B4 भ्रामत; D1 शुभ्रं (for श्रीमत्). V2 प्राज्ञसूतसमायुक्तं (for the prior half). V1.2 B2.3 सर्वगं हेमभूषितं; B4 D1 तत्सर्वं (B4 सुबलं) हेमभूषितं (for the post. half).]

—Thereafter, D2 cont. l. 129-131 of App. I (No. 63). —After 1, M2 ins.:

2075* रावणोऽपि रथं भीमं दीप्यमानं स्वतेजसा ।

—M2 cont.; D5-7.10.11 T1 G (G2 repeats after 2, 2076* and the prior half of 2078*) M1.3.5 ins. after 1:

2076* अथान्यं रथमारुह्य रावणो राक्षसाधिपः ।

[D10.11 आस्थाय; Ck as above (for आरुह्य).]

—After 1, D4 T2.3 ins.:

2077* विवृत्य नयने क्रूरे रावणो लोकरावणः ।

—Thereafter all cont.; while D5-7.10.11 T1 G (G2 repeats 2076* and the prior half of 2078* after 2) M1.2(further).3.5 cont. after 2076*; D9 ins. before 2:

2078* अभ्यद्रवत काकुत्स्थं स्वर्भानुरिव भास्करम् ।

[D4.7.10.11 T2.3 M2 अभ्यधावत; G1 M5 अभिदुद्राव.]

—After 1, D13 ins. l. 69-70 of App. I (No. 64).

2 Ś D3.12 om. 2-3. Before 2, V2 ins. 2074*; while D9 ins. 2078*. B2 reads first time 2^{ab}; B3 reads first time 2-3 (including 2079*) after App. I (No. 64) then both repeat here. —^{a}) Ñ2 V B2-4 (B2.3 second time) तमारुह्य; B1 रथस्थं तं. Ñ1 B3 (first time) D13 रथस्थोथ (Ñ1 B3 स रथस्थो) दशग्रीवो; B2 (first time) सरथस्तु दशग्रीवो. —^{b}) D6 चंद्रोपमैः; D13 वज्रसमैः (for वज्रोपमैः). —D1 repeats 2^{cd} after 13. —^{c}) Ñ1 B3 (first time) D13 महातेजा; V3 शरैर्घोरैर्; D7.10.11 G2 महाशैलं; D9 °घोरो; M1 °वेगैर् (for महाघोरैर्). B1 D1 (second time).2.3 अभ्यवर्षत्पुनर्भीमो(D1 °मैर्); D1 (first time) अभ्यवर्षत्तदा भीमो. —^{d}) V3 तोयदं. —After 2, B1 D1-4 T2.3 ins.; B3 ins. after first occurrence of 2:

2079* राघवाय शरान्घोरान्विससर्ज महाबलः ।
दशग्रीवो रणश्लाघी प्रमुखे हरियूथपान् ।

[(l. 1) D1-3 जघान च (for महाबलः).]

—After 2, G2 repeats 2076* and the prior half of 2078*.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

दीप्तपावकसंकाशैः शरैः काञ्चनभूषणैः ।
निर्विभेद रणे रामो दशग्रीवं समाहितः ॥ ३
भूमिस्थितस्य रामस्य रथस्थस्य च रक्षसः ।
न समं युद्धमित्याहुर्देवगन्धर्वदानवाः ॥ ४
ततः काञ्चनचित्राङ्गः किंकिणीशतभूषितः ।
तरुणादित्यसंकाशो वैदूर्यमयकूबरः ॥ ५
सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः ।
हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः ॥ ६
रुक्मवेणुध्वजः श्रीमान्देवराजरथो वरः ।
अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥ ७

G. 6. 86. 10
B. 6. 102. 12
L. 6. 83. 7

3 Ś $D_{8.12}$ om. 3 (cf. v.l. 2); B_3 repeats 3 (cf. v.l. 2).—^{a}) $Ñ_1$ D_{13} अथ; $Ñ_2$ V B (B_3 both times) $D_{1-4.9}$ $T_{2.3}$ ततः; Cr as in text (for दीप्त-).—^{b}) $Ñ_2$ कनकभूषितैः; D_{13} $T_{1.3}$ G_3 कांचनभूषितैः; $V_{1.2}$ B(B_3 both times) D_2 कनकभूषणैः; D_3 अग्निशिखोपमैः.—D_5 om. 3^c-6^d.—^{cd}) $Ñ_2$ V $B_{2.4}$ अभ्यद्रवद्; $D_{3.4.9-11}$ $T_{2.3}$ अभ्यवर्षद् (for निर्विभेद). D_6 $G_{1.3}$ रामं. B_3 (second time) अभ्यद्रवद्रणे रामं (for ^{c}). B_3 (second time) D_6 T_1 $G_{1.3}$ दशग्रीवः. V B_2 T_1 $G_{2.3}$ M समाहितैः (M_3 °तं). $Ñ_1$ D_{13} विभेद रावणं रामः सुमु(D_{13} °पुं)खैः सुसमाहितैः (D_{13} °तः); $B_{1.3}$ (first time) $D_{1.2}$ अभ्यवर्षत्पुनर्भीमं(D_1 °त्शरैर्भीमैर्; D_2 °त्पुनर्भीमो) धाराभिरिव तोयदः ❀ Cr: दशग्रीवं समाहितमिति पाठः ❀

4 D_5 om. 4 (cf. v.l. 3).—^{a}) Ś $Ñ_2$ V B $D_{1-4.8-12}$ M_3 भूमौ स्थितस्य; $Ñ_1$ भूमिष्ठस्य तु; D_{13} भूमिस्थस्य च.—^{b}) $Ñ_1$ तु (for च).—^{c}) $Ñ_2$ V B_{2-4} ऊचुर् (for आहुर्).—^{d}) D_1 -मानवाः; D_{9-11} -किंनराः (for -दानवाः). B_4 वासवं देवदानवाः.—After 4, $Ñ_1$ B_3 D_{13} ins.; V_2 cont. l. 2-4 only after l. 1 of 2081*:

2080* अन्तरीक्षगता ऊचुर्देवराजं शतक्रतुम् ।
तन्निशम्य सहस्राक्षो मातलिं चाब्रवीद्वचः ।
शीघ्रं गच्छ रथं गृह्य रामस्यार्थे त्वरान्वितः ।
कवचं काञ्चनं चेदं सशरं सशरासनम् ।

[(l. 1) B_3 अंतरीक्षे.—(l. 2) D_{13} प्राब्रवीद्.—(l. 3) D_{13} रावणार्थे.—B_3 reads l. 4 in marg.—(l. 4) D_{13} च शरासनं.]

—B_3 cont.; $Ñ_2$ V $B_{2.4}$ ins. after 4:

2081* देवतानां वचः श्रुत्वा शतक्रतुरनन्तरम् ।
प्रेषयामास रामाय रथं मातलिसारथिम् ।

[(l. 1) B_3 देवादीनां (for देवतानां). V_3 शक्रस्तुत्यम् (for शतक्रतुर्).]

—After 4, D_4 (l. 3-9 only).$_{6.7.9-11}$ $T_{2.3}$ ins.:

2082* ततो देववरः श्रीमाञ्श्रुत्वा तेषां वचो मृतम् ।
आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ।
रथेन मम भूयिष्ठं शीघ्रं याहि रघूत्तमम् ।
आहूय भूतलं यातः कुरु देवहितं महत् ।
इत्युक्तो देवराजेन मातलिर्देवसारथिः । [5]
प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ।
शीघ्रं गच्छामि देवेन्द्र सारथ्यं च करोम्यहम् ।
ततो हयैश्च संयोज्य हरितैः स्यन्दनोत्तमम् ।
स्वर्गाजग्मार्थं रामस्य क्षपचक्राम मातलिः ।

[(l. 1) T_2 देवान् (for तेषां). D_6 [ऽ]र्थवित्; $T_{2.3}$ [ऽ]र्थवत् (for -[अ]मृतम्).—Before l. 3, D_1 ins. the reference इन्द्र उवाच in marg. and then ins. (marg.):

2082(A)* मातले भूतलं याहि रामरावणसंगरे ।

—(l. 3) D_{9-11} T_2 भूमिं (for भूयिष्ठं). D_1 रथेन महता युक्तः (for the prior half).—(l. 4) D_1 रामाय; T_3 आरुह्य; Ct as above; K(ed.) मातले (for आहूय). D_6 T_2 रामाय भूतले यंतः (T_2 °ता); D_7 अहाय भूतलं याहि (for the prior half).—(l. 5) D_6 $T_{2.3}$ शक्रः; Ct as above (for देव-).—(l. 7) $D_{7.9-11}$ यास्यामि (for गच्छामि).—(l. 8) $D_{1.6}$ $T_{2.3}$ हरिभिः (for हरितैः).—$D_{7.9-11}$ om. l. 9.]

5 D_5 om. 5 (cf. v.l. 3).—^{a}) $Ñ_1$ D_{13} स तु; $D_{6.11}$ तत्र (for ततः). Ś $D_{8.12}$ रत्नवि-; $Ñ_2$ V B_{2-4} (B_3 *sup. lin.* also as in text) कनक- (for काञ्चन-). $Ñ_1$ B_3 D_{13} -चित्रांगं; G_1 -चित्राभिः. B_1 रथश्चाल चित्रांगं.—^{b}) Ś V B_4 $D_{1.8.12}$ -जाल-; D_2 -कर-; D_6 T_3 -गण- (for -शत-). $Ñ_2$ -जालसंहतः; B_3 -जालभूषितं; D_4 -कृतभूषणः (for -शतभूषितः). $Ñ_1$ D_{13} G_1 किंकिणीभिर्विभूषितं (G_1 °तः); D_9 $M_{2.5}$ किंकिणीकविभूषितः.—D_4 reads 5^{cd} twice.—^{c}) $Ñ_1$ B_3 D_{13} -संकाशं.—^{d}) $Ś_2$ $D_{2.3.6-8.12}$ S वैदूर्य-. $Ñ_2$ V_3 B_{2-4} -सम-; B_1 (marg. also) -मणि- (for -मय-). $Ñ_1$ B_3 -कूबरं. D_4 (both times) वैदूर्यकृतभूषणः; D_{13} मणिवैदूर्यकूबरं.

6 D_5 om. 6 (cf. v.l. 3).—^{a}) D_{13} दशार्हैः. B_2 -[उ]पेतैर् (for -[आ]पीडैर्).—^{b}) $Ś_2$ $D_{3.12}$ M_5 युक्तैः; B_3 D_1 युक्तं; $D_{2.11}$ G_1 M_3 युक्त- (for युक्तः). $Ñ_1$ D_{13} श्वेतैर्युक्तं प्र(D_{13} सु)कल्पितं; D_4 युक्तः श्वेतैश्च चामरैः.—^{d}) $D_{1.4}$ -विभूषणैः. M_2 मणिहेमविभूषितैः.

7 ^{a}) V_2 B_3 (*sup. lin.* also) $D_{2.3}$ रुक्मदंड-; B_1 वज्रदंत-; G(ed.) वज्रदंड- (for रुक्मवेणु-). Ś $D_{1.8.12}$ -दंडधरः (D_1 °मणिः) (for -वेणुध्वजः).—^{b}) $Ś_1$ $Ñ_1$ B_2 $D_{1-4.8.12.13}$ T_3 -रथोत्त(B_2 T_3 °प)मः (for -रथो वरः).—After 7^{ab}, B_3 ins.:

2083* पूर्णो हयसहस्रेण कामगेन महारथः ।

—After 7^{ab}, $D_{5-7.9-11}$ S ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 86. 19
B. 6. 102. 13
L. 6. 83. 8

अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः ।
प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ ८
सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते ।
दत्तस्त्व महासत्त्व श्रीमाञ्शत्रुनिबर्हणः ॥ ९
इदमैन्द्रं महच्चापं कवचं चाग्निसंनिभम् ।
शराश्चादित्यसंकाशाः शक्तिश्च विमला शिता ॥ १०
आरुह्येमं रथं वीर राक्षसं जहि रावणम् ।
मया सारथिना राम महेन्द्र इव दानवान् ॥ ११

2084* देवराजेन संदिष्टो रथमारुह्य मातलिः ।
[M2 देवराजसमादिष्टस्तं समा°.]

—Ñ1 D4.13 om. 7c–8b. —c) B3 D1 अभ्यवर्षत. —After 7, Ñ2 V B ins. :

2085* रामलक्ष्मणसुग्रीवा हनुमान्सविभीषणः ।
अवतीर्णं रथं दृष्ट्वा सर्वे विस्मयमागताः ।
विस्मितौ रामसुग्रीवौ लक्ष्मणः सविभीषणः ।
अङ्गदो जाम्बवांश्चैव केसरी पनसस्तथा ।
मन्त्रयन्ति स्म तेऽन्योन्यं कारणं हि भविष्यति । [5]
उपायेनेदृशेनायं छलितुं नूनमिच्छति ।
बहुमायाधरः क्रूरो रावणो राक्षसाधिपः ।
रामस्य वचनं श्रुत्वा सुग्रीवो वाक्यमब्रवीत् ।
वयं सर्वे परीक्षामो रथमश्वं ससारथिम् ।
अश्वांश्च संस्थितान्भूमौ युद्धसज्जान्मनोजवान् । [10]
विभीषणो महाप्राज्ञो दृष्ट्वा वचनमब्रवीत् ।
सुविश्रब्धं रथं वीर आरोह त्वमशङ्कितः ।
अहं सर्वां विजानामि मायां वै रक्षसामिह ।
अभिगम्य च काकुत्स्थं दशग्रीवस्य पश्यतः ।

[(l. 3) B3 च विशेषतः (for सविभीषणः). B1 विस्मिताश्च ततश्चैते रामसुग्रीवलक्ष्मणाः . —V2 om. l. 5. —(l. 5) B1 च (for ते). —(l. 6) B1 मूलम् (for नूनम्). —V3 om. l. 7. —(l. 7) B1 राक्षसाधमः . —(l. 8) V तेषां तद् (for रामस्य). —(l. 9) B1.4 परीक्ष्यामो. —V3 om. l. 10. —(l. 10) V1 illeg. for the prior half. V2 अश्वांस्तु. Ñ2 B1 असंस्थितान्; B4 च पातितान् (for च संस्थि°). B1 -शौंडान् (for -सज्जान्). V2 मनोभवान् . —(l. 11) V2 महत्प्राज्ञो; V3 महातेजा; B4 [s]थ महत्प्राज्ञो (hypm.). —(l. 12) Note hiatus between the two halves. V3 सविश्रब्धं रथं दृष्ट्वा (for the prior half). —(l. 13) V1.2 मायया; V3 B4 मायाया; B3 मायां यां (for मायां वै). B2 राक्षसीम् (for रक्षसाम्). —After l. 13, B2.3 ins. ; while Ñ1 D4.13 cont. after 2087* :

2085(A)* नैवंविधा राक्षसेन्द्रे रथा विद्यन्ति शत्रुहन् ।
नैर्ऋतेषु विजानामि रथान्मायागुणान्वितान् ।
मातलिं च विजानामि नित्यं शक्रस्य सारथिम् ।
आरोह त्वं सुविश्रब्धं विजयायाविचारयन् ।
निमित्तानीह पश्यामि यानि सिद्धिकराणि वै । [5]

[(l. 1) B2 तिष्ठंति (for विद्यन्ति). D4 राघव (for शत्रुहन्). —(l. 2) B2 नानागुणान्वितान्. —(l. 3) Ñ1 D4 चैव जानामि. D4 धीमतः (for सारथिम्). —(l. 4) D4 आरूरोह (for आरोह त्वं).]

—After 2085(A)*, B3 cont. :

2085(B)* तद्बभूवाद्भुतं दृष्ट्वा राघवं रथमास्थितम् ।
विजयानीह पश्यामि यानि सिद्धिकराणि वै ।]

8 Ñ1 D4.13 om. 8ab (cf. v.l. 7). B1 om. 8ab. D8 repeats 8ab after 9ab. —a) Ñ2 V B2–4 अथाब्रवीत्. Ś D12 तथा; D8 (both times) ततो (for तदा). —b) Ś D1 संप्रतोदो ; B3.4 D8 रथस्थितः . —cd) D4 आदाय (for प्राञ्जलिर्). V3 om. (hapl.) मातलिर् . V3 देवराजस्य (for सहस्राक्षस्य). —D1 om. 8d. D4 उवाच रघुनंदनं (for d). Ñ1 D13 आदाय प्रांजलिर्वाक्यमुवाच हरिसारथिः (D13 °सूतयः[corrupt]).

9 a) Ñ1 D4.13 देवराजेन (for सहस्राक्षेण). —b) Ś1 Ñ2 V B D1–3.12 वै; Ś2 च (for ते). D8 अवतीर्य त्रिविष्टपात् . —After 9ab, D8 repeats 8ab. —D8 om. 9c–10d. —c) D7 प्रेषितस्ते (for दत्तस्तव). Ñ2 V2.3 B2–4 महेंद्रेण; M1 महाबाहो (for महासत्त्व). Ś Ñ1 V1 B1 D1–4.12.13 प्रेषि(Ñ1 D3 प्रहि)तस्ते(B1 D13 °स्तु) महेंद्रेण; M2 दत्तस्तुभ्यं महेंद्रेण. —d) V1 D9 T3 श्रीमञ् . Ñ1 D4 M1 -निषूदन; B3 D11.12 G3 M2 -निबर्हण (for -निबर्हणः). D5.6.10 T1 M3 श्रीमञ्शत्रुनिबर्हण; D13 श्रीमाञ्शत्रुं निषूदय.

10 V3 D8 om. 10 (for D8, cf. v.l. 9). —a) Ñ1 D4.13 ऐंद्रं चेदं; Ñ2 इममैंद्रं; G1 इदं चैंद्रं; G (ed.) एतच्चैंद्रं. D13 महाचापं. —b) Ś B1 D1–3.12 [अ]पि सुप्रभं; V1 [अ]ग्निसुप्रभं; V2 M1 [अ]र्क(V2 [अ]पि)संनिभं. —c) G1 शरश्चादित्यसंकाशः . —d) D5 T1 G3 विपुला (for विमला). D9–11 T2 शिवा (for शिता). Ś D12 शक्त्यश्च विमलांचि- (Ś2 D12 °लाग्नि)ताः; Ñ V1.2 B2–4 D4 शक्त्यश्चामलाः शिताः(Ñ1 D4 शुभाः; B3 शिवाः) ; B1 शस्त्राश्च विमलाः शिताः; D1.3 शक्त्यश्च विमला म(D1 °लाः शि)ताः; D13 शक्त्यश्च विपुलाः शुभाः; T2.3 रथे तिष्ठति राघव.

11 a) Ś Ñ1 V2.3 D4.5.8.12.13 T1 G3 [ए]नं (for [इ]मं). Ñ V B2–4 D4.13 राम (for वीर). —b) Ñ2 V B2–4 M2 transp. राक्षसं and रावणम् . —c) D13 तेन (for मया). Ś B1.3 D1–3.8.12 युक्तं; D6 T2.3 G1 M1.3.5 राजन् ; D9–11 देव; D13 सर्द्धि (sic); G (ed.) वीर (for राम्). —d) T1 देवेंद्र (for महेन्द्र). V3 damaged from व up to l. 1 of 2088*. —After 11, Ś B1 D1–3.8.12 ins. :

2086* विभीषणमतेनैव परीक्ष्य च यथाबलम् ।
[D2 परीक्ष च; D3 प्रेक्ष्य चैव; D12 परीक्ष्यं च (for परीक्ष्य च). D1 यथाक्रमं.];

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

इत्युक्तः स परिक्रम्य रथं तमभिवाद्य च ।
आरुरोह तदा रामो लोकाँल्लक्ष्म्या विराजयन् ॥ १२
तद्बभूवाद्भुतं युद्धं द्वैरथं लोमहर्षणम् ।
रामस्य च महाबाहो रावणस्य च रक्षसः ॥ १३
स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः ।
अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १४

G. 6. 86. 28
B. 6. 102. 19
L. 6. 83. 14

while Ñ1 D4.13 ins. :

2087* एवमुक्तो नाभ्यनन्दत्तं रथारोहणं प्रति ।
बहुमायाधरं चिन्त्यं राक्षसं वैरिणं रिपुम् ।
विभीषणस्ततो रामं प्रणिपत्येदमब्रवीत् ।

[(l. 1) D4 रथं रोहणं ; D13 तथारोहणं. —(l. 2) D4 बहुमायाधरः क्रूरो रावणो राक्षसाधिपः.]

—Then Ñ1 D4.13 cont. 2085 (A)*.

—After 11, Ñ2 V B2–4 ins. :

2088* एवमुक्तस्तदा तेन दृष्ट्वा दिव्यं च तं रथम् ।
विभीषणमथोवाच राघवो बुद्धिसत्तमम् ।
सुग्रीवं चैव दुर्धर्षं लक्ष्मणं च महारथम् ।
हनूमन्तं सुषेणं च प्रधानांश्च तथा हरीन् ।
परीक्षध्वं रथं सर्वे रक्षसा निर्मितं भवेत् । [5]
परीक्षितं यथातत्त्वमारोक्ष्यामि ततो रथम् ।
तस्य तद्वचनं श्रुत्वा वानराः सविभीषणाः ।
परीक्ष्य सुचिरं बुद्ध्या रथं तस्मै न्यवेदयन् ।
इन्द्रदत्तमिमं वीर आरोह त्वमशङ्कितः ।
रावणं च दुराधर्षं राक्षसं जहि राघव । [10]

[V3 damaged for l. 1. —(l. 1) B2 दिव्यकृतं (for दिव्यं च तं). —After l. 1, B3 ins. :

2088(A)* बहुमायाधरं मत्वा रावणं वैरिणं च तम् ।

—(l. 2) V3 B2 बुद्धिसंमतं. —(l. 3) V1 [अ]पि (for [ए]व). —(l. 4) V3 damaged from तथा up to य in l. 6. Ñ2 हरींस्तथा (by transp.). —(l. 5) Ñ2 V1.2 B3.4 परीक्ष्यध्वं. B3 यताः (sic) (for रथं). —(l. 6) B4 तथा सर्वे (for परीक्षितं). B4 आरोक्षामि. V1 महारथं; V2.3 तथा रथं (for ततो रथम्). —V3 damaged for l. 9–10. —(l. 9) Note hiatus between the two halves.]

12 V3 om. 12^{ab}. —^{a}) Ñ1 D13 स तु विक्रम्य; Ñ2 V1.2 B2 D1.2.7.9–12 T G1 M1.3.5 Cm.g.t संपरिक्रम्य; D6 तं परिक्रम्य; G2 स प्रतिक्रम्य. —^{b}) B4 M3 समू- (for तम्). V1 सः (for च). Ś D8.12 जयाय रथमस्त्रवित् ; Ñ1 D4.13 संप्र(D4 सुसं)हृष्टतनूरुहः ; B1 D1–3 जयाय परमास्त्रवित् . —After 12^{ab}, Ñ1 D4.13 G(ed.) ins. :

2089* रथं प्रदक्षिणीकृत्य मातलिं प्रतिगृह्य च ।
स्वां तनुं चिन्त्य तां दिव्यां देवान्संपरिपूज्य च ।

[(l. 1) D4 प्रदक्षिणं कृत्वा. D13 प्रतिपूज्य (for °गृह्य). —(l. 2) D13 स्वांतरं. D4 चिंतितां. D13 तान्दिव्यान् (for तां दिव्यां). G (ed.) ततो विचिंत्य तं देवं (for the prior half). D4 स (for सं-). G (ed.) सः (for च).] ;
while Ñ2 V1.2 B2.4 ins. :

2090* प्रदक्षिणं तथा कृत्वा मातलिं वाजिनस्तथा ।

[B2 तदा (for first तथा). B4 वाजिनं. B2 रावणः सविभीषणाः (for the post. half).]

—^{c}) Ś Ñ V B D1–4.8.12.13 M2 रथं ; D6 T2.3 ततो (for तदा). B1 दिव्यं (for रामो). —^{d}) Ś D3.8.12 लोकं; B1 रामो ; D2 लोक- (for लोकाँल्). Ñ1 D4.13 लोक(D13 °के)लक्ष्म्या विराजितः; Ñ2 V2.3 B2–4 विभीषणपरीक्षितं ; V1 विभीषणमतेन हि; G (ed.) जयाय परमास्त्रवित्. —After 12, Ñ2 V B2–4 ins. :

2091* कवचं च समावध्य माहेन्द्रं राघवस्तदा ।
श्रियाभिरुरुचे रामो लोकरक्षाधिराजवत् ।

[(l. 1) V3 समासाद्य (for °वध्य). Ñ2 V2.3 B3 महेंद्रं. —V1 illeg. for l. 2. —(l. 2) V2 B3.4 लोके. Ñ2 -पाल-; V2 B4 रक्षो (for -रक्षा-). V3 लोके देवा विराजयत् (for the post. half).]

—Ñ2 B2 (l. 1 only) cont.; Ñ1 D4.13 ins. after 12 :

2092* ते तु दिव्या हरिहया जानुभ्यामगमन्महीम् ।
संनियम्य तु तानश्वान्मातलिर्वैरसारथिः ।
मनसा चोदयामास यथेप्सितमरिंदमः ।

[(l. 1) D4 तं (for ते). —(l. 2) Ñ1 स नियम्य; Ñ2 संनियाम्य. D4 सर्वान् (for अश्वान्). D4 देव- (for वर-). —(l. 3) Ñ2 D13 [आ]देशयामास. G (ed.) अरिंदमः.]

—After 2091*, B3 (marg.) cont. :

2093* तद्बभूवाद्भुतं दृष्ट्वा राघवं रथमास्थितम् ।
दशग्रीवो विषण्णं च मनसा चेदमब्रवीत् ।
विचेष्टितं महेन्द्रस्य नूनं चैव भविष्यति ।
तेनायं रथमुख्योऽद्य प्रहितः सर्वसंयुतः ।
वानरा राक्षसाश्चैनं दृष्ट्वा शक्ररथे स्थितम् । [5]
मनसा चक्रिरे रामो रावणं निहनिष्यति ।

—After 12, M2 ins. :

2094* विभीषणमभिप्रेक्ष्य संमतस्तेन राघवः ।

13 B2 om. 13^{ab}. —^{ab}) Ñ2 V1.3 B3.4 अथा(B3 ततो)भूद् ; D9–11 तद्बभौ च (for तद्बभूव). L (ed.) ततोभवन्महायुद्धं (for ^{a}). D6 तुमुलं (for द्वैरथं). Ś V B1 D4.7.8.10–12 G2 M2 रोमहर्षणं. D1.2.5 T G1.3 M3.5 तुमुलं- (D1.2 द्वैरथे) रोमहर्षणं (for ^{b}). M1 ततो बभूव संग्रामो द्वैरथो रोमहर्षणः. —V3 om. 13^{cd}. —^{c}) Ñ1 D4.13 राजपुत्रस्य शूरस्य. —^{d}) Ś B1 D1–3.8.12 बलिनो रावण(D2 °क्षस)स्य च. —After 13, D1 repeats 2^{cd}.

14 ^{a}) Ś Ñ1 V3 B D1–4.8.12.13 गां(D1.3 गं)धर्वेण

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 86. 29
B. 6. 102. 20
L. 6. 83 15

अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः ।
ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ १५
ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः ।
अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥ १६
ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः ।
राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ १७
तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः ।
दिशश्च संततः सर्वाः प्रदिशश्च समावृताः ॥ १८

तान्दृष्ट्वा पन्नगग्रामः समापतत आहवे ।
अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ १९
ते राघवधनुर्मुक्ता रुक्मपुङ्खाः शिखिप्रभाः ।
सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥ २०
ते तान्सर्वाञ्शराञ्जघ्नुः सर्परूपान्महाजवान् ।
सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २१
अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः ।
अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २२

तु(B1 च); Ñ2 V1.2 D7 गंधर्वेण च (for स गान्धर्वेण). —[b]) B2 देवी (sic) (for दैवं).

15 [a]) B3 तदस्त्रं; D6 अस्त्रं तत् (for अस्त्रं तु). —[b]) D6 राघवं; G (ed.) नागानां (for राक्षसं). D13 राक्षसेश्वरः. —For 15[ab], Ś B1 D1-3.8.12 subst.:

2095* अस्त्रयुद्धे च परमे रावणो राक्षसेश्वरः ।

[B1 अस्त्रयुद्धेन (for अस्त्रयुद्धे च). B1 D1.2 परमो. D3 अस्त्रं भौमं जगमं घोरं (hypm.) (for the prior half).]

—[c]) D1 परमः. —[d]) D4 संग्रामे च (for पुनरेव). Ś B1.3 (*sup. lin.* also) D8.12 स राघवे; V2 D1.2 स राघवः; D3 महाबलः (for निशाचरः). M1 राघवाय महाबलः.

16 V3 om. 16[ab]. —[a]) Ñ1 G1 -विनिर्मुक्ताः. —[b]) D3 कनक- (for काञ्चन-). Ś1 V2 B1 D8.12.13 -भूषिताः (for -भूषणाः). —[c]) B1 D1.2.4.6.13 अभ्यवर्ष(B1 D1 °र्ष)त. Ñ1 अभ्यधावंत काकुत्स्थे. —[d]) D13 सर्पभूता. D2 महाविषं.

17 [a]) Ñ V B2.4 D4.13 घोरा; M2 दीप्ता (for दीप्तं). Ś B1.3 (*sup. lin.* also) D1-3.8.12 ते सर्पवदना घोरा. —[b]) B3 वदनैर्विषं; D4 रुधिरं मुखे; M1 ज्वलनं मुखात्. —[c]) Ñ1 V B2.3 D4.6 T2.3 M1.2 [अ]भ्यधावंत; D2 [अ]भ्यवर्षत. —[d]) Ś Ñ1 V B D1-3.7.8.12 M2 भयावहाः; G2 महाबलाः; Cg as in text (for भयानकाः). D9 दीप्तास्या इव पन्नगाः.

18 [a]) D5.9 T1 G3 तैश्च(D9 °*) वासुकिसंकाशैर्; G2 तैश्च वह्निसमस्पर्शैर्. —[b]) Ñ2 V1.3 B2.3 दीप्तजिह्वैर्; B4 दीप्तैर्जिह्वैर्; D4 दीर्घभोगैर्. —[cd]) Ñ1 D13 वै संतताः; D4 विदिशस्तु; M2 सुसंवृताः (for च संततः). D9-11 विदिशश्; Cg as in text (for प्रदि°). Ñ1 D4.13 समंततः (for समावृताः). Ś B1 D1-3.8.12 दिशश्च विदिशश्चैव समंतादावृता बभुः.

19 D13 om. 19[ab]. —[a]) B3 प्रततान्; D4 सर्वतो (for पन्नगान्). —[b]) Ñ V B2-4 D4 पततो(B3 शतशो)थ सहस्रशः. —[c]) Ñ1 D4.13 स(D13 तु) गारुडं; V B2-4 D7 G2 M2.5 पाशुपतं (for गारुत्मतं). Ñ2 सौपर्णास्त्रं तदा घोरं; D6 T2.3 ग(T2 गा)रुडास्त्रं महाघोरं. —[d]) Ñ2 V B2.3 D6.13 भयानकं; D4 तथावहं (for भयावहम्). —For 19, Ś B1 D1-3.8.12 L (ed.) subst.:

2096* रामः संपततो दृष्ट्वा पन्नगांस्तान्सहस्रशः ।
सौपर्णमस्त्रं तद्घोरं पुनः प्रावर्तयद्रणे ।

[(l. 1) D1 पतंगांस् (for पन्नगांस्). B1 समंततः (for सहस्रशः). —(l. 2) L (ed.) सौपर्णास्त्रं तदा घोरं (for the prior half).]

20 [a]) D6 T2.3 M3 -शरा मुक्ता; G1 M5 -करान्मुक्ता (for -धनुर्मुक्ता). Ś Ñ1 B1 D1-4.8.12.13 M2 रामेण तु (D4 M2 च) शरा मुक्ता(Ś D8.12 शरान्मुक्तान्); Ñ2 V B2-4 राघवेण ततो मुक्ता. —[b]) Ñ1 शशिप्रभाः; B1 D1.2 शिलाः शिताः; B3 शिताः शराः; D3.4 शिलासिताः; T2 शिखिप्रदाः; G1 M5 शिलीमुखाः; Cr.m.g.t शिखिप्रभाः (as in text). Ś D8.12 रुक्मपुंखाञ्शलाशि(D12 °चि)तान्. —G (ed.) om. 20[cd]. —[cd]) D4 M2 सुवर्णाः; Cg सुपर्णाः (as in text). D13 विकीर्णाः कांचनीभूता. Ś D8.12 विरेजुः (for विचेरुः). Ñ1 D4.13 सर्वश(D4.13 °त)स्तदा; D3 सर्वशत्रवः.

21 [a]) Ñ1 गारुडास्ते; Ñ2 ते *** (illeg.); V2.3 B2.3 ते तु सर्वान्; B4 ते तु सर्पान्; D4 गारुडाश्च; D6 T2 ते तान्सर्पान्; M2 सर्वांस्ते तान्; M5 तांस्तान्सर्वान् (for ते तान्सर्वान्). Ś D8.12 शरान्भित्त्वा; D3 समाजघ्नुः (for शराञ्जघ्नुः). D13 आरूढास्तेथ आजघ्नुः (with hiatus). —[b]) D6 T2.3 सर्पभूतान्. Ñ2 V B D1-3.5 T1 G3 M1 महाविषान्; M2 °रणे (for महाजवान्). Ś D8.12 सर्पीभूतान्महाविषान्; Ñ1 D4.13 सर्व(D13 °र्प)भूताञ्शरान्रिपोः. —G (ed.) om. 21[cd]. —[c]) Ñ1 D4.13 दिव्यरूपा हि; D6 सुपर्णभूताः; M2 सुवर्णरूपा. —[d]) Ś D8 कामचारिणः.

22 [a]) B4 अस्त्र-. Ś D8.12 क्रूरे; D11 क्रुद्धे. —[b]) Ś B1 D1-3.8.12 राक्षसेश्वरः. —[c]) Ñ1 घोरं (for रामं). —[d]) B1 धाराभिः. M5 इव (for शर-).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततः शरसहस्रेण राममक्लिष्टकारिणम् ।
अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २३
पातयित्वा रथोपस्थे रथात्केतुं च काञ्चनम् ।
ऐन्द्रानभिजघानाश्वाञ्शरजालेन रावणः ॥ २४
विषेदुर्देवगन्धर्वा दानवाश्चारणैः सह ।
राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः ॥ २५
व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ।
रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥ २६
प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ।
समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥ २७
सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः ।
उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् ॥ २८
शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः ।
अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना ॥ २९
कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् ।
आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे ॥ ३० G. 6. 86. 43 B. 6. 102. 36 L. 6. 83. 30

23 [a]) D8 -सहस्राणि (sic).—[b]) D8 T2 आक्लिष्ट-. —Ś B1 D8.12 om. 23[c] – 24[b]. —[c]) Ñ1 D4 मर्दयित्वा; Ñ2 V B2.3 (also *sup. lin.* as in text).4 पूर्°; D7 G1.2 M2.5 अर्प° (for अर्दयित्वा). M1 शरैस्तीक्ष्णैर् (for शरौघेण). —[d]) D9 प्रत्यविध्यते; T3 °ध्य तत् (for प्रत्यविध्यत). —After 23, D5–7.9–11 S ins.:

2097* चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः ।

[D9 M5 चिक्षेप. T1 G2.3 इंद्रस्य; Cv.r.m.g.t as above (for उद्दिश्य). M1 चिच्छेद दिव्यं केतुं च (for the prior half). D9 शरमेकं स रावणः (for the post. half).]

24 Ś B1 D8.12 om. 24[ab] (cf. v.l. 23). —[a]) Ñ2 B4 D5 सूद (D6 हत [sic]) यित्वा; V B2 ताड°; D4 तुरगांश्च (for पातयित्वा). —[b]) Ñ V1.2 B2–4 D4 रथ (Ñ2 °थे) केतुं. D13 G1 स (for च). D1–3 राममक्लिष्टकारिणं. —[c-d]) D6.7 T3 G1.2 M3.5 अपि (for अभि-). D4 -हतान्; G2 गजान्; Cv.t as in text (for -जघान). Ñ1 ऐंद्रानश्वानभ्यहनच्; Ñ2 V B2–4 D13 ऐंद्रानश्वाञ्जघानाशु (D13 °नभिहता) (for [c]). Ñ1 D4.13 शरवेगेन; V1 B2–4 °वर्षेण (for शरजालेन). Ñ2 शरैरानतपर्वभिः (for [d]). S B1 D1–3.8.12 ऐंद्रानश्वानभ्यहनद्घोराभिः (B1 °न्स) शरवृष्टिभिः. —After 24, D7 G1.2 M3 ins.:

2098* तदृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः ।

25 [a]) Ś1 विनेदुर्; Ś2 D8.12 विनेशुर्; Ñ2 V B3.4 ऋषयो; D13 विभियुर् (sic) (for विषेदुर्). Ś D9.11 G1 -गंधर्व-. —[b]) M2 ऋषयश् (for दानवाश्). Ś B1 D1–3.8.12 चारणाः पितरस्तथा; Ñ2 V B2–4 चारणाश्च (V3 damaged from °रणाश्च up to तदा in 25[c]) सवासवाः; D6 T2.3 दानवाश्चाप्सरोगणाः; D9–11 चारणा दानवैः सह; M1 यक्षाश्च सह चारणैः. —[c]) Ñ2 V1.2 B2–4 तथा; D7 G2 तु ते (for तदा). —Ś1 D13 om. (hapl.) 25[d] – 26[c]. —[d]) M2 सिद्धाश्चाप्सरसस्तथा.

26 Ś1 D13 om. 26[a–c] (cf. v.l. 25). V3 om. 26–28[b]. —[a]) D7 G2 वानरेंद्रर्क्षा (for °रेन्द्राश्च). D1–3 व्यथितो वानरेंद्रश्च. —[b]) Ś2 B1 D1–3.8.12 व्यथितश्च विभीषणः —[c]) Ñ1 B3 D1.3.4.7.8.12 G1 राम (D7 °मं) चंद्रसमं; T2.3 रामचंद्रं तु तं (T3 तदा); Cm.g रामचंद्रमसं (as in text). —B3 repeats from दृष्ट्वा in 26[c] up to 28[a], after 28[a].

27 V3 om. 27; B3 repeats 27 (for both, cf. v.l. 26). —[a]) Ś D8.12 तु (for च). —[c]) T2 ततस् (for बुधस्). D13 चापि; L (ed.) तस्थे (for तस्थौ). —[d]) Ś Ñ V1.2 B D1–4.8.12 M2 अहिते रतः (B3 तरः [meta.]); D9–11 अहितावहः; T3 अशुभावहं; M1 अशिवाय वै (for अशुभावहः). D13 प्राजापत्याहिते रतः.

28 V3 om. 28[ab] (cf. v.l. 26). —[a]) Ñ1 B4 D1.3 T2 सधूमः; D9 °मं; D13 विधूम-. B2.3 -परिवर्तोर्मिः; D4 -परिवृद्धोर्मिर्; D5.12 T1 G3 M3 -परिवृत्ता (D12 °त्तो) ग्निः. Ś B1 D8 सधू (D8 °स) मः परिवृत्तोग्निः. —After 28[a], B3 repeats from दृष्ट्वा in 26[c] up to 28[a]. —B3 om. 28[b]. —[b]) Ñ1 D4 ज्वलन्निव च. Ś D8.12 M2 सागरं. —Ś D8.12 om. 28[c]–29[b]. D9 repeats 28[c-d] after 29[ab]. —[c]) V B2–4 D7 G2 M1 ततः (for तदा). —[d]) B2 D13 स्पर्शन् (for स्पृशन्). D1.9 (second time) दिवाकरः (sic).

29 Ś D8.12 om. 29[ab] (cf. v.l. 28). D4 om. 29[ab]. —[a]) V3 B3 D3.5 G2 सपरुषो; B1 (m. also) स्वपुरुषो (sic); D6 सुदुर्द्धर्षो; D9 सुवर्णश्च; T2.3 सुदुर्दर्शो; G (ed.) च परुषो (for सुपरुषो). Ñ1 B2 D2.13 ताम्र (B2 ध्वस्त; D2 भस्म) वर्णः स (D13 °र्णस्तु) परुषो; B4 शशिवर्णस्वरूपश्च. —After 29[ab], D9 repeats 28[ad]. —D9 om. 29[cd]. —[c]) Ñ V2 B2.4 D4.13 प्रादृश्यत. —V3 damaged from -बन्धाङ्कः up to व्यक्त in 30[b]. B3 D13 कबंधाख्यः (D13 °स); D2.6 कबंधो (D6 °धा) र्कः; D4.7 कबंधांगः; G (ed.) कलंकांकः. —[d]) B1 G1 संयुक्तो; D13 पतंगो (for संसक्तो).

30 V3 damaged up to व्यक्त in 30[b] (cf. v.l. 29). —[a]) Ś D7.8.12 कोस (D8 °श) लानां तु; Ñ1 illeg; Ñ2 कौशल्याजन्म-; V1 B2 कौशल्यायाश्च; V2 B1.4 D1–3.6.9.11 कौ (D1.2.6.11 को) शलानां च; B3 कौशिकस्य च; B3 (m. also) ऐशान्यां चैव; D4.13 M2 शु (D13 श) क्रेण सह. —[b]) Ś D8 श्रेष्ठम्; Ñ1 (marg. also) B4 D1 ज्येष्ठम्; Ñ2 V1.2 B1–3 D2.3 ज्येष्ठाम् (for व्यक्तम्). B1 D13 ऐंद्राग्नि-; B4

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 86. 44
B. 6. 102. 36
L. 6. 83. 31

दशास्यो विंशतिभुजः प्रगृहीतशरासनः ।
अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ ३१
निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ।
नाशक्नोदभिसंधातुं सायकान्व्रणमूर्धनि ॥ ३२
स कृत्वा भ्रुकुटीं क्रुद्धः किंचित्संरक्तलोचनः ।
जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥ ३३

इति श्रीरामायणे युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

मित्राग्नि- (for इन्द्राग्नि-). G (ed.) ज्येष्ठामैत्राग्निदैवतं. —°) Ñ V B2.3(*sup. lin.* also).4 D4.9–11.13 G1.2 M1.2.5 आहत्य; B3 आवृत्य; D1 आगत्य; D2.3 आगम्य; D6 T2.3 आरुह्य (for आक्रम्य). D13 पावकस्. —d) V3 D5.11.13 T1 G1.2 M1.5 Ct विशाखम्. B3 D1 इव (for अपि). Ñ1 चासुरे (sic).

31 ab) Ñ1 D3.4 दशशीर्षो(D3 °ग्रीवो) (hypm.); D13 सशीर्षो (for दशास्यो). Ś B1 D1.2.8.12 दशग्रीवो विंशभुजः (for a). Ñ2 V B2–4 विंशद्बाहुर्दशग्रीवो दशशीर्षो दशाननः. —c) Ś B1 D1–3.8.12 तदाकंपो(B1 D2 °प्यो); Ñ2 V(V3 damaged from तेजा up to l. 1 of 2099*) B2–4 महातेजा; D7 G2 महासत्त्वो (for दशग्रीवो).

32 V3 damaged for 32 (cf. v.l. 31). —a) Ñ2 V1.2 B1–3 निरस्यमाणो. B1 रामस्य (sic). —c) Ś1 D8.12 नैवाशक्नोद्धर्षयितुं; Ś2 ***क्नोद्धर्षयि* (moth-eaten); Ñ1 D4 D13 न शक्नोत्यभिसंधातुं; Ñ2 V1.2 B1.2.4 D1 अ(B4 न; D1 ना)शक्नुवन्वार(B1 °न्संध)यितुं; B3 अशक्तः संधा(marg. also °वा)रयितुं; D2 न चाशकत्संधयितुं. —After 32, Ñ2 V(V2 l. 2–4 only) B2–4 ins.:

2099* किञ्चिदाविग्नसंत्रासस्तस्थौ तत्र रणाजिरे ।
स वध्यमानः काकुत्स्थस्तीव्राभिः शरवृष्टिभिः ।
संधायान्त तदा रामो रोषरक्तान्तलोचनः ।
प्रदहन्निव कोपेन युगान्ते पावको यथा ।

[V3 damaged for l. 1.—(l. 1) Ñ2 आगत-; B4 आविश्य (for आविग्न-).—(l. 2) Ñ2 V3 आवि(V3 स वि)ध्यमानः. —(l. 3) Ñ2 illeg. for the prior half. V1 संधायंत; V2 B4 संधाय तु; V3 संध्यायते; B3 ध्यायन्नेव. V2 B4 घोर-; B3 रौद्र- (for रोष-). —(l. 4) B2 प्रदहांति (corrupt).]

33 a) B3 स दृष्ट्वा; M2 कृत्वा च; Cg.k as in text (for स कृत्वा). Ś Ñ V2.3 B2.3 D1–4.8.12.13 M5 भ्रु(D3.13 भ्रू)कुटिं (Ś2 Ñ2 D2.8.12 °टीः; D1.13 °टीं) वक्त्रे (V3 °क्रां); D5.9.10 T M3 भ्रु(D9 T2 भ्रू)कुटिं कुद्धः (for भ्रुकुटीं क्रुद्धः). V1 B1.4 स बध्वा(B4 कृत्वा) भ्रुकुटीं वक्त्रे. —b) Ś B1 D1–3.8.12 क्रोध-; G (ed.) रोष- (for किंचित्). Ñ2 आरक्त-; V3 संसक्त-; B4 रक्तांत- (for संरक्त-). —c) Ñ2 V2.3 B2–4 सुमहाकोपं(V2.3 °कायं); D6.13 T2.3 M5 च (D13 स) महाक्रोधः; D7 G2 क्रोधसंरंभः; D9 सहसा क्रोधं; G1 सुमहाक्रोधः; G3 सुमहत्क्रोधं; Cm.t सुमहाक्रोधं (as in text). Ś V1 B1 D1–3.8.13 क्रोधं चकार सुभृशं. —d) Ś D8.12 पावकः; Ñ1 V2 D3.9–11 राक्षसान्; Ñ2 V1.3 B1.2.3(*sup. lin.* also).4 D1.4.13 राक्षसं; B3 पावकं; D2 रक्षसः (for चक्षुषा). —After 33, Ś Ñ V (V3 l. 1–4 only) B D1–4.8.12.13 ins.:

3000* सुरपतिधनुराकृतिं ललाटे
भयजननीं भ्रुकुटीं विभज्य रामः ।
हुतवह इव सर्पिषावसिक्तो
द्विगुणतरं बलवांश्चकार वीरः ।
स्वतेजसा प्रज्वलितः परंतपः [5]
प्रचक्रमे दर्शयितुं पराक्रमम् ।
निशम्य रामं परमं व्यवस्थितं
परं प्रहर्षं परमर्षयो गताः ।

[(l. 1) D12 स्वरपति-. D13 स च धनुषः कुटिलां ललाटमध्ये. —(l. 2) Ñ1 सभय-. Ñ V B4 D1.13 भृकुटीं; B1.3 D2.3 भृकुटिं; L (ed.) भ्रूकुटीं. Ś D8.12 विभज्यमानः; B1 (marg. also) निबध्य रामः; L (ed.) वितत्य रामः. —(l. 3) D13 हुतभुज. D3 स सर्पिषा. Ñ2 V3 B4 D4 [अ]वसक्तो; D8 [अ]व** (for [अ]वसिक्तो). —(l. 4) Ś D8.12 भगवांश् (for बल°). Ñ1 V2 D4.13 बलमाहरत्सु(D13 °त्स)तीव्रं; Ñ2 V1.3 B2–4 बलमादधत्स रोषात्(Ñ2 °त्सुघोरः; B2 त्सरोषः); B1 D1–3 बलवच्चुकोप वीरः. —(l. 5) Ñ V1.2 B2–4 D1–4.13 स तेजसा (for स्वतेजसा). B1 स रामः. —(l. 6) D13 सुचक्रमे. —(l. 7) V1 निरीक्ष्य; B3 विशल्य. B4 बाणं (for रामं). Ñ2 D1.2 परम-. Ś D8.12 निशम्य रामः पुरमास्थितः परं; Ñ1 V2 निशम्य(Ñ1 °ल्य)रामं पुरमास्थितं परं; B1 निशम्य रामस्य रथं व्यवस्थितं; D3.4.13 निशम्य रामं परमाहवे(D3 °मव्ययं) स्थितं. —(l. 8) V1 B1 ययुः (for गताः). Ś D8.12 हर्षं परं तत्परमर्षयो गताः; Ñ1 V2 D13 परं प्रहर्षमुन(D13 हर)योभ्युपागमन्; B3 परं हर्षं च महर्षयो गताः; D4 परं हि हर्षमृषयो हि जग्मतुः.]

Colophon: D10.11 om. —*Kāṇḍa name*: Ñ V1 B1.3.4 D2.4.13 लंकाकांडे. —*Sarga name*: Ś D8.12 रामरावणयोर्युद्धं; Ñ1 D4 रामक्रोधः; Ñ2 V2.3 B2–4 देवरथा(B3 °थ्य)गमनं; V1 देवराजरथागमनं; B1 द्वैरथ्यं; D1–3 द्वैरथयुद्धं; D13 रामसंरंभः. —*Sarga no.* (figures, words or both): Ś1 Ñ1 V2.3 B2.4 D2.4.8.12.13 om.; Ś2 83; Ñ2 D3 89; V1 D9 85; B1.3 82; D1 84; D5–7 T1 G M3.5 103; T3 111; T3 115; M1.2 104; B (ed.) 102; G (ed.) 86. —After colophon, D2 concludes with रामः; G1 M1.2.5 with श्रीरामाय नमः..

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

९१

तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः ।
सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी ॥ १
सिंहशार्दूलवाञ्शैलः संचचालाचलद्रुमः ।
बभूव चापि क्षुभितः समुद्रः सरितां पतिः ॥ २
खगाश्च खरनिर्घोषा गगने परुषस्वनाः ।
औत्पातिका विनर्दन्तः समन्तात्परिचक्रमुः ॥ ३
रामं दृष्ट्वा सुसंक्रुद्धमुत्पातांश्च सुदारुणान् ।
वित्रेसुः सर्वभूतानि रावणस्याविशद्भयम् ॥ ४
विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः ।
ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ॥ ५
ददृशुस्ते तदा युद्धं लोकसंवर्तसंस्थितम् ।
नानाप्रहरणैर्भीमैः शूरयोः संप्रयुध्यतोः ॥ ६
ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः ।
प्रेक्षमाणा महायुद्धं वाक्यं भक्त्या प्रहृष्टवत् ॥ ७

G. 6. 87. 7
B. 6. 102. 45
L. 6. 84. 7

91

D10.11 continue the previous Sarga.

1 [a]) Ñ2 V B2.4 transp. तस्य and क्रुद्धस्य. D5 T1 सततं (for वदनं). Ñ1 B3 D4.13 क्रुद्धस्य वदनं दृष्ट्वा. —[b]) Ñ1 D4.13 तदा; B3 तस्य (for दृष्ट्वा). —D13 om. from नि in 1[c] up to खर in 3[a]. —[c]) D9 संत्रेसुः (for वित्रेसुः). —[d]) Ñ1 D4 प्रचकंपे (for प्राकम्पत). Ś Ñ2 V B1.2.4 D1–3.8.12 मही तदा(V1.3 B2.4 D1.2 °था); B3 तथा मही (for च मेदिनी).

2 D13 om. 2 (cf. v.l. 1). —[a]) Ñ1(marg. also as in text)-शार्दूलकः (for -शार्दूलवाञ्). D4 सिंहशार्दूलव्याघ्रैश्च. —[b]) Ñ2 V1.2 B2–4 D1–3 च सद्रुमः; V3 D9.11 G1 M Ct चलद्रुमः; D5.10 T2.3 चलद्रुमः; G2 Ck महाद्रुमः (for [अ]चलद्रुमः). Ś D8.12 ससर्प मलयद्रुमः; Ñ1 D4 चचाल च(D4 शरभैश्च) समंततः; B1 संप्रजज्वाल सद्रुमः. ❀ Ck.t:चलद्रु(Ck महाद्रु)म इति ब्रुहुव्रीहिः। Ct adds महद्रुम इति पाठान्तरम्. ❀ —[c]) B1.4 D7 T1 G M3 [अ]ति-; D8 M5 [अ]भि- (for [अ]पि). D6 T2.3 बभूव क्षुभितः सर्वः. —[d]) Ñ2 V B3.4 सागरः (for समुद्रः). Ś B1 D1–3.8.12 इव पर्वसु(D2 °णि) (for सरितां पतिः).

3 D13 om. up to खर in 3[a] (cf. v.l. 1). —[a]) Ś Ñ V1.2 B D1–4.6.8–12 T2.3 M1.2 खराश्; V3 खङ्गाश्; D5.7 T1 G3 घनाश् (for खगाश्). D3 क्रूर- (for खर-). —[b]) Ś Ñ V1.2 B D1–4.8–13 T2.3 M2.3.5 परुषा घनाः (for परुषस्वनाः). —[c]) Ñ1 D1–3.6.7.9 G1 M3.5 निनर्दतः; D5 T1 G3 निनर्दतः; D10.11 M1.2 च नर्दतः; D13 विनिर्जाताः (for विनर्दन्तः). Ś D8.12 औत्पातिकं निनादं च(D12 ह). ❀ Cg: औत्पातिकानि उत्पातसूचकानि। नर्दन्तः गर्जन्तः. ❀ —[d]) T3 समरे (for समन्तात्).

4 D7 om. 4[ab]. —[a]) Ś D1.3.8.12 [अ]थ; D4.13 तु; T1 M2.5 च (for सु-). Ś D1.2.8.12.13 संरब्धम् (for -संक्रुद्धम्). Ñ2 V B2–4 रामं च वीक्ष्य संरब्धम्(B3 सरथम्); B1 रामं संक्रुद्धं संवीक्ष्य. —[b]) B1 महोत्पातान्सु-; D1.8.–11.13 T1 G1 M1 उत्पातांश्चैव(G1 M1 °श्चापि) (for उत्पातांश्च सु-). —V3 om. 4[cd]. —[c]) Ś Ñ V1.2 B D1–4.8.12.13 M2 त्रस्तानि (for वित्रेसुः). —[d]) D5.7.9–11 T1 G M [अ]भवद् (for [आ]विशद्). Ś Ñ1 B1 D1–3.6.8.12 T2.3 रावणं (Ñ1 °क्षसं) चा(Ś1 °णमा; B1 °णे चा)विशद्भयं; Ñ2 V1.2 B2–4 D4 रावणं चा(D4 रक्षसश्चा)गमद्भयं; D13 रक्षसां च महद्भयं.

5 [a]) Ś Ñ2 V B3 D1–3.8 G2 M1.2 ततो (for तदा). D4 तेषां (for देवा). —[b]) Ś Ñ1 B1 D1–3.8.12.13 T1 M1 स- (for च). V B3.4 सगंधर्व-(B4 °र्वा); D4 सर्वदेवा (for गन्धर्वाश्च). —V3 om. 5[cd]. —[c]) Ś D3.8.12.13 तदा; Ñ2 V1.2 B D1.2 तथा (for ऋषि-). G1 -देवाश् (for -दैत्याश्). Ñ1 D4 तथैव दानवा दैत्या. —[d]) Ś D8.12 गुरुमंतश्; Ñ2 मरुत्वंतश् (for गरुत्मन्तश्). D3 खे गताः (for खेचराः). D4 गरुत्मांश्च खगेश्वरः.

6 [a]) M1 च (for ते). Ś V2.3 B1 D1–3.8.12 M5 ततो; D13 M3 महा- (for तदा). —[b]) B2–4 काल-; G2 लोकं; Cv.r.m.g.k.t as in text (for लोक-). Ś B1 D1–3.8.12 -संवर्तकं(Ś1 °सं-) स्थितं(Ś D8.12 °रं); Ñ1 V2 B4 D4.13 -संवर्तकोपमं; D7 M1 -संवर्तसंनिभं; Cv.r.m.g.t as in text (for -संवर्तसंस्थितम्). —[c]) B3 -संप्रहरणैर्(hypm.). Ñ1 B3 D4.13 घोरैः; B1 भीमं (for भीमैः). —[d]) Ś Ñ1 V1.3 B1.2.4 D1.3.8.12 संप्रयु(Ś D1.8.12 °वृ)द्धयोः; D4 च प्रबुद्धयोः; D13 सयुयुत्सयोः; G2 संप्रबुध्यतोः (for संप्रयुध्यतोः).

7 [a]) Ś Ñ2 V B D1–3.8.12 तदासु(Ś1 V2 °दा सु)राः; Ñ1 D4.13 चैव सुराः (for सुरासुराः). —[b]) Ś1 [ऽ]सुरैर्; Ś2 V1.3 B1–3 D1–3.8.12 सुरैर् (for तदा). G1 आस्थिताः; M5 आगतं; Cr.m.g.t as in text (for आगताः). Ñ V2 B4 D4.13 परस्परसमागताः. —[c]) B2.4 प्रेक्षमाणान् (for प्रेक्षमाणा). D5 तदा; G1 M5 तयोर्; M3 महद् (for महा-). Ś Ñ1 B1 D1–4.8.12.13 -भागाः; Ñ2 V B2–4 -[उ]त्पातान्; M2 -वेगा (for -युद्धं). —[d]) D1 चास्य (for वाक्यं). D6 सु- (for प्र-). Ñ1 V2 D4.13 स्वस्त्यस्तु रघुनंदनेः; Ñ2 V1.3 B2–4 इदमुचैः समाहि(B4 °ग)ताः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 87. 8
B. 6. 102. 46
L. 6. 84. 8

दशग्रीवं जयेत्याहुरसुराः समवस्थिताः ।
देवा राममथोचुस्ते त्वं जयेति पुनः पुनः ॥ ८
एतस्मिन्नन्तरे क्रोधाद्राघवस्य स रावणः ।
प्रहर्तुकामो दुष्टात्मा स्पृशन्प्रहरणं महत् ॥ ९
वज्रसारं महानादं सर्वशत्रुनिबर्हणम् ।
शैलशृङ्गनिभैः कूटैश्चितं दृष्टिभयावहम् ॥ १०
सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम् ।
अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ॥ ११
त्रासनं सर्वभूतानां दारणं भेदनं तथा ।
प्रदीप्त इव रोषेण शूलं जग्राह रावणः ॥ १२
तच्छूलं परमक्रुद्धो मध्ये जग्राह वीर्यवान् ।
अनेकैः समरे शूरैः राक्षसैः परिवारितः ॥ १३
समुद्यम्य महाकायो ननाद युधि भैरवम् ।
संरक्तनयनो रोषात्स्वसैन्यमभिहर्षयन् ॥ १४
पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा ।
प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ १५

8 Ñ1 D4.13 transp. ^{ab} and ^{cd}. —^{a}) Ś1 Ñ1 V B2.3 D2.3 दशग्रीव (for दशग्रीवं). Ñ2 V B2–4 [ऊ]चुर् (for [आ]हुर्). —^{b}) B4 राक्षसाः ; D4 अमराः (sic) (for असुराः). Ñ1 V D4.6 G2 M3 समुपस्थिताः ; D13 समरे स्थिताः ; T1 सम***(damaged) ; M1 गगने स्थिताः . —^{cd}) Ś B1 D1–3.8.12 T2.3 G1.2 M1.2.5 च (for ते). B3 देवाश्च राममूचुस्ते (for ^{c}). Ś B1 D1–3.8.12 जयस्वेति; D6 T2.3 जयेति च (for त्वं जयेति). Ñ1 D4.13 तत्रोचुश्च जयस्वेति पुनः पुनरिंदम.

9 V3 om. 9–10^{b}. —^{a}) Ś B1 D1–3.8.12 M1 क्रुद्धो; Ñ1 D4 रोषाद् ; Ñ2 V1.2 B2–4 M3 कोपाद् ; D13 घोरां (sic) ; Cg as in text (for क्रोधाद्). —^{b}) Ś Ñ2 V1.2 B2–4 D1–3.8.12 राघवाय; D7 G2 राघवं स; Cg as in text (for राघवस्य). D5.7.9–11 T2.3 G2 M1.5 च (for स). —^{c}) D4 [ऽ]स्य शितं (for दुष्टात्मा). —^{d}) Ś D8.12 स्पृष्ट्वा; D4 बाणं (for स्पृशन्). Ñ1 D13 प्राणहरं (for प्रहरणं).

10 V3 om. 10^{ab} (cf. v.l. 9). —^{a}) D13 चक्र- (for वज्र-). Ś Ñ V2 B D1–4.8.12.13 -धारं; D6 T2.3 -घोरं (for -सारं). Ś B1 D3.8.12 -नाभं; M1 -वेगं (for -नादं). V1 transp. -सारं and -नादं. —^{b}) D4.13 सर्वशस्त्र-; G2 शत्रुदर्प- (for सर्वशत्रु-). D13 -विगर्हणं (for -निबर्हणम्). —G (ed.) om. 10^{c} – 11^{b}. —^{c}) T3 शूलैश् ; Cg.k.t as in text (for कूटैश्). —^{d}) Ś Ñ1 V1.2 B1 D8.12.13 G3 M5 चित्रं; D2 चित्रैर् ; D6.7.10.11 G2 चित्त- (for चितं). D1 दृष्ट्वा; D3 वृष्टि- (for दृष्टि-). D7 -भयावहैः .

11 D6 G(ed.) om. 11^{ab} (for G [ed.], cf. v.l. 10). —^{c}) D9 तीक्ष्णाग्रे. —^{b}) Ñ2 B4 D7 -समप्रभं; V2 -समुत्थितं; T2.3 -भयावहं; Ct as in text (for -चयोपमम्). Ś1 युगाग्नि-निचयोपमं; V1.3 B2.3 युगांताग्निमिवोत्थितं. —^{c}) Ś Ñ V B D1–4.8.12.13 अनौपम्यम् (for अतिरौद्रम्). Ś D8.12 अनासह्यं; Ñ2 V B2–4 अनाधृष्यं; D4 समासाद्य (for अनासाद्यं). —^{d}) D13 बलेन (for कालेन). Ś D1–3.8.12 सुदुःसहं; B1 सुदुष्करं (for दुरासदम्).

12 V3 damaged up to दारुणं in ^{b}. —^{b}) Ś Ñ V1.2 B2–4 D2–4.6.8.9.11 T1.2 G3 M2.5 दारुणं; G1 तारणं; Cg as in text (for दारणं). Ś D8.12 निनदंस्तथा; Ñ1 D4 नादयंस्तथा (D4 °दा) ; Ñ2 V B2–4 चांतकोपमं; B1 D1–3.13 दारु (D2.3 °र)णं तथा (B1 °तः). —D13 reads 12^{cd} twice. —^{c}) B1 G2 M3 प्रदीप्तम् ; D5 T1 G3 स दीप्त. V3 इति (for इव). B1 घोरेण (for रोषेण). —^{d}) M2 पाणिना; Cg as in text (for रावणः).

13 Ñ1 D4 om. 13–15. D13 om. 13^{ab}. —^{a}) Ś B1 D8.12 रावणः ; B3 (*sup. lin. also*) D1–3 राक्षसः ; M2 सतत- (for परम-). —^{b}) Ś Ñ2 V B D1–3.8.12 प्र(Ñ2 V1 B4 सं)गृह्य युधि; D6.7.9–11 T2.3 G1.2 M2.5 जग्राह युधि (for मध्ये जग्राह). —^{c}) Ñ2 V1.3 D7.9–11 Ct अनीकैः (for अनेकैः). D13 वीरो (for शूरैः). —V3 damaged from सैः in 13^{d} up to 16^{a}. B3 reads 13^{d} – 15 in marg. —^{d}) Ś D8.12 रावणः (sic) (for राक्षसैः). G3 परिपालितः (for °वारितः). —After 13, M2 ins. :

3001* रिपूणां शोकजननं सुहृदां भयनाशनम् ।

14 Ñ1 D4 om. 14; V3 damaged for 14; B3 reads 14 in marg. (for all, cf. v.l. 13). —^{a}) Ñ2 B4 समुद्यम्य (B4 °दन्) ; B2 अनदत्सु- ; B3 D1 तमुद्यम्य (for समुद्यम्य). Ś Ñ2 V1.2 B D1–3.8.12 G1 M5 -नादं (for -कायो). —Ñ2 V2 B2.4 om. 14^{bc}. —^{c}) D1 हर्षात् ; D13 क्रुद्धः ; M1 क्रोधात् (for रोषात्). —^{d}) Ś D8.12 स (for स्व-). D3.6 अति- (for अभि-). Ś2 -वर्षयन् ; B4 -नादयन् (for -हर्षयन्).

15 Ñ1 D4 om. 15; V3 damaged for 15 ; B3 reads 15 in marg. (for all, cf. v.l. 13). —^{a}) Ñ2 B1.2.4 अं(B1.2 चां)तरीक्षं (for चान्तरिक्षं). —^{b}) Ś Ñ2 B1.2.4 D2.3.8.12 दिशोथ (for दिशश्च). Ś B3 D8.12.13 विदिशस् (for प्रदिशस्). D11 तदा (for तथा). —^{c}) Ś B1.2 D2.3.8.12.13 प्रा(D12 अ)कंपयत शब्देन. —^{d}) T2 G1.2 दारुणं. Ś1 B1 D1–3.8.12.13 राक्षसेंद्रः सुदारुणः (Ś1 D8.12 °णं); Ś2 (marg. also as in Ś1) राक्षसेंद्रः प्रतापवान् .

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अतिनादस्य नादेन तेन तस्य दुरात्मनः ।
सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे ॥ १६
स गृहीत्वा महावीर्यः शूलं तद्रावणो महत् ।
विनद्य सुमहानादं रामं परुषमब्रवीत् ॥ १७
शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः ।
तव भ्रातृसहायस्य सद्यः प्राणान्हरिष्यति ॥ १८
रक्षसामद्य शूराणां निहतानां चमूमुखे ।
त्वां निहत्य रणश्लाघिन्करोमि तरसा समम् ॥ १९
तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव ।
एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः ॥ २०
आपतन्तं शरौघेण वारयामास राघवः ।
उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः ॥ २१
निर्ददाह स तान्बाणान्रामकार्मुकनिःसृतान् ।
रावणस्य महाशूलः पतंगानिव पावकः ॥ २२

G. 6. 87. 22
B. 6. 102. 62
L. 6. 84. 22

16 V3 damaged for 16[a] (cf. v.l. 13). M1 om. 16. V1 illeg. for 16[a]. —[a]) Ñ2 V2 B2-4 अतीव तेन; D7.9-11 अतिकायस्य (for अतिनादस्य). Ś Ñ1 B1 D1-4. 8.12.13 अ(Ñ1 D4.13 प्र)तिनादेन तेनास्य. —[b]) Ś Ñ1 V B1 D1-4.8.12.13 घोरेणात्यु(Ñ1 V1 °त्यु)ग्र(V2.3 °तीव) कर्मणा(B1 D1-3.13 °णः); Ñ2 B2-4 तानि तस्यांतकात्मनः (B2 °नि च). —[c]) Ś B1 D1-3.8.12 M2 [अ]पि (for प्र-). Ñ1 D4.13 सागराश्च प्रचुक्षुभुः. —After 16, Ñ2 V B3-4 ins.:

3002* स्वस्त्यस्तु लोकेभ्य इति तत्रोचुः परमर्षयः।

17 [a]) V3 damaged from महा up to रामं in [d]. Ñ1 D4.13 -घोरं; Ñ2 V1.2 B2-4 G1 M5 -बाहुस्; M1 -तेजाः (for -वीर्यः). —[b]) Ñ2 V1.2 B2-4 transp. शूलं and तद्. V2 [स]म्यहं; D6 महान् (for महत्). —[c]) V2 स विनद्य; D4 विनद्य च (for विनद्य सु-). —[d]) Ś B1 D1-3.8.12 परुषं वाक्यम्; Ñ1 D4.13 रामं वचनम्; G1 परुषं रामम् (by transp.) (for रामं परुषम्).

18 [a]) B1 D1-3 ते (for ऽयं). Ñ1 -धारो मे; Ñ2 V1.2 B2-4 D4.13 -धारस्ते; B1 D1.2 -धारोयं; D3 -घोषोयं (for -सारस्ते). Ś D8.12 शूलहस्तो वज्रधरो. —[b]) Ś D8.12 रामं. Ś B1 D8.12 T3 समुद्यतः; M1 मयेरितः (for मयोद्यतः). —[c]) Ś D8.12 घोरान्; B1 योयं; D1-3 घोरो (for तव). D8 धातृ- (for भ्रातृ-). —[d]) D4 समं; D9-11 G2 सम्यक् (for सद्यः). D13 प्राणं (for प्राणान्). Ś2 B3.4 D4.8.13 हनिष्यति.

G3 प्रियार्हा; Cm.k.t as in text (for प्रियार्ह-). B1.3 D4 M5 -श्रवणात्; D1 -श्रवणे; G3 श्रवणं; Cm.k.t as in text (for -श्रवणा). Ś D8.12 L (ed.) [अ]प्रियं तत्([by transp.]; Ś1 वदत्; L [ed.] वचः); B1 अथाप्रियं (for तदप्रियं). —b) Ś D8.12 सीतापि सं- (for प्रियादुप-). Ś2 B1 D3.4.12 चिराय (for चिरस्य). D9–11 मानिनी (for मैथिली). D13 तु मैथिली तदा (for चिरस्य मैथिली). —c) Ś B1 D1–3.8–12 रुदती तदा भृशं (D1 घनं); Ñ V B2–4 D4.13 सहसा प्रवेपिता (Ñ2 D4 °पती) (for सुभृशं प्रवेपिता). —d) Ś Ñ V B D1–4.8.12.13 T2.3 G1.2 M2 -दंत-; Cm.t as in text (for -हस्त-). Ś1 G3 वल्गकी; Ś2 D1.5.8.12 T1 M2.3 Cm.g सल्लकी; Ñ V1.3 B D3.4 शल्लकी; Ct as in text (for वल्लरी).

Colophon.—*Kāṇḍa name*: Ñ B1.3.4 D2.4.13 लंकाकांडे.—After Kāṇḍa name, V1 D1 ins. आभ्युदयिके.—*Sarga name*: Ś Ñ2 V B D1–3.8.12 सीतापरित्यागः (V1 °गं); Ñ1 D4 रामकोपः; D13 सीतानिर्भर्त्सनं.—*Sarga no.* (figures, words or both): Ś1 Ñ1 V2.3 B2.4 D2.4.8.12.13 om.; Ś2 D1 98; Ñ2 104; V1 99; B1.3 96; D3.9 101; D5–7 T1 G M3.5 118; D10.11 117; T2 126; T3 129; M1 119; M2 120; B (ed.) 115; G (ed.) 100.—After colophon, D2 concludes with राम; G M1.2 with श्रीरामाय नमः; M5 with श्रीराम.

104

D12 begins with ॐ.

1 a) V2 damaged from -देही up to 1c.—b) B1 D4 M5 परमं (for परुषं). Ñ2 V2 B1 D1.5–7.9–11 S रोम-; D12 लोक- (for लोम-).—c) V2 B1 D3.4 राघवस्तु. Ś V2 B1 D1–4.8 [अ]ति- (for स-).—d) D5.9–12 श्रुत्वा (for भृशं). D2 [अ]रुदत् (for [अ]भवत्).

2 G2 om. 2–3. D3 om. (hapl.) 2.—a) Ś Ñ V B2.3 D2.4.9–13 तदा (for तद्). D2 [अ]श्रुतपूर्वा हिः D4 [अ]श्रुपूर्णाक्षी (subm.); D13 [अ]श्रुमुखी पूर्वं (for अश्रुतपूर्वं हि).—D9 om. 2b–3a.—b) B1 माने; D13 यत्ने (for जने). D6 T2.3 जानकी (for मैथिली).—c) Ś Ñ V B D1.2.4.8.11.12 M2 भर्तुर् (for भर्तृ-). Ś V1 B1 D1.2.8.10–12 घोरं (for रूक्षं).—d) D4 कृपया (for लज्जया). Ś B1 D1.2.6–8.10–12 T2.3 [अ]वनता; Ñ2 D4 M3 पीडिता; T1 व्री ** (damaged); M2 व्यथिता; Cr.m.g as in text (for व्रीडिता).

3 G2 om. 3; D9 om. 3a (for both, cf. v.l. 2). V3 om. 3–4b.—a) Ś2 D4.8.12 च (for [इ]व).—b) Ś V2 B1 D1–3.8.10–12 T2.3 स्वानि सा; D4 स्वमेव; D9 व्यथिता (for स्वान्येव).—c) G3 त्वच्- (for वाक्-). Ś V2 B3 D6.7.9–12 G3 -शरैस्; B1 D4 -वज्रैस्; D8 -क्रूरैस् (for -शल्यैस्). B3 यथा शल्यैर्; D4 सशल्यैश्च (for सशल्येव).—d) D1 [अ]पातयत् (for [अ]वर्तयत्). D7 भृशं प्रव्यथिताभवत्.

4 V3 om. 4ab (cf. v.l. 3).—a) Ś Ñ V1.2 B2–4 D1.2.4.8–12 M1.2.5 -क्लिन्नं (for -क्लिष्टं).—b) Ñ1 V1 D2.7 G2 M1 मार्जयंती; B4 संमर्दंती (for प्रमार्जन्ती).—c) T1 damaged for शनैर्गद्. Ś D8.12 त्यक्तगृहीतार्थं; Ñ1 D4 गृहीत्वा भर्तुः सा (D4 om. सा [subm.]); D1.3 तमिव हीनार्थं; D2 उपगूहीतार्थं; D3 गृहीत्वा तु पादौ (for गद्गदया वाचा).—d) Ñ1 D4.13 पादौ (D13 भर्तुर्) वचनम् (for भर्तारमिदम्).—After 4, Ñ V B D4.13 ins.:

3229* कुले महति जातां च दत्तां चैव महाकुले ।
शैलूषीमिव राजेन्द्र परेभ्यो दातुमिच्छसि ।

[D13 om. l. 1. V3 damaged up to दत्तां.—(l. 1) D4 हि (for च). V1 प्रदत्तां च (for दत्तां चैव).—(l. 2) Ñ1 B4 D13 अर्हसि (for इच्छसि).]

5 B1 om. (hapl.), B3 reads in marg. 5–6b.—a) Ñ1 D4 नाम (for माम्). M1 अनुदृशं; Cm.g.t as in text (for असदृशं). D2 शक्यम् (for वाक्यम्).—b) V3 B3 शोक-; G2 क्रोध-; Cm.g.t as in text (for श्रोत्र-). D4 -दारणं (for -दारुणम्).—c) D4 सर्वं (for रूक्षं).—d) D11 om. प्राकृतः. B4 यथा; T1 damaged (for इव). G (ed.) प्राकृतामिव योषितं.

6 B1 om., B3 reads in marg. 6ab (for both, cf. v.l. 5).—a) Ñ1 D13 G1 तथा न (by transp.); B1 अनाथा; D4 तथा च (for न तथा). Ś2 D8.12.13 [अ]स्ति

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 101. 8
B. 6. 116. 7
L. 6. 97. 7

पृथक्स्त्रीणां प्रचारेण जातिं त्वं परिशङ्कसे ।
परित्यजेमां शङ्कां तु यदि तेऽहं परीक्षिता ॥ ७
यद्यहं गात्रसंस्पर्शं गतास्मि विवशा प्रभो ।
कामकारो न मे तत्र दैवं तत्रापराध्यति ॥ ८
मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते ।
पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा ॥ ९
सहसंवृद्धभावाच्च संसर्गेण च मानद ।
यद्यहं ते न विज्ञाता हता तेनास्मि शाश्वतम् ॥ १०
प्रेषितस्ते यदा वीरो हनूमानवलोककः ।
लङ्कास्थाहं त्वया वीर किं तदा न विसर्जिता ॥ ११
प्रत्यक्षं वानरेन्द्रस्य त्वद्वाक्यसमनन्तरम् ।
त्वया संत्यक्तया वीर त्यक्तं स्याज्जीवितं मया ॥ १२

(for [अ]स्मि). B4 महाभाग. —b) Ś Ñ V B2–4 D1–4. 8–12 G2 M2 माम्; Cm.k.t as in text (for त्वम्). B3 अवमन्यसे; D9 अनुगच्छसि (for अवगच्छसि). —c) D4 कुरु (for गच्छ). T1 G3 M3 येन; Cm.k.t as in text (for स्वेन). —d) Ś2 Ñ1 B1.2.4 D9.12.13 M5 च (for [ए]व). Ś D8.12 तेजसा; B1 D4 तोषये; B4 तेन वै (for ते शपे).

7 D4.13 om. 7ab. —a) Ś Ñ V B D1–3.8.9.12 M2 विशंक्यास्तु(Ñ B2.4 °श्च; D1.2 हि) स्त्रियो नाम(V B3 D1 राम; B1.2 राजन्). —b) Ś Ñ V B2.4 D8.9.12 M2 स्थाने च (Ñ2 V1.2 त्वं); B1 D1–3 स्थाने तु; B3 तत्रैव; D5 T1 G3 M1.5 जातित्वं; D7 यदि त्वं; T2.3 जारत्वं; G2 M3 Cm.k जातिं तां (for जातिं त्वं). M3 परिशंससे. —c) T1 damaged for परित्यजेमां. Ś Ñ2 V B2–4 D1.3.8–11.13 M2 [ए]नां; Ñ1 D2.4.12 [ए]तां; Cm.g.k.t as in text (for [इ]मां). Ñ2 B1 D1–3.13 त्वं (for तु). —d) Ñ V1.2 B2–4 D4.13 [अ]हं ते (by transp.); D9 ते मां (sic) (for तेऽहं). T2 प्रतीक्षिता. Ś B1 D1–3.8.12 यद्यपीयं परोक्षता.

8 a) Ś V B3.4 D1–3.8–13 T3 M1 Ck यद्; B1 तद्; G3 धष्ये (sic); Cm.g as in text (for यदि). Ñ1 V2 D4.13 तस्य तद्वेश्म; G3 गात्रसंस्पर्शे; Cm.g.t as in text (for °संस्पर्शं). —b) Ś D1.3.8.12 शत्रोर्हस्त(D1 °स्ते)गता; Ñ1 D4.13 M2 शत्रोस्तव गता; Ñ2 V B तव(B3 यदा) शत्रोर्गता; Cm.g.t as in text (for गतास्मि विवशा). G(ed.) विभो (for प्रभो). D2 शत्रोर्हस्तमुपागता. —c) D2.4.13 कामचारो. —d) Ñ1 अत्र (for तत्र). Ś B3 (m. also) D1–3.8.9.12 तु बलवत्तरं (for तत्रापराध्यति). B1 D4 दैवतं बलवत्तरं; D13 देवं न वापराध्यति. —After 8, D4.13 ins. 3230*.

9 D4.13 (hapl.) om. 9. —a) Ñ2 B1 यद्; B3.4 त्वद् (for मद्). B1 D2 M1 हि; B2 च (for तु). Ñ V B2–4 हृदयं; D6 यत्तस्मिन् (for यत्तन्मे). —b) Ñ B2.3 त(B2 य)च्च मे; V य(V3 त)द्राम; B4 तत्र मे (for हृदयं). —d) Ś1 Ñ2 V B1.4 D1–3.9–11 [अ]नीश्वरी; G2.3 M5 °श्वर; Cg as in text (for °श्वरा). Ś2 D8.12 करिष्याम्यहमीश्वरी. —After 9, Ñ V B2–4 ins.; while D4.13 ins. after 8 (due to om.):

3230* त्वामहं न व्यभिचरे मनसापि कदाचन।
तेन सत्येन मे देवा दिशन्त्वभयमीश्वराः।

[(l. 1) B4 ऋते (for अहं). D4 व्यतिचरे (for व्यभि°). D13 तस्मिन्कदाचन प्रभो (unmetric) (for the post. half). —D4 om. (hapl.?) after सत्येन up to ते न in 10°. —(l. 2) B3 ते (for मे). V2 lacuna for the post. half.]

10 D4 om. up to ते न in c (cf. v.l. 3230*). —a) B1 मम; D9 नाहं (for सह-). L(ed.) संबद्ध-. D10.11 Ck.t -भावेन; Cv.r.m.g as in text (for -भावाच्च). Ś D8.12 सहसा बद्धभावा च; Ñ V B2–4 मनसा शुद्धभावेन. —b) D3 [ए]व; D13 न (for च). —c) Ś B1 D1–3.8–12 यदि तेहम्; Ñ1 V B4 D7 T3 यदहं ते; T1 * * * ते (damaged) (for यद्यहं ते). Ś B1 D1.2.8 अविज्ञाता; D3 अवज्ञाता; G1 ह्यवि°; G2 न विदिता; Cv.g.k.t as in text (for न विज्ञाता). —d) Ś1 हृता; B1 मृता (for हता). Ś D12 नीता (for तेन). Ś B1 D3.8.9 T1 (before corr.) M2 सांप्रतं; D1.2 संप्रति; Cv.m.g.k.t as in text (for शाश्वतम्).

11 a) D3.13 प्रेक्षितस् (for प्रेषितस्). M2 तु (for ते). Ś V1.2 D2.8.12 तदा; D9–11 G1 M5 महा- (for यदा). Ñ V B2.4 G2 M2 वीर (for वीरो). —After 11a, V3 erroneously reads 12d, for the first time repeating it in its proper place. —b) Ś D8.12 अवलोकितुं; D5 G3 M3 °लोकनः; D13 वनगोचरः; Cm.g.t as in text (for °लोककः). —c) D6.7 T2.3 G2 M5 त्वया(D6 तदा) रामः; D9–11 M1.2 तदा(D9–11 त्वया) राजन् (for त्वया वीर). Ś Ñ1 B1 D1–4.8.12.13 लंकायाममिवर्तत्या(D4 °ती); Ñ2 V B2–4 लंकायां मयि(V1.3 B4 अपि; B2 अभि-) तिष्ठत्यां (V3 °ष्ठन्मां). —d) D7 इदानीं; M1.2 Ck.t त्वया न (for तदा न). Ñ V B2–4 D4 G(ed.) [अ]स्मि न (G[ed.] नास्मि) व(V1 त; D4 विनि)र्जिता; D13 न विनिर्जिता. D2 किं त्वनेन विवर्जिता (sic); D9 किं त्वया न विमार्शिता.

12 a) Ś D8.12 प्रत्युक्तं; D1.2 प्रत्ययं (for प्रत्यक्षं). Ś B1 D1.3.8–12 G1 वानरस्यास्य; D2 वानरस्येव; M1 वायुपुत्रस्य; L(ed.) वानरस्यैव (for वानरेन्द्रस्य). —b) Ś B1 D1.3.8.12 तद्वचः; Ñ V B2–4 D4–6.10.11.13 T1 G M2.5 तद्वाक्य-; D2 प्रत्ययः; T2 त्वद्वाक्यं (for त्वद्वाक्य-). D9 तद्वजस्व निरंतरं. —c) Ñ1 [अ]संयुक्तया; B1 D2 [अ]संसक्तया (for संत्यक्तया). V3 erroneously reads 12d for the first time after 11a repeating it here.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

न वृथा ते श्रमोऽयं स्यात्संशये न्यस्य जीवितम् ।
सुहृज्जनपरिक्लेशो न चायं निष्फलस्तव ॥ १३
त्वया तु नरशार्दूल क्रोधमेवानुवर्तता ।
लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम् ॥ १४
अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात् ।
मम वृत्तं च वृत्तज्ञ बहु ते न पुरस्कृतम् ॥ १५
न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः ।
मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतम् ॥ १६
एवं ब्रुवाणा रुदती बाष्पगद्गदभाषिणी ।
अब्रवील्लक्ष्मणं सीता दीनं ध्यानपरं स्थितम् ॥ १७
चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम् ।
मिथ्यापवादोपहता नाहं जीवितुमुत्सहे ॥ १८
अप्रीतस्य गुणैर्भर्तुस्त्यक्तया जनसंसदि ।
या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम् ॥ १९

G. 6. 101. 21
B. 6. 116. 19
L. 6. 97. 19

—[a]) Ś D4.8.12 त्यक्तं मा; Ñ1 मुक्तं स्याज्; V3 (both times) B1.3.4 D9.13 त्यक्तव्यं (for त्यक्तं स्याज्).

13 [a]) V3 अथवा; B1 वृथा च; D9 न तदा (for न वृथा). B1 मे (for ते). V3 damaged from स्यात् up to 13[b]. Ś D8.9.12 [s]भूच्च; D13 स्याच्च; M2 राजन् (for sयं स्यात्). D1.2 न व्यथा न श्रमस्ते स्यात्(D2 °मोभूत्ते). —[b]) B1 न्यस्त- (for न्यस्य). Ś D8.12 संशयो यस्य जीविते; Ñ V1.2 B2–4 D4 संशयश्च हि (Ñ1 सु-; Ñ2 V1 °श्चैव; V2 तु; D4 स्व-) जीविते; D13 श्रमाय न च जीवितं. —[c]) D4 सुहृज्जने; T1 * * * न- (damaged) (for सुहृज्जन-). —[d]) D4 वासं; G2 च स्यान् (for चायं). V3 lacuna for निष्फलस्तव. Ś B1 D1–3.8.9.12.13 T2.3 Ct विफलो; D10.11 विफलस्; G1 निष्फलं; Cm.k as in text (for निष्फलस्). Ś Ñ V1.3 B D1–4.8.9.12.13 T2.3 भवेत् (for तव).

14 [a]) Ś1 Ñ2 V2.3 B1 D1–3.9–11 नृप-; T2 रघु- (for नर-). —[b]) Ś V3 D8.12 क्रोधेन; Ñ2 V3 B1 D1–3.5.9–11 रोषम्; M1 कोपम् (for क्रोधम्). V2.3 B3 D4.13 G3 [अ]नुवर्तते(B3 G3 °त) (sic) (for [अ]नुवर्तता). —[c]) Ś D8 लघुनैवं; V3 D13 लघुरेव (for लघुनेव). D12 लघुना मनुष्येंद्रेण (unmetric). —[d]) Ñ1 D13 एवं (for एव). Ś D8.12 स्त्रीतत्त्वं नैव(Ś2 D12 नोप-) धारितं; B1 D9 स्त्रीत्वमे(D9 °त्वेनं)वापराधितं; D1–3 स्त्रीत्वं नै(D1 °त्वेनै; D3 °त्वमे)वोपधारितं.

15 Ś D8.12 om. 15–24. V3 om. (hapl.) 15–16. —[a]) Ñ V1 B2 D4.13 M2 व्यपदेशो न(M2 °शश्च); V2 T1 अपदेशो न(T1 हि); B1.3.4 व्यपदेशेन; D5 अतुदेशो हि (sic); D6.10.11 Ck.t अपदेशो मे; D9 अथ ते किं न; Cv.r.g as in text (for अपदेशेन). D4 कालोयम्; L (ed.) जानक्या (for जनकान्). —[b]) B1.3 D4.7 G1.2 M1.2 उत्पत्तिर् (for नोत्पत्तिर्). —[c]) G (ed.) शीलं च (for वृत्तज्ञ). B1.2 D1–3.9 मम(D3 °यि)शीलं च भक्तिश्च. —[d]) Ñ2 B4 बहुधै(B4 °हु नै)व; B1.2 D1–3.9 सर्वं ते न; D13 बहुधा ते; T2 बहुलेन; Ck.t as in text (for बहु ते न). Ñ V1.2 B3.4 D4.13 M2 परीक्षितं; B1 D3.9 समर्थितं; D1 समन्वितं; D2 प्रतिष्ठितं (for पुरस्कृतम्).

16 Ś V3 D8.12 om. 16 (cf. v.l. 15). —[a]) D13 मा; G3 स (for न). G1 प्रमाणकृतः. —[b]) D7 अग्नौ (for बाल्ये). Ñ2 V1.2 B1–3 बाणेन (sic); B4 D4.13 ना(B4 वा)न्येन; D6.7.10.11 G2 मम नि- (for बालेन). B1 पालितः; T2 वेदितः (for पीडितः). M1 बाल्यात्प्रभृति पीडितः. —[c]) B1 D1–3.9 वृत्तं; D5.7 T1 भक्तिं (for भक्तिश्). Ñ V1.2 B2–4 D4.13 transp. भक्तिश् and शीलं. —[d]) D6 reads ते पृष्ठतः कृतम् in marg.

17 Ś D8.12 om. 17 (cf. v.l. 15). —[a]) B1.3 D1–3.9–12 इति (for एवं). —V3 damaged from णा up to अब्रवी in 17[c]. B1 D1–3.9–11 ब्रुवंती (for ब्रुवाणा). —[b]) Ñ1 B1 D4.6.13 T2.3 -गद्गदया गिरा (for °भाषिणी). —[c]) B1 D1–3.9–11 उवाच (for अब्रवील्). Ñ1 D4.13 वाक्यं; B1 D1–3 दीना (for सीता). —[d]) Ñ1 ध्यानपरिस्थितं; D4.10.11.13 °परायणं (for °परं स्थितम्). Ñ2 V B2–4 दीना (B2.4 चिंता-) ध्यानमुपागतं(Ñ2 °ता); B1 D1–3.9 सीता (D9 दीना) ध्यानपरायणा.

18 Ś D8.12 om. 18 (cf. v.l. 15). —[a]) T2 चितिं (for चितां). D4.13 देहि (for कुरु). —[c]) Ñ1 -[अ]भिशापेन; Ñ2 -[अ]भिशापनि-; V1.2 -[अ]पघातोप-; B1 D1–3 M3.5 Cm.g -[उ]पघाताभि- (M3.5 °तोप-); B2 G2 -[अ]पवादेन(G2 °दोपि); B3 -प्रवादोप-; D4 -शापेन (subm.); D9 L (ed.) -[अ]भिशापाप- (L [ed.] °भि-) (for -[अ]पवादोप-). D6 T2.3 -[उ]पगता (for °हता). D13 मिथ्याभिशापे जुहुता (corrupt). —[d]) D13 हि (for [अ]हं).

19 Ś D8.12 om. 19 (cf. v.l. 15). V3 mostly damaged for 19[ab]. Ñ1 also reads 19[ab] as in D1 in marg. —[a]) V1.2 D3.6.9–11 Ct अप्रीतेन; B1 अच्युतेन; D1.2 अप्रतीतैर्; D4 सुप्रीतेन; D13 ब्रवीहि स्व-; G3 अप्रियस्य; Cr.m.g as in text (for अप्रीतस्य). Ñ2 मे भर्तुस् (subm.); V2 B1 D1–3.9–11 गुणैर्भर्त्रा; D4 °र्भक्ता; D13 °र्भर्तृ-; Ct*p* as in text (for गुणैर्भर्तुस्). —[b]) Ñ V1.2 B D1–4.6.7.9–11 T2.3 G2.3 M1.5 Cr.m.g.t त्यक्ताया(B1 D1–4.9 °हं) (for त्यक्तया). —[c]) D6 का (for या). Ñ1 V3 B4 वै; D9 या (for मे). Ñ1 (marg. also) B1 D1–3.9 तां तु (for गन्तुं). L (ed.) तां तु गतिं. D4 यांचया मे गतिस्थातुं (sic); D13 या स्वमांसैर्गतिस्तूर्णं. —[d]) Ñ V B2–4 D13 गमिष्ये; B1 D1–4.9 पतिष्ये (for प्रवेक्ष्ये). M2 प्रवेक्ष्यामि हुताशनं.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 101. 22
B. 6. 116. 20
L. 6. 97. 20

एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा ।
अमर्षवशमापन्नो राघवाननमैक्षत ॥ २०
स विज्ञाय मनश्छन्दं रामस्याकारसूचितम् ।
चितां चकार सौमित्रिर्मते रामस्य वीर्यवान् ॥ २१
अधोमुखं ततो रामं शनैः कृत्वा प्रदक्षिणम् ।
उपासर्पत वैदेही दीप्यमानं हुताशनम् ॥ २२
प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली ।
बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः ॥ २३
यथा मे हृदयं नित्यं नापसर्पति राघवात् ।
तथा लोकस्य साक्षी मां सर्वतः पातु पावकः ॥ २४

---

20 Ś D8.12 om. 20 (cf. v.l. 15). —[a]) Ñ V1.2 B2 M2 मैथिल्या; B4 सौमित्रिर् (for वैदेह्या). —[c]) Ñ1 V B D1–4.9.13 विमर्ष- (D1–3 °र्श-) (for अमर्ष-). —V3 damaged from न्नो up to सौमि in 21c. —[d]) Ñ V1.2 B2–4 D4.13 रामाननमुदैक्षत; B1 D1–3.9–11 राघवं समुदैक्षत.

21 Ś D8.12 om. 21 (cf. v.l. 15). V3 damaged up to सौमि in 21c (cf. v.l. 20). —[a]) B1 सं- (for स). Ñ V1 B4 D1.3–5 T1 G M3.5 ततश्छंदं; B1 D9 M2 मतं तस्य (B1 तं तु); B2.3 तु(B3 च)तच्छंदं; D2.13 ततः शब्दं; D7 ततश्चिह्नं; Ck.t as in text (for मनश्छन्दं). —[d]) G1 ततो; Cg.k as in text (for मते). V3 M2 धीमतः (for वीर्यवान्). —After 21, B1–3(m.).4 D1–3.9–11 ins.:

3231* न हि रामं तदा कश्चित्कालान्तकयमोपमम् ।
अनुनेतुमथो वक्तुं द्रष्टुं वाप्यशकत्सुहृत् ।

[(l. 1) B1.3 ततः (for तदा). D9 कृतांतक- (for कालान्तक-). B1.3.4 D1–3 कुद्धांतकसमं तदा(B4 °मप्रभं); G(ed.) क्रोधशोकवशं गतं (for the post. half). —(l. 2) D2 प्रष्टुं (for द्रष्टुं). B4 D3 च (for वा). D9 न (for [अ]पि). B1 [अ]थ कः सकृत्; B3 [अ]भवत्क्षमः; B4 D1.2 [अ]सकृत्सुहृत्; G(ed.) [अ]थ शक्नुवन्(for [अ]शकत्सुहृत्).];
while M2 ins.:

3232* शुक्लकाष्ठैस्ततो धीमान्वानरैः सह लक्ष्मणः ।
चितां कृत्वा ततः शीघ्रं चिन्ताभूतो बभूव ह ।

22 Ś D8.12 om. 22 (cf. v.l. 15). —[a]) Ñ V B2–4 D4 -मुख(V1.3 B2 -भूत)मुखं; B1 D1–3.9–11 -मुखं स्थितं; D6 T2.3 -मुखं तदा; D13 -मुखं गतं; M3 -मुखं तथा (for -मुखं ततो). —[b]) Ñ V B D1–4.6.9–11.13 ततः (for शनैः). —[c]) Ñ2 D9–11 उपावर्तत. —[d]) V3 damaged after मा up to -पुटा in 23c. Ñ2 B1.2.4 D1–3.13 M1 विभावसुं (for हुताशनम्). —After 22, B1.3(marg.) ins.:

3233* उदङ्मुखी ततः सीता वाक्यं चेदमुवाच ह ।

[B1 transp. सीता and वाक्यं.]

23 Ś D8.12 om. 23 (cf. v.l. 15). V3 damaged up to -पुटा in 23c (cf. v.l. 22). —[a]) D1–4.6.7.9–11.13 T2.3 G2 M2 दैवतेभ्यश्. B1 सा (for च). —[c]) Ñ1 D3 कृत- (for बद्ध-). B3 (m. also देवी) D1 देवम्; B4 चेयम्; G1 भूत्वा (with hiatus); M2 रामम् (for चेदम्). D4 कृतांजलिमुवाचेदम्. —[d]) D1.9 [अ]ग्निं (for [अ]ग्नि-). B3 (marg. also) कृत्वा मनसि राघवं. —After 23, Ñ V B D1–4.9.13 ins.:

3234* यथाहं कर्मणा वाचा शरीरेण च राघवम् ।
सततं नातिवर्तेयं प्रकाशं वा रहःसु वा ।

[(l. 1) V1.2 B2 यथेद्; V3 शपेहं; B1 यदाहं; B4 यथेमं; D9 यद्यहं (for यथाहं). B1 मनसा (for कर्मणा). D9 हृदयेनापि (for शरीरेण च). D13 रावणं (for राघवम्). —(l. 2) B1 कर्मणा; D1–3.9 मनसा (for सततं). Ñ V1 D4.13 ना(D4 चा)-भिवर्तामि; V2.3 B1.2.4 D1.3 नाभि(B1 चाति; B2 चाभि)वर्तेहं (V3 D1.3 °यं) (for नातिवर्तेयं). V2 B1.2 D1–3.9 रहोपि (for रहःसु).]

24 Ś D8.12 om. 24 (cf. v.l. 15). V3 damaged for 24abc. —[a]) B1 यदा (for यथा). B1 D1–3 हृदयान्; D11 हृदये (sic) (for हृदयं). —[b]) Ñ1 नाव-; D13 परि-; M2 नोप- (for नाप-). G(ed.) नातिवर्तति. B1 D1–3 राघवः (for राघवात्). —D5–7.9(after 3240*).10.11 T G1.3 M2.3.5 repeat 24cd after 3236* (D5 T1 G3 M3 repeating again after 3240*); while M1 reads 24cd twice. —[c]) B3 तथायं लोकसाक्षी मां; G1 (second time) तथा मां शुद्धचारित्रां. —[d]) D4 om. पातु. —After 24, Ñ2 (marg.) ins. l.2–3 of 3242*; while D4.13 ins.:

3235* मनसि वचसि काये जागरे स्वप्नभावे
यदि मम पतिभावो राघवादन्यपुंसि ।
तदिह दह ममाङ्गं दीप्यमानं हुताश
सुकृतकुकृतज्ञाता सर्वलोकैकसाक्षी ।

[(l. 3) D4 दीप्यमानो. —(l. 4) D4 सु * * * कृतवेत्ता.] —After 24cd (first time), D5–7.10.11 T G1.3 M2.3 ins.; M5 cont. after 3238*:

3236* यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः ।

[G1 शुद्धां (for दुष्टां).];
while M2 ins. after 24cd (r.):

3237* एकपत्नीव्रते युक्तां यदि मां वेत्ति पावकः ।
त्रैलोक्याधिष्ठितः सोऽयं सर्वतः पातु पावकः ।

—Then M2 further cont.; while D5–7 T G1.3 M1.3.5 (after 24cd first time) ins. after 24cd (second time):

3238* कर्मणा मनसा वाचा यथा नातिचराम्यहम् ।
राघवं सर्वधर्मज्ञं तथा मां पातु पावकः ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् ।
विवेश ज्वलनं दीप्तं निःसङ्गेनान्तरात्मना ॥ २५

जनः स सुमहांस्तत्र बालवृद्धसमाकुलः ।
ददर्श मैथिलीं तत्र प्रविशन्तीं हुताशनम् ॥ २६

G. 6. 101. 33
B. 6. 106. 28
L. 6. 97. 30

—Thereafter M2 cont.; while D9 ins. after 24^{cd} (first time):

3239* अथ वा पुंश्चली पापा रामातिक्रमचारिणी ।
तथा संवर्तको भूत्वा भस्मीकुर्यात्तु पावकः ।

[(l. 1) D9 चाहं (for पापा). D9 -कारिणी (for -चारिणी). —(l. 2) D9 तदा (for तथा). D9 भस्मीकरोतु (unmetric) (for °कुर्यात्तु).]

—Then D9 M2 cont.; while D5 T1 G3 M3 cont. after 3238*:

3240* आदित्यो भगवान्वायुर्दिशश्चन्द्रस्तथैव च ।
अहश्चापि तथा संध्ये रात्रिश्च पृथिवी तथा ।
ये चान्येऽप्यभिजानन्ति तथा चारित्रभूषिताम् ।

[(l. 1) M2 धर्मेश् (for दिशश्). —(l. 2) M2 अहश्चैवाथ संध्ये द्वे रात्रिः खं पृथिवी दिशः. —After l. 2, D9 reads a line which is mostly illeg. —(l. 3) D9 ये चान्येह संजानंति; M2 एतानि मां विजानंति; M3 यथान्येपि विजानंति (for the prior half). M2 यथा; Cg as above (for तथा). M2.3 Cg -संयुतां (for -भूषिताम्).]

25 B3 reads 25^{ab} in marg. —^{b}) B1 च पावकं (for हुताशनम्). —For 25^{ab}, Ś D8.12 subst.; while L (ed.) ins. after l. 3 of 3242*:

3241* इत्युक्त्वाश्रूणि मुञ्चन्ती भर्तृप्रणिहितेक्षणा ।

—After 25^{ab}, Ñ1(m.) B D1–3.9 T2.3 ins.; Ñ2 (marg.) ins. l. 2–3 only after 24:

3242* प्रवेष्टुकामा ज्वलनं वाक्यं चैवेदमब्रवीत् ।
त्वमग्ने सर्वभूतानां शरीरान्तरगोचरः ।
त्वं साक्षी मम देहस्थः पाहि मां देवसत्तम ।
तस्यास्तद्वचनं श्रुत्वा सर्वे ते हरियूथपाः ।
बाष्परुद्धमुखाश्चासन्रुरुदुश्च शनैर्भयात् । [5]
ततः सा राघवं सीता नमस्कृत्यातेक्षणा ।

[(l. 1) Ñ1 D2.3 चेद(Ñ1 वाच)मथाब्रवीत्; B1.3 चेदमुवाच ह; D1 एतदुवाच ह (for चैवेदमब्रवीत्). B4 इदं वचनमब्रवीत् (for the post. half). —(l. 2) B1.3 आद्यः (for अग्ने). D9 T2.3 पावक त्वं च भूतानां (for the prior half). Ñ2 अंतश्चरसि; D1 शरीरांतक- (for शरीरान्तर-). —(l. 3) B1.3 हव्यकव्येश (for मम देहस्थः). B2.4 त्राहि (for पाहि). B3 चेश- (for देव-). B2.3 -संमतः; D9 T2.3 सर्वतः (for -सत्तम). —L (ed.) om. l. 4–6. —(l. 5) B2 सर्वे (for चासन्). B2 तु (for second च). Ñ1 B1.3 भृशं (for भयात्). —B3 reads l. 6 in marg. —(l. 6) B1 च (for सा). T2.3 नमस्कृत्वा.]

—^{c}) Ś B1 D1–3.8.12 देवीं; M2 तत्र (for दीप्तं). —^{d}) Ś Ñ V B D2–4.8–13 M5 निःशंकेन; G2 निःसंज्ञेन; Ck as in text (for निःसङ्गेन). —After 25, V3 reads one damaged line.

26 V3 om. 26. —^{a}) Ś D8.12 ततस् (for जनः). Ś Ñ1 V1.2 B3.4 D4.7.8.12.13 G2 M2 तु; Ñ2 D3.6.9–11 G1 M5 च (for स). B2 ज्वलनस् (for जनः स). B2 D2 तु महांस्; D13 बहुशस्; T1 damaged (for सुमहांस्). M3 त्रस्तो (for तत्र). —^{b}) Ñ2 V1 B2 D2.11.13 G3 -वृद्धः (for -वृद्ध-). Ś B1 D1.3.8.12 -पुरःसरः; Ñ V1.2 B3–4 D2.4.13 -समागतः (for -समाकुलः). —^{c}) Ś D8.12 देवीं; Ñ1 D4.13 सीतां; B1 D1–3.9 दीनां; D10.11 G1 दीप्तां (for तत्र). —^{d}) D2 प्रविवेश (for प्रविशन्तीं). —After 26, V2 (ins. l. 9 after 26 and cont. l. 7–8,5, prior half of l. 4 and post. half. of l.6 after 3245*) D5.6 (only l. 6–9).7.10.11 T1 G M1.3.5 ins.; Ś B1 D1–3.8.9.12 T2.3 cont. after 3246*; Ñ1 D4.13 ins. after colophon; Ñ2 V1.3 B3.4 ins. after 27; B2 cont. after 3247*; M2 further cont. after 3248*:

3243* सा तप्तनवहेमाभा तप्तकाञ्चनभूषणा ।
पपात ज्वलनं दीप्तं सर्वलोकस्य संनिधौ ।
ददृशुस्तां विशालाक्षीं पतन्तीं हव्यवाहनम् ।
सीतां सर्वाणि भूतानि रुक्मवेदीमिवोत्तमाम् ।
ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् । [5]
सीतां कृत्स्नास्त्रयो लोकाः पुण्यामाज्याहुतीमिव ।
प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने ।
पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे ।
ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः ।

[V3 om. l. 1. —(l. 1) Ś2 V1 B D1–3.8.9.12 रक्त- (for तप्त-). G (ed.) -वर- (for -नव-). G1 -हेमांगा (for -हेमाभा). Ñ1 B3 D4.13 -भूषिता (for -भूषणा). —(l. 2) Ñ V1.3 B2–4 D4.13 M2 ज्वलने दीप्ते. Ñ V1.3 B2–4 D4.13 M2 हु(M2 सी)ताहुतिरिवाध्वरे (for the post. half). Ś B1 D1–3.8.9.12 T2.3 M1 विवेश मैथिली दीप्त(M1 ज्वलनं चित्र)मग्नि (B1 °प्तं दीप्ता)मग्निशिखा यथा (B1 °खामिव; M1 °खोपमा). —Ñ2 om. (hapl.) l. 3–8. Ñ1 V3 D4.5.13 T1 G1.3 M3.5 om. (hapl.) l. 3–4. V1 B2–4 om. l. 3. —(l. 3) Ś B1 D1–3.8.12 ते (for तां). G2 M1.2 हव्यवाहने. —The sequence of l. 4–6 (including omissions and repetitions) in B3 is as follows: l. 5 (first time), prior half of l. 4, post. half of l. 4 om., prior half of l. 6 (first time) om., post. half of l. 6 (first time), l. 5 (in m.) and l. 6 (second time). —(l. 4) V1.2 B2 read the prior half of l. 4 after l. 5. D10.11 G2 Ck.t रूपाणि (for भूतानि). —B4 om. from

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 101. 34
B. 6. 116. 34
D. 6. 97. 31

तस्यामग्निं विशन्त्यां तु हाहेति विपुलः स्वनः । | रक्षसां वानराणां च संबभूवाद्भुतोपमः ॥ २७

इति श्रीरामायणे युद्धकाण्डे चतुरधिकशततमः सर्गः ॥ १०४ ॥

---

the post. half of l. 4 up to the prior half of l. 6. V1.2 B2 om. the post. half. D7.10.11 G2 M1 रुक्मवेदिनिभां तदा(D7 °तः) ; M2 विस्मितेनांतरात्मना (for the post. half). —M2 om. (hapl.) l. 5–8. D1.7 om. l. 5. ❀ Cv : सीतां कृत्स्ना इत्यादेः पूर्वार्धे 'ददृशुः तां महाभागां प्रविशन्तीं हुताशनमिति.' ❀ —(l. 5) D13 ते (for तां). Ś B1.3 (second time) D2.3.8.9.12 T2.3 तामपश्यन्विमानस्थाः (Ś D8.12 °न्सुमनसा [Ś2 D12 °सः]) (for the prior half). V3 damaged for the post. half. —D12 om. (hapl. groupwise) l. 6-7. V3 om. l. 6. —(l. 6) V1.2 B2 om. the prior half. V1.2 B2.3(first time).4 D6 पूर्णाम् (for पुण्याम्). Ś B1.3(second time) D1–3.8–11 T2.3 ऋषयो देवगंधर्वा यज्ञे पूर्णाहुतीमिव(Ś2 °तीं यथा) ; Ñ1 D4.13 सीतां सदेवगंधर्वास्त्रियो लोकाः प्रचुक्रुशुः. —(l. 7) V1.3 B3.4 प्रशशंसुः ; B1 चुक्रुशुश्च; B2 शशंसुस्ताः (for प्रचुक्रुशुः). V1 चापि (for सर्वास्). Ñ1 D4 स्त्रियः सर्वास्तु तां दृष्ट्वा; D13 स्त्रियश्च सर्वास्तां दृष्ट्वा (for the prior half). Ñ1 D4.13 प्रविष्टां; B2 दृष्ट्वा तां (by transp.) (for तां दृष्ट्वा). T1 damaged for हव्यवाहने. Ś1 D8 प्रविशंतीं हुताशनं; Ś2 lacuna (for the post. half). —(l. 8) D6 [अ]नले (for [अ]ध्वरे). —After l. 8, Ś B1 D1–3.8.9(before l. 9).12 T2.3 ins. ; B3 cont. in marg. after 3244* :

3243(A)* त्रैलोक्यवासिनः सर्वे ये सिद्धा धर्मचारिणः ।
ते तामभ्येत्य ददृशुः प्रविष्टां हव्यवाहनम् ।

[D9 om. l. 1. —(l. 1) Ś2 D12 स्वैर- ; B3 छन्न- ; D1–3 छंद- (for धर्म-). B1 च प्रधाविनः(m. also °चारिणः) (for धर्मचारिणः). Ś1 D8 सिद्धाः स्वच्छंदचारिणः (for the post. half). —T2.3 repeat l. 2 here, reading it for the first time after l. 5 of 3246*. —(l. 2) B3 सीतामागत्य; D9 ते तां समेत्य; T2 (second time) ते तां मध्येन; T3 (second time) सीतां मध्येन (for ते तामभ्येत्य). D8 हव्यवाहने.]

—Then B3 cont. 3245*. —Ś1 D8 om. l. 9. D9 (preceded by l. 2 of 3243(A)*) T2.3 (repeat it in its proper place preceded by l. 2 of 3243(A)* which is repeated) ins. l. 9 after l. 5 of 3246*. —(l. 9) Ś2 D12 T3 ते (for तां). Ś2 B1 D12 ततो (for त्रयो). Ś2 D12 देवाः सिद्ध- (for लोका देव-). D2 -मानवाः ; D5 -राक्षसाः (for -दानवाः). —For l. 8–9, Ñ1 D4.13 subst. :

3243(B)* पतन्तीं बाष्पशोकार्द्रैर्वदनैर्विस्मितास्तदा ।
लोकपालास्तदा दृष्ट्वा सीतां चन्द्रनिभाननाम् ।

[(l. 1) D4 वेपंतीं (for पतन्तीं). D13 शोकार्द्रबाष्प- (unmetric) (for बाष्पशोकार्द्रैर्). D13 -वदना (for वदनैर्).] —Then Ś B1 D1–3.8.9.12 T2.3 cont. (D9 after l. 8 ; T2.3 after l. 9 [r.]) ; Ñ V1.2 B2–4 D5–7.10.11.13 T1 G M cont. only l. 3 :

3244* मैथिलीं तु विशालाक्षीं प्रविशन्तीं हुताशनम् ।
सांख्येन विधिना यज्ञे मन्त्रयुक्तामिवाहुतिम् ।
शप्तां पतन्तीं निरये त्रिदिवादेवतामिव ।

[Ś1 D8.9 om. l. 1. —(l. 1) T2 सु- (for तु). —(l. 2) D1.3 शैक्षेण; D2 शास्त्रेण; D9 T2.3 श्रुत्येन (for सांख्येन). D2 युक्ते (for यज्ञे). B1 मंत्रमुक्ताम्. —Ś B1 D1–3.8.9.12 T2.3 om. l. 3. D6 reads l. 3 in marg. —(l. 3) Ñ1 V1 B3.4 D4 धरणीं; B2 तां चैव; M2 त्रिदिवात्; Cm.k.t as above (for निरये). M2 सहसा (for त्रिदिवाद्). D13 शप्तांतरपतंतीं तु महीं दिवा देवतामिव (sic).]

—Then Ñ2 V1.2 B4 further cont. 3245*. —After 3243*, V3 cont. 3245* .

27 V2 om. 27. —[a]) V3 damaged up to विशन्त्यां. D13 याम्यम् (sic) (for तस्याम्). Ñ1 D4.12.13 अग्नौ; D1.2 अग्नि- (for अग्निं). B2 D13 च (for तु). Ś B1 D1–3.8.9.12 T2.3 प्रविष्टायां; D4 प्रविशंत्यां (for विशन्त्यां तु). —[b]) Ñ1 D4 वैदेह्यां; D13 सीताया (for हाहेति). Ś D3.8.12 च (Ś1 om. [subm.]) महा- ; D1.2 सुमहान् ; D4.7.13 T G M1.3.5 विपुल- ; D9 [अ]भून्महा- (for विपुलः). B1 पुनः (for स्वनः). —[c]) Ñ1 D3 तु (for च). B4 वानरेंद्राणां (for वानराणां च). —[d]) B3 marg.; D13 [आ]त्मनोपमं (sic) (for [अ]द्भुतोपमः). —After 27, Ś Ñ1 B1.2 D1–4.8.9.12.13 T2.3 ins. ; while Ñ2 V1.2 B4 further cont. after 3244* ; V3 cont. after 3243* ; B3 cont. after 3243(A)* :

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

१०५

ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ॥ १

G. 6. 102. 2
B. 6. 117. 2
L. 6. 98. 12

3245* निशम्य सीतां तु तदा विशङ्कां
हुताशनं दीप्तमनुप्रविष्टाम् ।
सराक्षसा वानरपुंगवास्ते
सुदुःखिता ध्यानपरा बभूवुः ।

(l. 1) V3 damaged for निशम्य सी. V1 निरीक्ष्य (for निशम्य). T3 तथा (for तदा). Ñ V2.3 B2–4 D4 रुदतीं (for तु तदा). Ñ2 अशंकां; V2 B4 विसंज्ञां; D1 T2.3 विशंकितां; D9 विशंतीं; D13 हुताशनं (for विशङ्कां).—(l. 2) D13 युगांत-दीप्ताग्निमिव प्रविष्टां.—(l. 3) D9 T2.3 ततो जना (for सराक्षसा). D1 -यूथपास् (for -पुंगवास्). D9 T2.3 च (for ते).—(l. 4) D13 च तस्थुः (for बभूवुः).]

—After 27, Ñ2 V1.3 B3.4 ins. 3243*; M2 ins. 3247* (followed by 3248* and 3243*).

Colophon: V3 damaged. D12 begins colophon with ॐ.—*Kāṇḍa name*: Ñ V1 B1.3.4 D2.4.13 लंकाकांडे.—*Sarga name*: Ś Ñ1 V2 B D2–4.8.12 सीताग्निप्रवेशः; Ñ2 अग्निप्रवेशः; V1 D1 आभ्युदयिके सीताग्निप्रवेशः; D13 सीतावह्निप्रवेशः; M2 सीताप्रवेशः.—*Sarga no.* (figures, words or both): Ś1 Ñ1 V2 B2.4 D2.4.8.12.13 om.; Ś2 D1 99; Ñ2 105; V1 101; B1 77; B3 97; D3.9 102; D5 M1 120; D6.7 T1 G M3.5 119; D10.11 118; T2 127; T3 130; M1.2 121.—After colophon, Ś B1 D1–3.8.9.12 T2.3 ins.:

3246* स तदा हव्यकव्येशः सीतया संस्तुतस्तदा ।
बभूवाकृतिसम्पन्नो हूयमान इवाध्वरे ।
बभूव चास्य तद्रूपं स्तूयमानस्य सीतया ।
गङ्गाह्रदस्य सलिलं वातोद्धूतस्य शीतलम् ।
ये च तस्य समीपस्था वानरा दीप्यतस्तदा । [5]
ते चास्य शीतभावं तं दृष्ट्वा विस्मयमागताः ।
शुद्धां च मेनिरे सीतां संप्रविष्टां हुताशनम् ।
अरुन्धतीं वसिष्ठस्य पार्वतीमिव शूलिनः ।
अभवत्सर्वसैन्यानां दिदृक्षूणां समागमः ।
सा रामं मनसा कृत्वा हुताशनमुपागता । [10]
सा विगाह्य ततो देवी दिव्यभूषणभूषिता ।
हुताशनं संप्रविष्टा सर्वेषामेव पश्यताम् ।

[(l. 1) D2.3 तथा (for तदा). Ś D8.12 -कव्याशी (for -कव्येशः). Ś D8.12 संस्कृतस् (for संस्तुतस्). B1 D1.2 transp. सीतया and संस्तुतस्. D1 तथा (for तदा). D3 संस्तुतः सह सीतया (for the post. half).—(l. 3) B1 D3 [अ]स्य च (by transp.) (for चास्य). D2 स्तूयमानः स (for °मानस्य).—(l. 4) After गङ्गा, D9 wrongly repeats from ह्व्य in l. 1 up to गङ्गा in l. 4. Ś D1.3.8.12 शिशिरे; D2 [इ]व यथा (for सलिलं). B1 वाताहतस्य; D9 वातोद्धूतं स- (for वातोद्धूतस्य).—(l. 5) D9 T2.3 दीप्ततेजसः.—After l. 5, D9 (preceded by l. 2 of 3243(A)*) T2.3 (repeat it in its proper place preceded by l. 2 of 3243(A)* which is repeated) ins. l. 9 of 3243*.—(l. 6) D1–3 ते चा(D2 तथा)स्य तच्छीतलत्वं; D9 T2.3 अग्नौ सीतां सुखासीनां (for the prior half). B1 D1.3.12 स्पृष्ट्वा (for दृष्ट्वा). B1 आययुः.—T2.3 om. l. 7–10.—(l. 7) B1 तां (for च). D9 प्रविशंतीं (for संप्रविष्टां).—(l. 8) B1 पार्वतीव च (for पार्वतीमिव).—(l. 10) D1 नमः सा (for सा रामं). D9 प्रणम्य शिरसा देवी (for the prior half).—D12 om. l. 11.—(l. 11) B1 D1–3.8.9 संविगाह्य. B1 च सा (for ततो). B1 -[आ]भरण- (for -भूषण-). T2.3 विभूषण-विभूषिता (for the post. half).—(l. 12) Ś D8.12 प्रविष्टा सा (for संप्रविष्टा).]

—Thereafter, Ś B1 D1–3.8.9.12 T2.3 cont. 3243*. Ñ1 D4.13 ins. 3243* after the colophon. G M1.2 conclude with श्रीरामाय नमः.

105

Before 1, V B2 (followed by 3243*)–4 D5–7.10.11 T G M1.3.5 ins.; while M3 ins. after 6.104.27:

3247* ततो हि दुर्मना रामः श्रुत्वैव वदतां गिरः ।
दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ।

[(l. 1) V3 damaged for the prior half. V2 B2–4 M2 ततस्तु; T1 damaged; Ck.t as above (for ततो हि). V2 om. दुर्मना. V B2–4 D5.7.10.11 G2 M2 [ए]वं; M5 तु (for [ए]व). G1 M5 गदतां (for वदतां). D10.11 T2.3 वरः; G1 M5 गिरं (for गिरः).—(l. 2) V B3.4 तस्थौ; B2 ध्यात्वा (for दध्यौ).]

—Thereafter M2 cont.:

3248* लक्ष्मणेन सह भ्रात्रा सह सर्वैः प्लवंगमैः ।
ददर्श सीतां वैदेहीं प्रविशन्तीं हुताशनम् ।

—Thereafter M2 further cont. 3243*.

1 Ñ1 reads 1^{ab} twice. B2 transp. ^{b} and ^{d}.—^{b}) V3 damaged after क up to -नयनः in 2^{a}. Ñ (Ñ1 both times) V1.2 B2.4 D4.6.13 -कर्षणः (for -कर्शनः). Ś B1 D1–3.8–12 यम(Ś D8.12 धर्म)श्च पितृभिः सह; B3 मयश्चामित्रकर्षणः; M2 धर्मराजो यमस्तथा.—^{c}) Ś B1 D1–3.8–12 T2.3 च देवेशो (for महेन्द्रश्च).—^{d}) Ś B1 D1–3.8.10–12 जलेश्वरः(D11 °शयः); Ñ V1.2 B2–4 D13

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 102. 3
B. 6. 117. 3
L. 6. 98. 13

षडर्धनयनः श्रीमान्महादेवो वृषध्वजः ।
कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ २
एते सर्वे समागम्य विमानैः सूर्यसंनिभैः ।
आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ३
ततः सहस्ताभरणान्प्रगृह्य विपुलान्भुजान् ।
अब्रुवंस्त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥ ४

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः ।
उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ।
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥ ५
ऋतधामा वसुः पूर्वं वसूनां च प्रजापतिः ।
त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ॥ ६

[अं]भसां पतिः (for परंतपः). D4 वरुणश्च भवांभसि (corrupt); D9 T2.3 पवनश्च जलेश्वरः(D9 °शयः).

2 V3 damaged up to -नयनः in 2a (cf. v.l. 1). —a) Ñ V1.2 B2–4 D4.13 स च त्रि- (for षडर्ध-). Ś B1 D1–3.8.12 त्रिशूलपाणिर्विश्वेशो; D9 T2.3 शूलपाणिश्च देवे(D9 विश्वे)शो. —D4 reads 2c,d twice. —c) D4(second time) एते; L(ed.) कर्ता च (hypm.) (for कर्ता). B1 मनुष्य-; B2 च सर्व- (for सर्वस्य). D2 जगतो (for लोकस्य). D9.13 हर्ता च(D13 स कर्ता) सर्वलोकस्य. —d) Ñ V B2–4 D4(both times).13 च ज्ञानिनां (for ब्रह्मविदां). Ś B1 D1.3.8.9.12 ब्रह्मा(D9 कर्ता) च भगवान्प्रभुः; D2 ब्रह्मा चैव महाद्युतिः; M2 वसवो मरुतो ग्रहाः. —After 2, Ś Ñ V1.2 B D1–3.8.9.12 T2.3 ins.:

3249* स च राजा दृशरथो विमानेनान्तरिक्षगः ।
अभ्याजगाम तं देशं देवराजसमद्युतिः ।

[(l. 1) Ś2 Ñ V1.2 B [अं]तरीक्षगः; T2 [आ]गतस्तदा (for [अ]न्तरिक्षगः). —V1 om. l. 2. —(l. 2) Ś Ñ2 D8.9.12 T2.3 आजगामाथ (for अभ्याजगाम). B1 -समन्वितः; B4 -समद्युतिं.];

while M2 ins.:

3250* पितरश्च तथा सर्वे आदित्याः सर्व एव च ।
अश्विनौ कार्तिकेयश्च ऋषयः काश्यपादयः ।
गन्धर्वाप्सरसश्चैव गरुडोरगराक्षसाः ।
पुण्यजाश्चैव *** तथान्ये सिद्धचारणाः ।

[(l. 1) Note hiatus between the two halves.]

3 V3 om. 3–4b. T1 mostly damaged for 3a. —a) Ś D8.12 ते सर्वे च (for एते सर्वे). D13 समागत्य. —b) D4 सूर्यवर्चसैः. —c) Ñ1 V1 B2 D4.13 Ct आगत्य; G2 आक्रम्य; Ck as in text (for आगम्य). —d) Ñ1 D4 अभिगत्वा; Ñ2 V1.2 B2–4 D13 M2 °गम्य; Ck.t as in text (for °जग्मुश्). —For 3c,d, Ś B1 D1–3.8.9.12 subst.:

3251* अभ्यभाषन्त काकुत्स्थं मधुरं वामगोत्रतः ।

[B1 पितृमातृतः; D1.3 मातृगोत्रतः; D9 प्रियमेव हि (for नामगोत्रतः).]

4 V3 om. 4a,b (cf. v.l. 3). B4 om. 4. Ñ2 illeg. for 4a. —a) B2 प्रशस्त-; D6 सहस्र- (for सहस्त-). V2 M2 -[आ]भरणं. —b) Ñ2 परिघोपमान्; V2 M2 विपुलं भुजं; B3 विमलान्भुजान्. —For 4a,b, Ś Ñ1 B1 D1–4.8.9.12.13 subst.:

3252* सहस्ताभरणं बाहुं प्रगृह्य परिघोपमम् ।

[D1–3.8.13 सहस्र-; D4 समस्त- (for सहस्त-). D9 युक्तं संभूषणैर्बाहुं (for the prior half). Ś2 damaged for परि.] —c) Ś Ñ1 V1.2 B1 D1–4.8.9.12.13 M2 अब्रवीत्त्रिदशश्रेष्ठो. —D9 om. (hapl.?) 4d–5e. V3 damaged for 4d–5b. —d) Ś Ñ V1.2 B2.3 D2.3.6.10–12 T3 G2 M2 transp. प्राञ्जलिं and राघवं. B1 D1.4.7.8.13 T2 राघवं(B1 रामं तं) प्रांजलिस्थितं.

5 D9 om. 5a–e; V3 damaged for 5a,b (for both, cf. v.l. 4). —a) Ś B1 D8.12 भर्ता (for कर्ता). Ñ1 B1 T3 transp. सर्वस्य(Ñ1 in marg.) and लोकस्य. D1–3.13 भर्ता त्वं(D3 भर्तारं; D13 स कर्ता) सर्वलोकस्य. —b) D6 M2 ज्येष्ठो. B1.2 ज्ञानभृतां; D1 धर्मविदां; D3.10.11 G1.2 °विदां (for ज्ञानवतां). B2 D7.10.11 G1.2 M2 विभुः; D6 T2.3 प्रभुः; M3 पतिः (for वरः). Ñ1 D4.13 ब्रह्मा च ज्ञानिनां वरः(D4 °र). —c) M2 देव (for सीतां). —d) Ś V2.3 B D1–3.8.12 हव्यवाहनं. M2 सुप्रीतां जनकात्मजां. —V3 om. 5e,f. —e) Ñ1 B3.4 D1.2.13 -गणश्रेष्ठ; T1 -गण ** (damaged); G(ed.) -वरश्रेष्ठ (for -गणश्रेष्ठम्). D12 अब्रवीत्त्रिदशश्रेष्ठम्. —f) D3 नावबुध्यते; D4 अवबुध्यसे (for नावबुध्यसे). Ñ1 D13 G1.2 M5 नात्मानमवबुध्यसे.

6 T2.3 om. 6a,b. Ś Ñ V B D1–4.8.9.12.13 M2 read 6–8b after 17. —a) Ñ1 B2 D4.13 शतधामा; B3 शतनामा; D1 कृतधामा; D9 भूतधामा. Ñ V1 B2.3 M3 पूर्वो (for पूर्वं). B4 ऋभुश्च त्वं वसुः पूर्वो; D12 **** तदपूर्वं. ❀ Ct: ऋतधामेत्यादिश्लोकत्रयं कतकासंमतम् । तीर्थस्त्वेवं व्याचष्टे-पूर्वं पूर्वस्मिन् कल्पे सृष्टेः पूर्वं वा वसूनां मध्ये ऋतधामा नाम वसुः । आदिकर्ताण्डाधिपतिरूपादिसृष्टिकर्ता । स्वयंप्रभुरितरानियम्यः. ❀ —b) V3 damaged for च प्रजा. Ñ1 B2–4 D4–7.13 T1 G M1.3.5 त्वं (for च). M2 प्रजानां त्वं (for वसूनां च). —V3 o...o°–7. G2 om. 6c,d. —c) B2–4 च(for हि). Ś Ñ V1.2 B1 D1–4.8–13 त्रयाणामपि; M3 त्रयाणां त्वं हि (by transp.) (for त्वं त्रयाणां हि). —d) D9 कर्ता हर्ता (for आदिकर्ता). B1.3.4 D4.7.13 M2 स्वयंभवः; T1

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः ।
अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ॥ ७
अन्ते चादौ च लोकानां दृश्यसे त्वं परंतप ।
उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ ८
इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ।
अब्रवीत्त्रिदशश्रेष्ठान्रामो धर्मभृतां वरः ॥ ९
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ।
योऽहं यस्य यतश्चाहं भगवांस्तद्ब्रवीतु मे ॥ १०
इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः ।
अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ॥ ११
भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः ।
एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १२

G. 6. 102. 13
B. 6. 117. 13
L. 6. 98. 24

स्वयं ** (damaged) (for °प्रभुः). V1 आराध्यश्चाभयप्रदः. —After 6, M2 ins. l. 2 of 3256*.

7 V3 om. 7 (cf. v.l. 6). Ś Ñ V1.2 B D1–4.8.9.12.13 M2 read 6-8ᵇ after 17. —ᵃ) Ñ1 सप्तमो (for अष्टमो). V1 B2–4 वसूनामष्टमः साध्यः. —ᵇ) T1 असि; M5 अथ (for अपि). —ᶜ) D5 वा (for च). Ś D2.3.9–12 कर्णौ ते (by transp.); D4.8 कर्णांते (for ते कर्णौ). —ᵈ) D4 om. चंद्रसूर्यौ च. Ñ V1.2 B2–4 D13 M2 चंद्रादित्यौ; D1 सूर्याचंद्रौ (for चन्द्रसूर्यौ). D9–11 सूर्याचंद्रमसौ दृशौ.

8 Ś Ñ V B D1–4.8.9.12.13 M2 read 6-8ᵇ after 17. V3 mostly damaged for 8ᵃ. —ᵃ) Ñ1 B2 D4 आदौ चांते (by transp.); D13 आदावंते (for अन्ते चादौ). Ś B1 D1–3.5.8–12 मध्ये च; D7 G2 भूतानां (for लोकानां). —ᵇ) Ñ2 V1.3 D9–11 M2 च (for त्वं). Ś D1.8 M1.3 परंतपः; Ñ1 B2 D4.13 पराक्रमैः (for परंतप). —V3 om. 8ᶜ–9ᵇ. —ᶜ) Ñ V1.2 B2–4 D4.13 शंकसे चैव (for उपेक्षसे च). —ᵈ) Ñ V1 B2–4 D4.13 अदृ(Ñ1 D4.13 °दु)ष्टां; D9 प्राकृतः (for मानुषः). Ś B1 D1–3.8.12 प्राकृतः प्राकृता(Ś1 B1 D8 °ती)मिव; V2 अदृष्टां प्राकृतीं यथा; M2 प्रविशंतीं हुताशनं.

9 V3 om. 9ᵃᵇ (cf. v.l. 8). —ᵃ) Ś B1 D1–3.8.9.12 देवराजेन; B2 लोकपालैस्तु; D13 देवलोकैस्तैः (for लोकपालैस्तैः). M2 सर्वलोकनमस्यस्त्वं. —ᵇ) M2 राघव. —After 9ᵃᵇ, M2 ins.:

3253* एवमुक्तः स धर्मात्मा राघवो रघुनन्दनः ।

—ᶜ) Ś Ñ1 V B1.3.4 D1–3.8.9.13 M2 -श्रेष्ठं; D4.12 -श्रेष्ठो (for -श्रेष्ठान्). —ᵈ) D4 वर. Ñ2 V2 B2–4 राघवः प्रांजलिः स्थितः; V1 प्रांजलिः पुरतः स्थितः; V3 आत्मानं नाव*** (damaged).

10 ᵃ) V3 damaged from न्ये up to 11ᵃ. —ᶜ) V2 D4.10.11 M1 सो (for यो). Ś V2 D8.12 जातो यथा(V2 °तश्); Ñ1 D5.10.11.13 M1 यश्च यतश्; Ñ2 V1 B2.3 देव य(Ñ2 °वा य)तश्; B1 यतो यतश्; B4 देव ततश्; D1.4 यत्र यथा(D4 °तश्); D2 यश्च यथा; D3 यथा यतश् (for यस्य यतश्). D8 वा (for च). Ñ D4.13 [ए]व (for [अ]हं). D9 कोहं यतो यथा चाहं. —ᵈ) D6 T2.3 प्रब्रवीतु; D7 तद्ब्रवीहि; D8 G3 तद्ब्रवीमि; M5 तान्ब्रवीतु (for तद्ब्रवीतु). D8 G3 ते (for मे). Ñ V1.2 B2–4 D4.13 तद्भवान्वक्तुमर्हति; B1 M2 तद्भवान्प्रब्रवीतु मे. —After 10, Ś V1 B1 D1–3.8.9.12 M2 ins.:

3254* तमुवाच सहस्राक्षः श्रेष्ठोऽस्माकं पितामहः ।
स्वयंभूर्भगवान्ब्रह्मा वक्ष्यत्येष यथा भवान् ।

[(l. 1) V1 B1 सोस्माकं तु(B1 च) (for श्रेष्ठोऽस्माकं). —(l. 2) Ś2 B1 D2.12 यतो (for यथा).]

—Thereafter M2 cont. 3255*.

11 V3 damaged for 11ᵃ (cf. v.l. 10). —ᵃ) M1 एवं (for इति). D6 T1 G1.2 M3 ब्रुवंतं. V1 इति ब्रुवति देवेशे. —ᵇ) Ñ1 च ज्ञानिनां; B2 वेदविदां (for ब्रह्मविदां). D4 वर. B3 D6 T2.3 ब्रह्मा लोकपितामहः; M1 Ck ब्रह्मा ब्रह्मविदुत्तमः. —ᶜ) Ñ V B2–4 D4.13 काकुत्स्थ; D10.11 M1 Ck.t मे वाक्यं (for मे राम). —ᵈ) B4 सत्यवतां वर. —For 11, Ś B1 D1–3.8.9.12 subst.; while M2 cont. after 3254*:

3255* तमुवाच ततो देवः स्वयंभूरमितद्युतिः ।
प्रगृह्य रुचिरं बाहुं स्मारयन्पूर्वदैहिकम् ।

[(l. 1) M2 [अ]व्ययो (for ततो). —(l. 2) B1 वचनं; D1.12 रुधिरं; M2 विपुलं (for रुचिरं). B1 स्वार्गं(sic) (for बाहुं).]

12 ᵃᵇ) M2 श्रीमाञ् (for देवः). Ś Ñ V B1–3 D1–3.8.12.13 श्रीमान्देवश् (by transp.); B4 D9 साक्षादेवश्; D4 चैव श्रीमांश् (for देवः श्रीमांश्). D6 T2.3 M5 चक्रधरो (for चक्रायुधो). Ś Ñ V B D1–4.7–13 T3 G2 प्रभुः (for विभुः). M1.2 श्रीमांश्च(M2 शार्ङ्गच)क्रगदाधरः(for ᵇ). —After 12ᵃᵇ, Ś Ñ V1.2 B D1–4.8.9.12.13 read 14. —V3 damaged from 12ᶜ up to अक्षरं in 13ᵃ. —ᶜ) T2 -शृंग- (for -शृङ्गो). Ñ1 D4.13 च (for त्वं). —ᵈ) B3 भूतो भव्य-; B4 D13 M5 भूतभव्यः. V1 D1–3 -भवात्मकः; B1 -भवांतकः (for -सपत्नजित्). Ś D8.12 यज्ञनाभो रणाकृतिः; D9 T2.3 पद्मनाभोमरारिहत्. ❀ Cm: भूतभव्यः सपत्नजित् इति पाठः. ❀

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 102. 14
B. 6. 117. 14
L. 6. 98. 25

अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव ।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ॥ १३

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ।
अजितः खड्गधृग्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १४

सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः ।
प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १५

इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत् ।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १६

सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परंतप ॥ १७

प्रभवं निधनं वा ते न विदुः को भवानिति ।
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च ।
दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ १८

---

13 V₃ damaged up to अक्षरं in ᵃ (cf. v.l. 12). D₉ om. 13. Ñ₂ om. 13ᵃᵇ. —ᵃ) Ś D₈.₁₂ संपन्नं; V₂.₃ B₁.₂.₄ D₁–₃ सत्यं ते; D₆ T₂.₃ G₁.₂ M₂ सत्यं त्वं; Cm.g.k.t as in text (for सत्यं च). —ᵇ) D₆ T₂.₃ त्वं (D₆ m.) मध्येंते (for मध्ये चान्ते). V₃ जगन्नाथोसि राघव. —ᶜ) Ś₁ D₈ तु परो; V₁.₃ D₄ त्वं परं; B₃ D₁₃ परमो; D₁₂ त्वपरो (for त्वं परो). Ñ₁ D₄.₁₃ लोको (for धर्मो).

14 V₃ om. 14. Ś Ñ V₁.₂ B D₁–₄.₈.₉.₁₂.₁₃ read 14 after 12ᵃᵇ. —ᵃ) D₁ सज्जधन्वा. —ᵇ) Ś₂ B₁ D₁–₃.₈.₉.₁₂ पुराणः (D₉ °ण-); B₂ T₁ केशवः; Cm.g.t as in text (for पुरुषः). —ᶜ) G₁ अजरः. Ś Ñ₁ D₁–₃.₆.₈.₉.₁₂ T₂.₃ खड्गभृद्; B₁ M₂ शंखभृद्; B₂ खड्गभुग्; D₁₃ स्वर्गधृग् (for खड्गधृग्). Ñ₂ V₁ B₂ D₁.₉ M₂ जिष्णुः (for विष्णुः). —ᵈ) M₂ विष्णुः कृष्णो (for कृष्णश्चैव). Ś B₁ D₁–₃.₈.₉–₁₂ सनातनः (for बृहद्बलः). Ñ V₁.₂ B₂–₄ D₄.₁₃ जि(Ñ₂ V₁ B₂ वि)ष्णुः कृष्णो(V₂ °ष्णुर्विष्णुर्) महाबलः.

15 D₉ om. 15–16ᵇ. D₁₂ om. 15ᵃᵇ. —ᵃ) Ś₂ Ñ₂ B₁ D₁–₃.₈.₁₃ अग्रणीश् (for ग्रामणीश्). D₁ स त्वं; D₇ सत्यस्; D₁₀.₁₁ Ct सर्वं (for च त्वं). —V₃ damaged for 15ᵇ–ᵈ. —ᵇ) Ñ V₁.₂ B₂.₃ D₄ बुद्धिश्चिंता; D₆ बुद्धिस्त्वं च; D₇.₁₀.₁₁ T₂.₃ G₁ M₁.₂.₅ त्वं बुद्धिस्त्वं; Cg as in text (for बुद्धिः सत्त्वं). Ś B₁ D₁–₃.₈ वैकुंठश्च (B₁ D₁–₃ °स्त्वं) महाभुजः; B₄ बुद्धिश्चिंता क्षमादयः; D₁₃ बुद्धिश्च त्वं क्षमा दया; G₂ बुद्धिस्त्वं च शमो दमः. —ᶜ) Ñ₁ प्रभावश्. B₁ D₁.₃.₄.₆ T₂.₃ G₂.₃ M₃ [अ]व्ययश्. V₂ [ए]व (for त्वम्). D₈ प्रभावश्चापि पंच त्वम् (sic); D₁₃ प्रभावश्चाव्ययश्चैव; M₅ प्रजापतिश्चाव्ययस्त्वम्. —ᵈ) B₃ त्वमिंद्रो; D₁₃ त्वमुपेंद्रो (hypm.) (for उपेन्द्रो). V₂ त्वं मित्रो देवसत्तमः.

16 D₉ om. 16ᵃᵇ (cf. v.l. 15). —ᵃ) Ñ₂ D₄.₁₃ कृतकर्मा; M₂ विश्वकर्मा. Ñ D₁₃ च (for त्वं). Ś B₁ D₁–₃.₈.₁₂ विष्णु(B₁ वृष्णि; D₁ पृष्टि; D₃ पृश्नि)गर्भो धृतार्चि-(D₈.₁₂ °र्ति)स्त्वं. —ᵇ) Ś₁ D₄ नरांतकृत्; V₃ युगांतकृत्; B₁ रणांतकः; D₂ भवांतकृत्; D₈ वरांतरः; D₁₃ त्वनंतकृत्. —V₃ om. 16ᶜ – 17ᵇ. —ᶜᵈ) Ñ₁ B₄ M₅ शरण्यः. D₄ वा त्वाम्; D₁₂ कृत्वा (for च त्वाम्). Ś B₁ D₁–₃.₈.₉.₁₂ सेंद्राः; G₁ दिव्यं (for दिव्या). Ś₂ D₁₂ सुरर्षयः. Ñ V₂ D₄ आहुर्देवाः सवासवाः; V₁ B₂–₄ आहुर्देवर्षयो बुधाः (for ᵈ). D₁₃ शरण्यः शरणश्च त्वं सहायो वासवो वसुः.

17 V₃ om. 17ᵃᵇ (cf. v.l. 16). —ᵃ) Ś Ñ V₁.₂ B₁–₃ D₁–₄.₈.₉.₁₂ M₂ ऋक्साम(B₃ *sup. lin.* also °ग्यजुः)शृंगो(D₉ M₂ °जिह्वो); B₄ ऋक्सामयजुर्- (for सहस्रशृङ्गो). D₁₃ ऋक्सामानि यजूंषि त्वं. —ᵇ) D₃.₉ M₂ शतशृंगो; D₅ जितजिह्वो; D₁₀.₁₁ M₁ शतशीर्षो (for शत-जिह्वो). Ś₂ Ñ₁ महर्षिपः; V₁.₂ D₈.₁₂ T₁ (*inf. lin.* also) G₁ महर्षयः; D₁.₄ महर्षभः; D₇ सहस्रदृक्; G₃ महर्षिभिः; M₅ महोरगः (for महर्षभः). Ś₁ शतशीर्षो महर्षिपः; B₁ शत-जिह्वोमहर्षणः; G₂ शतशीर्षः सहस्रधृक्. ❀ Cm: शतशीर्ष इति वा पाठः. ❀ —After 17ᵃᵇ, D₅–₇.₁₀.₁₁ T G M₁.₃.₅ ins.; while M₂ ins. l. 2 only after 6:

3256* त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ।
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ।

[T₁ reads l. 1 *inf. lin.* —(l. 1) G₂ स्वयंभुवां; M₅ स्वयंभवः. —(l. 2) M₂.₅ अथ (for अपि). D₇ G₂ transp. सिद्धानाम् and साध्यानाम्. D₆ M₃ [अ]पि (for [अ]सि).] —ᵈ) D₄ त्वं स्वाहास्त्वं (for त्वमोंकारः). Ś Ñ V B D₁.₂.₄.₈.₉.₁₂.₁₃ T₁ G₃ M₁.₅ Cg परंतपः; D₇.₁₀.₁₁ परात्परः; G₂ परः पुमान्. —After 17, Ś Ñ V B D₁–₄.₈.₉.₁₂.₁₃ M₂ read 6–8ᵇ.

18 M₁ om. 18. G₂ om. 18ᵃᵇ. —ᵃ) Ś₂ प्रधनं; D₄ प्रभावं; M₂ प्रकृतिं; Cg as in text (for प्रभवं). K (ed.) विधनं (for निधनं). Ś Ñ₂ V B₁.₃.₄ D₂.₃.₈–₁₂ चापि; B₂ वापि; D₁ च त्वं; D₁₃ चांते (for वा ते). —ᵇ) V₂.₃ D₉–₁₂ नो (for न). Ñ₁ B₄ D₄.₁₃ M₂ विद्मः; Cm.g as in text (for विदुः). —ᶜ) D₅.₁₃ दृश्यते. D₉ -वेदेषु; D₁₃ -लोकेषु. —ᵈ) Ś Ñ V B D₁–₄.₈–₁₂ गोषु च(B₂ वर्णेषु) ब्राह्मणेषु च D₁₃ गोषु ब्राह्मणमेव च. —Ñ₁ D₄.₉ om. (hapl.) 18ᵉᶠ. —ᵉᶠ) D₁ चरणे (for गगने). D₁₀.₁₁ नदीषु; D₁₃ गुहासु (for वनेषु). B₁ सागरे पर्वतेषु च (for ᶠ). Ñ₂ V B₂–₄ गगने दिक्षु सर्वासु सागरेषु नगे(B₂ वने)षु च.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक् ।
त्वं धारयसि भूतानि वसुधां च सपर्वताम् ॥ १९
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः ।
त्रीँल्लोकान्धारयत्राम देवगन्धर्वदानवान् ॥ २०
अहं ते हृदयं राम जिह्वा देवी सरस्वती ।
देवा गात्रेषु लोमानि निर्मिता ब्रह्मणा प्रभो ॥ २१
निमेषस्तेऽभवद्रात्रिरुन्मेषस्तेऽभवद्दिवा ।
संस्कारास्तेऽभवन्वेदा न तदस्ति त्वया विना ॥ २२
जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ।
अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षण ॥ २३
त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः ।
महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ॥ २४

G. 6. 102. 27
B. 6. 117. 27
L. 6. 98. 38

19 [a]) D1.9 -नयनः (for -चरणः). —[b]) D8 आत्तशीर्षः (for शतशीर्षः). D1.2.9 सहस्रपात्; D4.5.12 T3 G3 सहस्रधृक् (for °दृक्). —[c]) D7 लोकानां (for भूतानि). —[d]) Ś1 सर्वपर्वतां; D2 चैव पर्वतान्. D9–11 M1 पृथिवीं सर्वपर्वतान्. —After 19, M2 ins.:

3257* त्वं स्रष्टा सर्वभूतानां त्वयि सर्वं प्रतिष्ठितम् ।

20 [a]) Ś V2 D8.12 अंतः पृथिव्यां; Ñ1 V3 B2.4 D2.3 M2 अंतः पृथिव्याः; B3 D9 अंते पृथिव्यां; D13 अधस्त्ववाव्यां (sic); Cr.g.k.t as in text (for अन्ते पृथिव्याः) —[b]) D5 महोरगे. —[c]) S2 D8.12 चारयत्राम; V3 B3 धारयस्येतान् (V3 °से *). B4 लोकांस्त्रीन्धारयामास. —D9 om. (hapl.) 20[d] – 21[a]. —[d]) G3 -दानवाः; M2 -मानुषान् (for -दानवान्). Ñ V B2–4 D4 देव(D4**)मानुषपन्नगान्.

21 D9 om. 21[a] (cf. v.l. 20). —[a]) D7 G2 सौम्य; Ck.t as in text (for राम). —[c]) D5–7 T G M1.3.5 रोमाणि (for लोमानि). Ś Ñ V B D1–4.8–13 M2 देवा रोमाणि गात्रेषु. —[d]) T2.3 बोधिता; Ck as in text (for निर्मिता). D7.10.11 G2 Cr.t ब्रह्मणा निर्मिताः (by transp.). Ś B1 D1–3.8.9.12 निर्मितास्ते स्व(B1 च)मायया; Ñ V B2–4 D4 M2 निर्मितानि(Ñ2 M2 °स्ते) स्वयंभुवा(M2 °प्रभो); D13 त्वया ते निर्मिताः प्रभो.

22 [a]) B1 D2 निमिषस्. Ś D1–3.8.12 स्मृतो; Ñ V B2.4 G3 M3 भवेद्; B1 D9–11 स्मृता; D5 भवान् (sic) (for ऽभवद्). B3 निमेषं तु भवेद्रात्रिर्; D13 अनिमेषास्तेभवद्रात्रिर् (corrupt). —[b]) D5 G3 M3 भवेद् (for ऽभवद्). Ś1 दिवसः स्मृतः; Ś2 Ñ B1 D1–4.8–13 M2 दिवसस्तथा; V B2–4 दिनमेव च (for तेऽभवद्दिवा). D8 हत्येषो दिवसस्मृतः (sic). —After 22[a b], M2 ins.:

3258* उदरं तेऽर्णवा राम सेन्द्राश्च सदिवौकसः ।

—D9 om. 22[c] – 23[b]. V2 lacuna for 22[c]. —[c]) Ñ2 V3 B2 D10.11.13 तु; Cr as in text (for ते). Ñ1 T2 M2 देवा (meta.); Cr.m.g.k as in text (for वेदा). Ś D1.2.8.12 संस्कारस्तेभवद्दहो; B1 संस्कारस् त्वभवन्देवा; B3 संस्कारस्ते भवेद्राम. —[d]) D7.10.11 G2 [ए]तद्; Cm.g.t as in text (for तद्). T2 अस्मिन्; Cm.g.t as in text (for अस्ति). Ś2 D1–3.12 transp. त्वया and विना. Ñ V B D4 मनः सेंद्रा दिवौकसः; M2 नास्ति किंचित्त्वया विना.

23 D9 om. 23[a b] (cf. v.l. 22). V3 om. 23[a b]. —[a]) Ś D8 शरीरे (for शरीरं). —[b]) D13 धैर्यं (for स्थैर्यं). G1 च (for ते). —[c]) D13 प्रभावस् (for प्रसादस्). M5 च (for ते). —[d]) D9 हिमः (for सोमः). B2 श्रीश्च स- (for श्रीवत्स-). Ś1 Ñ2 V1.3 B2.3 D2.3.9–11 T2.3 G2.3 M3 -लक्षणः; Ś2 B1.4 D1.5.7.8.12.13 -लक्ष्मणः; Ñ1 V2 -लक्षणं; D4 M5 -लांछनः(M5 °न).

24 V3 om. 24. —[a b]) G3 यथा; Cm.g.k.t as in text (for त्वया). D8 G1 M5 त्रयो लोकास्त्वया क्रांताः (for [a]). Ś V1.2 B1.3 D2.3.6.8.9.12 G1 M5 पुराणैर्; Ñ2 B2.4 M1.2 पुरा वै; D10.11 पुरा स्वैर्; T2.3 पुरा ते; Cr.m.g as in text (for पुराणे). Ñ1 D4.13 त्वया लोकत्रयं क्रांतं पुरा विक्रमणैस्त्रिभिः. —[c]) D2 महेंद्रस्तु कृतो वीरं. —[d]) D8 दृष्ट्वा (for बद्ध्वा). Ñ1 D13 महाबलं; B4 [अ]सुरोत्तमं; D4 महाधनं; D9–11 सुदारुणं (for महासुरम्). B3 (after corr. *sup. lin.*) बलिर्बद्धो महासुरः (before corr. °बल). —After 24, Ś D8.12 ins.:

3259* लोकान्संहृत्य काले त्वं निवेश्यात्मनि निश्चलम् ।
कुर्वन्नेकार्णवं घोरं दृश्यादृश्येन वर्त्मना ।
त्वया सिंहवपुः कृत्वा हिरण्यकशिपुर्हतः ।
नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
सर्वभूतनिवासाय वासुदेवाय साक्षिणे । [5]
नमस्ते आदिदेवाय साक्षिभूताय ते नमः ।
नारायणाय ऋषये नराय हरये नमः ।

[(l. 4) D12 नमस्कृत्य. —(l. 6) Note hiatus between नमस्ते and आदिदेवाय. —(l. 7) D12 हरये (for ऋषये).]

—Then Ś D8.12 cont.; B1.2.3(marg.) D1–3.9.13 T2.3 ins. after 24:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 102. 30
B. 6. 117. 27
L. 6. 98. 47

सीता लक्ष्मीर्भवान्विष्णुर्देवः कृष्णः प्रजापतिः ।
वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ॥ २५
तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ।
निहतो रावणो राम प्रहृष्टो दिवमाक्रम ॥ २६

अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः ।
अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः ॥ २७
ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम् ।
ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ २८

इति श्रीरामायणे युद्धकाण्डे पञ्चाधिकशततमः सर्गः ॥ १०५ ॥

3260* त्वमश्ववदनो भूत्वा पातालतलमास्थितः ।
संभूतं परमं दिव्यं दहस्यम्भः पुनः पुनः ।
यत्परं श्रूयते ज्योतिर्यत्परं श्रूयते तपः ।
यत्परं परतश्चैव परमात्मेति कथ्यते ।
परो मोक्षः परं यच्च तत्त्वमेव निगद्यसे । [5]
हव्यं कव्यं पवित्रं च प्राप्तिः स्वर्गापवर्गयोः ।
स्थित्युत्पत्तिविनाशानां त्वामाहुः प्रकृतिं पराम् ।
यज्ञश्च यजमानश्च होता चाध्वर्युरेव च ।
भोक्ता यज्ञफलानां च त्वमेव परिगीयसे ।

[(l. 1) D_{13} विश्व- (for अश्व-). B_1 D_9 आश्रितः (for आस्थितः). —(l. 2) $D_{2.3.9}$ $T_{2.3}$ संभृतं; D_{13} संवृतं (for संभूतं). B_1 हव्यं दहस्याद्य; $D_{1-3.9}$ हव्यं द(D9 व)हस्यं(D3 °त्यं)द्य(D1 °भः); D_{13} दिव्यं दहसि त्वं; $T_{2.3}$ दिव्यं बहस्यंबु (for दिव्यं दहस्यम्भः). —(l. 3) B_3(*sup. lin.* also) D_3 तमः; T_3 ततः (for तपः). —(l. 4) D_3 तत्; T_3 मत् (for यत्). D_{13} परमश् (for परतश्). $Ś_2$ D_{12} [अ]पि; D_{13} [इ]ति (for [ए]व). D_9 $T_{2.3}$ परमादिहिं (for °त्मेति). $D_{2.3}$ T_3 कथ्यसे. D_{13} परमात्मा च कल्पसे (for the post. half). —(l. 5) T_2 मोक्षे (for मोक्षः). $Ś_1$ T_3 यश् (for यच्). $Ś_1$ एतन् (for एव). D_{13} तदुत्पन्नं (for तत्त्वमेव). B_{1-3} परमाख्यं परं यच्च त्वमेव च निगद्यसे. —(l. 6) T_2 damaged for हव्यं. D_2 प्रवृत्तिं (for पवित्रं). Ś $D_{8.12}$ T_3 प्राप्तिं; D_2 शक्तिं (for प्राप्तिः). D_9 प्राणं सर्गापसर्गयोः (for the post. half). —(l. 7) D_2 स्थितिपालननाशानां (for the prior half). B_{1-3} परमां गतिं (for प्रकृतिं पराम्). D_{13} स्वमायाप्रकृतिः परा (for the post. half). —(l. 8) $D_{1.8}$ वा (for third च). D_{12} साध्वयुर्. —(l. 9) D_3 दाता (for भोक्ता). D_2 हि (for च). D_{13} परमेश्वरः (for परिगीयसे).]

25 ^{a}) D_4 लक्ष्मीभाव (corrupt) भवान्विष्णुर्. —^{b}) Ś Ñ V B_{2-4} $D_{4.8.12.13}$ देवश्चक्रायुधः प्रभुः. —^{c}) D_9 त्वं (for [इ]ह). —^{d}) D_8 मानवीं (for मानुषीं).

26 V_3 om. 26–27^b. —^{ab}) Ñ$_1$ यत्; D_8 तत् (for नः). Ś Ñ $V_{1.2}$ B $D_{1-4.8-13}$ M_2 transp. कृतं and त्वया. $D_{1.2.4}$ वरः. —^{c}) D_6 reads रावणो in marg. Ñ$_2$ $V_{1.2}$ $B_{2.4}$ D_{13} पापः; D_3 नाम; T_2 देव (for राम). —^{d}) $D_{1.3.4}$ T_2 $G_{1.2}$ प्रविष्टो. Ñ $D_{4.13}$ भ(D13 दे)व मानद; $V_{1.2}$ $B_{3.4}$ पुरमाव्रज; B_2 पुरमाक्रम; $T_{2.3}$ दिवमाक्रमत्. Ś B_1 $D_{1.3.8.12}$ प्रविष्टो दिवमाक्रमात् (B1 °माक्रम, [m. also] °मक्रमः).

27 V_3 om. 27^{ab} (cf. v.l. 26). —^{a}) $T_{2.3}$ अमोघ-. Ś B_1 $D_{1-3.8-12}$ देव (for बल-). —Note hiatus between ^{a} and ^{b}. —^{b}) Ñ $V_{1.2}$ $B_{2.4}$ $D_{4.6.13}$ $T_{2.3}$ G_1 M_2 न ते(D6 च) मोघः (for अमोघस्ते). Ś $D_{8.12}$ न ते मोघः शमस्तव(Ś1 शरस्तथा); B_1 $D_{1-3.9}$ न ते मोघ(D2.3.9 °घः)परिश्रमः; B_3 $D_{7.10.11}$ G_2 $M_{1.5}$ Ct न ते मोघाः पराक्रमाः; D_5 T_1 G_3 Ck अमोघास्ते पराक्रमाः. —After 27^{ab}, Ñ V B $D_{1-7.9-11.13}$ S ins.:

3261* अमोघं दर्शनं राम न च मोघस्तव स्तवः ।

[D_4 अमोघ-. Ñ $D_{4.13}$ चैव (with hiatus) (for राम). —V_3 damaged from the post. half up to भ in 27°. D_5 $T_{1.2}$ G_1 $M_{1.5}$ ते (for च). Ñ D_{13} अमोघं वचनं तव; V_2 B_1 न ते(B1 च) मोघं वचस्तव; B_3 न च मानुषरूपधृक्; D_4 अमोघं च बलं तव; D_{9-11} (with hiatus) अमोघस्तव संस्तवः; T_3 न चामोघं ततस्तव; G_3 न ते मोघस्तदा स्तवः (for the post. half). ❀ Cv: न च मोघस्तव स्तव इति पाठः. ❀]

—D_4 reads in marg. 27^d–28°. —^{d}) Ñ V_2 $D_{4.7}$ $G_{1.2}$ $M_{2.5}$ तु (for च). Ś B_1 $D_{1-3.8-12}$ नरा भुवि; V_3 B_3 D_6 $T_{2.3}$ तु(V_3 B_3 च) ये जनाः; M_1 च ये त्वयि.

28 D_4 reads in marg. 28$^{a\delta\circ}$ (cf. v.l. 27). —^{a}) M_2 त्वा. Ñ $D_{4.13}$ देव स(D13 त)दा; D_2 देवतरं; T G_3 M_2

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

देव ध्रुवं (for देवं ध्रुवं). T3 प्राप्ताः (for भक्ताः). Ś D8.12 देव त्वां दे(D8 °वत्वाद्दे)वताभर्तुः; V1.2 B2–4 D9 ये(B2 ते) च त्वां दैवतं भक्ताः; V3 ये च त्वां देवताभक्ताः; B1 ये त्वां स्तुवंति त्वद्भक्ताः; D1 ये च त्वां दैववद्भक्ताः; D3 ये त्वां विदंति त्वद्भक्ताः; M1 ये त्वां स्तोष्यंति मनुजाः. —^{b}) D1 T3 पुराण-. —After 28^{ab}, Ñ1 V2 D13 ins.:

3262* अमोघास्ते भविष्यन्ति देवा नास्त्यत्र संशयः।

[D13 राम (for देवा).]

—Thereafter V2 cont.; while Ś Ñ2 V1.3 B2–4 D8.12 ins. after 28^{ab}:

3263* मृताः स्वर्गं गमिष्यन्ति कीर्तित्वा नात्र संशयः।

[Ñ2 V B2–4 कीर्तनान्नात्र (V B2.3 °स्ति).]

—After 28^{ab}, D3.5–7.9–11 S ins.:

3264* प्राप्नुवन्ति सदा कामानिह लोके परत्र च।

[D9–11 तथा (for सदा). D3 न तेषां दुर्लभं किंचिद् (for the prior half).]

—Thereafter D3.5–7.9–11 S cont.; while Ñ2 V(V2 further cont.) B2–4 cont. after 3263*; whereas Ñ1 D13 cont. after 3262* and B1 D1.2 ins. after 28^{ab}:

3265* इममार्षं स्तवं दिव्यमितिहासं पुरातनम्।

[V2 B1 D1.2 इदम्; D13 एवम् (for इमम्). G2 M1 आर्ष-. D6 T2.3 M3 नित्यम्; G1 पुण्यम् (for दिव्यम्). —V3 damaged from the post. half up to परा in 28^{d}. B1 D3 इतिहाससमन्वितं; D13 आह ब्रह्मा पुरातनं; M2 निर्मितं पापनाशनं (for the post. half).]

47 D_{13} om. 47–48^b. —^{a}) M_1 damaged for ततः प्रहर्षा. D_2 प्रसादाद्; D_6 $T_{2.3}$ प्रहृष्टो; M_2 हर्षात्स (for प्रहर्षाद्). —^{b}) D_5 T_1 $G_{1.3}$ वीर्यवान् (for राघवः). —T_1 damaged from first न in 47^c up to 48^b. —^{d}) B_2 भरतालयं.

48 D_{13} om.; T_1 damaged for 48^{ab} (for both, cf. v.l. 47). —^{a}) D_6 $T_{2.3}$ G_1 $M_{2.5}$ आगम्य (for आसाद्य). —^{b}) Ś Ñ V B $D_{6.8.12}$ $T_{2.3}$ भरताग्रजः; D_7 [उ]पवने तदा (for राघवस्तदा). D_{1-3} राघवः सत्यविक्रमः; $D_{4.10}$ रामः सत्यप (D_{10} damaged) राक्रमः; M_2 राघवः सह वानरैः. —D_{13} reads 27^{ab} (followed by 3571*) and 48^{cd} after 30. V_2 illeg. for 48^c. —^{c}) D_{13} विमानात्तु. —^{d}) Ś Ñ V_1 $B_{1.2}$ $D_{8.12}$ ततस्तस्थौ; B_3 अवतस्थौ; B_4 तस्थतुस्तौ; D_{13} रामस्तस्थौ. D_6 $T_{2.3}$ महाबलः (for महीतले).

49 D_{13} reads 49–50^b (followed by 3587*) after colophon. —^{ab}) $D_{5-7.10.11}$ T G M_5 तु (for च). D_6 $T_{2.3}$ ततो (for तदा). D_4 तं (for तद्). T_1 damaged from त्तमम् in ^{b} up to ग in ^{d}. Ś Ñ V B $D_{8.12}$ मनोजवं (for अनुत्तमम्). D_{13} अब्रवीत्तु विमानं तन्मनोजवमरिंदमः. —D_8 om. (hapl.) 49^c – 50^b. —^{c}) $B_{1.2}$ गच्छ; D_{13} अहं (for वह). —^{d}) Ś Ñ V B D_{12} अहमाज्ञापयामि ते.

50 D_8 om. 50^{ab}; D_{13} reads 49–50^b (followed by 3587*) after colophon (for both, cf. v.l. 49). B_2 reads 50 after 41. —^{a}) Ś $Ñ_1$ $V_{1.2}$ B_3 D_{12} अथ; D_2 तथा (for ततो). —^{b}) Ś Ñ V B $D_{1-4.9.12}$ $M_{1.2}$ मनोजवं (for अनुत्तमम्). —After 50^{ab}, D_{13} ins.:

3587* कुबेरस्तदागतं वीक्ष्य वचनं चेदमब्रवीत् ।
निर्जितस्त्वं नरेन्द्रेण राघवेण महात्मना ।
हत्वा युधि दुराधर्षं रावणं राक्षसाधिपम् ।
ममापि परमप्रीतिर्जिते तस्मिन्दुरात्मनि ।
वह सौम्य तमेव त्वं प्रभुराज्ञापयामि ते । [5]
परमो ह्येव मे कामो यस्त्वामिक्ष्वाकुनन्दनम् ।
वह सुप्रीतिबुद्धिस्त्वं तस्मात्तत्रैव गम्यताम् ।
एतस्मिन्नन्तरे चैव शत्रुघ्नः परवीरहा ।
आदिदेशानुचरांश्च कर्तुं कार्यं यथोचितम् ।

[(l. 1) prior half hypm.]

—$Ñ_2$ D_{13} om. 50^{cd}. —^{c}) Ś $Ñ_1$ $V_{2.3}$ $B_{1.3.4}$ $D_{1-4.8.9.12}$ आस्थाय; B_2 आसाद्य; $D_{5.6}$ T $G_{1.3}$ M Cg आगम्य (for उद्दिश्य). —T_1 damaged from 50^d up to colophon. —^{d}) B_2 निपपात महीतले. —After 50, Ś $Ñ_1$ V B $D_{6-8.10-12}$ $T_{2.3}$ G_2 K (ed., within brackets) ins.; $Ñ_2$ (due to om.) M_2 ins. after 50^{ab}:

3588* विमानं पुष्पकं दिव्यं सर्वर्तुकमनुत्तमम् ।
रामवाक्यप्रमुदितं जवेन धनदं ययौ ।

[(l. 1) B_2 M_2 सर्वर्तुकमनोजवं (M_2 °रं); B_3 सर्वर्तुफल-मुत्तमं; $D_{6.7.10.11}$ $T_{2.3}$ G_2 संगृहीतं तु (D_6 $T_{2.3}$ च) रक्षसा (for the post. half). —D_6 $T_{2.3}$ om. l. 2. —(l. 2) B_1 च तदा (for धनदं). $D_{7.10.11}$ G_2 M_2 अगम् (M_2 °च्छ) द्धनदं वेगाद्रामवाक्यप्र (M_2 °वयेन) चोदितं.]

—Then Ś Ñ V B $D_{8.12}$ cont.; $D_{2.4.9}$ ins. l. 5–8 only after 50:

3589* तत्तु वैश्रवणो दृष्ट्वा स्वविमानमुवाच ह ।
राममेव वहस्व त्वमुपतिष्ठ च मां स्मृतः ।
तत्तु वैश्रवणाज्ञप्तमुपातिष्ठच्च राघवम् ।
उपलभ्य च वृत्तान्तं पूजयामास राघवः ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पुरोहितस्यात्मसमस्य राघवो
बृहस्पतेः शक्र इवामराधिपः ।
निपीड्य पादौ पृथगासने शुभे
सहैव तेनोपविवेश वीर्यवान् ॥ ५१

G. 6. 111. 0
B. 6. 127. 63
L. 6. 108. 64

इति श्रीरामायणे युद्धकाण्डे पञ्चदशाधिकशततमः सर्गः ॥ ११५ ॥

गते तु तस्मिन्कृतसंप्रणामो [5]
बद्धाञ्जलिर्भ्रातृजनानुयातः ।
प्रचक्रमे धर्मविधानगोप्ता
ततो गुरूणामभिवादनाय ।

[Ś1 V2 om. l. 1–2. —(l. 1) Ñ V1.3 B1.4 तत्र; D8 तत्तद् (for तत्तु). B1 राजा (for दृष्ट्वा). Ñ B2–4 स्वं; V3 B1 तद् (for स्व-). —(l. 2) Ñ1 (also as above) वह युद्धम् (for वहस्व त्वम्). B1 उपतिष्ठेश्च. D12 मा (for मां). B3 स्मृतं. Ñ V1.3 B2 उपतिष्ठस्व (V3 °ष्ठेश्च) मां स्मृतं; B4 उपतिष्ठ समागतः (for the post. half). —(l. 3) Ñ V2 ततो; B4 तं तु (for तत्तु). Ñ V B2–4 उपातिष्ठत; B1 तमुतिष्ठत; D8 उपतिष्ठस्व. —(l. 4) B3 उपालभ्य. B1 तु (for च). —Ñ V B1.2.4 om. l. 5–8. —(l. 5) Ś D8.12 स कृत- (for कृतसं-). D2 -प्रयाणे (for -प्रणामो). D4 गते च तस्मिन्सहसा विमाने. —(l. 6) D2 राज- (for भ्रातृ-). B3 बद्धांजलीन्भ्रातृजनानभाषत; D4 कुबेरसांनिध्यमथेह रामः. —(l. 8) D2.4.9 गतो (for ततो).]

51 T1 damaged for 51 (cf. v.l. 50). G (ed.) om. 51. —^{a}) Ś Ñ V B D8.12.13 [अ]थ समेत्य; D4.10.11 T2.3 M1.5 [आ]त्मसख (D4 °हित)स्य. ❀ Cr.m.g: पुरोहितस्येति- आत्मसमस्य स्वानुरूपस्य।; Ct: आत्मसमस्येति पाठान्तरम्। ब्रह्मज्ञत्वादिति भावः। वसिष्ठस्येत्यर्थ इति तीर्थः. ❀ —^{b}) B1 शक्रम्. B1 [अ]मराधिपं; B2 [अं]बराधिपः; G3 [अ]मरेश्वरः; M5 [उ]चितासने. —^{c}) B1 निवेद्य. V3 damaged from दौ up to है in ^{d}. Ñ2 सुभगासने शुभैः; D1–4.9 ज्वलनार्कसंनिभौ. ☞ D5 missing from वीर्यवान् up to 6.116. 48^c. —^{d}) Ś सदा (for सह). D7 तत्र (for तेन). B1 M3 राघवः (for वीर्यवान्). ❀ Cv: सहैव तेनोपविवेशेति —एकस्मिन् काले उपवेशः। स्वस्मिन् स्वस्मिन् आसने (स चा सं च?) एकदैवोपविविशुरित्यर्थः। 'अथाब्रवीद्राजपुत्र' इत्यादि श्लोकद्वयं पूर्वत्र 'कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा' इत्यस्यानन्तरं द्रष्टव्यम्। अन्यत्र तु प्रमादप्रक्षिप्तम्। ततोऽस्य सर्गस्यादिः शिरस्यंजलिमाधायेत्यादि वेदितव्यम्।, also Cr. ❀

Colophon: D5 missing; T1 damaged (cf. v.l. 51 and 50 respy.). —*Kāṇḍa name*: Ñ V1 B1.3.4 D4.13 लंकाकांडे. —After Kāṇḍa name, V1 D1.2 ins. आभ्युदयिके; B1 युद्धपर्वण्याभ्युदयिके. —*Sarga name*: Ś Ñ V2.3 B D2.8.12.13 भरतसमागमः; V1 भरतसमागमनं; D1 भरतागमः; D3 भरताभ्यागमनं; D4 रामाभिगमनं; M2 भरताश्रमप्रवेशः. —*Sarga no.* (figures, words or both): Ś1 Ñ1 V2.3 B2.4 D2.4.8.12.13 om.; Ś2 V1 D1 110; Ñ2 116; B1 87; B3 107; D3 112; D6.7 G M3.5 130; D9 113; D10.11 129; T2 138; T3 141; M1 131; M2 132. —After colophon, Ś1 concludes with ॐ; D2 with राम; G M1.2.5 with श्रीरामाय नमः. —After colophon, D1–4.9 ins. 3590*; while D13 reads 49–50^b (followed by 3587*).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

११६

G. 6. 112. 4
B. 6. 128. 1
L. 6. 109. 4

शिरस्यञ्जलिमाधाय कैकेयीनन्दिवर्धनः ।
बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १
पूजिता मामिका माता दत्तं राज्यमिदं मम ।
तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥ २
धुरमेकाकिना न्यस्तामृषभेण बलीयसा ।
किशोरवद्वहुं भारं न वोढुमहमुत्सहे ॥ ३
वारिवेगेन महता भिन्नः सेतुरिव क्षरन् ।
दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४

116

D5 missing up to 48^{e} (cf. v.l. 6.115.51). —Before 1, Ś Ñ V B D8.12 ins.; while D1–4.9 ins. after the colophon of 6.115 Sarga; whereas D13 ins. after 6.115.36:

3590* सुषेणं जाम्बवन्तं च केसरिं च महाबलम् ।
अभिवाद्य च सुग्रीवं विनयेन परंतपः ।
अभ्यवादयत प्रीतो भरतः प्लवगर्षभान् ।

[(l. 1) D1–4.9 कपिं केसरिणं तथा (for the post. half). —(l. 2) B2 D1–4.9 अभिगम्य. Ñ1 B4 D13 स (for च). —V3 damaged from ग्रीवं up to the post. half. —Ñ V B1.3.4 D13 om. l. 3. —(l. 3) D3 श्रीमान् (for प्रीतो). B2 प्लवगर्षभं; D3 प्लवंगर्षभान्.]

—Thereafter Ś Ñ V (V1 followed by 6.115.33) B1.3.4 D2.3.8.12.13 cont. 3576*; while B2 D1.4.9 cont. after 3590*:

3591* तं परिष्वज्य सुग्रीवश्चिराद्भ्रातृसमागमे ।

[B2 सुग्रीवं (for सुग्रीवश्). B2 D9 चिरं भ्रात्रा(D9 चिराद्भ्रातुः) समागतं (for the post. half).]

—Then B2 (preceded by the second occurrence of 6.115.32^{c-d}) D1.4.9 further cont. 3576* (D1 followed by 3577*).

—Before 1, D1.3.9 read 6.115. 32^{c}–42; D2 reads 6.115.33–42; while D4 reads 6.115.36–42; whereas M2 ins.:

3592* भरतस्तु तदोत्थाय शत्रुघ्नेन सहैव तु ।
भ्रातुर्मित्रांस्तथा सर्वान्संभाष्य विनयेन तु ।
जाम्बवन्तं नलं चैव केसरिं प्लवगोत्तमम् ।
अभिवाद्य च तान्सर्वानृक्षवानरराक्षसान् ।

—Then cont. 3576* and 3578*.

1 D13 reads 1–11 (om. 6–8) after 6.115.45. V3 T1 damaged up to यी in 1^{b}. —^{a}) B2 शिरसा (for शिरसि). Ś2 D2.4.6–8.11.12 T2.3 आदाय; M1 damaged; M2 आरोप्य; Cv.r.g as in text (for आधाय). —^{b}) Ñ V1.2 B2–4 कैकेय्या (for कैकेयी-). Ś B1 D2.6–9.12 T2.3 G3 M3 Cg -[आ]नंद-; D1.4.10.11.13 T1 -नंद- (for -नन्दि-). —V3 om. 1^{c}–2^{b}. —T1 damaged from 1^{d} up to first म in 2^{d}. —$^{c-d}$) Ś Ñ V1.2 B D1.2.4.8.9.12 T3 M1.2 भ्रातरं (for भरतो). B1 transp. ज्येष्ठं and रामं. D4 om. सत्य-. D13 आबभाषे तदा ज्येष्ठं भ्रातरं सत्यविक्रमं. —After 1, D4 repeats 6.115. 43^{c-d} (preceded by 3585* [r.]).

2 V3 om. 2^{a-b}; T1 damaged up to first म in 2^{d} (for both, cf. v.l. 1). For sequence in D13, cf. v.l. 1. —^{a}) Ś Ñ V1.2 B D8.12 मामकी; D2.3 मेधिकं (for मामिका). D13 मानिनश्चैव. —^{b}) M2 transp. दत्तं and राज्यम्. B2 D1–4.9 त्वया (for मम). Ś D8.12 अरिंदम. D13 दत्तं राज्यपदं महत्. —^{c}) D9 दास्यामि; D13 ददानि (for ददामि). D1.2.4 तथैवाहं प्रतिददे. —^{d}) D9 अवधारय (for अददा मम). Ś Ñ V B D8.12 यथा मह्यं भवान्ददौ (B4 °नतः); D1.4 L (ed.) यथैव त्वं म(D4 स्व)मादददाः (L [ed.]समाददः); D2 तव राज्यं रघूत्तम; D3 यथा मे त्वमदाः पुरा; D13 यथा त्वं दत्तवान्मम; T2.3 यथातत्त्वं ददामि च.

3 For sequence in D13, cf. v.l. 1. ☞ It seems that Ck is missing from 3 up to the colophon. B1 om. 3^{a-b}. —^{a}) Ś2 V3 B3 D8 न्यस्तं; V1 B4 व्यूढाम् (for न्यस्ताम्). D1–4.9 धुरमेतां समुद्वहुताम्(D4 समुत्कटाम्; D9 सुदुर्धर्षां). —^{b}) Ś V2.3 D6.8–12 Ct वृषभेण (for ऋषभेण). —V2 lacuna for 3^{c}. —^{c}) Ś Ñ V1.3 B D1–4.8.12 कुगौरिव; D6.7 T G M3.5 Cv.r.m किशोरीव; D9 शिरसा तं; D13 गिरेरिव; Cg.t as in text (for किशोरवद्). —^{d}) D4.13 M1.2 सोढुम्; Cv.r.m.g.t as in text (for वोढुम्).

4 For sequence in D13, cf. v.l. 1. V3 om. 4. —^{a}) Ś1 -मेघेन (sic) (for -वेगेन). D13 वारिधेर्वेलमिहतो (sic). —^{b}) D2.4.9.13 T2 M1 भिन्न- (for भिन्नः). M1 damaged for व क्षरन्. D1 [अ]क्षयं; D3 क्षरः; D7 त्वरन्; D13 क्षितौ (for क्षरन्). —^{c}) G1 अहं; Cg as in text (for इदं). Ś D8.12.13 वार्यो(Ś °त्यो)घमिव मन्येहं; Ñ V2 B3.4 T1 दुर्वार्य(Ñ2 °र्धर्ष; V2 B4 °र्वार; B3 °र्घोर; T1 °बंध)मिदमन्येन; V1 B1 G (ed.)सु(G [ed.]स)दुर्वहमिदं(B1 °महं) मन्ये; B2 धार्यं न हीदमन्येन; D1.2 दुर्बद्ध(D2 °र्बोध)मिव चान्येन; D3 (with hiatus) दुर्बद्ध इव एतार्थे; D4 दुर्बुद्धिरिव बाल्येन; D9 G2 दुर्बद्धमिव(G2 °ह) मन्येहं. —^{d}) Ś D4.8 T2 राज्यं छिन्न(D4 T2 °द्र)म्; D3 तद्वद्राज्यम् (for राज्यच्छिद्रम्). D1 असंहितं; D4 समं वृतः; D7 असंस्कृतं; D9

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

गतिं खर इवाश्वस्य हंसस्येव च वायसः ।
नान्वेतुमुत्सहे देव तव मार्गमरिंदम ॥ ५
यथा च रोपितो वृक्षो जातश्चान्तर्निवेशने ।
महांश्च सुदुरारोहो महास्कन्धः प्रशाखवान् ॥ ६
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयेत् ।
तस्य नानुभवेदर्थं यस्य हेतोः स रोप्यते ॥ ७

एषोपमा महाबाहो त्वमर्थं वेत्तुमर्हसि ।
यद्यस्मान्मनुजेन्द्र त्वं भक्तान्भृत्यान्न शाधि हि ॥ ८
जगदद्याभिषिक्तं त्वामनुपश्यतु सर्वतः ।
प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९
तूर्यसंघातनिर्घोषैः काञ्चीनूपुरनिस्वनैः ।
मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व शेष्व च ॥ १०

G. 6. 112. 13
B. 6. 128. 10
L. 6. 109. 13

असंवरं; D13 समापितं (for असंवृतम्). Ñ V1.2 B D12 राज्यं छिद्रसमन्वि(Ñ1 °मसंम; D12 °समावृ)तं.

5 For sequence in D13, cf. v.l. 1. B2 reads 5^{ab} twice (second time in marg.).—^{a}) V3 damaged from श्च up to तु in 5^c. B2(first time) D1-4 खरो वा (B2 हि) गतिमश्वस्य; D13 गतिं गंतुं समावस्थो. —^{b}) D3 तु (for च). D13 विहायसः (for च वायसः). B2 (first time) D1.4 L (ed.) सर्पो(L [ed.]मर्त्यो) वा(B2 हि) शकुनेर्गतिं; D2 मानुषः शकुनेर्गतिं. —D3 reads 5^{cd} after 6. —^{c}) Ś D2-4.8.12 नान्वेष्टुम्. D7.10.11 G2 वीरः T1 G1.3 M3 राम (for देव).

6 For sequence and om. in D13, cf. v.l. 1. V3 D9 om. 6-8^b. D1.2.4 om. 6.—^{a}) G1 Cv.r यदा; Cm.g as in text (for यथा). Ñ2 तु; B1.3.4 [अ]व-; M3 सं- (for च). Ś Ñ1 V1.2 B2 D3.6-8.10-12 T2.3 G M3.5 Cv.r.m.g.t [आ]रोपितो (for रोपितो).—^{b}) Ś D8.12 ज(D12 श)नैः श्रांत- (for जातश्चान्तर्-).—^{c}) Ś Ñ V1.2 B D8.12 महांश्चैव; D3 संवर्धितो; D6.7.10.11 G1.2 महानपि (G2 °न्स च); M1 °महांश्चापि; M2.5 महान्न च; Cg as in text (for महांश्च सु-). M5 दुराधर्षो (for -दुरारोहो).—^{d}) Ś D8.12 महांश्चैव; M3 Cg महास्कंध- (for °स्कन्धः). Ś B4 D3.7.8.12 प्रताप(D3 °रोह; D7 °वाल)वान् (for प्रशाखवान्). ❀ Cm: महास्कंधप्रवालवान्. ❀ —After 6, D3 reads 5^{cd}.

7 For sequence and om. in D13, cf. v.l. 1. V3 D9 om. 7 (cf. v.l. 6).—^{a}) Ś Ñ V1.2 B D8.12 यश्चा(B4 D8 °था)पि; D1.2.4 यथा तु; G1 M1 शीर्यते; M2 स शीघ्रं; Cv.m.g.t as in text (for शीर्येत). B2 D1.2.4 वृक्षो (for भूत्वा). D3 यस्तु वै रोपितो वृक्षो. —B1 om.(hapl.?) 7^b–8^c.—^{b}) D4 M3 स (sic); Cv.m.g.t as in text (for न). G (ed.) transp. न and फलानि. D3 प्रयच्छति; D4.6.7.10.11 T G M1.3.5 Cv.m.g.t प्रदर्शयन् (for प्रदर्शयेत्). Ś Ñ V1.2 B2-4 D8.12 फलानि न(Ñ2 V1 B2 च) वि(B2 न; B3.4 नि)दर्शयेत्(D8.12 °यन्).—^{c}) G1 तस्मात्. Ś D8.12 T1 G1 अर्थो; Cv.r.m.g.t as in text (for अर्थं). D1-4 अर्थं(D4 °र्थान्) नानुभवेयुस्ते; L (ed.) तस्य नार्थो भवेदर्थो. D3.7.10.11 G2 M5 Ct रोपितः (for रोप्यते). D1 तदर्थं समरोपितः; D2.4 ये यदर्थं प्र(D4 स [sic]) रोपिताः.

8 For sequence and om. in D13, cf. v.l. 1. V3 D9 om. 8^{ab} (cf. v.l. 6). B1 om. 8^{abc} (cf. v.l. 7).—^{a}) D1.2 उपमैषा (by transp.); D4 उपभुंक्ष्व (for एषोपमा). Ś Ñ V1.2 B2-4 D8.12 महाराज (Ś D8.12 °ज्ञस्) (for °बाहो).—^{b}) D6 T2.3 M2 तद्-; T1 तम् (for त्वम्). Ś D8.12 त्वदर्थं कल्पितं(Ś2 D12 °ता) मया; Ñ V1.2 B3 त्वदर्थं संहि(Ñ1 °ज्ञि)तो मया; B2 D1-4 तवार्थे(B2 त्वदर्थं) रघुनंदन; B4 त्वदर्थे सज्जिता मया; G(ed.) तदर्थं संज्ञिता मया. ❀ Cg: एषोपमा त्वदर्थमुक्तेति वेत्तुमर्हसीति योजना. ❀ —^{c}) Ś D8.12 तदस्मान्वत्सलो भूत्वा; Ñ V B2-4 यदस्मान्नृपभो(V2.3 B3.4 °न्नृपभाग्)भूत्वा; D1-4.9 यद्(D9 °द्य)स्मान्नृपतिर्भूत्वा.—^{d}) Ñ1 V B2-4 D7.10.11 G2 भर्ता (for भक्तान्). Ś D1.3.4.8.12 transp. भक्तान् and भृत्यान्. Ś D8.12 च पोषय; Ñ1 V B2-4 न पोषसि(Ñ1 V2 °से); D1.4 च पोषिताः; D3 न पुष्यसि; G (ed.) न पोषयेः (for न शाधि हि). Ñ2 भर्ता त्वं नानुपोषसि; B1 भर्तुर्भृत्यान्नु पोषसि; D2 भक्त्या भृत्या नु पोषिताः; D9 भक्त्या भक्तान्भरस्व नः.

9 For sequence in D13, cf. v.l. 1.—^{a}) D13 जगत्याम.—^{b}) D6.13 G1 सर्वशः; D7.10.11 G2 राघव (for सर्वतः).—For 9^{ab}, Ś Ñ V B D1-4.8.9.12 M2 subst.:

3593* अद्य त्वामनुपश्यन्तु अभिषिक्तं नराधिपाः ।

[Note hiatus between the two halves. Ñ2 V1 B2 अनुपश्यंतम्; D1.3.4.9 अभि°; M2 °पश्येयम् (for अनुपश्यन्तु). D1.3.4 ह्यभिषिक्तम्. Ñ1 B4 नराधिपं(B4 °प); B2 D1-4 M2 अरिंदम (for नराधिपाः).]

—^{c}) D8 उत्तपंतम्; D13 प्रयच्छंतम् (for प्रतपन्तम्). —V3 damaged from दि up to घा in 10^a.—^{d}) D13 प्रदीप्तं (for मध्याह्ने).

10 For sequence in D13, cf. v.l. 1. V3 damaged up to घा in 10^a (cf. v.l. 9). G1 om. 10.—^{a}) V2 हर्ष-; T2 दीर्घ-; Cg.t as in text (for तूर्य-). D6 -वादित्र- (for -संघात-). B3 -निनादैः (for -निर्घोषैः). D13 शंखतूर्य-विनिर्घोषैः.—^{b}) Ś V3 D1.3.6-9.11-13 -निःस्वनैः.—B1 om. 10^c–11.—^{c}) D9 -निर्घोषैः (for -शब्दैश्च).—^{d}) D2 प्रबुद्धयस्व (subm.) (for प्रतिबुध्यस्व). Ñ1 V2 B1 D1-4.13 पश्य च; B2 बंदिनां; B4 T2.3 M3 राघव;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 112. 14
B. 6. 128. 11
L. 6. 109 14

यावदावर्तते चक्रं यावती च वसुंधरा ।
तावत्त्वमिह सर्वस्य स्वामित्वमभिवर्तय ॥ ११
भरतस्य वचः श्रुत्वा रामः परपुरंजयः ।
तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः ।
सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ १३
पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले ।
सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥ १४

D9 सर्वथा; Ct as in text (for शेष्व च). Ś D8.12 प्रतुष्यस्व नराधिप; Ñ2 बोधयंत्विह बंदिनः . —After 10, D13 ins. :

3594* मङ्गलावर्तशत्रूंश्च विनाशं शीर्षसंभवम् । (sic)

11 For sequence in D13, cf. v.l. 1. B3 om. 11 (cf. v.l. 10). D13 om. 11^{ab}. —^{a}) D3 प्रवर्तते; T2.3 आवर्तयेद् ; Cv.m.t as in text (for आवर्तते). —^{b}) Ś Ñ1 V2 B1 D1.2.4.8.9.13 T2 तावती; D3 यावच्च (for यावती). Ś Ñ V2 B2.4 D8.13 ते; D1.2.9 मे; D3.6 T2.3 [इ]यं; T1 M2 वा; Ct as in text (for च). —V3 om. 11^{cd}. —^{c}) D13 यस्मात् (for तावत्). M2 एव (for इह). D2 यावद्वंशस्य. D6.7.10.11 G1.2 M1 Ct लोकस्य; Cg as in text (for सर्वस्य). Ś Ñ V1.2 B1.2.4 D1.2.4.8.9.12 त(B2 D1.2.4.9 अ)स्यास्त्वमपि(Ś B4 D4.8 °सि) सर्वस्याः . —^{d}) Ś Ñ V1.2 B1.4 D7.8.10–12 G1.2 M1.3.5 Cg अनुवर्त-(Ś D8.12 °चिंत)य (for अभिवर्तय). D13 स्वामी कामं प्रवर्तसे. —After 11, D13 ins. :

3595* दृष्ट्वा च पुत्रं शोकेन मग्ना तमसि दारुणे ।
कौसल्या त्वां कुशलिनं पुत्रं द्रक्ष्यति राघव ।
अद्य त्वां मूर्ध्नि जिघ्रन्तं न तृप्तिमुपयास्यति ।
गौर्यथा नष्टवत्सेव पुनर्वत्सेन संगता ।

12 D13 om. 12^{ab}. —^{b}) Ś Ñ V B1.3.4 D8.12 रामः सत्यपराक्रमः ; T1 रा****रंजयः . —D13 reads 35^{cd} and 12^{cd} after 6.115.41. —^{c}) D12 यथेति. Ś Ñ V1 B2 D1.2.8.12 स(Ś2 D1.2 सं- ; V1 च) प्रतिश्रुत्य; V3 D3 तं (D3 सं-) परिश्रुत्य; B3 समुपश्रुत्य; B4 D4 °संश्रुत्य (for प्रतिजग्राह). V2 B1 स तथेति प्रतिश्रुत्य. —^{d}) D6.13 T G1.3 M5 च सः(D6 यः) (for शुभे). Ś Ñ V B D8.12 (with hiatus) आसने समुपाविशत् ; D1–4.9 समुपाविशदासने. —After 12, D1 reads an addl. colophon [युद्धकांडे आभ्युदयिके भरतवाक्यं नाम सर्गः ॥ १११ ॥] ; while D3 ins. :

3596* उवाच च महाबाहुर्भरतं लक्ष्मणं तथा ।
भरतैनं मुदा युक्तो विभीषणमरिंदमम् ।
प्रणम्य प्रीतिपूर्वं हि मानयस्व यथाप्रियम् ।
त्वयापि च महावीर सौमित्रे वै ममाज्ञया ।
पूजनीयश्च बहुधा प्रेमपूर्वं निरन्तरम् । [5]
तथायं ससमुत्साहं नमस्कर्तुं हि मातरः ।
करोति तत्त्वया कार्यं यथायोग्यं विभीषणे ।
एवमुक्तस्तु भरतस्तथा चक्रे नृपाज्ञया ।
प्रणामं परिरम्भं च प्रेमपूर्वं च लक्ष्मणः ।
धृत्वा करे महाबाहुं राक्षसेन्द्रं विभीषणम् । [10]
सौमित्रिर्जग्मिवांस्तत्र यत्र सर्वास्तु मातरः ।
कौशल्यापूर्वकं राजा नमश्चक्रे विभीषणः ।
लक्ष्मणेनाभ्यनुज्ञातो मातृभिः प्रतिनन्दितः ।
सत्कृतश्च पुनः श्रीमान्स रामं समुपागमत् ।
तथा विनोदवार्तासु वर्तमानासु तत्र वै । [15]
अलंकाराय भरतः शत्रुघ्नं वासमादिशत् ।

13 ^{a}) B2 D2–4.9 -निर्दिष्टा; D1 -संदिष्टा (for -वचनात्). —^{b}) Ś1 -वारणाः ; Ñ V1.2 B2–4 D6–8.10–12 T2.3 G2 Ct -वर्धनाः ; B1 -कारिणः ; D1 -प्रवर्धकाः (hypm.) (for -वर्धकाः). —After 13^{ab}, D13 ins. :

3597* चन्दनोरसि कर्पूरकुङ्कुमागुरुवासितम् ।
पुण्योदकं तथा पीठं मणिरत्नविभूषितम् ।
नानापुष्पस्रजं दिव्यां परिमलैश्च विराजिताम् ।
(hypm.)
करेणादाय ते सर्वे राघवं पर्युपासिरे ।
तालवेणुमृदङ्गादिभेरीपणवसंयुताः । [5]

—^{c}) M2 लघु- (for सुख-). Ś Ñ V1.2 B D1–4.6.8.9.12 च (for सु-). Ś D8.12 श्लाघ्याश् ; D1 दीर्घाश् (for -शीघ्राश्). D13 तथा सर्वे. —^{d}) Ñ1 D1.2.4.9 T1 G1 M5 पर्यु(D1 समु)पासते; B1 °गमन् ; B2 °सयन् ; B4 पर्यमुपेयन् (sic) ; D3 °पस्थिताः ; D7.10.11 G2 पर्यवारयन् ; D13 °सिरे; M2 पर्यवस्थिताः ; G (ed.) °विशन् ; Cg as in text (for पर्युपासत). —After 13, Ś D8.12 ins. :

3598* उपतस्थुर्जलस्नानकर्मदैवविदो जनाः ।
वासांसि चाङ्गरागाणि द्रव्याणि सुरभीणि च ।
माल्यानि च विचित्राणि दिव्यान्याभरणानि च ।
तान्दृष्ट्वा राघवो वीरो यथाक्रममुपस्थितान् ।
उवाच परमप्रीतः सर्वानेवानुजीविनः । [5]
भरतं लक्ष्मणं चैव सुग्रीवं सविभीषणम् ।
सर्वानिच्छाम्यहं द्रष्टुं पृथक्पृथगुपस्थितान् ।
वानरानृक्षरक्षांसि स्नापयामासुरन्तरे ।

[(l. 7) Ś2 तांस्तान् ; D8.12 स्नातान् (for सर्वान्). Ś2 D12 उपाश्रितान् (for उपस्थितान्). —(l. 8) Ś2 वानराः (for वानरान्).]

14 ^{a}) B1 ततश् ; D13 तूर्णं (for पूर्वं). Ś B1.2 D2.8.12 T1 G1 च (for तु). M2 भ्रातरि (for भरते). —^{b}) M5 परंतपे (for महाबले). —D9 om. 14^{cd}. V3 reads 14^{cd} twice (second time illeg. for ^{a}). —^{a}) Ś Ñ V1.2 B1.4 D2–4.8.12.13 M2 राक्षसे च. —After 14, M2 ins. :

3599* युवराजेऽङ्गदे चैव नीले सेनापतौ तथा ।
यूथपेषु तथान्येषु हनूमत्प्रमुखेषु च ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः ।
महार्हवसनोपेतस्तस्थौ तत्र श्रिया ज्वलन् ॥ १५
प्रतिकर्म च रामस्य कारयामास वीर्यवान् ।
लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ १६
प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः ।
आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥ १७
ततो राघवपत्नीनां सर्वासामेव शोभनम् ।
चकार यत्नात्कौसल्या प्रहृष्टा पुत्रवत्सला ॥ १८
ततः शत्रुघ्नवचनात्सुमन्त्रो नाम सारथिः ।
योजयित्वाभिचक्राम रथं सर्वाङ्गशोभनम् ॥ १९
अर्कमण्डलसंकाशं दिव्यं दृष्ट्वा रथं स्थितम् ।
आरुरोह महाबाहू रामः सत्यपराक्रमः ॥ २० G. 6. 112. 23 B. 6. 128. 20 L. 6. 109. 25

15 [a]) Ś1 विकर्तित-; Ś2 D1.2.4.12 विकोशित-; M2 विशोषित- (for विशोधित-). Ś2 D6-8 T3 G M1-3 -जट-; T2 -जल- (for -जटः). D3 असौ भरतमहात्मा (unmetric); D9 ततः स्नातश्च काकुत्स्थश्. —[b]) B3 शुक्ल-; D3 स चित्र- (hypm.) (for चित्र-). —After 15[ab], Ś Ñ V B D8.12 M2 ins.:

3600* दिव्याभरणजुष्टाङ्गः श्रीमाञ्ज्वलितकुण्डलः ।

[M2 ब्रह्म- (for दिव्य-). Ś B1 D8.12 -पुष्टांगः; V3 B3 -दीप्तांगः (for -जुष्टाङ्गः). Ś1 V3 B3 श्रीमज्-; B1 धीमाञ् (for श्रीमाञ्). M2 विमल- (for ज्वलित-). G (ed.) श्रीमदुज्ज्वल-.]

—[c]) T1 damaged for महार्ई-. Ś Ñ V B2-4 D1-4.8.9.12.13 G1.3 M2.3 रामस् (for -[उ]पेतस्). B1.3 महार्ई-मासनं (B3 °शयनो)रामस्. —[d]) G1 तथा (for तस्थौ). Ś D8.12 देवः; Ñ V1.2 B1.2.4 D4 देव-; B3 वेद-; D13 दीप्तः (for तत्र). D3 वृतः (for ज्वलन्). —After 15, Ś D1-4. (D2-4 repeat after 20 followed by 3604*)8.9.12 ins.:

3601* सुग्रीवो हनुमांश्चैव महेन्द्रोपेन्द्रसंनिभौ ।
स्नातौ दिव्याम्बरधरौ रेजतुः शुभकुण्डलौ ।

[(l. 1) D2-4 (both times) -द्युति- (for -[उ]पेन्द्र-). —(l. 2) D2 (first time) -मंडनौ; D4 (second time) -लक्षणौ (for -कुण्डलौ).]

—Thereafter all the above MSS. cont. (D2-4 after the first occurrence); while Ñ V B1.3.4 subst. for 16; whereas B2 ins. after 15:

3602* नन्दिग्रामे जटां छित्त्वा भ्रातृभिः सह राघवः ।
स्नातो विपाप्मा बलवानिक्ष्वाकुकुलनन्दनः ।

[(l. 1) cf. 1.1.70[ab]. L (ed.) जटाश् (for जटां). D1-4.9 हित्वा; D12 भित्त्वा (for छित्त्वा). —G (ed.) om. l. 2. —(l. 2) D9 महात्मा (for विपाप्मा). D4.9 द्यु (D9 श्रु)-तिमान् (for बलवान्). Ś Ñ2 V2 D8.12 -कुलवर्धनः.]

16 For subst. in Ñ V B1.3.4 cf. v.l. 3602*. —[a]) D9 स (for च). Ś D2-4.9.12 रामाय; D1.8 सीतायाः (for रामस्य). —D8 om. 16[cd]. —[c]) Ś D1-4.9.12 लक्ष्मणाय (D3 °णेन) (for लक्ष्मणस्य). —[d]) D13 G1 M1.2 -नंदनः; Cv.m.g.t as in text (for -वर्धनः). D1-4.9 भरतः सत्यविक्रमः.

17 V3 om. 17-21. —[a]) T1 damaged for तिकर्म. —[c]) D4 आत्मनश्च (for आत्मनैव). B1 D1-3.9.13 ततश्; D4 T2.3 तथा (for तदा). —[d]) B3 G1 M1 मनोरमं (G1 °माः); D1-4 महाप्रभाः; D9 विचक्षणाः; D13 M2 मनोहराः (for मनोहरम्).

18 V3 om. 18 (cf. v.l. 17). —[a]) B1 D1-4.6.7.9-11 S वानर- (for राघव-). —[b]) M1 damaged for सामेव शोभनम्. B4 चैव; G (ed.) उप- (for एव). Ś B1.3.4 D1.2.8.12 G1.2 M2 शोभना (D1 °नाः); B2 D4.9 शोभनां; Cm.g.t as in text (for शोभनम्). —[c]) T1 damaged for र यत्नात्. B2 शोभां; D3 रत्नं; D7 यत्नं (for यत्नात्). M1 कारयामास (for चकार यत्नात्). —[d]) D6 T2.3 M3 (before corr. as in text) -लालसा (for -वत्सला). Ś Ñ V1.2 B1.3.4 D8.12 प्रहृष्टेनांतरात्मना; B2 प्रहर्षात्पुत्रगृद्धिनी; D3 पुत्रिणी पुत्रवर्धिनी. —For 18[cd], D1.2.4.9 subst.:

3603* अलंक्रियां चकाराथ कौसल्या पुत्रगृद्धिनी ।

[D1 अलंक्रियाश्; D2 अलंकारं.]

—Thereafter, D1.9 cont.; while Ś D8.12 ins. after 18; whereas D2-4 cont. after 3601* (second occurrence):

3604* तरुण्यः शौचसम्पन्ना एकतः शुभलक्षणाः ।
सुग्रीवपत्नीं सीतां च द्रष्टुं नार्यः समुत्सुकाः ।

[(l. 1) Ś2 D2.8.12 तरुणाः. D1.4.9 रूप- (for शौच-). D4 सर्वतः (for एकतः). D1 प्राप्ताः पौरजनस्त्रियः; D9 सवत्साः शुभकुंडलाः (for the post. half). —(l. 2) D3 तु (for च). D9 भार्याः (for नार्यः). Ś D8.12 समागताः.]

19 V3 om. 19 (cf. v.l. 17). D1-4.9 read 19-20 after 23[ab]. —[a]) D1.2.4.9 -निर्दिष्टः (for -वचनात्). —[b]) B4 D13 सुमंतुर् (for सुमन्त्रो). —[c]) Ś D8.12 [अ]तिचक्राम; B1 ह्यतिक्रांतान् (sic); B2 D1-4.9 [अ]भ्युपागच्छ (B2 °तिष्ठ)द् (for [अ]भिचक्राम). —[d]) D1 इष्टं (for रथं). Ś Ñ V1.2 B2.4 D8.12 -भूषितं; B3 -भूषणं; D2.4 -सुंदरं; T1 -शो*** (for -शोभनम्).

20 V3 om. 20 (cf. v.l. 17). B4 om. 20[ab]. D1-4.9 read 19-20 after 23[ab]. —[a]) D10.11 अभ्यर्कमल-; T1 **मंडल- (for अर्कमण्डल-). D13 अर्कप्रकाशसदृशं. —[b]) Ś Ñ V1.2 B2.3 D8.12.13 T1 M3 रथोत्तमं; B1 मनोरमं; D1-4.9 महारथं (for रथं स्थितम्). —[c]) B1 रथं रामस् (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 112. 30
B. 6. 128. 23
L. 6. 109. 32

अयोध्यायां तु सचिवा राज्ञो दशरथस्य ये ।
पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥ २१

मन्त्रयन्त्रामवृद्ध्यर्थं वृत्र्यर्थं नगरस्य च ।
सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः ।
कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २२

महाबाहू). —[a]) B1 तदा (for रामः). Ś1 पर- (for सत्य-). D7.10.11 परपुरंजयः . —After 20, Ś Ñ V1.2 B D6–8.10–12 S ins., while D13 ins. only l. 1–3 after 28 :

3605* सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती ।
स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ।
वराभरणसम्पन्ना ययुस्ताः शुभकुण्डलाः ।
सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः ।

[(l. 1) G1 -वरुण- (for -सदृश-). D6.7 T3 -द्युतिः (for -द्युती). M1 damaged; M2 -द्युतिसंनिभौ (for -सदृशद्युती). Ś Ñ V1.2 B D8.12 राक्षस(Ñ V1 अंगद)श्च विभीषणः ; T1 म** ***द्युती(damaged) (for the post. half). —(l. 2) D6 धौतैर् (for स्नातौ). D6 दिव्यमयैर् ; T2.3 दिव्यैर्नवैर् (for दिव्यनिभैर्). T1 G3 M1 स्नातौ दि(M1 ***)व्यांबरधरौ; D13 महार्हवस्त्रसुस्नातौ; Cm.g.t as above (for the prior half). M5 रेजतुः ; Cm.t as above (for जग्मतुः). G1 -मंडनौ (for -कुण्डलौ). D13 गजमास्थितौ. —For l. 2, Ś Ñ V1.2 B D8.12 subst. :

3605(A)* स्नाता दिव्याम्बरधराः शुभकुण्डलधारिणः ।

[B2.3 दिगंबरधराः . Ś D8.12 श्लक्ष्णाः (for शुभ-).]

—After l. 2, M2 ins. :

3605(B)* विभीषणादयश्चान्ये जग्मुस्ते शुभकुण्डलाः ।

—(l. 3) B2 D7.10.11 G2 M2 सर्व- (for वर-). D7.10.11 G2 -जुष्टाश्च; D13 -संपन्नौ; M2 -युक्ताश्च (for -सम्पन्ना). M1 प्रययुः (for ययुस्ताः). G1 -मंडनाः (for -कुण्डलाः). Ś D8.12 सर्वतस्ते वनौकसः ; Ñ V1.2 B चा(Ñ V1 B2 आ)सन्सर्वे वनौकसः ; D13 अन्योन्याविव भूषितौ (for the post. half). —After l. 3, Ś Ñ V1.2 B D8.12 ins. ; while G (ed.) ins. only l. 2 after 20 :

3605(C)* आरोहन्तु रथं शीघ्रमिति राम उवाच तान् ।
लक्ष्मणादीन्स्थितान्दृष्ट्वा आरूढो रथिनां वरः ।

[(l. 1) Ñ V2 B4 आरोहत; B1(also as in D12).3 आरोहध्वं; D12 आरुरोह (sic) (for आरोहन्तु). Ś1 D8.12 दीप्तम् ; Ś2 दिव्यम् (for शीघ्रम्). —(l. 2) Note hiatus between the two halves. V1 B4 रथिनं; G (ed.) रथे वै (for आरूढो).]

—(l. 4) D7 सीतां (for सीता). Ś Ñ V1.2 B D8.12 सुग्रीवो राक्षसेंद्रश्च (for the prior half). Ś Ñ V1.2 B D8.12 उत्सुकौ; D6 T2 आगताः (for उत्सुकाः).]

—After 20, D2–4 repeat 3601* (followed by 3604*) ; while D13 ins. :

3606* आरुरोह रथं दिव्यं भरतश्च महारथः ।
शत्रुघ्नश्च महातेजा आरुरोह रथोत्तमम् ।
लक्ष्मणश्च महातेजाः सुस्नातः समलंकृतः ।
आरुरोह रथं दिव्यं मणिकाञ्चनभूषितम् ।
मणिकाञ्चनचित्राभाः शिविकाश्च विभूषिताः । [5]
आरुरुहुस्ता मुदा युक्ता जानकीप्रमुखाः स्त्रियः ।
(hypm.)

21 V3 om. 21 (cf. v.l. 17). Ś Ñ V1.2 B1.3.4 D8.12 read 21–23 (B3 up to 22[c,d] only) after 30. D13 reads 21–23[b] before 36. —[a]) V2 D2.7.10.11 Ct च (for तु). —[b]) Ś D8.12 तु; Ñ V1.2 B3.4 ते; B1 D7.10.11.13 च (for ये). M2 नागराश्चैव संमताः . —After 21[a,b], B1 ins. 3610*. —[c]) Ś Ñ1 B1 D8.9.12 शत्रुघ्नं च (Ś1 D8 तु; B1 ते) (for पुरोहितं). D9 पुरस्कृत्वा. Ñ2 B4 शत्रुघ्नश्च महातेजाः ; V1.2 B2.3 D1–4.13 शत्रुघ्नं पुरतः कृत्वा; G (ed.) आयांतं राघवं श्रुत्वा. —[d]) Ś D8.12.13 मंत्रयित्वा सुनिश्चितं; Ñ V1.2 B पुरोहितमथाब्रुवन् ; D1–4.9 [अ]मंत्रयन्मंत्रकोविदाः . —After 21, Ś D6–8.10–13 S ins. :

3607* अशोको विजयश्चैव सुमन्त्रश्चैव संगताः ।

[T1 mostly damaged for the prior half. G3 सिद्धार्थश् (for सुमन्त्रश्). G1 संवृताः ; Cm.t as above (for संगताः). Ś D8.12.13 शत्रुघ्नविजयावुभौ; D7.10.11 सिद्धार्थश्च समाहिताः ; M1 damaged (for the post. half).]

—Then Ś D8.12.13 cont. :

3608* पुरोहितं समानीय इदं वचनमब्रुवन् ।

[Note hiatus between the two halves. Ś1 अब्रवीद् (sic).]

—After 21, D1–4.9 ins. :

3609* मतिमन्तौ महात्मानावशोकविजयौ तथा ।

[D1 मतिमंतं. D2 ह्यशोक- ; D3.9 विशोक- (for अशोक-). D9 तदा.]

22 For sequence in Ś Ñ V1.2 B1.3.4 D8.12.13, cf. v.l. 21. —[a]) Ś Ñ V B D8.12.13 भवंतो (for मन्त्रयन्). Ś D8.12 रामतुष्टयर्थं; B4 °शुद्धयर्थं; G1 आत्मवृद्धयर्थं (for रामवृद्धयर्थं). D1–4.9 क्षिप्रं (D2.3 ततो) रामस्य वृद्धयर्थं. ❀ Cm : मन्त्रयन् । मन्त्रयन्तः । ; Cg.t : मन्त्रयन् अमन्त्रयन् . ❀ —T2.3 om. (hapl. ?) 22[b,c]. —[b]) Ś Ñ1 B1.3.4 D2–4.6.8.12.13 T1 G1.2 M1 वृद्धयर्थं; D1 om. (hapl.) ; D9 सर्वस्य; G3 M2.3 ऋद्धयर्थं (for वृत्र्यर्थं). B2 नगरस्य च वृद्धये. —After 22[a,b], Ś Ñ V B2–4 D8.12 ins. ; while B1 ins. after 21[a,b] :

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

इति ते मन्त्रिणः सर्वे संदिश्य तु पुरोहितम् ।
नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २३

हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः ।
प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥ २४

जग्राह भरतो रश्मीञ्शत्रुघ्नश्छत्रमाददे ।
लक्ष्मणो व्यजनं तस्य मूर्ध्नि संपर्यवीजयत् ॥ २५

श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ।
अपरं चन्द्रसंकाशं राक्षसेन्द्रो विभीषणः ॥ २६

ऋषिसंघैस्तदाकाशे देवैश्च समरुद्गणैः ।
स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ २७

ततः शत्रुंजयं नाम कुञ्जरं पर्वतोपमम् ।
आरुरोह महातेजाः सुग्रीवो वानरेश्वरः ॥ २८

G. 6. 112. 27
B. 6. 128. 31
L. 6. 109. o

3610* यथावद्द्रव्यसंभारं विधिदृष्टमशेषतः ।

[Ñ$_2$ V1.2 B4 यथा च (for यथावद्). B1 अथाहरन्द्रव्यभारं (for the prior half). V3 damaged for दृष्टमशे.]
—^{c}) B1 सर्वानेव; B2 D1.2.4 सर्व एव; M3 °मेक- (for सर्वमेव). Ñ1 [अ]भिषेकार्थे. —^{d}) Ś Ñ V1.2 B1.3.4 D8.12 राज्या(Ñ2 illeg.)र्हस्य; B2 D1–4.9 तदर्ह(D1.3 °र्थ)स्य; G1 जयार्थं च (for जयार्हस्य). D13 जयार्थं च सहस्रिणः. —B3 om. 22^e–23. —^{e}) D1 T G2.3 M2 अर्हसि (for अर्हथ). ❀ Cv: अर्हथेति। गुरुषु बहुवचनम्।; Cm: महात्मनो रामस्याभिषेकार्थं यद्यत्तत्सर्वं मङ्गलपूर्वकं कर्तुमर्हथ। पूजायां बहुवचनम्।; so also Cg; Ct: कर्तुमर्हथेति भृत्यान्प्रत्युक्तिः. ❀ —^{f}) Ś Ñ V B4 D1–4.8.12 सर्व-; B1.2 सर्वं; M2 सद्यो (for यद्यत्). D1 -मांगल्य-; D4 -लक्षण- (for मङ्गल-). D9 (with hiatus) अभिषेकं समंत्रकं; D13 यन्मंगलमपूर्वकं.

23 For sequence in Ś Ñ V1.2 B1.4 D8.12.13, cf. v.l. 21. B3 om. 23 (cf. v.l. 22). —^{a}) Ś D8.13 [ए]तेः; D1–4.9 [ए]वं; D12 [ए]तन् (for ते). —^{b}) Ś D8.12.13 [अ]थ; Ñ V1.2 B1.4 [आ]र्यं; V3 B2 D6.7.10.11 M1 Ct च (for तु). B2 D10–12 Ct पुरोहितः. D1–4.9 रामंगल(D3 °दर्शन)कांक्षिणः; M2 योजयित्वा महात्मनः. —After 23^{ab}, D1–4.9 read 19–20; while D13 ins.:

3611* अवतीर्य रथाद्राम उपविश्य वरासने ।
मन्त्रिभिः कथयामास वानराणां पराक्रमम् ।

—B2 om. 23^c–26^b. D1–4.9 om. 23^{cd}. D13 reads 23^{cd} after 27. —^{c}) D13 च ययुस् (for निर्ययुस्). Ś D8.12 द्रष्टुं (for तूर्णं). —V3 damaged for 23^d.

24 B2 om. 24 (cf. v.l. 23). V3 om. 24^{ab}. Before 24, D13 reads 28–29. —^{ab}) T1 damaged for स्राक्षो रथ. Ñ1 D1.2.4.9 M5 ऐंद्रम्. Ś2 D12 इवानुगः; B3 D13 M2 °परः; M1 इ *** (for इवानघः). —^{c}) Ś Ñ2 V B1 D8.12 तैः सहा(Ñ2 B1 °मा)स्थाय (for रथमास्थाय). B3 पुनर्ययौ सहोत्थाय. —^{d}) D13 राघवो रथम्; M1 राघवः पुरम् (for रामो नगरम्). Ś Ñ V B1.3.4 D1–4.8.12 राघवो(D1.4 °मो वै) ज्वलि(Ñ1 लक्षि)तः श्रिया; D9 रामोर्कज्वलितं श्रिया.

25 B2 om. 25 (cf. v.l. 23). —^{a}) D3 G2 रश्मिम्. —^{b}) D12 T3 आदधे (for आददे). B4 छत्रं शत्रुघ्न आदधे. —Ñ2 illeg. for 25^{cd}. —^{c}) D1–4.9 गृहीत्वा; D13 चामरं (for लक्ष्मणो). G1 M1 व्यजने; Cr.m.g.t as in text (for व्यजनं). Ś Ñ1 V B1.3.4 D8.12 गृह्य; D1–4.9 मूर्ध्नि; D13 वीरः (for तस्य). —^{d}) D6 संपर्यवेद्यत् (sic); D7.10.11 संवीजयंस्त(D7 °यत्त)दा; T1 संपरिवीजयन्; G2 संपर्यवीजत; M2 संपरिवीजति; Cr.m.g as in text (for संपर्यवीजयत्). Ś Ñ1 V B1.3.4 D8.12 राघवं पर्यवीजयत्; D1.4 लक्ष्मणोधारयच्छुभं; D2.3 लक्ष्मणः परवीरहा; D9 लक्ष्मणोथ दधच्छुभं; D13 प्रतिजग्राह लक्ष्मणः.

26 B2 om. 26^{ab} (cf. v.l. 23). G (ed.) om. 26. —^{a}) M2 तु (for च). D13 वालं. —^{b}) D6.7.10.11 T G2.3 M3.5 Ct जग्राह(D10.11 Ct °गृहे) परि(D6 G2.3 M3 पुर)तः स्थितः(D7 °तं; M5 °तस्ततः); G1 M1 जग्राह हरिभिर्वृतः (M1 प्लवगाधिपः). —^{c}) D4 देव-; D3 चेंद्र- (for चन्द्र-). M1 damaged for संकाशं. —After 26^c, Ś D8.12 ins.:

3612* दिव्यं दृष्ट्वा महारथम् ।
आरुरोह महाबाहुः.

27 Ñ2 illeg. for 27^a. —^{a}) Ñ1 B4 D1.3.4 T1.2 G2 तथाकाशे; D2 अथा°; D13 तथा कामैर् (for तदाकाशे). B2 (with hiatus) आकाशे ऋषिसंघैश्च. —^{b}) G1 दैवतैः (for देवैश्च). —B4 om. 27^{cd}. —^{c}) Ś2 lacuna for स्य राम. M2 स्तूयमानैस्तु. —^{d}) B3 D2–4.9 M2 श्रूयते (for शुश्रुवे). Ś1 Ñ1 D1–3.8.9.12 मधुरो (for मधुर-). Ñ2 B3 D1.4 M1.2.5 -स्वनः; D2.3.9 स्वरः; Cr.m.g as in text (for -ध्वनिः). —After 27, D13 reads 23^{cd}.

28 L (ed.) om. 28. D13 reads 28–29 before 24. —^{a}) Ś Ñ V B1.3.4 D8.12 पश्चाच् (for ततः). V3 शत्रुंजयं; D2.4.8 शत्रुजयं. —^{b}) Ś2 lacuna for कुञ्ज. D4 पर्वतोत्तमं. —^{c}) Ś2 D8.12 महाबाहुः (for °तेजाः). D13 (with hiatus) रामाज्ञया आरुरोह. —^{d}) Ñ1 V2.3 B1 प्लवगोत्तमः; Ñ2 V1 B3.4 D2.3 M2 प्लव(D3 °वं)गेश्वरः; B2 M1 प्लवगाधिपः; D6 T2.3 वानराधिपः; D7.10.11.13 T1 G M3.5 प्लवगर्षभः (for वानरेश्वरः). —After 28, D3 ins.:

3613* तथैव रथमारुह्य प्रययौ रावणानुजः ।

While D13 ins. l. 1–3 only of 3605*.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 112. 28
B. 6. 128. 32
L. 6. 109. 30

नव नागसहस्राणि ययुरास्थाय वानराः ।
मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ २९
शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निस्वनैः ।
प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥ ३०
ददृशुस्ते समायान्तं राघवं सपुरःसरम् ।
विराजमानं वपुषा रथेनातिरथं तदा ॥ ३१
ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः ।
अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥ ३२
अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः ।
श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३३
स पुरोगामिभिस्तूर्यैस्तालस्वास्तिकपाणिभिः ।
प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥ ३४

29 V$_3$ om. 29^{ab}. D$_{13}$ reads 28–29 before 24. —^{a}) D$_9$ ततो; D$_{13}$ तथा; T$_{2.3}$ अथ; M$_2$ दश (for नव). G (ed.) नागश्रेष्ठ-; Ct as in text (for नव नाग-). —^{b}) Ñ V$_{1.2}$ B$_{1.4}$ M$_2$ (with hiatus) आरूढाः शेष-(Ñ$_1$ °ढा येषु; V$_2$ B$_1$ °ढास्ते च; M$_2$ °ढास्तत्र); G$_1$ M$_5$ ययुरारुह्य. B$_{2.3}$ D$_{1-4.9}$ (with hiatus except B$_3$ D$_3$) आ(B$_3$ D$_3$ चा)-रूढा वानरोत्तमाः(D$_2$ °रेश्वराः). —^{c}) T$_1$ G$_3$ मानुषान्वि-ग्रहान्कृत्वा. —^{d}) T$_1$ damaged for सर्वा. —After 29, D$_{13}$ ins.:

3614* हयमुख्यं तथा दिव्यं श्वेतकाञ्चनभूषितम् ।
मनोजवं महाकायमारुरोह विभीषणः ।
आरुह्य च पृथग्यानं हयानां हरिराक्षसाः ।
राजानश्च महात्मानः पौरजानपदास्तथा ।
गजाश्वरथसंकीर्णा पादातैर्मेदिनी वृता । [5]
भेरीपणवशङ्खादीन्वादयद्भिः सहस्रशः ।
गजवाजिसहस्रौघैः कम्पयन्ति स्म मेदिनीम् ।

30 V$_3$ om. 30. —^{a}) G$_1$ -वंश-; G$_2$ -चक्र-; M$_2$ -भेरी-; Cv.r.g.t as in text (for -शब्द-). D$_{13}$ -निनादैश्च. Ś Ñ V$_{1.2}$ B D$_{1-4.8.9.12}$ शंखभेरीनिनादैश्च(Ś$_2$ D$_{12}$ °देन). —^{b}) D$_{1-4.9}$ कुंजराणां (for दुन्दुभीनां). Ś Ñ$_2$ V$_{1.2}$ B D$_{1.3.6-9.12}$ निःस्वनैः. D$_{13}$ भेरीणां निःस्वनैः परैः. —^{c}) B$_2$ D$_{1-4.9.13}$ संप्रयातो(D$_{13}$ °ते) नरव्याघ्रस्(D$_{13}$ °घ्रे). —^{d}) Ś B$_1$ D$_{8.12}$ स्वां पुरीं; D$_{13}$ नगरीं. Ś Ñ V$_{1.2}$ B$_{1.3.4}$ D$_{8.12.13}$ परि(Ś V$_1$ D$_{8.12.13}$ संप्र)हर्षयन्; B$_2$ D$_2$ पुरुषर्षभः; D$_{1.4.9}$ पुरुषोत्तमः; D$_3$ प्लवगर्षभः; D$_6$ G$_1$ हेममालिनीं (for हर्म्य-मालिनीम्). —After 30, Ś Ñ V$_{1.2}$ B$_{1.3.4}$ D$_{8.12}$ read 21–23 (B$_3$ up to 22^{cd} only); while D$_3$ ins.:

3615* अशोको धर्मपालश्च विजयश्चैव बुद्धिमान् ।;

whereas D$_{13}$ ins.:

3616* नागरा निर्ययुर्हृष्टा रामदर्शनलालसाः ।

31 ^{a}) V$_3$ damaged for ददृशुस्ते स. D$_4$ पुरजनाः; M$_{1.2}$ तमा(M$_2$ °दा)यांतं (for समायान्तं). B$_3$ कर्तुमर्हथ दायांतं (sic). —^{b}) D$_9$ रामं सह- (for राघवं स-). V$_3$ B$_2$ सपुरःसराः. —After 31^{ab}, B$_2$ D$_{1-4}$ read 32^{cd}. —T$_1$ mostly damaged for 31^{cd}. —^{c}) Ś D$_{8.12}$ भ्राजमानं च; D$_{13}$ विद्योतमानं (for विराजमानं). D$_4$ पुरुषा (for वपुषा). —^{d}) D$_3$ स्वयं (for तदा). Ś Ñ V B$_{1.3.4}$ D$_{8.12.13}$ ज्वलंतमिव पावकं; B$_2$ राममादित्यवर्चसा; D$_{1.2.4.9}$ M$_1$ रथे(D$_9$ °स्थे)नादित्यवर्चे(D$_1$ °तेज)सा; D$_6$ T$_{2.3}$ रथेन रथिनां वरं.

32 ^{a}) Ś D$_3$ वंदयित्वा; D$_6$ दर्शयित्वा (for वर्धयित्वा). Ś Ñ V B D$_{3.12}$ M$_2$ राजानं; D$_{1-4.9.13}$ रामं तु (for काकुत्स्थं). —^{b}) Ś$_2$ D$_{3.12}$ प्रतिनंदितं(D$_3$ °तैः) (for °नन्दिताः). —V$_3$ B$_2$ repeat 32^{cd} after 33^{ab}. B$_2$ D$_{1-4}$ read 32^{cd} after 31^{ab}. —^{c}) M$_1$ damaged for अनु-जग्मुर्म. T$_1$ damaged from र्म up to तं in 35^a. —V$_3$ damaged from 32^d (first time) up to ज्ञाति (See Var.) in 33^b.

33 T$_1$ damaged for 33; V$_3$ damaged up to ज्ञाति in 33^b (for both, cf. v.l. 32). D$_9$ repeats 33^{ab} after 34^{ab}. —^{a}) Ñ$_1$ B$_{1.3}$ वैरैर्; Ñ$_2$ B$_4$ सर्वैर्; V$_1$ illeg.; V$_2$ om. (for चैव). Ś D$_{8.12}$ ब्राह्मणैर्वैश्च. D$_{13}$ बहुभिश्च महा-भागैर्. —^{b}) D$_3$ ततः; G$_2$ तदा (for तथा). Ś Ñ V B$_{1.3.4}$ D$_{8.12.13}$ ज्ञाति(V$_3$ damaged)भिः स्व(D$_{13}$ सु)जनैस्तथा (Ñ$_2$ °** ****[illeg.]); B$_2$ ज्ञातिप्रकृतिभिः सह. —After 33^{ab}, V$_3$ B$_2$ repeat 32^{cd}. —V$_3$ om. 33^c–34^b. —^{c}) Ś Ñ V$_{1.2}$ B$_{1.3.4}$ D$_{8.12}$ पूजितो; B$_2$ श्रिया वै; D$_{1.4.13}$ M$_2$ श्रियाभि- (for श्रिया वि-). —^{d}) D$_{13}$ नक्षत्रेण (for नक्षत्रैर्).

34 T$_1$ damaged for 34 (cf. v.l. 32). V$_3$ om. 34^{ab} (cf. v.l. 33). —^{a}) G$_1$ सूतैस् (for तूर्यैस्). Ś Ñ V$_{1.2}$ B D$_{8.12.13}$ आशीर्भि(Ś D$_8$ °शाभि)र्मधुराभिश्च; D$_{1-4.9}$ मधुराभाषिभिः पौरैस्; M$_2$ लाजाक्षतैश्चापि तथा. —^{b}) Ś Ñ V$_{1.2}$ B D$_{1-1.8.9.12.13}$ M$_2$ तथा; D$_6$ T$_{2.3}$ तालैः; D$_7$ स्नातः; Ct as in text (for ताल-). —After 34^{ab}, D$_9$ repeats 33^{ab}; while D$_{13}$ reads 37^{cd} (including 3619*). —D$_{13}$ om. 34^c–35^b. D$_9$ om. 34^{cd}. —^{c}) Ś$_2$ Ñ$_1$ V$_{1.2}$ B$_{1.3.4}$ D$_{1-4.8}$ T$_2$ प्रति-; Cg.t as in text (for प्रवि-). B$_3$ मधुरैर् (for मुदितैर्). —^{d}) D$_7$ मंगलाभि- (for मङ्गलानि). D$_{7.10.11}$ transp. ययौ and वृतः. Ś Ñ V B D$_{1-3.8.12}$ मंगलार्थं(B$_2$ मुदः सार्धं)मभिष्टुतः (Ś D$_{12}$ °ष्टुतैः; B$_2$ D$_{2.8}$ °ष्टुतैः; D$_1$ °ष्टवैः); D$_4$ मंगलं कामिभिः स्तवैः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अक्षतं जातरूपं च गावः कन्यास्तथा द्विजाः ।
नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥ ३५
सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे ।
वानराणां च तत्कर्म व्याचचक्षेऽथ मन्त्रिणाम् ।
श्रुत्वा च विस्मयं जग्मुरयोध्यापुरवासिनः ॥ ३६
द्युतिमानेतदाख्याय रामो वानरसंवृतः ।
हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह ॥ ३७

G. 6 112 41
B. 6. 128. 41
L. 6. 109. 44

35 T1 damaged up to तं in 35[a] (cf. v.l. 32). D13 om. 35[ab] (cf. v.l. 34). —[a]) Ś Ñ1 V1 B2.4 D1-3. 8.9.12 अक्षता. D9 -रूपैश् (for -रूपं). —[b]) V3 damaged from व: up to स्ता in [c]. D6 T2.3 द्विजास्तथा (by transp.); D7.10.11 G2 M1 सहद्विजाः. —M1 om. 35[c]-90. D13 reads 35[cd] and 12[cd] after 6.115.41. —[c]) B1 लाजा-; D4 तथा (for नरा). —T1 damaged for [d]. —[d]) Ś Ñ V B D2.4.8.12 स्थिताः; D1 [s]भवन् (for ययुः). D3 राघवं पर्युपस्थिताः; D13 राघवस्याग्रतो-भवन्; T2.3 राघवस्य पुरो ययुः.

36 M1 om. 36 (cf. v.l. 35). Before 36, D13 reads 21-23[b]. —[a]) D1 स रामः; D4 रामः स; M2 रामस्य (for च रामः). Ś Ñ V B2-4 D8.12 रामः सख्यं च (by transp.); B1 रामश्च सख्यं (by transp.). —[b]) Ś Ñ V B D3.8 हनूमतः(D3 °ति) (for [अ]निलात्मजे). D1.4.13 विक्रांते(D4.13 °क्रमं) च हनूमति; D2.9 विक्रांतं (D2 °तिं) च हनूमतः. —V3 om. (hapl.?) 36[c-f]. —[c]) D3 वानरेषु. D2 ततः कर्म; D4 च सत्कर्म (for च तत्कर्म). —After 36[c], T1 G3 M3.5 ins.:

3617* राक्षसानां च तद्बलम् ।
विभीषणस्य संयोगम् .

—[d]) Ś1 V2 D2.7.10-12 ह्याचचक्षे; T1.3 G M3.5 आचचक्षे. Ñ1 D2.3 स; B4 सु-; D1 स्व-; D4.6.7 T1 G M3 च (for ऽथ). Ś B2 D1-4.6.8.9 मंत्रिषु(D3.6 °णं); M2 मंत्रिणः (for मन्त्रिणाम्). D13 कथयामास मंत्रिणे. —D1-4.12 om. 36[ef]. —[e]) G2 M3 तु (for च). —After 36, Ś Ñ V1.2 B D6-11.13 T2.3 G1.2 M2 ins.; while D12 ins. after 36[cd]:

3618* वानराणां च तत्कर्म राक्षसानां च तद्बलम् ।

[cf. 36[c] and l. 1 of 3617*. D13 अमानुषं (for वानराणां). D13 om. first च (subm.). D9.13 तद्वधं (for तद्बलम्).]

37 M1 om. 37 (cf. v.l. 35). D13 om. 37[ab]. —[a]) D3 एवम् (for एतद्). Ś Ñ V B D8.12 एवं स (Ś2 B1-3 D12 सं-) कथयन्नेव. —[b]) B1 -वेष्टितः; B2 D10.12 -संयुतः (for -संवृतः). —D13 reads 37[cd] (including 3619*) after 34[ab]. V3 damaged from पु in 37[c] up to ला in l. 1 of 3619*. —[c]) D8.12 हर्ष- (for हृष्ट-). D1 -तुष्ट- (for -पुष्ट-). —[d]) V1 D7.10-12 G1.2 सः(for ह). Ñ2 B4 पुनरागतः; D1-4 अन्व(D1 सम)पद्यत; D9 अन्ववर्तत (for प्रविवेश ह). —After 37, Ś Ñ V B D8.12.13 ins.; while D1-4.9 ins. l. 17-19 only:

3619* पताकमालाभरणां सिक्तरथ्यान्तरापणाम् ।
पुष्पचित्ररथां रम्यां बालवृद्धनिरन्तराम् ।
हर्म्यप्रासादविवृतामुद्यानवनशोभिताम् ।
ऊचुस्तदा ता वै राममिदमभ्यन्तराः स्त्रियः ।
सभ्रातृणां सपुत्राणां तव दर्शनकाङ्क्षिणाम् । [5]
दिष्ट्या राजन्कृतो दैवैः प्रसादः पुरवासिनाम् ।
भृशं काकुत्स्थ कौसल्या त्वदर्थमभितप्यते ।
निर्विशेषं तदा सर्वं पुरे पुरनिवासिनः ।
असूर्यमिव खं राम हृतरत्न इवोदधिः ।
त्वया पुरमिदं हीनं विचन्द्रा शर्वरी यथा । [10]
अद्यायोध्या महाबाहो अयोध्या प्रतिभाति नः ।
परेषां प्रार्थ्यमानानां त्वयि संनिहिते हिते ।
चतुर्दश समाश्चेमाः शतानीव चतुर्दश ।
वर्षा हि नो व्यतिक्रान्तास्त्वयि राम वनं गते ।
ईदृशा मधुराः स्निग्धाः पथि शुश्राव राघवः । [15]
नरनारीप्रयुक्तास्ता वाचः प्रीतिनिदर्शनाः ।
आविद्धान्युत्तरीयाणि नरैस्तत्पुरवासिभिः ।
निहत्य रावणं शत्रुमयोध्यां पुनरागतः ।
इत्येवं वदतां तत्र नराणां श्रूयते ध्वनिः ।

[Ś1 om. l. 1-3. Ñ1 om. l. 1. V3 damaged up to ला in l. 1. —(l. 1) D13 पताका- (for पताक-). —V2 wrongly reads the post. half of l. 5 in place of the post. half of l. 1. Ś2 D8.12 तथा सिक्तांतरापथां; D13 तोरणैश्च विचित्रितां; L (ed.) सिक्तरथ्यां सतोरणां (for the post. half). —V3 om. l. 2. —(l. 2) L (ed.) -[आ]चित- (for -चित्र-). B1-3 -पथां (for -रथां). V2 B1.2 दिव्यां; D12 पुण्यां (for रम्यां). —For l. 2, D13 subst.:

3619(A)* चन्दनोशीरकर्पूरकुङ्कुमागुरुवासितैः ।
सलिलैः शीतलैश्चैव सिक्तरथ्याचतुष्पथाम् ।

—(l. 3) Ñ1 (marg. also as above) -विकृताम्; B4 -वृत्तां तां; D13 -विस्तृतां (for -विवृताम्). Ś2 D8.12 रत्नौघैश्च सुपूजितां; Ñ2 V1 B1.4 तथा (Ñ2 नाना-; B4 तदा) स्तंभसमुच्छ्रि(B4 °दि)तां; V2 B2.3 D13 तथान्यै(D13 °द्यै)श्च (B2 रथाश्वेन) सुसंवृतां (for the post. half). —(l. 4) D13 हर्षात् (for तदा). Ś Ñ1 D8.12 तु (D8 om. [subm.]) वै; V1 D13 तदा; V2 वै ता (by transp.); B1 [आ]गतं (for ता वै). B4 transp. तदा and ता वै. B2 स्तवै रम्यैर्; B3 दाशरथिम् (for ता वै रामम्). V3 B1.3 अभ्यंतर-; D12 आर्त्यंतराः (for अभ्यन्तराः). V3 -स्थिताः (for स्त्रियः). D13 इदं तत्र वरांगनाः (for the post. half). —V3 om. l. 5-6. —(l. 5) Ñ2 V2 B4 सभर्तॄणां (for सभ्रातॄणां). D13 सत्पुत्राणामपुत्राणां (for the prior half). B3

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 112. 0
B. 6. 128. 42
L. 6. 109. 0

ततो ह्यभ्युच्छ्रयन्पौराः पताकास्ते गृहे गृहे ।
ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ३८

पितुर्भवनमासाद्य प्रविश्य च महात्मनः ।
कौसल्यां च सुमित्रां च कैकेयीं चाभ्यवादयत् ॥ ३९

भवद- (for तव). —(l. 6) Ñ2 हि नः (for राजन्). D13 दिष्ट्या रामः कृतस्नानः (for the prior half). —After l. 6, D13 ins.:

3619(B)* प्रासादशिखरारूढाः पुरनार्यो दिदृक्षया ।
ववर्षुः पुष्पवर्षाणि रामे व्रीडासितेक्षणाः ।
काश्चिद्विपर्ययग्धृतवस्त्रभूषणा
विसृज्य चैकं(का) युगलेन चापरा ।
कृतैकपत्रश्रवणैकनूपुरा [5]
काचिद्वितीयं त्वपरा विलोचनम् ।
अश्नन्त्य एकास्तदयास्यसात्स्वा (sic)
अभ्युज्यमाना अकृतोपमज्जनाः ।
स्वपन्त्य उत्थाय निशम्य निःस्वनं
निपाययन्त्योऽर्भमपोह्य मातरः । [10]
लङ्काकाण्डे अयोध्याप्रवेशो नाम सर्गः ॥
नृत्यवादित्रगीतैश्च स्तुतिभिः स्वस्तिवाचकैः ।
नागरा निर्ययुर्हृष्टा रामदर्शनलालसाः । (= 3616*)
कलशं च पुरस्कृत्य तथा कन्याश्च सद्विजाः ।
दधिमत्स्यादिहस्ताश्च राघवस्याग्रतोऽभवन् ।
एवं पौरजनाः सर्वे हर्षनिर्भरमानसाः । [15]
प्रत्याहरन्ति मुदिता मङ्गलानि समन्ततः ।

—D13 om. l. 7 —st. 39. —(l. 7) V3 damaged from कु up to पं in l. 8. Ś1 D8 परि-; D12 अपि (for अभि-). G (ed.) अत्यतप्यत. —(l. 8) B3 तथा (for तदा). G (ed.) पुरे च पुरवासिनः (for the post. half). —(l. 9) Ñ1 B1 दिवसं (for इव खं). Ś2 Ñ2 -रत्नम् (sic) (for -रत्न). —(l. 10) V1.2 B1.4 तथा (for त्वया). Ñ2 B2.4 रजनी (for शर्वरी). Ñ1 V3 तथा. —(l. 11) Note hiatus between the two halves. D8 अयोध्या या (for अद्यायोध्या). V1 सनाथा; B1.3 (to avoid hiatus) चायोध्या (for अयोध्या). V2.3 B4 -पतिना त्वया (for प्रतिभाति नः). —V3 om. l. 12–15. —(l. 12) Ś B2 D8.12 प्रार्थमानानां (sic). Ñ1 स्थिते (for हिते). —(l. 13) Ś1 D8 हीमाश्; B4 ह्येताः (for चेमाः). Ñ2 illeg. for the post. half. Ñ1 V2 च (for [इ]व). Ś D8.12 चतुर्दश शतानि च (for the post. half). —(l. 14) G (ed.) वसतां (for वर्षा हि). Ś D8.12 ये (for नो). Ñ V2 B4 रामे (for राम). B4 वने (for वनं). D8 प्रवर्तेत (for वनं गते). —Ñ1 om. l. 15. —(l. 15) V2 B2–4 ईं(B2 स)दृशीर्; B1 तादृशा; D8 इत्येवं; L (ed.) ईदृश- (for ईदृशा). Ś D8.12 विशुश्राव स राघवः (for the post. half). —(l. 16) Ś D8 तु; D12 या (for ता). —G (ed.) om. l. 17–19. Ñ1 om. l. 17–18. —(l. 17) Ñ2 illeg. for the post. half. Ś D8.12 निर्गत्य; V2 B4 नरैश्च; D4 जनैस्तत्- (for नरैस्तत्-). —V B1.3.4 om. from l. 18 up to 38b. —(l. 18) D1 पुनराविशत्. —Ñ1 reads l. 19 in marg. —(l. 19) D1.4.9 शुश्रुवे (for श्रूयते). D4 स्वनः (for ध्वनिः). D9 अयोध्यापुरमागतः (for the post. half).] —After 37, M2 ins.:

3620* समुच्छ्रितपताकां तां तोरणैः समलंकृताम् ।

38 D13 M1 om. 38 (cf. v.l. 3619* and 35 respy.). Ś Ñ V B D1–4.8.9.12 om. 38ab (for V B1.3.4, cf. v.l. 3619*). —a) ❀ Cg: अभ्युच्छ्रयन् अभ्युदश्राययन्, उन्नम्य स्थापितवन्तः।; Ct: अभ्युच्छ्रयन् अभ्युदश्रयन्. ❀ —b) D6.7.10.11 T3 G2 च (for ते). D11 om. (hapl.) second गृहे. —c) T3 इक्ष्वाक- (sic); Cg as in text (for ऐक्ष्वाक-). D6 पूर्वं; G2 M5 राम (for रम्यम्). Ś Ñ1 D1.2.4.8.9 इक्ष्वाकुव्युषितां रम्यां; Ñ2 V B D3.12 इक्ष्वाक्व(V2.3 ऐक्ष्वाका)ध्युषितां रम्यां. —d) Ś Ñ2 V1 D1.3.4.8.9.12 प्रविष्टो(Ñ2 V1 °यातो) मनुजर्षभः(D9 °जाधिपः); Ñ1 (marg. also as in Ś) V2.3 B D6 प्रयाते मनुज(D6 पुरुष)र्षभे; D2 प्रतस्थे मनुजेश्वरः. —For 38, M2 subst.:

3621* इक्ष्वाकुव्युषितां रम्यां श्रीमतीं द्वारतोरणाम् ।
स नक्षत्रैरिवाकाशं पताकैस्तु गृहे गृहे ।
प्रविवेश पुरं रम्यं द्योतयन्तो(sic) दिशो दश ।

—Then M2 cont.:

3622* आसाद्य रत्नसंपूर्णं प्रविश्य रघुनन्दनः ।

—After 38, Ñ2 B2.4 ins. an addl. colophon. [*Kāṇḍa name*: Ñ2 B4 लंकाकांडे. —*Sarga name*: Ñ2 B2.4 अयोध्याप्रवेशः. —*Sarga no.* (figures, words or both): B2.4 om.; Ñ2 117.]

39 D13 M1 om. 39 (cf. v.l. 3619* and 35 respy.). D6.7.10.11 T2.3 G2 M3 transp. 39 and 40. —a) D2 वचनम् (for भवनम्). —b) D6.7.10.11 G1.2 Ct प्रवेश्य; Cg as in text (for प्रविश्य). D1–4 सु- (for च). D1–4.9 महायशाः; M2 °द्युतिः (for महात्मनः). Ś Ñ V B D8.12 प्रविवेश महायशाः(Ñ2[*sup. lin.* also] °तपाः; B1 °रथः). —G (ed.) om. 39cd. —c) Ñ2 स कैकेयीं (for सुमित्रां च). —d) Ñ2 सुमित्रां (for कैकेयीं). D7 अभ्यवादयत्; D10 T2.3 M3 Cm.g चा(D10 अ)भिवाद्य च; D11 Ct अभिवादय; G2.3 चाभिवादयन्. ❀ Cv: पितुर्भवनमित्यादि। महात्मनः पितुर्भवनमासाद्य कौसल्यां च सुमित्रां च कैकेयीं च प्रवेश्याभिवादयन्नुवाचेति पूर्वेण संबंधः. ❀ —After 39, Ś Ñ V B1–3(repeats after 40).4 D1–4.8.9.12 ins., while G (ed.) ins. after 39ab (owing to om.):

3623* मूर्धन्याघ्राय कौसल्या तावुभौ रामलक्ष्मणौ ।
अङ्के सीतां समारोप्य शोकमात्मगतं जहौ ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अथाब्रवीद्राजपुत्रो भरतं धर्मिणां वरम् ।
अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४०
यच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् ।
मुक्तावैदूर्यसंकीर्णं सुग्रीवस्य निवेदय ॥ ४१
तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः ।
पाणौ गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥ ४२

G. 6. 112. 56
B. 6. 128. 46
L. 6. 109. 61

[D4 reads l. 1 twice. —(l. 1) Ś Ñ1 B1.3 (second time) D3.8.12 मूर्ध्न्युपाघ्राय; D9 शिर आघ्राय (for मूर्ध्न्याघ्राय). D4 (first time) सुमित्रा वाभ्यवादयत् (for the post. half). —(l. 2) V3 B1.3 (both times) अथारोप्य. Ñ2 आत्मभवं; V B3 (first time) चैवात्मजं (for आत्मगतं). B4 शोकमात्मजमाजहौ; D1-4.9 बाष्पमा(D4 °सा)नंदहर्षजं (for the post. half).]

—Thereafter, B2.3 (after the first occurrence) cont. a passage relegated to App. I (No. 74); while D1-4.9 cont.:

3624* मुमोच परमप्रीता प्रहृष्टेनान्तरात्मना ।

40 M1 om. 40 (cf. v.l. 35). D6.7.10.11 T2.3 G2 M3 transp. 39 and 40. —[a]) B2 तथा; D9 T2.3 तदा; Cm.g as in text (for अथ). Ś Ñ V2.3 B1.2.4 D2.8 राजपुत्रं; D1.4.9.13 तदा(D9 °था) रामो; D6 T2.3 राजसुतं; T1 M3.5 °सुतो (for राजपुत्रो). D3 अब्रवीद्राजपुत्रोथ. —[b]) Ś Ñ V B D1.8.12 धर्मचारिणं(B3 °वत्सलं); D3.6 T3 धर्मिणां वरः; M2 भ्रातृवत्सलं (for धर्मिणां वरम्). —[c]) Ś Ñ V B D8.12 -संहितया (for -[उ]पहितया). —[d]) T2.3 राघवो (for मधुरं). Ś Ñ V B1.3.4 D8.12 धर्महेत्वर्थ(Ś2 °तुत्व)युक्तया; B2 धर्महेतुः सदुक्तया; D1.4.9 वचनं चेदमुत्तमं(D9 °मब्रवीत्); D2.3 वचनं हीद(D3 हित)मर्थवत् (D3 °वित्); D13 (with hiatus) इदं वचनमुत्तमं. —After 40, B3 repeats 3623*.

41 M1 om. 41 (cf. v.l. 35). —[a]) D10.11 तच्च. Ñ V1.2 B तद् (for मद्-). D1-3.9 यदेतद्; D4.13 मदीयं (for यच्च मद्-). Ñ1 B4 भवन- (for -भवनं). D1.2.4.9 मुख्यं (for श्रेष्ठं). Ś D8.12 यदेतदुक्तमश्रेष्ठं(D12 °गेहं) मे; M2 यदुत्तमं तद्भवनं. ❀ Cv: यच्च मद्भवनं श्रेष्ठमिति सुग्रीवस्य निवेदयेति च पाठः. ❀ —D3 transp. 41[b] and 41[a]. —[b]) V1 B1 D4.13 अशोक- (for साशोक-). D4 om. (hapl.?); D13 -भवनं (for -वनिकं). M2 शुभं (for महत्). D9 कोशागारमनुत्तमं. —[c]) D1-3.6.7.9.10 T G M2.3 -वैडूर्य-. D9 -संयुक्तं; T2 M5 -संकाशं (for -संकीर्णं). Ś Ñ V B2-4 D8.12 वैडू(V3 B2-4 °दू)र्यकनकाकी(V3 B2-4 °स्ती)र्णं. —[d]) D6.7.10.11 G2 M3 सुग्रीवाय. T1 G2.3 M5 निदर्शय (for निवेदय). Ś Ñ V B D1-3.8.9.12 M2 सुग्रीवस्तत्र मोदतां(Ñ1 V B3.4 D2.3 °तु; B2 °ते). —For 41[cd], D4.13 subst.:

3625* मुक्तावैदूर्यसंछन्नवीरप्रख्यातमावृतम् ।
सुग्रीवराक्षसेन्द्राभ्यां सामात्याभ्यां निवेदय ।

[(l. 1) D4 मुक्तावैदूर्यसंकीर्णं (for the prior half) and आकृतिं (sic) (for आवृतम्).]

—After 41, Ś Ñ V B D8.12 ins.:

3626* यच्चैतत्सुमहद्दिव्यमुपस्थानगृहं महत् ।
विभीषणाय तत्सौम्य दीयतां सुधया सितम् ।
तथैव वानरेन्द्राणां यथाक्रमविहारिणाम् ।
दीयतां क्षिप्रमावासो यथेप्सितमरिंदम ।

[V3 om. l. 1. —(l. 1) Ś1 यश्च (sic). B1.3 तत् (for [ए]तत्). Ś1 Ñ1 D8 उपस्थानं. Ś D3.12 -गतं (for -गृहं). V1 B1 शुभं (for महत्). —(l. 2) D12 सर्वं प्रदेहि (for सौम्य दीयतां). V3 damaged; G (ed.) सुविभूषितं (for सुधया सितम्). —After l. 3, Ś D8.12 ins.:

3626(A)* शुक्लारवाटिकां दिव्यां फलपुष्पैश्च शोभिताम् ।
अङ्गदप्रमुखादीनां शुभान्यायतनानि च ।
[(l. 2) D12 -प्रमुखानां च.]

—(l. 4) B2 एतेषां; B4 आवासं (sic) (for आवासो). Ñ2 V1 B3 दीयतां क्षिप्रमावासा (for the prior half). Ś Ñ2 D8.12 -[उ]चितम् (for -[ई]प्सितम्). B2 सुधाभिः सितमंदिरं (for the post. half).];

while D2.9 ins.:

3627* नैर्ऋतेन्द्राय परमं जाम्बवत्प्रमुखाय च ।
हरिमुख्याय सर्वेभ्यो वानरेभ्यः पृथक्पृथक् ।
शयनासनपानादियुक्तानि भवनानि च ।
वृक्षोदकस्त्रियोपेतान्यावर्जितवसूनि च ।

[(l. 2) D2 -वृंदाय (for -मुख्याय). —(l. 4) D2 धृताः कपि- (sic) (for वृक्षोदक-).]

—Thereafter D2 cont.:

3628* दीपव्यजनहस्ताश्च दासदास्यश्च संगताः ।
गायना नर्तकाश्चैव कुर्वन्त्येते सुसंमदम् ।

—After 41, M2 ins.:

3629* तस्योपसदृशं चान्यद्गृहं काञ्चनकुट्टिमम् ।
तत्र राक्षसराजोऽयं शत्रुघ्न विनिवेश्यताम् ।
अङ्गदाय प्रदातव्यं गृहं वज्रपुरस्कृतम् ।
नलनीलगवाक्षाणां रम्भस्य पवनस्य च ।
सुषेणकुमुदानां च तथा द्विविदमैन्दयोः । [5]
हनूमत्प्रमुखानां च यूथपानां महात्मनाम् ।
ददस्व सुमहाबाहो गृहाणि विविधानि च ।
मम वाभ्यधिकं स्नेहं गौरवं चादरं महत् ।
तत्कृतं मम सर्वं स्याद्यत्कृतं हरिरक्षसाम् ।

42 M1 om. 42 (cf. v.l. 35). D9 om. 42[ab].

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

G. 6. 112. 57
B. 6. 128. 47
L. 6. 109. 62

ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च ।
गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥ ४३
उवाच च महातेजाः सुग्रीवं राघवानुजः ।
अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥ ४४
सौवर्णान्वानरेन्द्राणां चतुर्णां चतुरो घटान् ।
ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥ ४५
यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् ।
पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥ ४६

T1 damaged for 42[a]. —[a]) Ñ2 om. तस्य. —[c]) B3 D7.10.11.13 G2 हस्ते (for पाणौ). —[d]) Ś1 Ñ V B D8 मह(D8 °रु)दूहं; Ś2 D12 महद्गलं; D6 स्वमालयं; D13 M2 गृहोत्तमं; G2 तदा° (for तमालयम्). D1–4.9 प्रावेशयत तद्गृहं. —After 42, Ś Ñ V B D8.12 ins.:

3630* विभीषणं तथा वीरो वानरानपरांस्तथा ।;

while M2 ins.:

3631* शत्रुघ्नो विनयोपेतो राक्षसेन्द्रं विभीषणम् ।
गृहीत्वा प्रविवेशाथ द्वितीयं भवनं शुभम् ।
अङ्गदं च महाबाहुं तथान्यानृक्षवानरान् ।

43 M1 om. 43 (cf. v.l. 35). —[a]) D4.13 ततः कांचनदीपांश्च(D13 °साभ-). —[b]) V2 ह (for च). —[c]) D4 तत्र (for क्षिप्रं). Ś D8.12 प्राविशच्छीघ्रं; Ñ V B G(ed.) प्राविशन्शीघ्रं(G[ed.]°घ्राः); D1–3.9 प्राविशंस्तत्र (for विविशुः क्षिप्रं). —[d]) V1 B1 D13 प्रदे(V1 °वे)शिताः (for प्रचोदिताः). Ś D8.12 शत्रुघ्नः संप्रचोदितः; D1–3.9 स्त्रियो भरतनो(D9 °चो)दिताः; D4 क्षिप्रं भरतदेशिताः. —For 43, M2 subst.:

3632* ततस्तैलप्रदीप्तानि पर्यङ्कविमलानि च ।
शतं शतं च दीपानामेकैकस्य प्रबोधयत् ।

—Then M2 cont.:

3633* वारमुख्या वरा वेश्याः सहस्रैकं न्यवेशयत् ।
सूतमागधबन्दीभिः संगीतकमनोहरैः ।
नृत्तं च सविलासं च कामयन्तीव संगमम् ।
—L (ed.) om. l. 7–8. —(l. 7) Ñ1 मुक्तम् (for त्यक्तम्). —(l. 8) Ñ1 D1–4.8 रावणं मधुरं and विभीषणः (for रावणोऽमधुरं and विभीषणम् respy.). —D1–3 om. l. 9–10. —(l. 9) D4 -कंपो (for -कोपो). Ś1 D12 इति तस्य वचः श्रुत्वा महात्मा स विभीषणः. —For l. 11–12, cf. 6.10.15. —(l. 11) Ś1 D12 हित-; Ñ1 ह्यनु- (for ह्यर्थ-). Ñ2 V3 B D9 निशाचर (for दशानन). —(l. 12) Ñ2 V1.3 B D9 नरा मूढाः (for दुरात्मानः). Ñ1 प्रगृह्णंति महात्मानः (for the prior half). —(l. 13) Ś1 D8.12 गुणं (for गुणांस्). L (ed.) सद्यो (for तस्य). D1 श्रीरामस्य (for राघवस्य). —(l. 14) Ñ1 राक्षसेंद्रे तु; D1.2.8 धर्ममेवैतन्; L (ed.) राक्षसेंद्रस्य (for राक्षसेन्द्रैतन्). D8 मुदा (for मया). D3 उदीरितं (for उदाहृतम्). —(l. 15) Ś1 D12 यदि नैव; D3 यदि नात्म-; D8 यद्धितार्थ- (for यदि नार्थ-). D4 मन्यसे त्वं प्रियं वचः (for the post. half). —(l. 16) Ś1 D2 मंत्रज्ञत्वान् (for मन्त्रं ज्ञात्वा). —D4 om. l. 17. —(l. 17) D1 वाच्यं (for वाक्यं). D1.2.8 राक्षसैश्च (for राक्षसेन्द्र). D2.8 महाबलैः. —(l. 18) D1 प्रीति-; L (ed.) इह (for इति). D1 transp. तस्मिन् and काले. —(l. 19) Ñ1 D8 संवादं नापि; D1 संवादं चापि; D3 संवादो नापि; D4 विवादो नापि; L (ed.) संवादे नापि (for विरोधं जहि). —After l. 19, Ś1 D12 ins.:

2* मया तव हितं वाक्यं राक्षसैश्च महाबलैः।

[Cf. l. 17. D12 राक्षसेंद्र महाबल (for the post. half).]

—D2 reads l. 20–21 in marg. —(l. 20) Ñ1 D8 आप्तैर्; D4 प्राप्त- (for प्राप्तैर्). Ñ1 [आ]त्मा; L (ed.) यैर् (for यो). Ś1 D12 तैर्मन्यते (for यो मन्यते). D2 हिते. —(l. 21) D1 राजन्! (for राजा). D2 नीतिपरः (for दशग्रीवः). D2 नित्योपि वा; D3 °दितो; D4 नित्ये स्थितो; D8 नित्यस्थितो (for नित्योत्थितो). D3 भवान्. —(l. 22) D4 ततो (for तदा). Ś1 -तलं (for -तले). —After l. 22, Ś1 Ñ1 D12 ins.:

3* उक्तवाक्ये दशग्रीवे जातकोपे विभीषणे।

[L (ed.) दशग्रीवो जातकोपो.]

—(l. 23) Ś1 D12 संज्ञापयामास; Ñ1 चाज्ञा°; D1.2.8 त्वाज्ञा°; (for तं ज्ञा°). —(l. 24) Ś1 D12 अयं मत्तः; D2 राज्याश्रम- (for राज्यान्मम). —(l. 25) Ś1 D1.12 उक्ते (for उक्तस्). D3 तदा (for ततो). —(l. 26) D8 om. from the post. half up

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

न शक्यं भवता स्थातुं गच्छ या ते गतिर्मता।
क्रुद्धस्ते रावणो राजा राक्षसाश्च महाबलाः।
प्रहस्तस्य वचः श्रुत्वा रावणं रावणानुजः।
अब्रवीत्परुषं वाक्यं भीमकर्मा विभीषणः। [30]
निर्गमिष्याम्यहं राजन्यदिदं तव सुप्रियम्।
अप्रमादश्च लङ्कायां कर्तव्यो राक्षसेषु च।
अथवा किं करिष्यन्ति राक्षसा नगरी च ते।
रक्ष स्वात्मानमेव त्वं वानरा हि महाबलाः।
क्षिप्त्वा शृङ्गाणि शतशः पादपांश्च शिलायुधाः। [35]
लङ्कां संपूरयिष्यन्ति सप्राकारां सतोरणाम्।

6

After 6.11.1^{ab}, Ś $D_{3.4.12}$ ins.; $\tilde{N}_1$ $D_{1.2.8}$ ins. l. 1–6 only after 6.11.1^{ab}:

क्रोधसंरक्तनयनं ससंध्यमिव तोयदम्।
तरङ्गकुटिलां लोलां भृकुटीं भृशदारुणाम्।
कृत्वासीनं निरीक्षन्तं प्रासादाग्रममर्षणम्।
अभिवाद्य ततो भूमौ क्रोधपर्याकुलेक्षणः।
चतुर्भिः सचिवैः सार्धं निश्चक्राम विभीषणः। [5]
स मातरं पुनर्दृष्ट्वा तत्सर्वं विनिवेदितुम्।
आजगाम मुहूर्तेन जननीमवलोककः।

संप्रविश्य महाप्राज्ञः सप्तकक्ष्यं महागृहम्।
हस्त्यश्वरथसंपूर्णं नानायोधसमाकुलम्।
परश्वधसमाकीर्णं चापपाणिविभूषितम्। [10]
दिव्यरत्नसमाकीर्णं प्रासादशतशोभितम्।
नित्यं बर्हिणसंघुष्टं प्रमदाजनसंकुलम्।
पुण्याहरवघोषेण सर्वतः प्रतिनादितम्।
दीप्यमानं श्रिया जुष्टं यथा वै वैष्णवं पदम्।
दीयतां याच्यतां चेति श्रूयमाणमहास्वनम्। [15]
पुरंदरगृहप्रख्यं कुबेरसदनोपमम्।
आवृतं कल्पवृक्षैश्च समन्तादुपशोभितम्।
पुंनागबकुलाकीर्णं कदलीखण्डमण्डितम्।
तथा कलापिबहुलं नानापक्षिभिरावृतम्।
सर्वदोषविनिर्मुक्तं गृहैः काञ्चनवेदिभिः। [20]
स प्रविश्य महाप्राज्ञो राक्षसेन्द्रो विभीषणः।
अनेकैर्वर्षवरकैः स्थविरैः सर्वतो वृतम्।
जटावल्कलसंवीतैर्वेत्रजर्जरपाणिभिः।
पदाहतिसुसंविग्नो निश्वसन्नुरगो यथा।
बाष्पव्याकुलताम्राक्षः स्खलमानः क्वचित्क्वचित्। [25]
अवष्टम्भेन हि स्वेन मन्युना च परिप्लुतः।
शोकसागरमध्यस्थो नानादोषावमानितः।
भ्रात्रा ज्येष्ठेन पापेन क्रूरेण हतबुद्धिना।

---

to the prior half of l. 27. $\tilde{N}_1$ कनीयसं (for यवीयसम्). —(l. 27) D_8 मतिर्मम (for गतिर्मता). —(l. 28) D_1 ते (for च). D_4 राक्षसश्च महाबलः (for the post. half). —(l. 30) $\tilde{N}_1$ परमं (for परुषं). —(l. 31) $D_{3.8}$ यदि (for यद्). —(l. 32) $D_{3.4}$ अप्रमादस्तु; D_8 प्रसादश्चापि (for अप्रमादश्च). D_1 लंकायाः. $Ś_1$ $\tilde{N}_1$ D_{12} राक्षसेश्वर (for राक्षसेषु च). —(l. 33) $D_{2.8}$ नगरीं. —(l. 34) D_4 एवं (for एव). $Ś_1$ D_{12} [अ]थ (for त्वं). —(l. 35) D_4 शिलायुधान् (for शिलायुधाः). —(l. 36) $Ś_1$ $D_{2.8.12}$ संचूर्णयिष्यंति; $\tilde{N}_1$ संपूर्णयिष्यंति; D_8 संपूरयिष्यामि.

6

(l. 1) D_3 ससांध्यम् (for ससंध्यम्). —(l. 2) $\tilde{N}_1$ भृकुटीं तरंगकुटिलां (hypm.) (for the prior half). $Ś_2$ भ्रुकुटीं; $\tilde{N}_1$ लोलां च; $D_{2.4}$ भ्रु(D_4 भृ)कुटिं. —(l. 3) D_4 अमर्षिणं (for अमर्षणम्). —$\tilde{N}_1$ reads twice l. 4–5. —$D_{3.4}$ om. l. 6. —(l. 6) L (ed.) द्रष्टुं (for दृष्ट्वा). $\tilde{N}_1$ $D_{1.2.8}$ विनिवेद्य च (D_2 तत्) (for °वेदितुम्). —(l. 7) D_3 अवलोकयन् (for °लोककः). —(l. 8) $Ś_2$ $D_{3.12}$ स (for सं-). $Ś_1$ महाप्रज्ञः. D_4 सप्तकक्ष्यं. D_3 सप्तकक्षां महाबलः (for the post. half). —(l. 9) D_3 -संपूर्णां. D_3 -समाकुलां. —After l. 9, $D_{3.4}$ ins.:

1* वृतां नैर्ऋतशार्दूलैर्गदामुद्गरपाणिभिः।
शक्त्यृष्टिपाशबहुलां ध्वजतोमरसंकुलाम्।
चर्मवर्मसमाकीर्णां प्रासशूलसमाकुलाम्।

[(l. 1) D_4 वृतं (for वृतां). —(l. 2) D_4 -बहुलं. D_4 ध्वजतोरणसंकुलं (for the post. half). —D_4 om. l. 3.] —D_4 om. l. 10. —(l. 10) D_3 परश्वधायुधाकीर्णां चापबाण-विभूषितां. —After l. 10, D_3 ins.:

2* सप्तकक्षां प्रविश्यैव ददर्श भवनं महत्।
पाण्डुराभ्रप्रतीकाशं कैलासशिखरोपमम्।

—D_{12} om. l. 11. —(l. 11) D_3 दीपरत्न-; D_4 हर्म्य धर्म-(for दिव्यरत्न-). —(l. 12) D_3 नित्य- (for नित्यं). D_4 प्रासा-दशत- (for प्रमदाजन-). —(l. 13) D_4 -वाक्य- (for -रव-). —(l. 14) D_4 पुष्टं (for जुष्टं). —(l. 15) D_3 भुज्यतामेभिः श्रूयमाणं (for याच्यतां चेति श्रूयमाण-). —(l. 16) D_3 -भवनोपमं. —(l. 17) $D_{3.4}$ तु (for च). —(l. 18) D_4 -स्तंभ-; D_{12} -पंड- (for -खण्ड-). —After l. 18, $Ś_2$ erroneously repeats l. 12, 10, दिव्यरत्न of l. 11 and l. 13–18. —(l. 19) L (ed.) दीर्घं (for तथा). $D_{3.4}$ दीर्घिकाभामिर्वं (D_4 °मिश्र ब)हुलं (for the prior half). —(l. 20) $D_{3.4}$ कांचनवेदिकैः. —(l. 21) D_4 सं- (for स). $Ś_1$ महाप्रज्ञो; D_4 °प्राज्ञै (for °प्राज्ञो). D_4 विभीषणः (here and below). —(l. 22) $D_{3.4}$ अनेकवर्षशतकैः (for the prior half). —(l. 23) $Ś_1$ -गूर्जर-; $Ś_2$ $D_{3.12}$ -झर्झर- (for -जर्जर-). —(l. 24) $Ś_2$ D_{12} पादाहतिसु-; D_3 पादताडन-; D_4 पादेन हत-. Ś D_{12} निःश्वसन्. —(l. 25) D_3 बाष्पाकुलित-. D_3 लंबमानः; D_4 वलमानः (for स्खलमानः). —(l. 26) $D_{3.4}$ L (ed.) अविषह्येन दुःखेन(L [ed.] तु स्वेन) (for the prior half). $D_{3.12}$ प्रत्युवाच (for मन्युना च). —(l. 27) $D_{3.4}$ नानादोष(D_3 मानार्हः स)विमानितः (for the post. half). —(l. 28) D_3 क्रूरेण (for पापेन). D_4 भ्रात्रा क्रूरेण ज्येष्ठेन (for the prior half). $D_{3.4}$ पापेन (for क्रूरेण). —(l. 29) D_3 स ददर्श ततो

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ददर्श मातरं तत्र निर्मलां जाह्नवीमिव ।
संवीतशुक्लवसनां हंसगद्गदभाषिणीम् । [30]
वरासनगतां देवीं भूषणैरुपशोभिताम् ।
सर्वलक्षणसंपूर्णां जननीमवलोक्य ताम् ।
पादयोर्न्यपतद्दूराच्छिन्नमूल इव द्रुमः ।
उद्भृत्य बाहू विपुलौ धर्मात्मा स विभीषणः ।
तमार्तरूपं दृष्ट्वैव केकसी जातविस्मया । [35]
स्वाङ्कमारोपयामास विलपन्तमचेतनम् ।
मूर्ध्नि चैनमुपाघ्राय इदमाह शुचिस्मिता ।
किमर्थं त्वं नरश्रेष्ठ पूर्णचन्द्रनिभानन ।
पद्मपत्रविशालाक्ष गजविक्रान्तगामिक ।
दुन्दुभिस्वननिर्घोष मत्तवारणवारण । [40]
धर्मबुद्धे महाप्राज्ञ केनासि त्वं विमानितः ।
ब्रूहि धर्मसमाचार पितुर्वृत्तव्रते स्थितः ।
पद्मयोनिकुले जातः स त्वं केनासि दुर्मनाः ।
ब्रूहि कार्यं विशालाक्ष भयं कस्मादुपागतम् ।
महेश्वरात्सवित्रोर्वा इन्द्राद्वापि पितामहात् । [45]
प्रेतराजाधिपाद्वापि कुबेराद्वापि बुद्धिमन् ।
सर्वदेवसमूहाद्वा सर्वमाख्यातुमर्हसि ।
अथवा कोसलेन्द्राद्वा रामान्नयविशारदात् ।
यस्यानीता च सा देवी सीता सुरसुतोपमा ।

एवमुक्तः स मात्रा तु राक्षसेन्द्रो विभीषणः । [50]
आख्यातुमुपचक्राम यथावृत्तं तु राक्षसात् ।
भयगद्गदया वाचा ह्रिया किंचिदधोमुखः ।
संस्तभ्य च तथात्मानं धैर्यबुद्ध्या निवेद्य च ।
पञ्चेन्द्रियग्रहैर्युक्तं संस्तभ्य मनसा गिरम् ।
स वक्तुमुपचक्राम जनन्यै सूनृतं वचः । [55]
शृणु मातर्यथा वाच्यं यद्वाक्यं हितनिष्ठुरम् ।
रावणस्य महाभागे मत्रकालविनिर्णये ।
उक्तः स तु मया देवी यथा सीता प्रदीयताम् ।
पादौ तस्याथ संगृह्य यथावदभिवाद्य च ।
रामेण तु महाबाहो न वैरं कर्तुमर्हसि । [60]
अन्यच्च शृणु मे राजन्यथा वक्ष्यामि सुव्रत ।
मारीचो येन निहतः कबन्धश्च महाबलः ।
विराधश्च महातेजाः खरश्च सगणो हतः ।
वाली येन हतो वीरः सप्त तालाश्च भेदिताः ।
विरूपा च कृता येन भगिनी रावणस्य सा । [65]
एवंविधानि कार्याणि श्रूयन्ते यस्य रावण ।
तस्य मुञ्च महाबाहो पत्नीं रामस्य धीमतः ।
एवमुक्तो मया देवि क्रोधेन कलुषीकृतः ।
धिग्धिगित्येवमुक्त्वा मां निर्भर्त्स्य च पुनः पुनः ।
ताडितोऽस्मि सभामध्ये पादेनाशनिवर्चसा । [70]

मातां; D4 मातरं स ददर्शाथ (for the prior half). —(l. 30) D3.4 शुक्लसंवीतवसनां हंसशुक्लशिरोरुहां (D4 सगद्गदप्रभाषिणीं). —(l. 32) L (ed.) -संपन्नां (for -संपूर्णां). —After the prior half of l. 32, D3 ins. :

3* सावित्रीमिव रूपिणीम् ।
चिन्तयन्तीं तमेवार्थं रामविग्रहसंयुतम् ।
ईषत्प्रम्लानवदनां विपद्मामिव पद्मिनीम् ।
एवं गुणगणाकीर्णां.

D3 अवलोकयन्. —(l. 34) D4 विपुलौ बाहू (by transp.). D3 उछित्य बाहू विलपन् (for the prior half). —(l. 35) Ś2 दृष्ट्वा वै. Ś2 D3.4 कैकसी (here and below). D3 -संभ्रमा (for -विस्मया). —(l. 36) D3 अंकम् (for स्वाङ्कम्). Ś2 विचेतनं (for अचेतनम्). —(l. 37) D3 सुविस्मिता (for शुचिस्मिता). —(l. 38) D4 रौषि (for पूर्ण-). D3 विनयि- (for त्वं नर-) and रोदिषींदु- (for पूर्णचन्द्र-). —(l. 39) D12 om. (hapl.) from the post. half up to the prior half of l. 44. L (ed.) -विक्रम- (for -विक्रान्त-). D3.4 मत्त-मातंगसद्गते (for the post. half). —(l. 41) D4 निवारितः (for विमानितः). —(l. 42) D4 काव्य-; L (ed.) कल्प- (for धर्म-). —(l. 43) D3.4 पद्मयोनेः कुलस्य त्वं (for the prior half). D3.4 नेता (for स त्वं). —(l. 45) Note hiatus between the two halves. D4 माहेश्वराद्. Ś2 D4.12 वा विष्णोर्; D3 विष्णोर् (subm.) (for सवित्रोर्). L (ed.) देवेंद्राद्वा (for इन्द्राद्वापि). D3 महाबल. —(l. 46) Ś D12 बुद्धिमान्; D4 बुद्धितः (for बुद्धिमन्). —After l. 46, D3 ins.:

4* वरुणात्पाशहस्ताद्वा पूर्ववैरचिकीर्षया ।

—(l. 48) D3 हि (for वा). —(l. 49) D4 यस्मान्नीता. D3 वरा (for च सा). —(l. 50) Ś1 तु (for स). L (ed.) स (for तु). D3.4 राक्षसेशो. —(l. 51) D3 राक्षसः; D4 रक्षसा; L (ed.) राक्षसीं (for राक्षसात्). —(l. 52) L (ed.) भयाद् (for भय-). D3.4 अवाङ्मुखः (for अधोमुखः). —(l. 53) D3 तदा (for तथा). Ś2 D12 L (ed.) धैर्यं बुध्या (L [ed.] °द्धौ) निवेश्य च; D3.4 धैर्येण वि (D4 °र्यं बुद्धिं) निवेश्य च (for the post. half). —Ś D12 om. l. 54. —(l. 54) L (ed.) यश्चेंद्रियगृ (?ग्र) हे युक्तं (?क्तः) (for the prior half). D3 पंचेंद्रियग्राहयुतं संस्तभ्य मनःसागरं (unmetric). —(l. 55) D3 प्रवक्तुम्. D4 L (ed.) जनन्यावि (L [ed.] °न्यैवि) तथं वचः (for the post. half). —(l. 56) Ś2 D12 मया (for यथा). D3 शृणुष्वावहिता त्वं यन्मया दुरनुष्ठितं (subm.); D4 L (ed.) शृणु मातर्ममावेद्यं (L [ed.] °वद्यं) यन्मया दुरधि (L [ed.] °नु)-ष्ठितं. —(l. 57) L (ed.) महाभागैर् (for °भागे). —(l. 58) D3.4 देवि (for देवी). —(l. 59) D3 अंगना सा परित्याज्या दहेदंगारवत्कुलं. —After l. 60, D3 ins. :

5* विशामो बलवीर्येण यशसाप्रतिमेन च ।
निरर्थकं वैरमिदं न त्वं कर्तुमिहार्हसि ।

—(l. 61) D4 सत्यं (for अन्यच्). D3.4 यत्त्वां (for यथा). —(l. 62) D3 निहतो येन (by transp.). —(l. 63) Ś1 D12 गतः (for हतः). —For l. 64–65, D3.4 subst. :

6* वाली ह्येकेन बाणेन प्रेषितो यमसादनम् ।
तस्य धर्मात्मनः पत्नीं मुञ्च मद्वचनात्प्रभो ।
[(l. 2) D4 विभो (for प्रभो).]

—(l. 66) D3.4 कर्माणि (for कार्याणि). —(l. 70) D4 पदा

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पुनश्चोक्तोऽस्मि तेनात्र गच्छ गच्छेति मा चिरम् ।
भ्रष्ट निर्लज्ज नीचेति ध्रुवं निन्ये यमक्षयम् ।
शत्रुणा प्रहितो नूनं शत्रुपक्षप्रशंसकः ।
रामस्यानुगतं भक्तं न त्वां द्रष्टुमिहोत्सहे ।
एवमुक्तोऽस्मि परुषं रावणेन शुभानने । [75]
राममेवानुगच्छामि त्वां तु द्रष्टुमिहागतः ।
यदि मे दुरनुक्रान्तं यदि वा दुरनुष्ठितम् ।
यदि दुश्चरितं मन्ये ततो गृह्य प्रशाधि माम् ।
एवमुक्ता तदा तेन माता तस्य महात्मनः ।
नाशकद्भाषितुं सुभ्रूर्मृण्मयीव व्यवस्थिता । [80]
ततः संज्ञामुपागम्य मुहूर्तादिव भामिनी ।
उवाच रुदती वाक्यं विभीषणमिदं तदा ।
एवमेतन्महाबाहो यथा वदसि पुत्रक ।
विद्धि नूनं विनाशं च सर्वेषां समुपस्थितम् ।
स्मारितास्मीह वचनं पुत्र तद्विपुलं त्वया । [85]
ब्रह्मणश्च महाबाहो तच्छृणुष्व समाहितः ।
दशग्रीवप्रभृतिषु जातेषु कुलनन्दन ।
निर्जितेषु च देवेषु सशक्रेषु महात्मसु ।
चिन्तयन्ती कुलस्याहं पुत्रं वंशकरं शुभम् ।
तपस्विनस्तव पितुर्गताश्रमपदं ह्यहम् । [90]
स्थितास्मि पुरतो वत्स तव पित्रे महात्मने ।
वक्तुकामा विशालाक्ष पितरं ते तपस्विनम् ।
ततो मां धिष्ठितां दृष्ट्वा पुरस्ताद्दयिसत्तमः ।

उवाच मधुरं वाक्यं हर्षगद्गदया गिरा ।
किमागमनकृत्यं ते ब्रूहि तत्त्वेन शोभने । [95]
एवमुक्तास्मि मुनिना पुत्र बुद्धिमतां वर ।
ततोऽहं वक्तुमारब्धा प्राञ्जलिः प्रणिपत्य तम् ।
आगतास्मि महाभाग संशयच्छेदनाय वै ।
तव वाक्येन ये जाताः पुत्रा मम महाव्रत ।
स्वं राज्यं विपुलं प्राप्ता लब्ध्वा पैतामहं पदम् । [100]
किंचिच्चिन्तास्ति संभूता दृष्ट्वा पुत्रं महाबलम् ।
अवध्यं वरदानेन सर्वैरपि दिवौकसैः ।
यक्षगन्धर्वनागैश्च पिशाचैर्ऋषिभिस्तथा ।
एवंविधेषु पुत्रेषु जातेषु तव सुव्रत ।
को नु वंशकरो ब्रह्मंस्तव पुत्रो भविष्यति । [105]
ऊचे मां स महाबुद्धिः काले धर्मभृतां वरः ।
दुराचारव्रतयुतो राज्ये स्थास्यति रावणः ।
कनिष्ठश्चापि धर्मात्मा पुत्रो वंशधरस्तव ।
राज्ये स्थास्यति धर्मेण यावद्भूमिर्धरिष्यति ।
पुनरुक्तः स तु मुनिर्मया पुत्र प्रणम्य वै । [110]
उवाच वचनं धीमान्सर्वज्ञो भगवानृषिः ।
शृणु केकसि यद्वृत्तं ब्रह्मणः सदने शुभे ।
देवानां संनिधौ भद्रे ऋषीणां च समागमे ।
यक्षकिंपुरुषाणां च पितॄणां वामलोचने ।
गन्धर्वाणां सनागानां पिशाचानां तथैव च । [115]
श्रेष्ठानां देवयोनीनां संनिधौ यन्मया श्रुतम् ।

तेन (for सभामध्ये). —D4 om. from the post. half up to the prior half of l. 71. —(l. 71) D3 मत्स्थानाद्; L (ed.) [अ]हं तेन (for तेनात्र). L (ed.) तत्र (for first गच्छ). —D4 om. l. 72. —(l. 72) D3 ध्वस्त (for भ्रष्ट). D3 न त्वां; L (ed.) न त्वा (for ध्रुवं). —(l. 73) D4 शत्रुणा हि (hypm.). —(l. 74) Ś2 D12 रामं चानुगतं रक्तं; D3 रामानुरागरक्तं च; D4 रामे सानुगसंसक्तं (for the prior half). —(l. 75) D4 पारुष्यं (for परुषं). —(l. 76) D12 [उ]त्सहे (for [आ]गतः). —(l. 77) D3.4 वा दुरति- (for मे दुरनु-) and दुरधि- (for दुरनु-). —(l. 78) D3.4 मह्यं; D12 मेघ (for मन्ये). —(l. 79) Ś2 D3 एवमुक्त्वा. —(l. 80) D4 स्थिता तदा (for व्यवस्थिता). D3 मृत्युवेवास्थिता तदा (for the post. half). —(l. 81) D3 चैव (for इव). —(l. 82) D3 साबला (for रुदती). —(l. 84) D3.4 विधिर्नू(D4 क्षयो नू)नं विशालाक्ष (for the prior half). D3.4 समुपस्थितः. —(l. 85) D3.4 चास्मि (for [अ]स्मीह). D4 ते (for तद्). Ś2 D4.12 यशः (for त्वया). D3 पितुस्ते विपुलौजसः (for the post. half). —(l. 86) D3 ब्रह्मर्षेः सु-; D4 ब्रह्मणस्तु. —(l. 88) D4 om. (hapl.) च देवेषु. D3.4 महामते (for महात्मसु). —(l. 89) D3.4 पुत्र. D4 वंशधरं; L (ed.) वशकरं. D3.4 सुतं (for शुभम्). —(l. 90) Ś1 तपस्विनं च पुत्रं तं; Ś2 D12 तपस्विने च पित्रे ते (for the prior half). D3 गत्वा (for गता). D3 तथा; D12 गृहं (for ह्यहम्). —(l. 91) D4 पितुस्तव महामते (for the post. half). —After l. 92, D3.4 ins.:

7* सर्वदोषविनिर्मुक्तं परमेष्ठिसमं गुणैः ।
ध्यानयोगसमायुक्तमाश्रमस्थं महामुनिम् ।

—(l. 93) D3 धिष्ठितो (for धिष्ठितां). —(l. 96) D3 ऋषिणा (with hiatus) (for मुनिना). D3.4 बुद्धिमता तदा (for °मतां वर). —(l. 100) D3.12 स्व- (for स्वं). D3 प्राप्तं. D4 लब्धं (for लब्ध्वा). D3 लब्धं तस्य महाफलं (for the post. half). —(l. 101) D4 पुत्रं दृष्ट्वा (by transp.). D3 विवृत्ता चास्मि संभूतान्दृष्ट्वा पुत्रान्महाबलान्. —(l. 102) D3 अवध्यान् (for अवध्यं). —(l. 105) D3 नो (for नु). L (ed.) वंशधरो. D4 वद (for तव). —After l. 105, D4 ins.:

8* एवमुक्तो महर्षिर्मां संप्रोवाचेति रावणः ।

—(l. 106) D3 किं तु वक्ष्ये महाबुद्धे कालः शस्त्रभृतां वरः; D4 कियंतं च महाबाहो कालं धर्मभृतां वर. —(l. 108) D3 कतरश्; D4 कतमश् (for कनिष्ठश्). D3.4 वंशकरस् (for °धरस्). —(l. 110) D4 एवम् and च (for पुनर् and तु respy.). D3 एवमुक्तस्तु मति*र् (for the prior half). D3 हि (for वै). —(l. 111) D3.4 बुद्धिमान्वरः(D4 °नृषिः) (for भगवानृषिः). —(l. 114) After पितॄणां, D12 erroneously repeats from च समागमे in l. 113 up to पितॄणां in l. 114. D3 पितॄणां च विशालाक्षि यक्षकिंपुरुषेष्वपि; D4 पितॄणां चापि यक्षाणां किंनराणां च शोभने. —Ś1 om. l. 115. —(l. 115) Ś2 सुनागानां (for स°). —(l. 116) D3.4 अष्टानां (for श्रेष्ठानां).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तत्तेऽहं संप्रवक्ष्यामि परमेष्ठिवचस्तदा ।
रावणेन जितो भद्रे शक्रः सुरगणैः सह ।
तन्मे हृतं महाराज्यं हस्ताद्विल्वमिवाहितम् ।
रावणेन च निर्जित्य बद्ध्वा नीतोऽस्मि स्वां पुरीम् । [120]
विमुक्तस्तव वाक्येन निर्लज्जः पुनरागतः ।
त्रिदशेषु महाबाहो राज्यकामो ह्यहं तव ।
एतत्ते कथितं सर्वं मम दुःखं तव प्रभो ।
त्वं प्रमाणं महाबुद्धे यत्तच्छ्रेयस्तदुच्यताम् ।
एवमुक्तस्तदा ब्रह्मा कौशिकेन महात्मना । [125]
उवाच वचनं सूक्ष्मं सर्वलोकहितं तदा ।
काले सुरगुरुर्ब्रह्मा कौशिकाख्याय शृण्वते ।
शृणु कौशिक भद्रं ते यत्त्वा वक्ष्यामि सुव्रत ।
सर्वं श्रुतं मया शक्र तव संग्रामकारणम् ।
निर्जितश्चासि संग्रामे तच्च मे विदितं तव । [130]
प्राप्तोऽरिर्दुष्टदुर्मेधा रावणो लोकरावणः ।
कृतान्तपाशासिधरश्चण्डस्तीक्ष्णतरो ध्रुवम् ।
वरदानबलोत्सिक्तो दुर्धर्षो रावणो मम ।
तं गच्छत मया सार्धं विष्णुमप्रतिमौजसम् ।
शङ्खचक्रगदापाणिं वरचन्दनभूषितम् । [135]
वरचापधरं देवं वीरं श्रीवत्सलाञ्छनम् ।
कौस्तुभोद्भासिततनुं श्रिया लयमनुत्तमम् ।
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
गरुत्मत्पृष्ठमासीनं पुण्डरीकनिभेक्षणम् ।
देवदेवं महाभागं विष्णुं ह्यभयमव्ययम् । [140]
योगसाध्योपनिषदैर्वेदैश्च समभिष्टुतम् ।
पुरुषं परमं विष्णुमनन्तं सर्वतोमुखम् ।
धर्मसेतुप्रवक्तारं सुराणां च हिते रतम् ।
तं गच्छाम वयं देवं सर्वदेवनमस्कृतम् ।
यद्विधास्यति नो नाथस्तत्कार्यमविशङ्कया । [145]
एवमुक्ताः सुराः सर्वे उत्तस्थुरमितौजसः ।
विमानैः सूर्यसंकाशैर्हंसबर्हिणवाहिभिः ।
ब्रह्माणमग्रतः कृत्वा गतास्ते क्षीरसागरम् ।
आस्थिता एकदेशं तु समे भूमितले तदा ।
तपस्युग्रे महात्मानं योजयन्तस्तदा सुराः । [150]
आत्मानं ते महात्मानं देवदेवं दिदृक्षवः ।
गतेऽनेकशते काले वागुवाचाशरीरिणी ।
दुन्दुभिस्वननिर्घोषा हर्षयन्ती दिवौकसः ।
उत्तिष्ठ भगवन्विष्णो कुरु कार्यं महाबल ।

—(l. 117) D_4 यथा (for tadā). D_3 परमं च वचस्तथा (for the post. half). —After l. 118, D_3 ins.:

9* जगाम ब्रह्मसदनं शरणं शरणैषिणः ।
निपतत्पादयोस्तस्य देवदेवस्य धीमतः ।
निर्जितस्तव पौत्रेण त्राणं भद्र प्रदर्शय ।
वैश्वदेवेषु यज्ञेषु सर्वैः सुरगणैः सह ।
त्वयासि स्थापितो राज्ये देवानां प्रपितामह ।; [5]

whereas D_4 ins.:

10* आगत्य ब्रह्मसदनं बभाषे प्रणतो यतः ।
भगवंस्त्वत्प्रसादेन यत्प्राप्तं चतुरानन ।

—After l. 118, L (ed.) reads a damaged line. —(l. 119) D_4 रत्नम् (for bilvam). D_3 करादिव (for ivāhitam). —(l. 120) $D_{3.4}$ L (ed.) वि(L [ed.] सु)निर्जित्य. D_4 निजां (for 'smi svāṃ). —(l. 121) D_4 मुक्तोस्मि (for vimuktas). —(l. 122) D_4 [s]स्म्यहं (for hyahaṃ). $D_{3.4}$ विभो; L (ed.) tadā. —(l. 123) $D_{3.4}$ मम दुःखतरं विभो (for the post. half). —(l. 124) D_3 प्रमाणं ते महाबुद्धिर् (for the prior half). $D_{3.4}$ नः; D_{12} तु (for tac). —(l. 125) D_3 ततो (for tadā). —$Ś_1$ om. (hapl.) from the post. half up to the prior half of l. 127. $Ś_2$ D_{12} काश्यपेन (for kauśikena). —(l. 126) D_3 श्रूणं (for sūkṣmaṃ). $D_{3.4}$ -भूत- (for -loka-). —D_4 om. l. 127. —(l. 127) D_3 प्रीतः (for brahmā). D_3 कौशिकस्योपशृण्वतः (for the post. half). —(l. 128) $D_{3.4}$ त्वां (for tvā). —(l. 129) $Ś_1$ संग्रामकारकं. —(l. 130) $Ś_2$ D_4 [अ]पि (for [अ]सि). D_4 तत्त्वं (for tac). L (ed.) tataḥ (for tava). —(l. 131) D_3 प्राप्तो हृतः सुदुर्मेधा; D_4 प्राप्तारिष्टो दशग्रीवो (for the prior half). —(l. 132) $D_{3.4}$ कालपाशशतै(D4 °गत)श्चैव मृत्योर्दंष्ट्रां-तरं गतः. —After l. 132, D_3 ins.:

11* ऋषिगन्धर्वयक्षांश्च बाधते सुरदानवान् ।

—(l. 133) $D_{3.4}$ कुर्वन्मन्युं ममानघ (for the post. half). —(l. 134) $D_{3.4}$ आगच्छ मे (D_4 तद्गच्छामो) महाबाहो (for the prior half). —(l. 135) D_3 वरदं सुरभूषणं (for the post. half). —(l. 136) $D_{3.4}$ वीरं (for devaṃ). $Ś_2$ वरं (for vīraṃ). D_3 श्रीवत्सकृतभूषणं; D_4 देवं श्रीवत्सलक्षणं (for the post. half). —(l. 137) D_4 श्रिया नित्यम् (for śriyā layam). —After l. 138, $Ś_2$ erroneously repeats l. 136. —(l. 139) D_3 गरुड-; D_4 गारुडं (for garutmat-). —(l. 140) D_3 परमम्; D_4 ह्यजरम्; L (ed.) निर्जरम् (for hyabhayam). —(l. 141) Ś D_{12} योगि-. Ś -सांख्य- (for -sādhya-). D_4 -[उ]पनिषदात्. Ś $D_{4.12}$ त्रिदशैः (for vedaiś ca). —(l. 142) $D_{3.4}$ विश्वम् (for viṣṇum). D_3 सर्वपौरुषं (for sarvatomukham). —(l. 143) D_3 -प्रकर्तारं (for -pravaktāraṃ). —(l. 144) $D_{3.4}$ तद्गच्छाम (D_4 तं गच्छामो) हरिं देवं (for the prior half). D_3 देव- (for sarva-). —(l. 147) D_4 -वादिभिः (for -vāhibhiḥ). —(l. 149) D_3 तत्र स्थित्वा तु ते सर्वे (for the prior half). —(l. 150) $D_{3.4}$ महात्मानो (for mahātmānaṃ). —D_{12} om. (hapl.) from the post. half up to the prior half of l. 151. D_3 योजयेरंस्; D_4 जजपेरंस् (for yojayantas). —(l. 152) $D_{3.4}$ ततो दश- (for gateṣv aneka-). —(l. 153) D_3 -स्वर- (for -svana-). —After l. 153, D_3 ins.:

12* सुराणां किमनुष्ठेयं ब्रह्म ब्रूहि महाव्रत ।
एतत्तद्वचनं श्रुत्वा ब्रह्मा वेदविदां वरः ।
उवाच वचनं धीमान्यद्धितं वो दिवौकसाम् ।

—(l. 154) D_4 महाबलः. —(l. 156) D_3 दुर्मेदं (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

देवानां भयभीतानामभयं दातुमर्हसि । [155]
रावणं सगणं देव त्वं निषूदय दुर्मतिम् ।
मानुषं रूपमास्थाय जहि शत्रुं दुरासदम् ।
एवमस्त्विति धर्मात्मा जातो रघुषु वीर्यवान् ।
विभक्तात्मा चतुर्धा च देवश्चक्रगदाधरः ।
सर्वे ते त्रिदशा जाता वानरीषु महाबलाः । [160]
ऋक्षीषु च महात्मानो देवपुत्रा मदोत्कटाः ।
स एष नृपशार्दूलो जातो रावणनिग्रहे ।
कुलस्य च विनाशाय अस्माकं वत्स साम्प्रतम् ।
तव पित्रा च विज्ञप्तो वंशस्थित्यै पितामहः ।
अस्माकं संततिः कस्मादविच्छिन्ना भविष्यति । [165]
तत्र वंशधरः सम्यग्भविष्यति विभीषणः ।
नारायणात्प्राप्तराज्यो यावच्चन्द्रार्कभूमयः ।
श्रीरामवचनाच्चैव चिरजीवी भविष्यति ।
त्वं चैव ब्रह्मणा प्रोक्तो राजा लङ्केश्वरः प्रभुः ।
त्वं गच्छ रामं धर्मज्ञ लोकरामं महाबलम् । [170]
स ते प्राणांस्तथा राज्यं दास्यते रघुनन्दनः ।
यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी ।
तावल्लङ्केश्वरस्त्वं हि एतदेव मया श्रुतम् ।
तव पित्रा मुखोद्गीर्णं त्वत्स्नेहाद्ददितं मया ।
तद्गच्छ पुत्र भद्रं ते विजयायारिसूदन । [175]
करोतु स्वस्ति ते ब्रह्मा त्रिनेत्रश्च महेश्वरः ।
शङ्खचक्रगदापाणिः पुराणः पुरुषोत्तमः ।
अहं च स्वस्तिनिरता तव नित्यं महाबल ।
एवमुक्तस्तु धर्मात्मा मात्रापृच्छ्य च तां तदा ।
अभिवाद्य च धर्मेण उत्पपात स राक्षसः । [180]

7

After 6.11.1^{ab}, Ñ$_2$ V$_{1.3}$ (l. 1–4 only) B D$_9$ ins.:

क्रोधसंरक्तनयनं ससंध्यमिव तोयदम् ।
भुजंगकुटिलां रोषाद्भृकुटीं भृशदारुणाम् ।
कृत्वासीनं प्रपश्यन्तं प्रासादस्थममर्षणम् ।
अभिवाद्य ततो भूयः क्रोधपर्याकुलेक्षणः ।
चतुर्भिः सचिवैः सार्धं निश्चक्राम विभीषणः । [5]
स मातरं पुनर्दृष्ट्वा सर्वमेव निवेद्य तत् ।
जगामाकाशमाविश्य कैलासं पर्वतोत्तमम् ।
यत्र वैश्रवणो राजा तिष्ठत्यमितविक्रमः ।
गुह्यकैर्बहुभिः सार्धं यक्षैश्चैव महाबलैः ।
अथाजगाम धर्मात्मा लोकानामीश्वरः प्रभुः । [10]
ततः सभायां देवस्य राज्ञो वैश्रवणस्य सः ।
धनाध्यक्षसभां देवः प्राप्तो हि वृषभध्वजः ।
उमासहायो देवेशो गणैश्च बहुभिर्वृतः ।
अवतीर्य वृषात्तूर्णं सहितः शूलभृग्विभुः ।
गिरेस्तस्य महातेजाः प्रविष्टस्तु सभां हरः । [15]
ऋध्या सहाययुक्तश्च तथा वैश्रवणः स्वयम् ।
अन्योन्यं तौ समालिङ्ग्य उपविष्टावुभावपि ।
सभायां तत्र तौ देवौ ते च देवा यथाक्रमम् ।
उपविष्टा गणाश्चैव यक्षाश्च सह गुह्यकैः ।
अक्षद्यूतं ततस्ताभ्यां प्रवृत्तं समनन्तरम् । [20]
एतस्मिन्नन्तरे तत्र राक्षसेन्द्रं विभीषणम् ।

दुर्मतिम्).—(l. 157) D$_3$ देहम् (for रूपम्).—(l. 159) D$_3$ चतुर्विधं विभज्यात्मा; D$_4$ चतुर्धा तु विभज्यात्मानं (hypm.) (for the prior half). D$_4$ शंख- (for देवश्च). D$_3$ शंख- (for ॰ चक्र-).—(l. 160) D$_4$ [ऽ]पि (for ते). D$_3$ सर्वेषु देवता जाता (for the prior half). Ś$_2$ D$_3$ वानरेषु.—(l. 161) D$_3$ ऋक्षेषु (for ऋक्षीषु) and बल- (for मद-).—(l. 162) D$_3$ रघुशार्दूलो.—(l. 163) Note hiatus between the two halves. D$_4$ विनाशोयम् (for विनाशाय).—D$_{3.4}$ om. l. 164–168.—(l. 165) Ś$_2$ एवं छिन्ना (for अविच्छिन्ना).—(l. 168) L (ed.) चिरंजीवी.—(l. 169) L (ed.) ब्रह्मणः (for ब्रह्मणा). D$_{3.4}$ एवं वै (D$_4$ त्वं चापि) ब्रह्मणाप्युक्तो (for the prior half).—(l. 170) D$_{3.4}$ तद् (for त्वं). D$_3$ सर्वज्ञं; D$_4$ धर्मज्ञं.—(l. 173) D$_3$ भवाँल्लंकेश्वरश्चाहं (for the prior half).—(l. 174) Ś$_1$ पितृ- (for पित्रा). L (ed.) न (for त्वत्-). D$_4$ हृदि मे हृतं (for गदितं मया).—(l. 175) D$_3$ जयाय च (for [अ]रिसूदन).—L (ed.) om. l. 176–177.—(l. 176) D$_{3.4}$ स्वस्ति कुर्वंतु (for करोतु स्वस्ति). D$_3$ [स]थ (for च).—(l. 177) D$_{4.12}$ पुराण- (for पुराणः). D$_3$ तथा देवो जनार्दनः (for the post. half).—After l. 177, D$_{3.4}$ ins.:

13* पिता च ते महाबाहो सततं पातु सुव्रतः ।

—(l. 178) D$_4$ तु (for च).—After l. 178, D$_3$ ins. colophon [सुंदरकांडे कैकसीवाक्यम् ॥ १००].—(l. 179) D$_4$ स (for तु). D$_3$ जनन्यासौ (for तु धर्मात्मा). D$_3$ तामापृच्छ्य च वीर्यवान्; D$_4$ अंबामापृच्छ्य वीर्यवान् (for the post. half).—(l. 180) D$_4$ स (for च). D$_3$ धर्मात्मा ऊर्ध्वमुत्पत्य (for धर्मेण उत्पपात स). L (ed.) राक्षसैः.—After l. 180, D$_3$ ins.:

14* चतुर्भिः सचिवैः सार्धं जनन्या स विवर्जितः ।

7

For l. 1–6, cf. l. 1–6 of App. I (No. 6).—(l. 1) B$_{1.3}$ संध्यायाम् (for ससंध्यम्).—(l. 2) V$_3$ D$_9$ भ्रुकुटीं; B$_3$ भ्रूकुटिं.—(l. 3) Ñ$_2$ प्रकंपंतं; V$_3$ निरीक्षंतं (for प्रपश्यन्तं).—(l. 4) B$_{2.3}$ अभिवादयते (for ॰वाद्य ततो). Ñ$_2$ D$_9$ -[ई]क्षणं (for -[ई]क्षणः).—(l. 5) B$_{2.4}$ विभीषणः (here and below).—(l. 7) Ñ$_2$ B$_{1-3}$ कैलाशं.—(l. 9) V$_1$ B$_1$ गंधर्वैर् (for गुह्यकैर्).—(l. 10) V$_1$ B$_1$ स तु प्रधानो; B$_{2.3}$ अथाग्रहार्यो (for अथाजगाम).—(l. 11) Ñ$_2$ B$_1$ D$_9$ च (for सः).—(l. 12) B$_4$ -सखो (for -सभां). V$_1$ प्राप्तो देवो (by transp.). Ñ$_2$ B$_4$ D$_9$ संप्राप्तो (for प्राप्तो हि).—(l. 13) Ñ$_2$ B$_4$ D$_9$ गौर्या सह महादेवो (for the prior half). Ñ$_2$ V$_1$ B$_1$ D$_9$ तु (for च).—(l. 14) B$_{2.3}$ महितः (for सहितः). Ñ$_2$ B$_4$ D$_9$ शूलभृद्.—(l. 15) Ñ$_2$ B$_2$ D$_9$ च (for तु).—(l. 17) Note hiatus between the two halves. B$_3$ वै (for तौ).—(l. 18) B$_3$ यत्र. B$_2$ वै (for तौ).—(l. 20) B$_{1.2}$ तस्यां (for ताभ्यां).—(l. 24) B$_4$ स कुल-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

दृष्ट्वा पौलस्त्यमायान्तं शिवः प्राह धनेश्वरम्।
अयं विभीषणः प्राप्तः शरणं तव पार्थिव।
मन्युनाभिप्लुतो वीरो राक्षसेन्द्रविमानितः।
सिंहासनस्य भङ्गेन सिंहासनसमुत्सुकः। [25]
परुषाणां च वाक्यानां तस्मिन्बुध्या रणेन च।
इह प्राप्तस्तव ह्येष वस्तुं कृतमतिस्त्वयि।
सर्वथा ह्येष दुर्धर्षः क्षिप्रमद्यैव वीर्यवान्।
रामाभ्यासं महावीर्यो गच्छतां तव शासनात्।
ततो यातं नरव्याघ्रः स रामः शत्रुतापनः। [30]
अभिषेक्ष्यति राज्येन राक्षसानां विभीषणम्।
सख्ये चैव तदा रामः सुग्रीवश्च तथा कपिः।
वरयिष्यति दुर्धर्षो रामो वीरं विभीषणम्।
ततस्तु संगता ह्येते दीप्तास्त्रय इवाग्नयः।
लोककार्यं करिष्यन्ति शिवं हि विबुधैः सह। [35]
सविद्युतो विप्रगणैरभिष्टुता
वहन्ति यज्ञं सुरभूतये शुभम्।
सुसंस्कृतं हव्यवहाः क्रतौ हुतं
तथा त्रयो रामविभीषणादयः।
कपिप्रवीरश्च सुसंमतो बली [40]
विभीषणेनानुगतो महात्मा।
महद्धि लोके ह्यसुरामरे यथा
तथा ह्ययं कर्म करिष्यतेऽनघ।
एवं संजल्पतस्तत्र संप्राप्तश्च विभीषणः।
जानुभ्यां पतितो गत्वा शिरसा त्ववनीं गतः। [45]
तं प्राह शंकरः श्रीमान्स च वैश्रवणः प्रभुः।
उत्तिष्ठोत्तिष्ठ भद्रं ते मा मन्युं कुरु राक्षस।
श्रियं प्राप्नुहि दुर्धर्ष दशग्रीवादनन्तरम्।
गच्छ सौम्य गुणारामो रामो यत्र महाभुजः।
सुग्रीवो वानरश्चैव लक्ष्मणश्च प्रतापवान्। [50]
इतो गतं महातेजा रामः शस्त्रभृतां वरः।
अभिषेक्ष्यति राज्येन लङ्कायां शत्रुघातिनम्।
रावणं च रणे रामः सगणं पुरुषर्षभः।
निहनिष्यति धर्मात्मा प्रसह्य रणमूर्धनि।
तं निहत्य महाबाहुः सीतामादाय शत्रुहा। [55]
स्वपुरीं यास्यते धीमान्सह सौमित्रिणा प्रभुः।
लङ्कायामीश्वरं चैव भवन्तं विबुधोपमम्।
स्थापयिष्यति धर्मात्मा नचिराय महायशाः।
ततो वैश्रवणो राजा पौलस्त्यकुलनन्दनम्।
विभीषणं राक्षसेन्द्रं तत्र प्राह महाद्युतिः। [60]
त्वं राजा सर्वथा वीर लङ्कायां प्रथितस्तदा।
भविष्यस्यचिरादेव दृष्टमेतत्पुरातनम्।
प्रथितः सर्वथा वत्स भविष्यसि युगे युगे।
अनागतं त्वया वीर धर्मज्ञेन महात्मना।
स त्वं धर्मभृतां श्रेष्ठ क्षिप्रमद्यैव राघवम्। [65]
भवाय सर्वभूतानामभवाय च रक्षसाम्।
उपगच्छ नरव्याघ्रमात्मनश्च विभूतये।
त्वं रामसहितः क्षिप्रं कुरु कार्यं दिवौकसाम्।
ऋषीणां च महाभाग ये चान्ये धर्ममाश्रिताः।
अधर्मशीलं निरपत्रपं यथा [70]
निरङ्कुशं वैरमदानुगामिनम्।
तपश्चराणां मृदुसौम्यशीलिनां
सदा विरुद्धं जहि रावणं तथा।

(for मन्युना).—(l. 25) V1 B1 -रणेन च; B2.3 -वरेण च (for -समुत्सुकः).—B1 om. (hapl.) l. 26.—(l. 26) V1 तु (for first च). B2 तदा (for तस्मिन्).—(l. 27) B1 [अ]ह्येव (for ह्येष) and कृत्वा मतिं (for कृतमतिस्).—B3 त्वया.—(l. 28) B1 ह्येव (for ह्येष). Ñ2 D9 दुर्वार्यः (for दुर्धर्षः).—(l. 30) V1 तत्र. Ñ2 B4 यावन् (for यातं). Ñ2 शत्रुतापनं.—(l. 31) B2 अभिषेक्ष्याभि-. B1 धर्मात्मा; D9 राजानं (for राज्येन).—(l. 32) Ñ2 B4 महा-; V1 D9 तदा (for तथा). B1 सुग्रीवाय यथा कपिः (for the post. half).—(l. 33) B2.3 रणे (for रामो).—(l. 36) Ñ2 V1 B1 D9 समेधिता (for सविद्युतो). B2 विष्णु- (for विप्र-).—(l. 37) B4 यज्ञे (for यज्ञं). Ñ2 D9 यज्ञे पुरुहूतये.—(l. 38) Ñ2 B4 D9 हुतास् (for हुतं). V1 B1 सुसंस्कृता हव्यवहः(V1 °भुजः)क्रतौ हुतास्.—(l. 39) B4 यथा (for तथा).—(l. 40) D9 समंततो (for सुसंमतो).—(l. 41) D9 महात्मना (for महात्मा).—(l. 42) Ñ2 B4 ह्युदयाध्वरे यथा; V1 त्रिपदाध्वरो यथा; B1 च सदा महाध्वरे; D9 [s]म्युदयेध्वरे यथा (for ह्यसुरामरे यथा).—(l. 43) B2 om. (hapl.?) तथा. Ñ2 D9 हि तत्; V1 तु तत; B4 हितं (for ह्ययं). B1 यथा तथा (for तथा ह्ययं).—(l. 44) B1 एतच्च; B3 एतत्सं- (for एवं सं-). B2 एतत्संकल्पतस्तत्र (for the prior half).—(l. 45) B2-4 परितो (for पतितो). V1 त्ववनिं; B2.4 धरणीं (for त्ववनीं).—(l. 46) B4 वै (for च).—(l. 48) Ñ2 D9 दुर्धर्षा; B4 धर्मज्ञ (for दुर्धर्ष).—(l. 49) B4 गुणाराम (for गुणारामो). V1 यत्र रामो (by transp.). B3 महानुजः (for °भुजः).—(l. 51) Ñ2 गतो; B1 गते (for गतं). B4 महाराजो (for °तेजा).—(l. 53) B1 पुरुषर्षभ.—(l. 56) B1.2 स; D9 स्वां (for स्व-). B4 यास्यति श्रीमान् (for यास्यते धीमान्). Ñ2 D9 विभुः (for प्रभुः).—(l. 57) Ñ2 चैवं; B2.3 रामो (for चैव). B2 विविधोपमं.—(l. 58) B4 नचिरात्स.—(l. 59) B4 पुलस्त्य-. Ñ2 B4 D9 -नंदनः.—(l. 60) B2.3 महामतिः (for °द्युतिः).—(l. 61) D9 om. (hapl.) from the post. half up to the prior half of l. 64. Ñ2 प्रार्थितस् (for प्रथितस्). Ñ2 B1.2 तथा.—(l. 62) B4 पुरातने.—G (ed.) om. l. 63–64. B1.3 om. l. 63.—(l. 63) V1 राम; B2 वीर (for वत्स).—(l. 64) V1 अकामतस्; B1 वस मे तत्; B2.3 समागतं (for अनागतं).—(l. 65) B2 श्रेष्ठः; B3 श्रेष्ठं (for श्रेष्ठ).—For l. 65–66, V1 subst.:

1* पालितं चिरराज्याय लङ्काराज्यं भविष्यति।

—(l. 68) Ñ2 B4 D9 तत्र; B2 शीघ्रं (for क्षिप्रं).—(l. 71) B4 महागजं. Ñ2 B4 D9 स्वैर- (for वैर-).—(l. 72) V1 B1.4 D9 -शालिनां (for -शीलिनां).—(l. 73) B4 मलाधिवद्धं (for सदा विरुद्धं).—(l. 74) B1 सोमविघातने;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

महाध्वरे सोमविलोपनं यथा
तथा च देवादिविघातने रतम्। [75]
दशाननं पापरतं यथा स्थितं
प्रियेऽनुजे देवगणे च नित्यम्।
तथा विमाने तु यथा स्थितं ध्रुवं
न सत्पथं दूरत एव वर्जयेत्।
दशाननं वर्जयतस्त्वानघ [80]
यशश्च ते नित्यसुखानुयायिनः।
श्रुत्वैतद्वचनं धीमानग्रजस्य मुखाच्च्युतम्।
अधोमुखो ध्यानपरो ह्यतिष्ठत्स विभीषणः।
तं ध्यायमानं भगवानुवाच प्रभुरव्ययः।
उत्तिष्ठोत्तिष्ठ राजेन्द्र सुखमासुहि शाश्वतम्। [85]
सुकृतस्य महाप्राज्ञ तपसः फलमीदृशम्।
प्रत्यक्षं दृश्यते वीर सर्वमेतद्विभीषण।
तस्मादुत्तिष्ठ गच्छ त्वं पुराणं प्रभुमव्ययम्।
आधारं सर्वभूतानां शाश्वतं निरवग्रहम्।
स हि धर्मनिधानं च गतिर्गतिमतां वरः। [90]
कृत्स्नस्य जगतो मूलं तस्माद्गच्छस्व राघवम्।
श्रुत्वैतद्वचनं तत्र नीलकण्ठेन भाषितम्।
उदतिष्ठन्महाबाहुस्तैरेव सचिवैः सह।
नमस्कृत्वा शिवं देवं तथा वैश्रवणं प्रभुम्।
रामाभ्यासं ययौ क्षिप्रं धर्मात्मा स विभीषणः। [95]
जगामाकाशमाविश्य रामो यत्र महाबलः।

B4 सोमविलोपिनं. —(l. 75) B1 चारादि- (for देवादि-). V1 सदा च ते तात (for तथा च देवादि-). —(l. 76) B1 पापभवं; B3 पापतरं. —(l. 77) B4 प्रियानुजे. Ñ2 V1 B4 D9 नित्यशः (for नित्यम्). —(l. 78) B1-3 यथा. V1 विमार्गे (for विमाने). B4 च (for तु). B1-3 पथा (for यथा). —(l. 81) V1 परं (for च ते). B1 नित्यसुखानि यानि नः. —(l. 84) B1 विभीषणं च (for तं ध्यायमानं). —(l. 86) B3 स्वकृतस्य. —(l. 89) B1 सांप्रतं (for शाश्वतं). —(l. 90) D9 धर्मविधानं. —(l. 91) Ñ2 स कृत्स्न- (for कृत्स्नस्य). B2 गच्छ स (for गच्छस्व). —(l. 92) Ñ2 D9 परमं भद्रं (for वचनं तत्र). —(l. 93) Ñ2 तदतिष्ठन्. —(l. 94) Ñ2 B3.4 D9 नमस्कृत्य. Ñ2 D9 महादेवं (for शिवं देवं). —B4 om. l. 96. V1 reads l. 96 twice (var.). —(l. 96) V1 (both times) यत्र रामो (by transp.). V1 (first time) विभीषणः (for महाबलः).

8

(l. 1) M1.2 आकर्ण्य; Cv.r.m.g.t as above (for आभाष्य). —(l. 3) D5-7 M3 Cm.g सु-; Cr.k.t as above (for स). —(l. 4) G3 damaged for व्यसनं प्रा. G1 यं; Cv as above (for यः). —T2 om. (hapl.) l. 5. —(l. 5) M5 राम (for नाम). —(l. 6) D6 उदीक्षत; D10.11 T3 G1 M1.2.5 उदी(D11 °द्वी)क्ष्य तु (for उदीक्ष्य च).

8

After 6.12.3, D5-7.10.11 S ins.:

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च।
ततः शुभतरं वाक्यमुवाच हरिपुंगवः।
स दुष्टो वाप्यदुष्टो वा किमेष रजनीचरः।
ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत्।
को नाम स भवेत्तस्य यमेष न परित्यजेत्। [5]
वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च।
ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम्।
इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः।
अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च।
न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः। [10]
अस्ति सूक्ष्मतरं किंचिद्यथात्र प्रतिभाति मे।
प्रत्यक्षं लौकिकं चापि विद्यते सर्वराजसु।
अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः।
व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः।
अपापास्तत्कुलीनाश्च मानयन्ति स्वकान्हितान्। [15]
एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः।
यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च।
तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु।
न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः।
पण्डिता हि भविष्यन्ति तस्माद्ग्राह्यो विभीषणः। [20]
अभ्यग्राश्च प्रहृष्टाश्च ते भविष्यन्ति संगताः।
प्रवादश्च महानेष ततोऽस्य भयमागतम्।
इति भेदं गमिष्यन्ति तस्माद्ग्राह्यो विभीषणः।

—(l. 7) D6 T3 M5 विस्मयमानस्तु. D6.7 शुभलक्षणं; D11 पुण्यलक्ष्मणं; G2 पार्श्वतः स्थितं (for पुण्यलक्षणम्). —(l. 8) T2 वाक्यविशारदः (for सत्यपराक्रमः). —(l. 9) G3 damaged for वृद्धाननु. —(l. 11) M1 Ck अति-; Cr.m.g.t as above (for अस्ति). T2 सूक्ष्मतमं. D5 T1 किं तु; T3 किं नु; Cr.g.k.t as above (for किंचिद्). D5.7 T G2.3 M2.3.5 यदत्र; D6 यदंतः (for यथात्र). D5.10.11 T1.3 G1.3 Ct मा; D6 मां (for मे). —(l. 12) D6 reads प्रत्यक्षं in marg. D6 T3 G3 M वा (for च). D10.11 वर्तते (for विद्यते). —(l. 14) G3 damaged for दयमिहा. —(l. 16) T3 M5 शोभनं (for शोभनः). —(l. 18) D6 तच्च (for तत्र). G2 om. ते (subm.). —(l. 19) D11 राजसः; G3 damaged (for राक्षसः). —(l. 21) M1.2 अभव्याश्; Cv as above (for अव्यग्राश्). D7 T3 G2 Cv.r प्रदुष्टाश्; Cg.t as above (for प्रहृष्टाश्). D6 T2.3 G1 M1.2.5 ते (for second च). G3 अव्यग्रा ह प्रदुष्टास्ते (for the prior half). D6 T1.2 G M न (for ते). T3 भविष्यंति न संगता: (for the post. half). —(l. 22) D6.7.10.11 T3 G3 M1.2 Cm.g.k.t प्रणादश्; M5 प्रणतश्; Cv.r.mp as above (for प्रवादश्). D7 एव; G3 अत्र; Cv.m.k.t as above (for एष). D6 रणेस्य; D10.11 Ck.t [s]न्योन्यस्य; T2 ततोन्य-; Cv as above (for ततोऽस्य). D5 T1.3 ततो विस्मयमागतं (for the post. half):

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः।
मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः। [25]
एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः।
उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत्।
रावणेन प्रणिहितं तमवेहि विभीषणम्।
तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर।
राक्षसो जिह्मया बुद्धया संदिष्टोऽयमिहागतः। [30]
प्रहर्तुं त्वयि विश्वस्ते प्रच्छन्नो मयि वानघ।
लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह।
रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः।
एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः।
वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत्। [35]

9

After 6.13.5, D5–7.10.11 S ins.:

तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत्।
वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव।
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम्।
एवमुक्तं तदा रक्षो रामेणाक्लिष्टकर्मणा।
रावणस्य बलं सर्वमाख्यातुमुपचक्रमे। [5]

अवध्यः सर्वभूतानां गन्धर्वोरगरक्षसाम्।
राजपुत्र दशग्रीवो वरदानात्स्वयंभुवः।
रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान्।
कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि।
राम सेनापतिस्तस्य प्रहस्त इति विश्रुतः। [10]
कैलासे येन संग्रामे माणिभद्रः पराजितः।
बद्धगोधाङ्गुलित्राणो अवध्यकवचो युधि।
धनुरादाय तिष्ठन्स अदृश्यो भवतीन्द्रजित्।
संग्रामसमयव्यूहे तर्पयित्वा हुताशनम्।
अन्तर्धानगतः शत्रूनिन्द्रजिद्धन्ति राघव। [15]
महोदरमहापार्श्वौ राक्षसश्चाप्यकम्पनः।
अनीकस्थास्तु तस्यैते लोकपालसमा युधि।
दशकोटिसहस्राणि रक्षसां कामरूपिणाम्।
मांसशोणितभक्षाणां लङ्कापुरनिवासिनाम्।
स तैस्तु सहितो राजा लोकपालानयोधयत्। [20]
सह दैवैस्तु ते भग्ना रावणेन दुरात्मना।
विभीषणवचः श्रुत्वा रामो दृढपराक्रमः।
अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत्।
यानि कर्मापदानानि रावणस्य विभीषण।
आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम्। [25]

—(l. 23) T3 करिष्यंति; Cm.g.k.t as above (for गमिष्यन्ति). D10.11 G1 प्राप्तो; Cv as above (for ग्राह्यो). —(l. 24) T3 सर्वे च (for न सर्वे). G2 परमोपमाः; Cr.m.g.k as above (for भरतो°). —(l. 25) G3 damaged for दो वा भव. —(l. 27) M3 [ए]नं (for [इ]दं). D6 वचः (for महा-). G2 प्रश्रितो; Ct as above (for प्रणतो). —(l. 28) D5–7 T3 G1.3 M1.2 अवैहि. D7.10.11 G M1.2 निशाचरं (for विभीषणम्). —(l. 30) T1 राक्षस्या; T3 रक्षसा; Cr.g as above (for राक्षसो). —(l. 31) T3 विश्वस्तः. D5 प्रच्छन्ने; D7.10.11 Ct विश्वस्ते; G3 damaged; M1.2 प्रच्छन्नं (for प्रच्छन्नो). D6 T3 राघव; D7 T2 G2 चानघ (for वानघ). —(l. 32) D6 लक्ष्मणेन (for लक्ष्मणे वा). D5 सदः स (for स वध्यः). —(l. 34) D7 M5 हरिश्रेष्ठः (for रघुश्रेष्ठं). —(l. 35) D7 T2 वाक्यकुशलस् (for °कुशलं).

9

(l. 1) G3 damaged for तस्य त. —(l. 4) D5 T1 उक्ते; D6.7.11 T2.3 G M उक्तस्. —(l. 6) G2.3 सोवध्यः; Cg as above (for अवध्यः). D5 T1 -देवानां; Cg as above (for -भूतानां). D5 T1 G2 M5 -[अ]सुर-; M3 -[अ]मर- (for -[उ]रग-). D10.11 -पक्षिणां (for -रक्षसाम्). D7 देवगंधर्वरक्षसां; G3 गंधर्वा ∗∗∗∗ सां (damaged) (for the post. half). —(l. 8) D7 M5 -[अ]वरजो (for -[अ]नन्तरो). G2 स (for च). —(l. 9) G2.3 -समो बले; Cg.k.t as above (for -बलो युधि). —(l. 10) G2 सौम्य (for राम). D7.10.11 G2.3 M3.5 Cg यदि वा(D10.11 ते); T2 युधि वि-; G1 वा यदि; M1.2 इति ते (for इति वि-). —(l. 11) D6 T2.3 M5 लंकायां (for कैलासे). D10.11 G1.2 समरे (for संग्रामे). D5–7.10 मणिभद्रः; Cg as above (for मा°). G2 प्रतापवान् (for पराजितः). —(l. 12) Note hiatus between the two halves. D6.10.11 T2.3 G2 M5 -[अं]गुलित्रश्च; G3 damaged; Cr.m.g as above (for -[अ]ङ्गुलित्राणो). D7 G2 M1.2.5 ह्यवध्य-; M3 त्ववध्य- Cg as above (for अवध्य-). —(l. 13) Note hiatus between the two halves. D7.10.11 यस्तिष्ठन्; T2 तिष्ठंश्च; M1.2 सगुणम् (for तिष्ठन्स). G2.3 त्वदृश्यो (to avoid hiatus) (for अदृश्यो). —(l. 14) D7.10.11 T1 M1.2 Cr.t संग्रामे; Cm.g as above (for संग्राम-). D5.6 T1 -समये; D7.10.11 Ct सु(D7 स)महद्-; M1.2 स सम-; Cr.m.g as above (for -समय-). G2.3 संग्रामे समभिव्यूढे(G3 °नुप्राप्ते); M5 संग्रामे च समव्यूढे (for the prior half). —(l. 15) D6 M1.2 शत्रुर्; D10.11 श्रीमान् (for शत्रून्). D5 T1.3 विद्रविष्यति (for इन्द्रजिद्धन्ति). —(l. 17) D10.11 M1.2 Ck.t अनीकपास्; G1 अतिकायस्; Cg as above (for अनीकस्थास्). M5 ते सर्वे (for तस्यैते). —D7 om. (hapl.) from the post. half up to the prior half of l. 20. G1 लोकपालोपमा युधि (for the post. half). —(l. 18) G3 damaged for दशकोटिस. —(l. 19) D10.11 T1 M2 -भक्ष्याणां (for -भक्षाणां). —(l. 21) D5.6 T1.3 भग्नास्ते(by transp.) (for ते भग्ना). D6 G1 M3.5 Cg महात्मना (for दुरात्मना). —(l. 22) G1 राघवो रघुसत्तमः (for the post. half). D7.10.11 G2.3 M1.2.5 विभीषणस्य तु वचस्तच्छ्रुत्वा(G3 °चः श्रुत्वा स) रघुसत्तमः(G2 M5 °नंदनः). —(l. 23) D7 सहसा (for मनसा). G2 पूर्वम् (for सर्वम्). G3 damaged for मिदं वचन. —(l. 24) T3 यानि कर्माणि पापानि (for the prior half). ❀ Cg: कर्मापदानानि अपदानं कर्मवृत्तमित्यमरः। करिकलभ इत्यत्रैव कर्मशब्दप्रयोगः। शौर्यकृतव्यापारा

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अहं हत्वा दशग्रीवं सप्रहस्तं सहात्मजम् ।
राजानं त्वां करिष्यामि सत्यमेतद्ब्रवीमि ते ।
रसातलं वा प्रविशेत्पातालं वापि रावणः ।
पितामहसकाशं वा न मे जीवन्विमोक्ष्यते ।
अहत्वा रावणं संख्ये सपुत्रबलबान्धवम् । [30]
अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे ।
श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः ।
शिरसावन्द्य धर्मात्मा वक्तुमेवोपचक्रमे ।

10

After Sarga 13, D5–7.10.11 S ins.:

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम् ।
ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् ।
चारो राक्षसराजस्य रावणस्य दुरात्मनः ।
तां दृष्ट्वा सर्वमव्यग्रं प्रतिगम्य स राक्षसः ।
आविश्य लङ्कां वेगेन राजानमिदमब्रवीत् । [5]
एष वानरऋक्षौघो लङ्कां समभिवर्तते ।
अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ।
पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ ।
उत्तमायुधसम्पन्नौ सीतायाः पदमागतौ ।
एतौ सागरमासाद्य संनिविष्टौ महाद्युती [10]
बलं चाकाशमावृत्य सर्वतो दशयोजनम् ।
तत्त्वमेतन्महाराज क्षिप्रं वेदितुमर्हसि ।
तव दूता महाराज क्षिप्रमर्हन्त्यवेक्षितुम् ।
उपप्रदानं सान्त्वं वा भेदो वात्र प्रयुज्यताम् ।
शार्दूलस्य वचः श्रुत्वा रावणो राक्षसाधिपः । [15]
उवाच सहसा व्यग्रः संप्रधार्यार्थमात्मनः ।
शुकं नाम तदा रक्षो वाक्यमर्थविदां वरम् ।
सुग्रीवं ब्रूहि गत्वाशु राजानं वचनान्मम ।
यथा संदेशमक्लीबं श्लक्ष्णया परया गिरा ।
त्वं वै महाराज कुलप्रसूतो [20]
महाबलश्चर्क्षरजःसुतश्च ।
न कश्चिदर्थस्तव नास्त्यनर्थ-
स्तथापि मे भ्रातृसमो हरीश ।
अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः ।
किं तत्र तव सुग्रीव किष्किन्धां प्रति गम्यताम् । [25]
न हीयं हरिभिर्लङ्का शक्या प्राप्तुं कथंचन ।
देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः ।
स तथा राक्षसेन्द्रेण संदिष्टो रजनीचरः ।
शुको विहंगमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ।
स गत्वा दूरमध्वानमुपर्युपरि सागरम् । [30]
संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत् ।

इत्यर्थः ।; Ct: कर्मापदानानि युधि कर्मनिर्वर्तितशौर्याणि. ❀ —(l. 25) D10 अख्यातानि. G1 हि (for च). M5 आख्याहि तानि (for आख्यातानि च). —(l. 26) D5 T1.3 M3 सबांधवं (for सहात्मजम्). —(l. 27) T3 एव (for एतद्). D10.11 श्रुणोतु मे (for ब्रवीमि ते). —(l. 28) D5 T1 M1.2 वा स; T3 चापि (for वापि). G2 राक्षसः (for रावणः). —(l. 29) G3 damaged for वा न मे. —(l. 30) T3 हत्वा तु (for अहत्वा). M5 समित्र- (for सपुत्र-). D7.10.11 G1 -जन-; G2.3 -ज्ञाति-; M1.2 -भ्रातृ- (for -बल-). —(l. 31) T3 सं· (for न). M5 भ्रातृभिस्तिसृभिः शपे (for the post. half). —(l. 32) M1.2 स विभीषणः (for [अ]क्लिष्टकर्मणः). —(l. 33) M1.2.5 चरणौ (for धर्मात्मा). ❀ Cr: शिरसावन्द्येत्यत्र आवन्द्येति पदच्छेदः ।; so also Cg. ❀ D7.10.11 G प्रचक्रमे (for [उ]पचक्रमे).

10

(l. 1) D11 विनिष्टां (meta.) (for निविष्टां). —(l. 4) G1 तद्; G3 M5 तं; Cm.k.t as above (for तां). ❀ Ck: तामिति पदम् । वाहिनीमित्यर्थः ।; so also Ct. ❀ D6.7.10.11 T2 M3.5 Cm सर्वतोव्यग्रं (D6 °ग्रां); T3 G सर्वमव्यग्रः (T3 °ग्रां) (for सर्वमव्यग्रं). D5 T1 प्रतिगृह्य (for °गम्य). G3 damaged for स राक्षसः. —(l. 5) K (ed.) प्रविश्य (for आविश्य). D5.6 T1.3 M3 रावणं वाक्यम्; Cm as above (for राजानमिदम्). —(l. 6) D6.10.11 T2 G2.3 M2.5 एष वै वानरर्क्षौघो (D6 °र्क्षो यो; G3 °र्क्षोसौ) (for the prior half). —(l. 8) D7 M5 [ए]तौ (for [इ]मौ). —(l. 9) D10.11 उत्तमौ रूप- (for उत्तमायुध-). T2 M5 पदवीं गतौ; Cr.m.g.k.t as above (for पदमागतौ). —(l. 10) D5.6 T1.3 G2 महाबलौ; D10.11 °द्युते; G3 * * * लौ (damaged) (for महाद्युती). —(l. 11) D5 सकाशम्; M3 आकाशम् (for चाकाशम्). T3 G2 आविश्य (for आवृत्य). —(l. 12) D10.11 T2 M3.5 Cm.g.t तत्त्वभूतं; G1.3 तत्त्वपूर्वं; G2 तत्त्वं ब्रूमि (for तत्त्वमेतन्). D6 महाभाग (for महाराज). —D6 om. (hapl.) from the post. half up to the prior half of l. 13. G2 क्षिप्रमर्हति वेदितुं (for the post. half). ❀ Cv: तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसीति सम्यक्पाठः ।; Cr: तत्त्वपूर्वं महाराजेति पाठः. ❀ —(l. 13) D6 अर्हसि (for अर्हन्ति). D7.10.11 वेदितुं (for [अ]वेक्षितुम्). —(l. 14) G3 वा सांत्वं (by transp.). M5 भेदं (for भेदो). —(l. 15) D7.10.11 M3 राक्षसेश्वरः (for राक्षसाधिपः). —(l. 16) G3 damaged for सा व्यग्रः in सहसा व्यग्रः. M5 वीरः (for व्यग्रः). —(l. 17) D10.11 साधु (for नाम). T3 -विशारदं; M1.2.5 -विदां वरः (for -विदां वरम्). —(l. 18) D5 T1.2 M3 त्वं; T3 G1 तु (for [आ]शु). T3 G2 वचनं (for वचनान्). —(l. 19) D6 अक्लिष्टं (for अक्लीबं). —(l. 20) D5.6 T1.3 कुले (for कुल-). —(l. 22) D7.10.11 कश्चन (for कश्चिद्). T2 सोस्त्यनर्थस्; T3 G1 M5 नाप्यनर्थस्; G3 * * * र्थस् (damaged) (for नास्त्यनर्थस्). —(l. 23) M5 तव (for तथा). G1 M1.2 [अ]सि; M3 हि (for [अ]पि). D6 M5 हरीश्वर (for हरीश). —(l. 25) M1.2 अत्र (for तत्र). —(l. 26) D6 T3 M5 च (for हि). D5–7.10.11 T1.3 प्राप्तुं शक्या (by transp.). —(l. 27) G1 न देवैरपि (for देवैरपि स-). ❀ Cg: अत्र नरग्रहणात् पूर्वार्धे हरिपदं नरोपलक्षकं बोध्यम्. ❀ —(l. 28) D6.10.11 T1 तदा (for तथा). G3 damaged for थो रज. —(l. 29) D6 M2 उत्प्लुत्य (for आप्लुत्य). —(l. 31) D5.6 T1.3 [स]पि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना ।
तं प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः ।
प्रापद्यन्त तदा क्षिप्रं लोसुं हन्तुं च मुष्टिभिः ।
स तैः प्लवंगैः प्रसभं निगृहीतो निशाचरः । [35]
गगनाद्भूतले चाशु परिगृह्यावतारितः ।
वानरैः पीड्यमानस्तु शुको वचनमब्रवीत् ।
न दूतान्घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः ।
यस्तु हित्वा मतं भर्तुः स्वमतं संप्रभाषते ।
अनुक्तवादी दूतः सन्स दूतो वधमर्हति । [40]
शुकस्य वचनं श्रुत्वा रामस्तु परिदेवितम् ।
उवाच मा वधिष्टेति घ्नतः शाखामृगर्षभान् ।
स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये ।
अन्तरिक्षे स्थितो भूत्वा पुनर्वचनमब्रवीत् ।
सुग्रीव सत्त्वसम्पन्न महाबलपराक्रम । [45]
किं मया खलु वक्तव्यो रावणो लोकरावणः ।
स एवमुक्तः प्लवगाधिपस्तदा
प्लवंगमानामृषभो महाबलः ।
उवाच वाक्यं रजनीचरस्य
चारं शुकं तूर्णमदीनसत्त्वः । [50]

न मेऽसि मित्रं न तथानुकम्प्यो
न चोपकर्तासि न मे प्रियोऽसि ।
अरिश्च रामस्य सहानुबन्धः
स मेऽसि वालीव वधार्ह वध्यः ।
निहन्म्यहं त्वां ससुतं सबान्धवं [55]
सज्ञातिवर्गं रजनीचरेश ।
लङ्कां च सर्वां महता बलेन
क्षिप्रं करिष्यामि समेत्य भस्म ।
न मोक्ष्यसे रावण राघवस्य
सुरैः सहेन्द्रैरपि मूढ गुप्तः । [60]
अन्तर्हितः सूर्यपथं गतो वा
तथैव पातालमनुप्रविष्टः ।
गिरीशपादाम्बुजसंगतो वा
हतोऽसि रामेण सहानुजस्त्वम् ।
तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् । [65]
त्रातारं नानुपश्यामि न गन्धर्वं न चासुरम् ।
अवधीस्त्वं जरावृद्धं गृध्रराजं जटायुषम् ।
किं नु ते रामसांनिध्ये सकाशे लक्ष्मणस्य वा ।

(for हि). D10 [अं]बरं (for [अ]म्बरे). D6 इदं वचनम् (for सुग्रीवमिदम्). —(l. 32) G3 -[उ]द्दिष्टं (for -[आ]दिष्टं). —(l. 33) D7 G1 Ct तत्; Cg.k as above (for तं). D6 M1.2 उत्प्लुत्य; Cv as above (for आप्लुत्य). —(l. 34) D7 प्रारभंत (for प्रापद्यन्त). D5 T1.3 M3.5 दिवं (for तदा). M5 नेतुं; Cm.t as above (for लोसुं). M1.2 transp. लोसुं and हन्तुं. —(l. 35) D10.11 सर्वैः (for स तैः). T3 प्रसंगैः (for प्लवंगैः). D6 विगृहीतो; M5 प्रगृहीतो (for निगृ°). —(l. 36) D6 T3 चापि (for चाशु). T1 भूतलेनाशु. D7.10.11 प्रतिगृह्य (for परि°). D6 T3 M3.5 निपातितः (for [अ]वतारितः). —(l. 37) G1 वध्यमानस्; M1.2 बद्धयमानस् (for पीड्य°). M1.2 वाक्यमथ (for वचनम्). —D5 repeats l. 38 after l. 44. —(l. 38) G2 M5 हंति (for घ्नन्ति). D5 (second time) कदाचिदपि साधवः (for the post. half). —(l. 39) D7 परिभाषते; D10.11 संप्रधारयेत्; Ck as above (for संप्रभाषते). —(l. 40) T1 न (for स). —(l. 41) D7.10.11 transp. श्रुत्वा and रामस्. D5.7 T1 G M5 स (for तु). M3 परिदेवनं; Cm.g.t as above (for °वितम्). —(l. 42) T2 शाखामृगाधिपान् (for °मृगर्षभान्). D7 M5 शाखामृगगणांस्तथा (M5 °तः) (for the post. half). ❀ Cg: मा वधिष्टेति प्रत्येकोक्त्यभिप्रायेणैकवचनम्। वधिष्टेतीत्यत्रार्षः संधिः।; Ck: मा वधिष्टेति। मा वधिष्वमिति यावत्। माङ्योगादडभावः। हनो वध इति लुङि चेति वधादेशः। एकवचनमार्षम्।; so also Ct. ❀ —(l. 43) D5 T1.2 पत्री; D7 पक्षी; T3 पत्रि- (for पत्र-). T3 -वपुर् (for -लघुर्). G [स]भये (for भये). ❀ Cv: पत्रलघुः पत्रैर्लघुः व(लु?)ञ्चितपक्षः इति यावत्।; so also Cr.m.g. Cr adds दर्शितेऽभय इत्यत्र अभय इति पदच्छेदः।; Cg adds भये दर्शितेऽपि।; Ck: हरिभिरभये रामवचसा दर्शिते, अवगतमित्रे सति पत्रलघुः पक्षबलेन शीघ्रगतिरन्तरिक्षे स्थित्वा पुनर्वचनमब्रवीत्। पत्रलघुः, लूनपक्ष इत्यर्थः। तादृशस्य कथमन्तरिक्षे स्थिती रामवचनं तत्कथं कृतं स्यात्तथा छेदे।; so also Ct. ❀ —(l. 44) T2 M3 अंतरिक्ष-; G3 damaged (for अन्तरिक्षे). D5 स्थिरो; G2 ततो; M1.2 शुकः (for स्थितो). M1.2 स्थित्वा (for भूत्वा). D7 G1 शुको (for पुनर्). —(l. 47) G3 M5 तथा (for तदा). —(l. 48) G3 अधिपो (for ऋषभो). —(l. 50) D6 T3 दूतं (for चारं). D6.10.11 T2 शुद्धम्; D7 M5 दीनम्; T3 G3 M1.2 क्रुद्धम् (for तूर्णम्). G1.3 M5 -सत्त्वं; Cg as above (for -सत्त्वः). —(l. 51) G1 [स]स्ति; Cg as above (for ऽसि). —(l. 52) M5 नोपकर्ता (for चो°). D7 [अ]पि; M5 स (for first [अ]सि). D7 च (for second ऽसि). —(l. 53) G2 महा-; Cg as above (for सह-). D7 -[अ]नुबंधैः; T3 -[अ]नुबद्धः (for -[अ]नुबन्धः). —(l. 54) D10.11 M1.2 ततोसि; T2.3 G1 M5 समोसि; Cg as above (for स मेऽसि). —(l. 55) D7.10.11 T2 G1 M3.5 सबंधुं; M1.2 सबंधुः (for सबान्धवं). —(l. 56) T2 सजाति- (for सज्ञाति-). —(l. 58) G3 damaged for क्षिप्रं करि. D10.11 सर्वैः (for क्षिप्रं). —(l. 59) D5.6 (in marg.) T M1.2 राघवेण; Cr as above (for राघवस्य). ❀ Cr.m.g.k.t: राघवस्य राघवात्। (Cg पञ्चम्यर्थे षष्ठी). ❀ —(l. 60) D7.10.11 सर्वैः (for सुरैः). G1 महेंद्रैर्; M5 सुरेंद्रैर् (for सहेन्द्रैर्). D7 T2.3 G1.2 M5 गूढ-; Cg.k as above (for मूढ). ❀ Cg: मूढेति संबुद्धिः. ❀ —(l. 61) D7 अंतर्हितं. D7.10.11 [स]पि (for वा). —D5.7 T1 G M om. l. 63-64. —(l. 63) T3 -संगतोपि (for -संगतो). —(l. 64) D6 T3 -[आ]त्मजस् (for -[अ]नुजस्). —(l. 65) T3 तत् (for ते). T1 त***षु (for तस्य ते त्रिषु). M1.2 दैवं नापि (for पिशाचं न). —(l. 66) D5 नाभिपश्यामि; D7 G2 नाधिगच्छामि; G1 M3 अनुप°; Ck as above (for नानुपश्यामि). —(l. 67) M3 यज् (for त्वं). M3 अक्षमं किं (for गृध्रराजं).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

हृता सीता विशालाक्षी यां त्वं गृह्य न बुध्यसे ।
महाबलं महात्मानं दुराधर्षं सुरैरपि । [70]
न बुध्यसे रघुश्रेष्ठं यस्ते प्राणान्हरिष्यति ।
ततोऽब्रवीद्वालिसुतो ह्यङ्गदो हरिसत्तमः ।
नायं दूतो महाराज चारकः प्रतिभाति मे ।
तुलितं हि बलं सर्वमनेनात्रैव तिष्ठता ।
गृह्यतां मा गमल्लङ्कामेतद्धि मम रोचते । [75]
ततो राज्ञा समादिष्टाः समुत्पत्य वलीमुखाः ।
जगृहुश्च बबन्धुश्च विलपन्तमनाथवत् ।
शुकस्तु वानरैश्चण्डैस्तत्र तैः संप्रपीडितः ।
व्याक्रोशत महात्मानं रामं दशरथात्मजम् ।
लुप्येते मे बलात्पक्षौ भिद्येते च तथाक्षिणी । [80]
यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम् ।
एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम् ।
सर्वं तदुपपद्येथा जह्यां चेद्यदि जीवितम् ।
नाघातयत्तदा रामः श्रुत्वा तत्परिदेवनम् ।
वानरानब्रवीद्रामो मुच्यतां दूत आगतः । [85]

Colophon

ततः सागरवेलायां दर्भानास्तीर्य राघवः ।
अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः ।
बाहुं भुजगभोगाभमुपधायारिसूदनः ।
जातरूपमयैश्चैव भूषणैर्भूषितं पुरा ।
वरकाञ्चनकेयूरमुक्ताप्रवरभूषणैः । [90]
भुजैः परमनारीणामभिमृष्टमनेकधा ।
चन्दनागरुमिश्रैश्च पुरस्तादधिवासितम् ।
बालसूर्यप्रतीकाशैश्चन्दनैरुपशोभितम् ।
शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा ।
तक्षकस्येव संभोगं गङ्गाजलनिषेवितम् । [95]
संयुगे युगसंकाशं शत्रूणां शोकवर्धनम् ।
सुहृदानन्दनं दीर्घं सागरान्तव्यपाश्रयम् ।
अस्यता च पुनः सव्यं ज्याघातविहतत्वचम् ।

—D1 om. (hapl. ?) l. 51-52. —(l. 51) D2.8 समानीतं. Ś D8.9.12 महाबलं. —(l. 52) Ś D2.4.12 ततः (for तदा). Ñ2 D3.9 पूर्णः; B2 पूर्वं; D2 तूर्णं (for पूर्णं). L (ed.) सागरः स्तिमितो (by transp.). —(l. 53) B4 स आगतं; D4 सभागतस्. Ś2 V1 B2-4 D9 तत् (for तं). B2.3 ज्ञात्वा (for दृष्ट्वा). —(l. 54) V1 B2-4 D1.8 समुदैक्षत; D3 अभ्युदैक्षत. —(l. 55) D3 स तु (for अथ). B2.3 प्रथितान् (for अथ तान्). —D4 om. l. 56-57. —(l. 57) D0.9 वा (for च). D0 चाद्य; D1 वात्र; D2 वाद्य. Ś ततो(Ś2 न चो द्योगमसंभाव्यम् (for the prior half). D1-3 (with hiatus) अयं (for सोऽयं). Ś D1-3.12 स (for च). —(l. 59) D8 संप्राप्तं (for साम्प्रतं). D1 न (for तत्). —(l. 60) Ñ2 B2.3 D1-3.9 च न (by transp.). —(l. 61) Ś D9 सेतुबंधे. Ś D9.12 महार्णवे (for महोदधौ). —(l. 62) Ñ1 गंधाश्च (for रागान्धाः). Ś2 Ñ2 B2.3 -प्राप्ताः; D1.3 -[आ]सक्ताः (for -सुप्ताः). Ś1 D4.12 सुसंगिनः; Ñ D9 प्रशंसिनः. B4 प्रसाधिनः (for प्रसंगिनः). —(l. 63) Ñ V1 B4 D9 तदा; B2 यथा; B3 यदा; D1.3 महा- (for तथा). Ñ D0.1.8.9 वित्त; D4 वेद (for वेत्थ). B2.3 न विज्ञाता (for यन्न वेत्थ). D4 निशाचरः. —D9 om. (hapl.) l. 64-70. —(l. 64) Ñ B2.3 D3 चरो. D8 नात्र (by transp.). Ñ V1 B2-4 D0 1.3.8 प्र(B3 नि)युक्तो वः (D1.3 वै) (for प्रयुक्तश्च). —(l. 65) D0 नूनं; D2 मंत्रस् (for राज्ञस). Ś D9.12 [इ]ति कथ्यते; Ñ1 V1 B3.4 [इ]ति(Ñ1 हि) मन्यते (for निगद्यते). —(l. 66) Ś D2.4.9.12 यानि कार्याणि (for कार्याका°). D1.3 राज्ञो (for राजा). Ñ1 राज्यं. —(l. 67) Ñ V1 B3.4 इति (for तानि). Ś D8.9.12 -[उ]द्यतैः. —(l. 68) D1.3 तैर्हि (for तेन). D0 राजा तेन (by transp.). Ś D4.9.12 राज्ञो महोदयः (for राजा सहायवान्). —B2 D1 om. l. 69. Ñ1 erroneously reads l. 69-101 for the first time after l. 36 repeating them here. —(l. 69) Ñ1 D8 सह (for सर्व-). D0 सर्वथा कार्याः (for सर्वकार्यार्थाः). —(l. 70) Ñ1 B2.3 D1 विश्वासाद् (for विस्रम्भाद्). —(l. 71) B4 ममैकं (for मामकं). B3 D2.9 कार्यं मतं (for कार्यतमं). —(l. 72) Ñ1 V1 B2-4 एव (for एकः). Ś1 प्रसादनं; Ś2 Ñ2 D3.4.12 प्रसाधनं; L (ed.) प्रशासनं (for प्रबाधनम्). —(l. 73) B4 एवं चारं (for चारं चात्र). V1 विमोक्ष्यामि; B2 विधास्यामि; D1.2 प्रयोक्ष्यामि (for नियोक्ष्यामि). Ś1 D3 सांत्वभेदम्. D9 च (for वा). —(l. 74) D0 तु (for ते). B3 D1.12 भृशं; D3 तथा (for [अ]भवन्). —(l. 75)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

वानरेन्द्राच्च सुग्रीवाद्वानराणां बलादपि ।
मानुषो नृपती रामो राज्यभ्रष्टस्तथैव च ।
कथं बिभेषि तस्मात्त्वं देवान्कृत्वा वशेऽनघ ।
इहानीतो मया शक्रो नागपाशसितो रणे । [80]
विबुधा निर्जिताः सर्वे स्वर्गं गत्वा त्वया पुरा ।
प्रेताधिपो जितः संख्ये वित्तेशश्च पराजितः ।
वरुणः काद्रवेयाश्च कालकेयाश्च दानवाः ।
वसवो मरुतश्चैव तथा चन्द्रदिवाकरौ ।
पृथिव्यां सर्वराजानो निर्जितास्ते स्वतेजसा । [85]
किं करिष्यन्ति ते राजन्वानरा वनचारिणः ।
तौ वा मानुषमात्रौ तु भ्रातरौ रामलक्ष्मणौ ।
व्येतु ते संभ्रमो राजन्नहं हन्मि प्लवंगमान् ।
मम बाणपथं प्राप्य न कश्चिदपि जीवति ।
रामं च लक्ष्मणं चैव हतौ पश्य मया रणे । [90]
हनूमन्तं ससुग्रीवमङ्गदं गन्धमादनम् ।
सुषेणं जाम्बवन्तं च तथान्यान्वनगोचरान् ।
मेघनादवचः श्रुत्वा प्रहस्तो वाक्यमब्रवीत् ।
एवमेतन्न संदेहो यथा वदसि मानद ।
मुसलायोधिने मह्यं कः स्थास्यति रणाजिरे । [95]
वानरेषु न मे चिन्ता चलचित्तेषु रावण ।
मानुषेषु च क्लीबेषु भक्ष्यभूतेषु नित्यदा ।
अहमेको वधिष्यामि तव शत्रून्दशानन ।
सुखी भव महाराज यथेष्टं विचरस्व च ।
मुसलं भ्रामयानस्तु रावणाननमैक्षत । [100]
एवमुक्ते प्रहस्तेन धूम्राक्षो वाक्यमब्रवीत् ।
आगतौ यदि तौ राजन्मानुषौ रामलक्ष्मणौ ।
बद्ध्वा सेतुं समुद्रे तु वानराश्च तरस्विनः ।
लङ्कामूले स्थितास्तस्मात्संनह्यध्वं निशाचराः ।
गच्छामस्त्वरितं तत्र यत्र तद्वानरं बलम् । [105]
सुखसुप्तान्हनिष्याम एतद्धि मम रोचते ।
महोदरोऽथ निर्भर्त्स्य धूम्राक्षं वाक्यमब्रवीत् ।
सुरक्षितं च रामेण सुग्रीवेण च तद्बलम् ।
वानरैश्च महावीर्यैः समन्तात्परिवारितम् ।
न तत्र गमनं युक्तं पुरे गुप्तिर्विधीयताम् । [110]
पूर्वमेतदभूत्कृत्यं परे पारे महोदधेः ।
सेतौ वा बध्यमाने च विघ्नः कार्यो निशाचराः ।

Ñ V1 B4 तदा; B3 D3.9 तथा (for tatas). B2 tadetesāṃ. D1.2.4 ह्यभाषत. —(l. 76) Ñ2 B2.3 D2.8 तप्यते. B2.4 D4 तदा; D3 अथ (for tathā). —(l. 77) Ś Ñ2 D2.4.12 तथा बलात् (for balādapi). —(l. 78) B2 D1.3 राज्याद् (for rājya-). —(l. 79) Ñ1 D8 कस्माद्. D0 त्वं देवान्नाथ (for tasmāttvaṃ devān). Ś1 D2.4.12 स्याप्य वशे; D1 विजयसे (for kṛtvā vaśe). D0 बलात् (for ऽnagha). —(l. 80) Ś1 -vṛtto; Ś2 B4 D12 -[ā]vṛtto; Ñ1 B3 D1.2.4 -[ā]sitoḥ; D3 -kṛtī; L (ed.) -jito (for -sito). —(l. 81) B2 niyutāḥ (for nirjitāḥ). Ñ1 mudaṃ; B2 durgaṃ; D2.4 svargaṃ (for svargaṃ). B2 purā mayā; D8 tvayā punaḥ (for tvayā purā). —(l. 82) Ñ1 B2 dhaneśaśca; D4 vittendraśca; L (ed.) vittešotra (for °śaśca). D9 purā jitaḥ (for parājitaḥ). —(l. 83) B2 transp. kādraveyāś and kālakeyāś. D1 dānavāḥ saganā jitāḥ (for the post. half). —(l. 84) B3 D9 mārutāś. —(l. 85) D8 pṛthivyāḥ. Ś D2.12 ye ca; D4 caiva (for sarve-). Ś D2.4.12 vijiṃ (Ś1 °di)tās. Ś D0.12 te ca; D2.4 caiva; D3 svena (for te sva-). —(l. 86) V1 te sarve; D1 rājanno (for te rājan). —(l. 87) Ñ1 ca (for vā). Ś2 mānuṣamātraṃ; Ñ1 vā naramātrau. Ś1 Ñ2 D12 ca (for tu). —(l. 88) Ś1 D12 śatroṛ (for rājan). D4 hanmi sarvān (for ahaṃ hanmi). —(l. 90) D4 vā (for ca). Ñ1 B2.3 D1 hataṃ (for hatau). V1 B4 mahāraṇe; D1 raṇājire (for mayā raṇe). —(l. 91) Ś B2 ca; D8 tu (for sa-). Ś D2.4.12 saṃgadaṃ. —(l. 92) D0.3 vanacāriṇaḥ.—(l. 94) Ñ1 B2 eva (for etan). —(l. 95) Ś Ñ V1 B2–4 D0.3.8.9 musalāyodhino. Ñ1 V1 B2–4 D0.3.8.9 megha (for mahya). D1 na (for kaḥ). —(l. 96) B2.3 cintā ca; D1.8 te cintā. D1 balavatsu ca rāvaṇa (for the post. half). —(l. 97) Ś Ñ2 D1.3.12 dīneṣu (for klībeṣu). B2 klībeṣu mānuṣeṣvatra; B3 klībeṣu mānuṣeṣu ca (for the prior half). D1.3.8 bhakṣ- (for bhakṣya-). Ñ V1 B3.4 D9 me sadā; B2 vā sadā; D1 nityaśaḥ; D3 manad; D8 māṃ sadā (for nityadā). —(l. 98) D2.3 haniṣyāmi. Ś Ñ B2.3 D1.2.4.12 śatruṃ (for śatrūn). —(l. 99) Ś D4.12 vicara svayaṃ; D0 viramasva ca (for vicarasva ca). —(l. 100) Ñ1 B2.3 D2.4 bhrā(Ñ1 B2.3 bhra)mamāṇastu; Ñ2 V1 B4 D9 bhrāmyamāṇastu; D8 bhrāmayāmāsa (for bhrāmayānastu). D1 ikṣya ca (for aikṣata). Ś D2–4.12 rāvaṇaṃ samudai(D2 cānvavai)kṣat; V1 B4 rāvaṇena samelya ca (for the post. half). —(l. 101) Ś Ñ2 V1 B4 D4 uktvo (for ukte). —V1 om. (hapl.) l. 102–107. —(l. 102) D1.3 bhrātarau (for mānuṣau). —(l. 103) Ñ2 B2.3 ca (for tu). Ñ1 D3.9 samudrasya. B2.3 mahābalāḥ; D1 tapasvinaḥ (for tarasvinaḥ). —(l. 104) D1 yasmātsaṃdahyadhvaṃ. —(l. 105) Ś Ñ2 D2–4.12 tvaritās. D1 yatra (for tatra). D8 yad (for tad). —(l. 106) Ñ1 B4 D9 atha; Ñ2 illeg.; B2.3 adya; D0.3 sukhaṃ (for sukha-). Ñ2 B2.3 D0.1 haniṣyāmi. —(l. 107) Ñ1 B2–4 D4.8.9 [s]pi (for stha). D0 niṣkramya. D3 prāha rākṣasaṃ (for vākyamabravīt). —After l. 107, B3 ins.:

2* kiṃ tvaṃ niṣpyase mugdha na jānāmi hitāhitam ।

—(l. 108) Ñ1 B2.3 tu (for ca). Ñ V1 B2–4 D9 lakṣmaṇena (for sugrīveṇa). —(l. 109) Ś Ñ2 D12 mahāvīraiḥ. V1 parirakṣitaṃ; D4 paricāritaṃ. —(l. 110) Ś1 Ñ2 [ā]gamanaṃ (for gamanaṃ). Ñ1 V1 B3.4 D0.2.3.9 pur-; B2 tatra; D1 punar (for pure). D3 vidhīyate. —(l. 111) Ñ2 illeg. for the prior half. D0 eva hi (for etad). B2 bhavet (for abhūt). Ñ1 V1 B4 guptiṃ (for kṛtyaṃ). B4 D8 paraṃ; D3 om. (for pare). —(l. 112) B2.3 D3.9 ca (for vā). Ñ1 V1 B3.4 D0.2.4.8 tu; Ñ2 D9 [s]pi; B2 hi (for ca). Ñ V1 B4 D9

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

साम्प्रतं त्वागते सैन्ये पुरस्ताद्बलिनो वयम् ।
शस्त्राणां कवचानां च कृत्वा सम्यगुपार्जनम् ।
तेषां दास्यामहे युद्धं हनिष्यामश्च तान्मृधे । [115]
एतस्मिन्नन्तरे वीरः प्रगृह्य विपुलं भुजम् ।
अतिकायो महावीर्यो रावणं वाक्यमब्रवीत् ।
रक्षितव्याः प्रजा राजन्नक्षितव्या द्विजातयः ।
दस्यवश्च निहन्तव्याः परिपाल्याश्च साधवः ।
अन्यायेन न हर्तव्यं परस्वं राक्षसर्षभ । [120]
एवं यो वर्तते राजा चिरं पाति वसुंधराम् ।
रामेण विनयज्ञेन व्यलीकं किं कृतं हि नः ।
जनस्थानगता येन तस्य भार्या त्वया हृता ।
पतिव्रता महाभागा लङ्कां किं वा प्रवेशिता ।
यतः प्रवेशिता सीता उत्पाता दारुणा भृशम् । [125]
कार्याकार्यं न जानीध्वं सर्व एव न संशयः ।
बलेन गर्विता यूयं विनाशाय कुलस्य च ।
तन्मह्यं रोचते बुद्धया सीता रामाय दीयताम् ।
परभार्या न युक्तं तु बलाद्धर्तुं निशाचराः ।
संमान्य दीयतां तस्मान्मैथिली जनकात्मजा । [130]
एवमुक्त्वातिकायस्तु तूष्णींभूतो बभूव ह ।

Colophon

विघ्नकालो निशाचर (for the post. half). —(l. 113) $\tilde{N}_1$ V_1 B_4 D_0 चागते; D_1 आगते. —(l. 114) $D_{2.4}$ तु (for च). D_2 उपायनं; D_4 उपार्जितं (for °र्जनम्). —(l. 115) $\tilde{N}_2$ illeg. for the prior half. $D_{4.8}$ दास्याम्यहं. D_8 हनिष्यामि. $\acute{S}_1$ तु (for च). $\tilde{N}$ V_1 B_{2-4} D_9 रणे (for मृधे). —(l. 116) $B_{2.3}$ एव काले तु (for अन्तरे वीरः). B_2 प्रसृज्य; B_3 प्रयुज्य (for प्रगृह्य). D_3 दक्षिणं (for विपुलं). —(l. 117) $\acute{S}$ D_{12} -वीरो; $\tilde{N}_2$ D_9 -कायो (for -वीर्यो). —(l. 118) D_0 सुविश्वस्ताः. $\tilde{N}$ V_1 B_4 $D_{0.2.9}$ राज्ञा (for राजन्). —$\tilde{N}_2$ illeg. from द्विजातयः up to the prior half of l. 119. B_4 हि (for द्वि-). —(l. 119) D_4 शत्रवश् (for दस्यवश्). D_{12} हि हर्तव्याः (for निहन्तव्याः). —(l. 120) $\tilde{N}_1$ कर्तव्यं (for ह°). $\tilde{N}_1$ V_1 परमं (for परस्वं). $\acute{S}$ $D_{2.4.12}$ राक्षसेश्वर. —(l. 121) V_1 शास्ति; B_4 तस्य (for पाति). $\acute{S}$ D_{12} स मेदिनीं; B_4 वसुंधरा (for वसुंधराम्). —(l. 122) D_0 सु- (for वि-). —$\tilde{N}_2$ illeg. from किं up to the prior half of l. 124. $\acute{S}_2$ हि; $\tilde{N}_1$ च; V_1 D_1 न (for किं). D_9 न हि. —(l. 123) $D_{1.2}$ जनस्थानं(D_1 °ने) (for जनस्थान-). $B_{2.3}$ त्वयाधुना; B_4 $D_{1.3}$ हृता त्वया (by transp.). —(l. 124) $B_{2.3}$ $D_{0.2.4.8}$ किं सा; D_1 सा किं (for किं वा). $\acute{S}$ $D_{3.12}$ लंकायां किं(D_3 सा) (for लङ्कां किं वा). —(l. 125) Note hiatus between the two halves. $\tilde{N}$ V_1 $B_{2.4}$ D_9 सा च (for सीता). $\acute{S}$ $D_{3.12}$ ततः (for भृशम्). —(l. 126) $\acute{S}$ D_{12} कार्यकालं(D_{12} °ले); B_2 $D_{0.2}$ कार्याकार्यं. $\tilde{N}_1$ V_1 वि- (for first न). B_2 जानीमः. —$\tilde{N}_2$ illeg. from एव up to l. 127. B_3 सर्वे यूयं; D_1 सर्वथैव (for सर्व एव). —(l. 127) D_1 गर्हिता. $D_{0.2}$ विनाशोयं. $\acute{S}_2$ $D_{0.2.4.9.12}$ नः (for च). —D_1 om. l. 128–129. —(l. 128) D_3 रामे प्रदीयतां. —(l. 129) D_0 परदारा (for °भार्या). $\tilde{N}$ V_1 B_4 $D_{3.9}$ युक्तास (for युक्तं). $\acute{S}_1$ V_1 $D_{2.3}$ निशाचर. —(l. 130) D_9 रामाय (for संमान्य). —$\tilde{N}_2$ illeg. from the post. half up to l. 131. $D_{1.3}$ रामाय (for मैथिली). —(l. 131) D_8 च (for तु). $\tilde{N}_1$ तु स्थितवानहं; V_1 B_4 संप्रति तस्थिवान्; $B_{2.3}$ भूत्वा(B_3 तत्र) स्थितोभवत्; D_9 प्रस्थितवान्गृहं (for -भूतो बभूव ह). —After l. 131, $\tilde{N}_1$ ins. :

सुन्दरकाण्डं समाप्तमिति ।;

while V_1 ins. :

3* रात्रिं च व * न्तमदोद्भूतानां
वचांसि चैतानि निशम्य राजा ।
तथातिक्रम्यस्य वचो निशम्य
तूष्णीं बभूव क्षणदाच * * ।;

whereas $B_{2.3}$ ins. :

4* रावणश्चेन्द्रजित्तूष्णींभूताः सर्वेऽपि राक्षसाः ।
[B_3 शक्रजित् (for चेन्द्रजित्).]

—$D_{0.3.4}$ ins. :

5* रावणश्चापि संचिन्त्य व्यादिशन्शुकसारणौ ।
[D_3 तं तु (for चापि). D_0 संदिशन् .]

—D_3 cont. :

6* इदं तु सुन्दरं काण्डं यः शृणोति दिने दिने ।
तस्य शोकं दरिद्रं च दूरादेव प्रणश्यति ।
आजन्मसंचितं पापं श्रवणादेव नश्यति ।

Colophon. $\tilde{N}_1$ B_2 om. colophon. —*Kāṇḍa name* : $\acute{S}$ $\tilde{N}_2$ V_1 $B_{3.4}$ $D_{0.3.4.8.12}$ सुंदरकांडं; D_1 युद्धकांडे; D_2 लंकाकांडे. —*Sarga name* : $\acute{S}$ $D_{0.2.4.8.12}$ राक्षसमंत्रः; $\tilde{N}_2$ V_1 B_4 D_9 मंत्रिवाक्यं; B_3 D_1 अतिकायवाक्यं; D_2 सेतुतरणः; L (ed.) राक्षसमंत्रणं. —*Sarga no.* (figures, words or both) : $\tilde{N}_2$ V_1 $D_{0.2.4.8.12}$ om. ; $\acute{S}_1$ 100 ; $\acute{S}_2$ 104 ; B_3 66 ; B_4 108 ; D_1 2 ; D_3 110 ; D_9 99 . —After colophon, $\acute{S}_1$ ins. :

समाप्तश्चायं सुन्दरकाण्डः पञ्चमयति शुभमस्तु । अथातो लङ्कायां युद्धकाण्डः ।
जितं भगवता तेन हरिणा लोकधारिणा ।
अनेन विष्णुरूपेण निर्गुणेन गुणात्मना ।
श्रीराम राम राम राम राम राम राम राम राम राम राम राम राम श्रीराम राम ।;

while $\acute{S}_2$ ins. :

समाप्तश्चायं सुन्दरकाण्डः । ५ । अतः परं युद्धकाण्डो भविष्यति । शुभमस्तु सर्वजगताम् ।

—$\tilde{N}_2$ ins. :

सुन्दरकाण्डं समाप्तं । श्री श्री श्रीरामप्रीतिरस्तु । शुभं ।
* * * * * * * * * * * * * * * * । (illeg.)
सुन्दरकाण्डं संपूर्णम् ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

16

After 6.15, D5–7.10.11 S ins. :

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः ।
सौमित्रिं संपरिष्वज्य इदं वचनमब्रवीत् ।
परिगृह्योदकं शीतं वनानि फलवन्ति च ।
बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ।
लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् । [5]
निबर्हणं प्रवीराणामृक्षवानररक्षसाम् ।
वाताश्च कलुषा वान्ति कम्पते च वसुंधरा ।
पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः ।
मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः ।
क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः । [10]
रक्तचन्दनसंकाशा संध्या परमदारुणा ।
ज्वलतः प्रपतत्येतदादित्यादग्निमण्डलम् ।
दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः ।
प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ।
रजन्यामप्रकाशस्तु संतापयति चन्द्रमाः । [15]
कृष्णरक्तांशुपर्यन्तो लोकक्षय इवोदितः ।
ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ।
आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते ।
रजसा महता चापि नक्षत्राणि हतानि च ।
युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण । [20]
काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च ।
शिवाश्चाप्यशिवान्नादान्नदन्ति सुमहाभयान् ।
शैलैः शूलैश्च खड्गैश्च विसृष्टैः कपिराक्षसैः ।
भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ।
क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् । [25]
अभियाम जवेनैव सर्वतो हरिभिर्वृताः ।
इत्येवमुक्त्वा धर्मात्मा धन्वी संग्रामहर्षणः ।

—V1 ins. :

समाप्तं चेदं सुन्दरकाण्डम् ।

—B2 ins. :

सुन्दरकाण्डं समाप्तं । अस्यानन्तरं लङ्काकाण्डं भविष्यति । श्री गुरुः । श्री श्रीरामो जयति । श्री श्रीशिवो जयति ।

—B3 ins. :

समाप्तमिदं सुन्दरकाण्डं ।
वाल्मीकिगिरिसंभूता रामायणमहानदी ।
पुनाति भुवनं धन्या रामसागरगामिनी ।
हनुमते नमः । श्रीरामो जयति । गुरवे नमः ।

—B4 ins. :

समाप्तं चेदं सुन्दरकाण्डमिति । अस्यानन्तरं लङ्काकाण्डमिति ।
श्री श्रीरामचन्द्राय नमः ।

—D2 ins. :

राम । समाप्तं लङ्कापर्व ।

वाल्मीकेर्वदनामलेन्दुगलितं पद्यं परं पावनं
पुण्यं वागमृतं पिबन्त्यनुदिनं ये श्रोत्रपात्रैर्नराः ।
विष्णोः सच्चरितं चराचरगुरो रामायणं सादरा-
त्तेषां श्रीर्भवने भवत्यतिबला नश्यन्ति चारातयः ।

—D3 ins. :

संवत् १७८७ अब्धीन्दुऋषिवसुसंख्यागते अब्दे । आषाढ शुक्ल ६ चन्द्रवारे । श्रीरामाय नमः ।

—D8 ins. :

सुन्दरकाण्डं समाप्तोऽयं । शुभमस्तु । श्रीरामाय नमः । श्री । श्री । श्री ।

—D9 ins. :

समाप्तमिदं सुन्दरकाण्डं संपूर्णं । शुभमस्तु । मङ्गलं ददात् ।

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ।

संवत् १८३७ शके १७०२ पौषे कृष्णपक्षे १४ रविवारान्वितायां ४५ ज्येष्ठानक्षत्रं ३९।४६ गंडयोग ४०।५३ बवकरणे ३० लिखितं पं. श्री दुबे खर्गराय कनोजिया टहरोली शुभस्थानं । श्रीराम श्रीराम राम श्रीराम राम श्रीराम राम ।

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

श्रीरामो जयति ।

16

(l. 2) Note hiatus between the two halves. D7 T2 स (for सं-). —(l. 4) T3 संविभज्येम. T3 व्यूहे; Cm.g.t as above (for व्यूह्य). —(l. 6) D10.11 प्रवर्हणं. —(l. 8) T3 धरणीरुहाः; Cm as above (for च महीं°). —(l. 10) D5 मिश्र- (for मिश्रं). —(l. 12) D7 ज्वलितं; G1.3 M1.2 ज्वलच्च. —(l. 13) D7 दीनतराः (for °स्वराः). G1 सर्वे ते (for सर्वतो). —(l. 14) T2.3 महाभयं. —(l. 15) D6 M1 अप्रकाशश्च; T3 अप्रशस्तं च (for अप्रकाशस्तु). —(l. 16) G2 कृष्णो (for कृष्ण-). —(l. 17) D7 M1.2 [s]प्रकाशश् (for sप्रशस्तश्). D10.11 तु (for सु-). —(l. 18) D6 reads from ले up to ते in marg. K (ed.) लक्ष्म नीलं (by transp.). G2.3 लक्ष्यते; Cg as above (for दृश्यते). —(l. 19) D7 [आ]वृतानि; G2.3 वृतानि; Ck.t as above (for हतानि). —(l. 20) G2 लोकस्य and शंसति (for लोकानां and शंसन्ति). —(l. 21) D7 नीचैर्गृध्राः (by transp.); D10.11 नीचा गृध्राः; Cg as above (for गृध्रा नीचैः). —(l. 22) D7.10.11 T2 M2 [अ]शुभान् (for [अ]शिवान्). G2 प्रनदंति महाभयात्; M1.2 निनदंति महास्वनाः (for the post. half). —(l. 23) D6 शूलैः शरैश्; T3 शूलैः सालैश्; G2 शरैः शूलैश् (for शैलैः शूलैश्). D7.10.11 विमुक्तैः (for विसृष्टैः). T2 विसृष्टैः खड्गैश्च (by transp.). —(l. 24) M2 -कर्दमैः; Cg -कर्दमा (as above). —(l. 26) D7 अभियामो. D7.10.11 सर्वैर्हरिभिरावृताः (for the post. half). T2 अभियाम जवे** *** हरिभिर्वृतां (damaged). —(l. 27) D7.10.11 धन्वी स

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः।
सविभीषणसुग्रीवास्ततस्ते वानरर्षभाः।
प्रतस्थिरे विनर्दन्तो निश्चिता द्विषतां वधे। [30]
राघवस्य प्रियार्थं तु धृतानां वीर्यशालिनाम्।
हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः।

Colophon

सा वीरसमिती राज्ञा विरराज व्यवस्थिता।
शशिना शुभनक्षत्रा पौर्णमासीव शारदी।
प्रचचाल च वेगेन त्रस्ता चैव वसुंधरा। [35]
पीड्यमाना बलौघेन तेन सागरवर्चसा।
ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः।
भेरीमृदङ्गसंघुष्टं तुमुलं लोमहर्षणम्।
बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः।
अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरम्। [40]
राक्षसास्तत्प्लवंगानां शुश्रुवुस्तेऽपि गर्जितम्।
नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम्।
दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्।
जगाम मनसा सीतां दूयमानेन चेतसा।
अत्र सा मृगशावाक्षी रावणेनोपरुध्यते। [45]
अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी।

दीर्घमुष्णं च निश्वस्य समुद्वीक्ष्य च लक्ष्मणम्।
उवाच वचनं वीरस्तत्कालहितमात्मनः।
आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण।
मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा। [50]
विमानैर्बहुभिर्लङ्का संकीर्णातिविराजते।
विष्णोः पदमिवाकाशं छादितं पाण्डुरैर्घनैः।
पुष्पितैः शोभिता लङ्का वनैश्चैत्ररथोपमैः।
नानापतगसंघुष्टैः फलपुष्पोपगैः शुभैः।
पश्य मत्तविहंगानि प्रलीनभ्रमराणि च। [55]
कोकिलाकुलषण्डानि दोधवीति शिवोऽनिलः।
इति दाशरथी रामो लक्ष्मणं समभाषत।
बलं च तद्वै विभजच्छास्त्रदृष्टेन कर्मणा।
शशास कपिसेनां तां बलमादाय वीर्यवान्।
अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः। [60]
तिष्ठेद्वानरवाहिन्या वानरौघसमावृतः।
आस्थितो दक्षिणं पार्श्वमृषभो वानरर्षभः।
गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः।
तिष्ठेद्वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः।
मूर्ध्नि स्थास्याम्यहं यत्तो लक्ष्मणेन समन्वितः। [65]
जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः।

रामः (for धर्मात्मा धन्वी). D7.10.11 G1.3 M1.2.5 -धर्षणः. —(l. 29) D7.10.11 सर्वे (for ततस्). —(l. 30) D10.11 Ck.t धृतानां; Cg निश्चिता (as above). T3 पथि (for वधे). —(l. 31) D5 T3 सुतानां; D10.11 सुतरां; T1 वीराणां; T2 यतानां; Cg as above (for धृतानां). T1 शौर्य- (for वीर्य-). —(l. 32) D5 T1 M3 हरि(M3 रघु)पुंगवः (for रघुनन्दनः).

Colophon. —*Sarga no.* (figures, words or both): D5–7.10.11 T1.3 G M 23; T2 damaged. —After colophon, T3 concludes with श्रीरामा नीवेदिक्; G M1.2.5 with श्रीरामाय नमः.

—Before l. 33, T3 ins. in marg. सेनारक्षणं. —(l. 34) G2 पूर्णमासीव शर्वरी (for the post. half). —(l. 35) D7 वित्रस्ता सा; G1 तत्र चैव (for त्रस्ता चैव). —(l. 36) D6 महा- (for तेन). —(l. 37) T2 आक्रोशं (for आक्रुष्टं). D5.7.11 लंकायाः. G2 ते वनौकसः. —(l. 38) D5.6 S रोम- (for लोम-). —(l. 40) D10.11 तद् (for तं). M5 घोषमुत्तमं. —(l. 41) D7 ते; M3 तु (for तत्). D5 T1 M3 च (for ते). D7 च (for ऽपि). —(l. 42) D5 T2 नदताम्. —(l. 44) G1 M1.2 सहसा (for मनसा). —(l. 45) T2 Cv तत्र; Cm.g.t as above (for अत्र). G2 [अ]सौ; Cv.m.g as above (for सा). —D11 transp. l. 47 and 49. —(l. 47) D5.6 T3 G2.3 M1.2 विनि(D6 °निः)श्वस्य. G1 M1–3 समुदीक्ष्य. —(l. 48) G2.3 रामस् (for वीरस्). —(l. 49) M1.2 उच्छ्रितां (for उत्थितां). —(l. 50) D7 [ए]व (for [इ]व). ❀ Cv: मनसैव कृतां लङ्कां नगाग्रे विश्वकर्मणेति पाठः. ❀ —(l. 51) T2 समाकीर्णा (for संकीर्णाति-). D7 G2 M5 हि विराजते; D10.11 रचिता पुरा; G1 M1.2 [अ]भिविराजते; G3 अतिराजते; M3 भुवि राजते (for [अ]तिविराजते). —(l. 52) D5.6 T1 G M पांडरैर्; D7.10.11 T2 Ct पांडुभिर्; Cm as above (for पाण्डुरैर्). —(l. 53) M1.2 शोभते. —After the prior half, G2 repeats erroneously from the post. half of l. 50 up to the prior half of l. 53. —M1 om. from the post. half up to the prior half of l. 56. D6.10.11 M2 चित्र- (for चैत्र-). —(l. 54) D5 M3 -पतंग-; M2 -विहग- (for -पतग-). D10.11 -संघुष्ट-. T2 -पुष्पोदकैः; T3 -मूलैर्नगैः (for -पुष्पोपगैः). G2 पुष्पोपगफलोपगैः (for the post. half). ❀ Cg: फलभूतानि पुष्पाणि यासां ताः फलपुष्पाः मल्लिकादयः, ताभिरुपगम्यन्त इति तथा। अतो न पुष्पितैरित्यनेन पौनरुक्त्यम्. ❀ —(l. 56) D5.7.10 -खंडानि (for -षण्डानि). M5 दोधूयति; Cm.g.t दोधवीति (as above). D5.6 T वनान्युपवनानि च (for the post. half). —(l. 58) D6.7.10.11 तत्र (for तद्वै). D5.6 T M3 विभजञ्; D7 G2 व्यभजच्; G3 व्यसृजच्; Ck.t विभजच् (as above). ❀ Ck.t: विभजद्व्यभजच्. ❀ —(l. 59) D5.6 T G1 M3.5 कपिसेनायां(T3 M3 °या; M5 °नां). D10 M1.2 Ck.t बलाद्; Cm.g as above (for बलम्). —(l. 60) M5 वीर्यवान् (for दुर्जयः). —M1.2 om. (hapl.) l. 61–63. —(l. 61) After तिष्ठेद्वा, D5 erroneously reads from -नररक्षिता in l. 70 up to the prior half of l. 71. T3 वानर-वाहिन्यां. —(l. 62) D7.10.11 T2 G1 Ct आश्रितो; M3 Cm आश्रित्य (for आस्थितो). D6.7.10.11 G1 नाम वानरः (for वानरर्षभः). —(l. 64) D11 repeats the post. half of l. 61 in place of the post. half of l. 64. D10 पक्षम्; Cm.t as above (for पार्श्वम्). M3 समाश्रितः (for अधिष्ठितः). —(l. 65) T3 यत्नॉल्; M3 Cg युक्तो; Ck.t as above (for यत्तो). D5.6 T च संयुतः; G M5 समाहितः (for समन्वितः).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः ।
जघनं कपिसेनायाः कपिराजोऽभिरक्षतु ।
पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ।
सुविभक्तमहाव्यूहा महावानररक्षिता । [70]
अनीकिनी सा विबभौ यथा द्यौः साभ्रसंप्लवा ।
प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् ।
आसेदुर्वानरा लङ्कां विमर्दयिषवो रणे ।
शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा ।
इति स्म दधिरे सर्वे मनांसि हरिसत्तमाः । [75]
ततो रामो महातेजाः सुग्रीवमिदमब्रवीत् ।
सुविभक्तानि सैन्यानि शुक एष विमुच्यताम् ।
रामस्य वचनं श्रुत्वा वानरेन्द्रो महाबलः ।
मोचयामास तं दूतं शुकं रामस्य शासनात् ।
मोचितो रामवाक्येन वानरैश्च निपीडितः । [80]
शुकः परमसंत्रस्तो रक्षोधिपमुपागमत् ।
रावणः प्रहसन्नेव शुकं वाक्यमुवाच ह ।
किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे ।
कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः ।
ततः स भयसंविग्नस्तेन राज्ञाभिचोदितः । [85]
वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ।
सागरस्योत्तरे तीरे ह्यवंस्ते वचनं तथा ।
यथासंदेशमक्लिष्टं सान्त्वयञ्श्लक्ष्णया गिरा ।
क्रुद्धैस्तैरहमुत्पत्य दृष्टमात्रैः प्लवंगमैः ।
गृहीतोऽस्म्यपि चारब्धो हन्तुं लोसुं च मुष्टिभिः । [90]
नैव संभाषितुं शक्याः संप्रश्नोऽत्र न लभ्यते ।
प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप ।
स च हन्ता विराधस्य कबन्धस्य खरस्य च ।
सुग्रीवसहितो रामः सीतायाः पदमागतः ।
स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् । [95]
एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः ।
ऋक्षवानरसंघानामनीकानि सहस्रशः ।
गिरिमेघनिकाशानां छादयन्ति वसुंधराम् ।
राक्षसानां बलौघस्य वानरेन्द्रबलस्य च ।
नैतयोर्विद्यते संधिर्देवदानवयोरिव । [100]
पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु ।
सीतां वास्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ।
शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् ।
रोषसंरक्तनयनो निर्दहन्निव चक्षुषा ।
यदि मां प्रतियुध्येरन्देवगन्धर्वदानवाः । [105]
नैव सीतां प्रदास्यामि सर्वलोकभयादपि ।
कदा समभिधावन्ति राघवं मामकाः शराः ।
वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम् ।
कदा तूणीशयैर्दीप्तैर्गणशः कार्मुकच्युतैः ।
शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् । [110]
तच्चास्य बलमादास्ये बलेन महता वृतः ।
ज्योतिषामिव सर्वेषां प्रभामुद्यन्दिवाकरः ।
सागरस्येव मे वेगो मारुतस्येव मे गतिः ।
न हि दाशरथिर्वेद तेन मां योद्धुमिच्छति ।
न मे तूणीशयान्बाणान्सविषानिव पन्नगान् । [115]
रामः पश्यति संग्रामे तेन मां योद्धुमिच्छति ।

—(l. 70) D5.11 सुविभक्तं; D6.7 T3 M5 °भक्ता; Cr.g as above (for सुविभक्त-). T3 महावीर्या; Cg as above (for -महाव्यूहा). —(l. 71) T2 [अ]पि (for वि-). G1 स्वाभ्र-; M1.2 अभ्र-; Cv.r.m.g as above (for साभ्र-). —(l. 73) D10.11 G2 M1.2 Ck.t मिमर्दयिषवो. ❀ Cm.g: विमर्दयिषवः विमर्दयितु(Cg मर्दयितु)मिच्छवः। Cg adds सनि द्वित्वाभाव आर्षः. ❀ —(l. 75) D7.10.11 हरिपुंगवाः; G3 M1.2.5 °यूथपाः (for °सत्तमाः). —(l. 77) D6 G1.3 M5 विसृज्यतां; Cm.t as above (for विमुच्यताम्). —(l. 78) D7.10.11 तु वचः (for वचनं). —(l. 80) D5.6 T M3 चाभि-(T3 °पि); M1.2 भृश- (for च नि-). —(l. 81) D6 लंकाधिपम्. —(l. 82) G1 वाचम् (for वाक्यम्). D5 T1.3 M3 अभाषत; G2 उवाच हा; M5 अथाब्रवीत्. —(l. 83) G3 उभौ; M1.2 एतौ; Ct as above (for इमौ). T3 हतौ (for सितौ). G1 लूनौ भग्नश्च. D5–7 T3 दृश्यते. —(l. 84) T1 वश*** (moth-eaten) (for वशमागतः). —(l. 85) D5.6 T तदा; G1 M1–3 तथा (for तेन). —(l. 87) D7 T1.3 M1.2.5 तदा (for तथा). —(l. 88) T3 यदा (for यथा-). G2.3 M1.2.5 अक्लीबं; Ct as above (for अक्लिष्टं). ❀ Cm.t: सान्त्वयन्।; Cg: सान्त्वयम्, असान्त्वयम्। सुग्रीवमिति शेषः. ❀ —(l. 89) M3 क्रूरैस् (for क्रुद्धैस्). D7.10 T2 उत्प्लुत्य (for उत्पत्य). D10.11 G1 दृष्टमात्रः. —(l. 90) D5 T1.2 [अ]हमारब्धो; G2 M5 [अ]विचारेण; Cm.t as above (for [अ]पि चारब्धो). —(l. 91) D10.11 ते (for [ए]व). G1 शक्यं. M5 स (for सं-). D10.11 M1.2 विद्यते (for लभ्यते). —(l. 94) M3 -सचिवो (for -सहितो). —(l. 95) G2 बद्ध्वा (for कृत्वा). G3 M1.2 वरुणालयं; M5 लवणांबुधिं (for लवणोदधिम्). —(l. 96) D6 reads in marg. from रक्षांसि up to राघवः. —(l. 97) D5 T3 M3 -मुख्यानाम्; T1 -**नाम् (damaged); T2 -सिंहानाम्; M1.2 -सैन्यानाम् (for -संघानाम्). M5 अनीकानां. —(l. 98) D7 -निकाशानि; G1 -सकाशानां (for -निकाशानां). —(l. 99) M1.2 वानराणां (for °रेन्द्र-). —(l. 101) G3 पुर- (for पुरा). —(l. 102) D5.7.10.11 च (for first वा). D10.11 युद्धं वापि; G2.3 M5 युद्धं वास्मै (for सुयुद्धं वा). —(l. 104) D6 T3 G1 कोप- (for रोष-). G3 -संसक्तनयनो. —(l. 105) T3 [इ]मान् (for मां). —(l. 106) D5 M3 प्रयच्छामि. —(l. 107) D5 T1 M3 नाम (for सम्-). D10.11 मामका राघवं (by transp.). —(l. 109) M5 बाणैर् (for दीप्तैर्). D7 शतशः. D10.11 कदा शोणितदिग्धांगं दीप्तैः कार्मुकविच्युतैः. —(l. 110) D5.10.11 T1.3 M5 आदीपयिष्यामि (all except M5 with hiatus). M5 ह्युल्काभिर्. —(l. 111) D6 तत्रास्य; G2 तस्यास्त्र- (for तच्चास्य). D5 पथम् (for बलम्). D11 आदाय; T3 आपास्ये (for आदास्ये). —(l. 113) D6 (both places) [ए]व (for [इ]व). D7.10.11 T2 M1.2.5 बलं (for गतिः). —(l. 114) D6 T3 [ए]व; D7.10.11 च; G1.2 [ए]तद्; G3 M1.2.5 तु (for हि). —T3 om. (hapl.) l. 115–116. —(l. 118) T2 शरकोणैः; T3

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

न जानाति पुरा वीर्यं मम युद्धे स राघवः ।
मम चापमयीं वीणां शरकोणप्रणादिताम् ।
ज्याशब्दतुमुलां घोरामार्तगीतमहास्वनाम् ।
नाराचतलसंनादां तां ममाहितवाहिनीम् । [120]
अवगाह्य महारङ्गं वादयिष्याम्यहं रणे ।
न वासवेनापि सहस्रचक्षुषा
युधास्मि शक्यो वरुणेन वा पुनः ।
यमेन वा धर्षयितुं शराग्निना
महाहवे वैश्रवणेन वा स्वयम् । [125]

Colophon

17

After 6.19.27, Ś Ñ V2.3 B D2(marg.).8.12.13 ins.:

अत्रैव च मया प्राप्तश्चागमो वानरेषु वै ।
प्रजापतेः किल पुरा वाताविद्धं रजस्तदा ।
वामेक्षणेऽपतत्तेन स्पृष्ट्वा किमिदमैक्षत ।
वामेनादाय हस्तेन क्षिप्तं दूरं पपात तत् ।
मनसा चिन्तितं तेन किमस्मात्प्रभविष्यति । [5]
तत्रापि तरसा भासा फेनबुद्बुदसप्रभा ।
उत्थिता विग्रहवती नारी कमललोचना ।
चन्द्रबिम्बानना बाला विद्युत्तरललोचना ।
नैव देवी न गन्धर्वी नासुरी न च पन्नगी ।
तादृग्रूपवती दृष्टा स्वयमेव स्वयंभुवा । [10]
लोकपालास्ततो दृष्ट्वा तं देशं समुपागताः ।
रविस्तत्राब्रवीद्वाक्यमुपसृत्य प्रजापतिम् ।
कस्यैषा केन कार्येण संप्राप्तेह शुभानना ।
पुरीं भोगवतीं त्यक्त्वा नागकन्या किमागता ।
सिद्धिर्बुद्धिस्तथा लक्ष्मीः प्रभा पुष्टिः सरस्वती । [15]
असौ रूपमवष्टभ्य चोत्थिता जगतां ततः ।
प्रजापतिस्तदा तत्र रवेरश्रावयत्कथाम् ।
ततोऽक्षिरजसो जातां स्निग्धां स्निग्धेन चक्षुषा ।
भास्करो भास्कराभां तामुपगुह्य गतस्ततः ।
कदाचिद्वीक्ष्य तां कन्यां रूपयौवनदर्पिताम् । [20]
स्थितां मन्दरपृष्ठेषु रविर्वचनमब्रवीत् ।

शरौघेण (for शरकोण-). D7 M1.2 -प्रवादितां. D6.10.11 M3 Cm.g.t शरकोणैः प्रवादितां (for the post. half). —D6 reads in marg. l. 119. —(l. 119) D5.6 T1.3 -घोषतुमुलां. T2 भीमाम् (for घोराम्). D7 T2 G1.3 M3 Cv.m.g आर्तभीत-; D10.11 आर्तगीतां; G2 आर्तभीम-; M5 मत्तगीत-; Ct आर्तगीत- (as above). T2 -रवस्वनां. —(l. 120) D5.6 T1.3 मम च; D7 G3 तां महा-; D10.11 Ct नदीम्; Cv.m.g as above (for तां मम). D5 T1.2 G2.3 M1.2 Cr -वादिनीं. —(l. 121) M3 नादयिष्यामि. —(l. 123) D6.7.10.11 T2 युद्धे; M3 यथा (for युधा). D10.11 M3 स्वयं (for पुनः). —(l. 124) G2 यथा; M5 क्षमो (for शर-). —(l. 125) M3 पुनः (for स्वयम्).

Colophon. —*Sarga no.* (figures, words or both): D5–7.10.11 T1.3 G M 24; T2 23. —After colophon, G M1.2 conclude with श्रीरामाय नमः; M5 with श्रीरामचन्द्राय नमः.

17

V3 om. l. 1–3. —(l. 1) Ś D8.12 यथा चैष; Ñ1 V2 B3 तत्र चैव; B1 इहैव च; D2.13 ततोत्रैव. Ś D8.12 तथा (for मया). Ñ V2 B3.4 D2.13 आगमो (for चागमो). Ñ2 च (for वै). B4 वानरेश्वरैः. —(l. 2) Ś V2 B1.2 D2.13 तथा (for तदा). —(l. 3) Ñ V2 B वामाक्षिप्रसृतं ते(B4 °हतस्ते)न; D2.13 वामेक्षणं श्रितं तेन (for the prior half). Ñ1 V2 B1–3 स्पृष्ट्वा रजसि वैकृतं; Ñ2 B4 कृतं चक्षुषि(Ñ2 °स्तु) वैकृतं (for the post. half). —(l. 4) Ñ2 V2 B D8 क्षिप्रं (for क्षिप्तं). Ñ V2.3 B दूरे. V2.3 ह; B1 D13 च (for तत्). B3.4 न्य(B4 प्र)पातयत्. —(l. 5) Ñ2 B4 [अ]धिष्ठितं (for चिन्तितं). Ś2 D8.12 प्रभविष्णुषु; Ñ2 संभविष्यति (for प्रभविष्यति). B4 हिमसार्द्रं भविष्यति (for the post. half). —(l. 6) Ñ1(m. also चंचला).2 V2 B D13 तरला (for तरसा). B1 -संनिभा; B2 -सत्प्रभा; B4 -संचया; D13 -सुप्रभा. —(l. 7) V3 B1 [अ]तिरूपवती (for विग्रहवती). B4 विग्रहवती स्यान्नारी (for the prior half). B4 तस्मिन् (for नारी). —(l. 8) B4 -मंडल- (for -तरल-). —(l. 9) Ś D8.12 न देवी न च (for नैव देवी न). Ś2 च न (by transp.). —(l. 10) Ñ V2 B1.2 नेदृग्; V3 नैतद्- (for तादृग्). Ñ1 B1.2 सृष्टा (for दृष्टा). B3.4 नैव तादृग्रूपवती सृ(B4 दृ)ष्टान्या स्त्री स्वयंभुवा. —(l. 11) Ñ2 B2 तथा; B1.4 तु तां (for ततो). D2.13 हृष्टास (for दृष्ट्वा). Ñ V2.3 B तं प्र(B4 तत्प्र)देशमुपागताः (for the post. half). —(l. 13) B1.4 वा (for [ए]षा). —(l. 14) D2 अग्रतः (for आगता). —(l. 15) Ñ1 V2 D2.13 धृतिस्; Ñ2 *तस्; B2 ऋद्धिस्; B3 वृद्धिस् (for बुद्धिस्). B4 ऋद्धिः (for प्रभा). D13 लक्ष्मीः (for पुष्टिः). Ñ1 V2.3 पुण्या(V3 सुधा) पुष्टिः प्रभाकरी; B1.2 प्रभा तुष्टिः प्रभाकरी (for the post. half). —(l. 16) Ñ V2.3 B1–3 आसां; B4 तासां; D13 आसीद् (for असौ). D13 (with hiatus) उत्थिता (for चोत्थिता). Ñ V2.3 B D2 (with hiatus) उत्थिता जगतीतलात् (D2 °तीकृते) (for the post. half). —Ś1 D8 om. (hapl.) l. 17–19. Ś2 D2.12 om. l. 17. —(l. 17) Ñ2 ततस्; D13 तथा (for तदा). Ñ1 V2 B3 रविम् (for रवेर्). Ñ2 आश्रावयत्. —(l. 18) Ś2 D12 ततो वै; V3 वातोत्थां; B2 अतोक्षि-; D2 ततोक्ष- (for ततोऽक्षि-). Ś2 B1 D2.12.13 -रजसा. L(ed.) जाता (for जातां). V3 दृष्ट्वा (for स्निग्धां). Ñ2 तेजसा (for चक्षुषा). Ś2 L(ed.) स्निग्धसांजनसप्रभा(Ś2 °भां); D2.12.13 स्निग्धा(D2 °ग्ध)मंजनचक्षुषा (for the post. half). —(l. 19) Ś2 Ñ1 V2.3 D2.13 उपगृह्य (for °गुह्य). Ś2 ततो गतः (by transp.); Ñ2 B2 गतस्तदा; V3 B4 D2.12 ततस्ततः; B1 [आ]गतस्ततः. —(l. 20) Ñ V2 B2.3 D2.13 अथ तां; V3 आगतां; B1 त्वथ तां (for वीक्ष्य तां). Ñ1 V2.3 B1–3 -गर्वितां (for -दर्पिताम्). B4 प्रजापतेस्तु कन्यायां स ययौ कामदर्पितः. —(l. 21) Ñ V2.3 B2.3 स्नातां (for स्थितां). Ñ V2.3 B D2.13 -पृष्ठे तु. B4 रविस्तामब्रवीद्वचः (for the post.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

मत्तेजसा महावीर्यस्त्वधृष्यश्च महारणे ।
देवदानवयक्षाणां पन्नगानां सरक्षसाम् ।
अवध्यस्त्रिदशानां च तव पुत्रो भविष्यति ।
वरेण छन्दयित्वा तामगमत्सद्य एव तु । [25]
रविणा बालभावाच्च बालेति परिकीर्तिता ।
अथ काले तदा श्रीमाञ्शक्रः सुरगणार्चितः ।
विचरन्मन्मथाविष्टः सर्वर्तुकुसुमाकरे ।
स दृष्ट्वा चारुसर्वाङ्गीं परं विस्मयमागतः ।
का त्वं भवसि रुद्राणां यक्षाणामिति चाब्रवीत् । [30]
मनो हरसि मे भीरु कान्ते कान्ततरा ह्यसि ।
स तु भावेन दिव्येन पाणिना तां मनोरमाम् ।
उपस्पृश्य जलं शीतं वचनं चेदमब्रवीत् ।
वानरौ दिव्यरूपौ ते सर्वज्ञौ कामरूपिणौ ।
उत्पत्स्येते महाभागे मा विषादं गमिष्यसि । [35]
यमजौ सुमहाभागौ वाली सुग्रीव एव च ।
किष्किन्धा नाम तु पुरी कान्ता पुष्पफलैर्युता ।
तत्र राज्यं करिष्येते सर्ववानरपुंगवौ ।
इक्ष्वाकुकुलसंभूतो रामो नाम महायशाः ।
विष्णुर्मानुषरूपोऽसौ तस्यैकः सख्यमेष्यति । [40]

18

After Sarga 30, D5-7.9-11 S ins.:

ततो रामः सुवेलाग्रं योजनद्वयमण्डितम् ।
आरुरोह ससुग्रीवो हरियूथपसंवृतः ।
स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन् ।
त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा ।
ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् । [5]
तस्यां गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम् ।
श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम् ।
रक्तचन्दनसंलिप्तं रत्नाभरणभूषितम् ।
नीलजीमूतसंकाशं हेमसंछादिताम्बरम् ।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् । [10]
शशलोहितरागेण संवीतं रक्तवाससा ।
संध्यातपेन संछन्नं मेघराशिमिवाम्बरे ।
पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः ।
दर्शनाद्राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः ।
क्रोधवेगेन संतप्तः सत्त्वेन च बलेन च । [15]
अचलाग्रादथोत्थाय पुप्लुवे गोपुरस्थले ।
स्थित्वा मुहूर्तं संप्रेक्ष्य निर्भयेनान्तरात्मना ।

---

half). —(l. 22) Ñ V2.3 B1-3 त्वप्रधृष्यो; B4 दुष्प्रधर्षो; D2 त्वधृष्यस्तु; D13 त्वां प्रविष्टो. —(l. 23) Ñ2 -सिद्धानां (for -यक्षाणां). V3 च (for स-). Ñ2 सयक्ष * * रक्षसां (illeg.) (for the post. half). —(l. 25) Ś D2.8.12 सः; D13 तत् (corrupt) (for तु). —(l. 26) Ñ1 D13 तु (for च). B1 -भावेन (for -भावाच्च). Ś D8.12 तु बालैवं; D2 तु बालापि (for च बालेति). B4 सा बालेति प्रकीर्तिता (for the post. half). —(l. 27) B4 ततः (for तदा). Ś D2.8.12.13 [आ]-सीनां (for श्रीमाञ्). Ś D8.12 सुरगणान्वितः; V3 सर्वसुरार्चितः. —(l. 28) Ś D2.8.12 समयाविष्टः (for मन्मथाविष्टः). V3 सर्वत्र (for सर्वर्तु-). Ś D8.12 -कुसुमोत्करे; B2 -कुसुमे वने. —(l. 29) V3 शक्रो (for परं). B2 विस्मयं परमं गतः (for the post. half). —(l. 30) G (ed.) यक्षाणां (for रुद्राणां). Ñ V2 B transp. रुद्राणां and यक्षाणाम्. G (ed.) पन्नगानां च रक्षसां (for the post. half). —B4 om. (hapl.) l. 31-33. V3 om. l. 31. —(l. 31) Ś2 चाभीरु. V2 काले; B1 यतः (for कान्ते). —(l. 32) Ñ2 transp. भावेन and दिव्येन. Ñ V2.3 B1-3 सुमनोरमां (V3 B3 °हरां); D2.13 सु (D2 स्व) मनोरमं. —(l. 33) D13 तत्र (for शीतं). Ñ V2.3 B1-3 पस्पर्श जल-शीतेन (for the prior half). D2 विषयं (for वचनं). —(l. 34) Ñ1 V3 तौ (for ते). Ś D2.8.12 सर्वज्ञौ (for सर्वज्ञौ). B2 दिव्य- (for काम-). —(l. 35) Ś V3 B4 D2.8.12 महाभागौ (for °भागे). Ś D2.8.12.13 transp. मा and विषादं. B3 (*sup. lin.* as above) करिष्यसि. —After l. 35, B3 ins.:

1* विरजो वानरश्रेष्ठस्ततः पाणिं ग्रहीष्यति ।

—(l. 36) Ś D8.13 य (D13 स) मजातौ; V3 B2.4 D2.12 यमजौ तौ (V3 द्वौ). —(l. 37) Ñ1 V2 B2-4 पुण्या तु; Ñ2 B1 पुर्यास्ते; V3 नगरी (for तु पुरी). Ñ V3 B दिव्य-; V2 दिव्या (for कान्ता). V3 -फलद्रुमा; B2 -फलैर्वृता; B3 -फलावृता. —(l. 39) Ñ1 V2 B2.3 महाबलः (for °यशाः). —(l. 40) D2 [ए]षः (for [ए]कः).

18

(l. 1) T3 damaged for ततो. D6.7.9.11 T2.3 M5 Cm.g.t -मंडलं (for -मण्डितम्). —(l. 2) D9-11 उपारोहत् (for आरुरोह). G2 -यूथपैः (for -संवृतः). D9-11 हरियूथैः समन्वितः; G1 हरियूथसमावृतः (for the post. half). —(l. 3) D6 सुग्रीवो (for तत्रैव). —D6 om. l. 4. —(l. 4) D5 T G1 रम्यां; M1.2 लंकां (for रम्ये). —(l. 5) M1.2 रम्यां (for लङ्कां). T2.3 सुव्यक्तां; G1 स न्यस्तां; Cg as above (for सुन्यस्तां). —(l. 6) D6.9-11 तस्य (for तस्यां). D6 T3 -मध्यस्थं (for -शृङ्गस्थं). —(l. 7) T2.3 विशद-; G2.3 M5 व्यजन-; Cg.k.t as above (for विजय-). —(l. 8) D6 -संयुक्तं; G1.3 M1.2.5 -लिप्तांगं (for -संलिप्तं). —G M5 transp. the post. halves of l. 8 and l. 9. D5.7.9-11 रक्त-; G M5 सर्व- (for रक्त-). —(l. 9) T2 -संबाधित-; T3 -संभावित-; Cr.m.g.k.t as above (for -संछादित-). G2.3 M5 रक्तांबरधरं शुभं (for the post. half). —(l. 11) T2 रक्तवाससं. —(l. 12) D5 T1 M3 संवीतं; G संनद्धं (for संछन्नं). M1.2 संध्यारागेण संछिन्नं (for the prior half). D7 G1 M5 मेघ-राजिम् (for °राशिम्). D5 T1 G3 इवांबरं. —(l. 14) T3 reads from दर्शनाद् up to सह in marg. —(l. 15) D9-11 G1 M3 संयुक्तः; T3 संलिप्तः (for संतप्तः). G3 स * * (for सत्त्वेन). —(l. 16) G1 [उ]त्पत्य and -स्थलं (for [उ]त्थाय and -स्थले respy.). —(l. 17) M1.2 तत्रैव (for संप्रेक्ष्य).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तृणीकृत्य च तद्रक्षः सोऽब्रवीत्परुषं वचः ।
लोकनाथस्य रामस्य सखा दासोऽस्मि राक्षस ।
न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा । [20]
इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि ।
आकृष्य मुकुटं चित्रं पातयित्वापतद्भुवि ।
समीक्ष्य तूर्णमायान्तमाबभाषे निशाचरः ।
सुग्रीव त्वं परोक्षं मे हीनग्रीवो भविष्यसि ।
इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले । [25]
कन्तुवत्तं समुत्थाय बाहुभ्यामाक्षिपद्धरिः ।
परस्परं स्वेदविदिग्धगात्रौ
परस्परं शोणितरक्तदेहौ ।
परस्परं श्लिष्टनिरुद्धचेष्टौ
परस्परं शाल्मलिकिंशुकाविव । [30]
मुष्टिप्रहारैश्च तलप्रहारै-
ररत्निघातैश्च कराग्रघातैः ।
तौ चक्रतुर्युद्धमसह्यरूपं
महाबलौ राक्षसवानरेन्द्रौ ।
कृत्वा नियुद्धं भृशमुग्रवेगौ [35]
कालं चिरं गोपुरवेदिमध्ये ।
उत्क्षिप्य चाक्षिप्य विनम्य देहौ
पादक्रमाद्गोपुरवेदिलग्नौ ।
अन्योन्यमापीड्य विलग्नदेहौ
तौ पेततुः सालनिखातमध्ये । [40]
उत्पेततुर्भूतलमस्पृशन्तौ
स्थित्वा मुहूर्तं त्वभिनिश्वसन्तौ ।
आलिङ्ग्य चालिङ्ग्य च बाहुयोक्त्रैः
संयोजयामासतुराहवे तौ ।
संरम्भशिक्षाबलसंप्रयुक्तौ [45]
संचेरतुः संप्रति युद्धमार्गैः ।
शार्दूलसिंहाविव जातदर्पौ
गजेन्द्रपोताविव संप्रयुक्तौ ।
संहत्य चापीड्य च तावुरोभ्यां
तौ पेततुर्वै युगपद्धरण्याम् । [50]
उद्यम्य चान्योन्यमधिक्षिपन्तौ
संचक्रमाते बहुयुद्धमार्गैः ।
व्यायामशिक्षाबलसंप्रयुक्तौ
क्रमं न तौ जग्मतुराशु वीरौ ।

—D5 om. l. 18. —(l. 18) T2 तु (for च). G2 *द्रक्षः. —(l. 19) D6 reads रामस्य in marg. T3 G1 रावण (for राक्षस). —(l. 21) D7.9 [उ]त्प्लुत्य; M1.2 [उ]त्थाय (for [उ]त्पत्य). —(l. 22) D5 T1.3 G M मकुटं; Ct as above (for मुकुटं). D7.9–11 पातयामास तद्भुवि; G1 पादेनाताडयद्भुवि (for the post. half). —(l. 23) D7.9–11 बभाषे तं (for आबभाषे). —(l. 24) D6.7.10.11 T3 M3 सुग्रीवस्त्वं. G1 परोक्षे; G3 समक्षं (for परोक्षं). —(l. 25) G2 स क्षिप्रं. T3 इत्युक्त्वा च स सुग्रीवं (for the prior half). G1 प्राक्षिपत् (for आक्षि°). G2.3 M5 बली (for तले). —D5 T1 repeat l. 26 after l. 66. —(l. 26) D6.7.9–11 T2.3 Ct कंदुवत्. D9–11 Ct स; T3 तु (for तं). T3 तमुत्थाय. G1 प्राक्षिपद्; Ct as above (for आक्षिपद्). —(l. 27) D11 M -विदग्ध-; G -निरुद्ध- (for -विदिग्ध-). —(l. 28) D5 T1.3 G3 M3 Cg -दिग्ध-; D9 -दीप्त-; Ct as above (for -रक्त-). —(l. 29) D6 T2 क्लिष्ट-; Ct as above (for श्लिष्ट-). D9 T2.3 -विरुद्ध-; Cg.t as above (for -निरुद्ध-). —(l. 30) D5.6 T M3 -किंशुकौ यथा; G1 -किंशुकाभौ; Cg.t as above (for °काविव). G2 M5 परस्परं किंशुकशाल्मली यथा. —(l. 31) D5 om. (hapl.) श्च तलप्रहारै. —(l. 32) D5.9 -पातैश्च; D11 om. (for -घातैश्च). D6 M1.2 चरणाग्र- (for च कराग्र-). D9 -पातैः; Cm.g.k.t as above (for -घातैः). —(l. 33) D7 असह्यरूपौ; G2 °वेगौ; M1.2 °वेगं; Cr.m.g.t °रूपं (as above). —(l. 34) D5 T1 G2 M1–3 वानरराक्षसेंद्रौ. —(l. 35) D5 T1 सुयुद्धं; G3 M5 च युद्धं; Cv as above (for नियुद्धं). D9 M1.2 -रूपौ (for -वेगौ). —(l. 37) D7 विक्षिप्य (for उत्क्षिप्य). D7.9–11 T3 M5 [उ]त्क्षिप्य (for [आ]क्षिप्य). D5 T1 M2 विनम्र- (for विनम्य). —(l. 38) D5 T1.3 M5 पदक्रमाद्. —(l. 39) T3 M3 Cg आविध्य; G1.2 M5 आलिंग्य (for आपीड्य). M1.2 विलीनगात्रौ; Cg as above (for विलग्नदेहौ). —(l. 40) D6.10 शाल- (for साल-). D5 marg.; D7.9 Cr -निघातमध्ये; Cg.k.t as above (for -निखात°). ❀ Ct: 'निघात' इति पाठेऽप्ययमेवार्थः. ❀ —(l. 41) D9–11 भूमितलं स्पृशंतौ (for भूतलमस्पृ°). —(l. 42) D11 सुमुहूर्तं (for मुहूर्तं). D6.7.9–11 Ct -निःश्वसंतौ; M5 -निस्पृशंतौ. G3 च विनिश्वसंतौ. —D10 reads l. 43 after l. 47. —(l. 43) D7 आविध्य. D5 T1 G2.3 M1.2 चापीड्य; D6 T2.3 M3 Cm.g चावल्ग्य; D7 बंधेन; M5 चाबध्य (for चालिङ्ग्य). M5 बाहुपाशैः (for °योक्त्रैः). —(45) T3 सहेह; M5 संरब्ध-; Cr.m.g.k.t as above (for संरम्भ-). —(l. 46) D9–11 सुचेरतुः (for संचे°). D6.10 T2 G2 युद्धमार्गे. D7 क्रमं न तौ जग्मतुराजि वीरौ. —(l. 47) D7.9–11 जातदंष्ट्रौ (for °दर्पौ). —(l. 48) G1 -नाथाविव; Cg as above (for -पोता°). G2 M5 संप्रवृद्धौ; Cr.g.k as above (for °युक्तौ). —(l. 49) T2 संहार्य; G1 प्रहत्य; Cg as above (for संहत्य). D6 G1 संपीड्य; D7.9–11 संवेद्य; Cg as above (for चापीड्य). D7.9–11 च तौ कराभ्यां; M1.2 परस्परेण; Cg as above (for च तावुरोभ्यां). —(l. 50) D5 T1 G M3 निपेततुर्. D7.9–11 धरायां; Cg as above (for धरण्याम्). ❀ Cv.r: निपेततुर्वै युगपद्धरण्यामिति पाठः। Cv adds वैशब्दः पादपूरणे. ❀ —(l. 51) D5 T1 G3 M5 उन्नम्य; Cg as above (for उद्यम्य). —(l. 52) M5 तौ संचरेते. D7.9–11 T1.2 G2.3 M5 -युद्धमार्गे; Cg as above (for °मार्गैः). —(l. 53) G1 damaged for शिक्षाबलसंप्र. —(l. 54) D7 G1.2 श्रमं (for क्रमं). D9 तु (for तौ). D5 T1 M1.2 आहवेन; D6 T2 आशु वेगौ; G2 आहवे तौ (for आशु वीरौ). —(l. 55) M2 वानर-; Cv as above (for वारण-). T2 (also) G3 -नासिकाभैर्; M5 -वारणाभिर् (for -वारणाभैर्). ❀ Cr.m: वारणवारणाभैः

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

बाहूत्तमैर्वारणवारणाभै-
निर्वारयन्तौ वरवारणाभौ ।
चिरेण कालेन भृशं प्रयुद्धौ
संचेरतुर्मण्डलमार्गमाशु ।
तौ परस्परमासाद्य यत्तावन्योन्यसूदने ।
मार्जाराविव भक्षार्थे वितस्थाते मुहुर्मुहुः । [60]
मण्डलानि विचित्राणि स्थानानि विविधानि च ।
गोमूत्रिकाणि चित्राणि गतप्रत्यागतानि च ।
तिरश्चीनगतान्येव तथा वक्रगतानि च ।
परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ।
अभिद्रवणमाप्लावमास्थानं च सविग्रहम् । [65]
परावृत्तमपावृत्तमवद्रुतमवप्लुतम् ।
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ ।
तौ संचेरतुरन्योन्यं वानरेन्द्रश्च रावणः ।
एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः ।
आरब्धुमुपसंपेदे ज्ञात्वा तं वानराधिपः । [70]
उत्पपात तदाकाशं जितकाशी जितक्रमः ।
रावणः स्थित एवात्र हरिराजेन वञ्चितः ।
अथ हरिवरनाथः प्राप्य संग्रामकीर्तिं
निशिचरपतिमाजौ योजयित्वा श्रमेण ।
गगनमतिविशालं लङ्घयित्वार्कसूनु-
र्हरिगणबलमध्ये रामपार्श्वं जगाम । [75]
इति स सवितृसूनुस्तत्र तत्कर्म कृत्वा
पवनगतिरनीकं प्राविशत्संप्रहृष्टः ।
रघुवरनृपसूनोर्वर्धयन्युद्धहर्षं
तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः । [80]

Colophon

19

After 6.31.47, D_{13} ins.:

राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ।
रावणोऽपि महातेजाः क्रोधविस्फारितेक्षणः ।
अगच्छत्सहसा क्रुद्धः सर्वसैन्येन संवृतः ।
गजाश्वरथसंकीर्णा राक्षसैर्मेदिनी कृता ।
उत्तरां दिशमास्थाय प्रयातो रावणो युधि । [5]
हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत् ।
सहयैः काञ्चनापीडैर्गजैश्च समलंकृतैः ।
रथैश्चादित्यसंकाशैः कवचैश्च मनोहरैः ।
नीलपीतसुरक्ताभिः पताकाभिरलंकृताः ।
राक्षसा भूरिविक्रान्ता मूर्छिता घोरदर्शनाः । [10]
वादित्रेण विचित्रेण वादयन्त इतस्ततः ।
विनिर्ययुर्महानादैर्नादयन्तो महीतलम् ।
निर्यान्तं राक्षसानीकं संप्रेक्ष्य सुदुरासदम् ।
ऋक्षवानरयूथाश्च हृष्टा युद्धाभिकाङ्क्षिणः ।
अभ्यधावंस्तदा घोरा राक्षसानां वधं प्रति । [15]
वानरै राक्षसानां च महायुद्धमवर्तत ।
प्रभिन्नकरटैर्घोरैर्नदद्भिश्च प्रहारिभिः ।
स्वलंकृतैर्बद्धतूणैर्नदद्भिश्च महास्वनैः ।
नानाशस्त्रधरा धीरा मेघा इव सविद्युतः ।
शैलशृङ्गनगैश्चापि भूरुहैर्विपुलैस्तथा । [20]
अन्योन्यबद्धवैराणां परस्परजयकृताम् । (sic)
तुरगखुरविध्वस्तं रथनेमिसमुद्धतम् । } 6.34.10
कण्ठानरौत्सीद्योधानां चक्षूंषि च महीरजः । }
ततो युद्धं महाभीमं हरिराक्षससंकुलम् ।

(Cm वारणा गजाः) तेषां वारणानि अर्गलानि तत्सदृशैः ।; Cg: वार्यन्ते एभिरिति वारणाः आलानस्तम्भाः ।; Ck: वारयन्त्येभिः प्रतिगजानिति व्युत्पत्त्या हस्तवाची वारणशब्दो द्वितीयः । करिकराभैरित्यर्थः । ; Ct: वारयन्त्येभिः प्रतिगजानिति वारणो महागजः । द्वितीयवारणशब्दः करिहस्तवाची. ❀ —(l. 56) D_5 निर्वास्य*तौ. $D_{7.9-11}$ $M_{1.2}$ Ct पर- (for वर-). —(l. 57) M_3 Cg तु सं- (for भृशं). $D_{5.6.11}$ T_1 M_3 प्रयुक्तौ; Cg as above (for प्रयुद्धौ). —(l. 59) M_3 मत्ताव् (for यत्ताव्). —(l. 60) D_{11} मार्जारम्. $D_{10.11}$ Ck.t [s]वतस्थाते; T_3 उत्तस्थाते; Cv.r.g as above (for वित°). —(l. 62) D_7 गोमूत्राणि च; D_{9-11} Cv.t गोमूत्रकाणि. D_7 $M_{1.2}$ चक्राणि; Ct as above (for चित्राणि). —(l. 63) D_9 T_1 M_5 चक्रगतानि; Cm.g.k.t as above (for वक्र°). G_1 [अ]पि (for च). —(l. 64) D_6 T_3 G_1 प्रहरणं; Cm.g.k.t as above (for प्रहाराणां). —(l. 65) D_9 G_1 अभिद्रावणम्. D_9 आश्लेषम्; G_2 आस्थानम्; Cr.g as above (for आप्लावम्). $D_{7.10.11}$ $M_{1.2}$ Ct अवस्थानं; G_2 आप्लवं च; Cm g as above (for आस्थानं च). T_2 सनिग्रहं. —(l. 66) G_2 om. (hapl.); M_5 उपावृत्तम; Cr.m.g.k.t as above (for अपा°). D_7 अवदत्तम्; $D_{10.11}$ G_2 $M_{1.2.5}$ Ct अपद्रुतम्; T_2 अवप्रतम्; Cv.r.m.k as above (for अवद्रुतम्). T_3 उतद्रुतमुपप्लुतं (for the post. half). —(l. 67) D_6 अपन्यस्तौ (for °न्यस्तं). —(l. 68) D_5 तं सं-; $D_{10.11}$ तौ वि-; $G_{1.2}$ वीरौ (for तौ सं-). G_3 संचेरतुस्तावन्योन्यं (for the prior half). G_3 वारणः (meta.) (for रावणः). $G_{1.2}$ राक्षसेंद्रकपीश्वरौ (for the post. half). —(l. 69) D_6 मायाबलसमन्वितः (for the post. half). —(l. 70) $G_{1.2}$ तज्ज्ञात्वा; $M_{1.2}$ ज्ञात्वा तद् (for ज्ञात्वा तं). M_5 वानरोत्तमः. —(l. 71) D_5 तथा (for तदा). T_2 गतक्रमः; Cg as above (for जित°). —(l. 73) $D_{5.9-11}$ प्राप्तसंग्रामकीर्तिर्; D_7 प्राप्य कीर्तिं महात्मा (for प्राप्य संग्रामकीर्तिं). —(l. 75) D_5 om. (hapl.) from नु up to in l. 79. —(l. 76) D_7 -गणवन-; T_1 -बलगण- (by transp.); G_2 M_3 -वरगण-; G_3 -वरबल- (for -गणबल-). —(l. 77) D_{9-11} स इति (by transp.); T_2 इति (for इति स). —(l. 78) D_7 संप्रकृष्टः (for °हृष्टः). —(l. 79) G_3 $M_{1.2}$ दशरथ- (for रघुवर-). ❀ Cv: रघुवरनृपसूनोरिति पाठः. ❀ —(l. 80) T_3 -गणमृग- (by transp.) (for -मृगगण-). G_1 हरींद्रैः; M_5 [s]भिद्गः (for हरीन्द्रः).

Colophon.—*Sarga name*: D_9 सुग्रीवरावणयुद्धं रामसमागमः.—*Sarga no.* (figures, words or both): $D_{5-7.10.11}$ $T_{1.3}$ G M 40; D_9 16; T_2 39.—After colophon, G $M_{1.2.5}$ conclude with श्रीरामाय नमः.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

रक्षःसैन्येषु संक्रुद्धा निजघ्नुस्ते परस्परम् ।
सिंहनादैर्विनेदुस्ते युद्धे वानरराक्षसाः ।
ते पादपैः शिलाग्रैश्च चक्रुर्वृष्टिं तथोत्तमाम् ।
वानराश्चूर्णयामासुर्यातुधानान्सहस्रशः ।
निजघ्नुः संयुगे क्रुद्धा हरयो राक्षसर्षभान् ।
केचिद्विद्राव्य रक्षांसि गजवाजिगतान्यपि ।
निजघ्नुः सहसा त्वन्ये यातुधानान्बलीमुखाः ।
शैलश्रृङ्गविभिन्नाङ्गा मुष्टिभिर्भ्रान्तलोचनाः ।
चेरुः पेतुश्च नेदुश्च ततो राक्षसपुंगवाः ।
निहतान्राक्षसान्दृष्ट्वा हतशेषा निशाचराः ।
लङ्काभिमुखं धावन्तो विद्रुता राक्षसा युधि ।
अपरे ये च दुर्धर्षा येऽपि सुस्था निशाचराः ।
ते सर्वे चालयामासुर्बाहुना शस्त्रमाहवे ।
ततः प्रजविताश्वेषु रथेषु रथिनां वराः ।
अगच्छन्सहसा क्रुद्धा यत्र युद्धमवर्तत ।
कुञ्जरैस्तु सुसंनद्धैः पदातैश्च सहस्रशः ।
नानाकवचसंनद्धा नानाप्रहरणैर्युताः ।
वानरं वानरैर्जघ्नुर्घोराः क्रुद्धाश्च राक्षसाः ।
राक्षसान्राक्षसैरेव पिपिषुर्वानरा युधि ।
आच्छिद्य च शिलाः केचिन्निजघ्नू राक्षसा हरीन् ।
केचिदाक्षिप्य शस्त्राणि जघ्नू रक्षांसि वानराः ।
निजघ्नुः शैलमुशलैर्विविधैश्च परस्परम् ।
छिन्नवर्मायुधधरा राक्षसा वानरैर्हताः ।
रुधिरं सुस्रुवुस्तत्र कृताः शैलद्रुमा इव ।
रथेनाथ रथं चापि राक्षसं राक्षसेन हि ।
हयेनैव हयं चापि पिपिषुर्वानरा रणे ।
क्षुरप्रैरर्धचन्द्रैश्च निशितैश्च शितैः शरैः ।
वितस्तिकैः सुनिशितैः शक्तितोमरमुद्गरैः ।
राक्षसा वानरेन्द्राणां कदनं चक्रुराहवे ।
निस्त्रिंशभल्लैः परिघैर्मुशलैः कूटमुद्गरैः ।
भुसुण्डिभिश्च गदया तोमरैः प्रासपट्टिशैः ।
निजघ्नुर्वानरान्सर्वान्राक्षसाः पर्वतोपमाः ।
प्रविष्टा राक्षसाः सैन्यं यत्र राघवलक्ष्मणौ ।
तान्निजघ्नुस्तदा रामो निर्दहंश्च शरार्चिषा ।
लक्ष्मणस्त्वथ रामश्च शरैरग्निशिखोपमैः ।
ममन्थू राक्षसानीकं दण्डहस्त इवान्तकः ।
शिरोभिरुद्भूतकिरीटकुण्डलैः
संरम्भदष्टैभिः परिदस्तदन्तकैः ।
महाभुजैः साभरणैः सहायुधैः
सा प्रस्तृता भूः करभोरुभिर्बभौ ।
वानराश्चापरे घोरा राक्षसैरपरैः सह ।
द्वंद्वयुद्धमकुर्वंस्ते बहवो बहुभिस्तदा ।
तत्रासीत्सुमहद्युद्धं तुमुलं लोमहर्षणम् ।
रक्षसां वानराणां च वीराणां जयमिच्छताम् ।
तस्मिन्प्रवृत्ते संग्रामे रौद्रे भीरुभयंकरे ।
हरिराक्षसयोर्युद्धं तुमुलं समपद्यत ।
वानरास्तत्र युध्यन्ति शैलवृक्षकृतायुधाः ।
अपरे मुष्टिभिः शूरास्ताडयन्ति महाबलाः ।

राक्षसाश्च महात्मानो नानाप्रहरणायुधाः ।
वानरांस्त्वभिसंक्रुद्धा गिरिवृक्षकृतायुधाः ।
तेऽन्योन्यं समरे जघ्नुर्गोलाङ्गूला निशाचराः ।
युध्यतां तु तदा तेषां वानराणां महात्मनाम् ।
राक्षसानां बभूवाथ रणे कोपः सुदारुणः ।
राक्षसा भीमकर्माणो रावणस्य जयैषिणः ।
वानराणामपि चमू रामस्य जयमिच्छताम् ।
तेषां युद्धं महाघोरं संजज्ञे कपिरक्षसाम् ।
रामरावणयोरर्थे समभित्यक्तजीवितम् ।
तद्बभूवाद्भुतं युद्धं तेषां संग्रामशालिनाम् ।
रुधिरार्द्रां महीं चक्रुस्तदा दारुणकर्दमाम् ।
कबन्धास्तत्र चोत्पेतुः पश्यन्तस्त्वशिरोक्षिभिः ।
उद्यतायुधदोर्दण्डैर्धावमाना इतस्ततः ।
शरीरछिन्नसंकीर्णा बभूव च वसुंधरा ।
शोणितौघमहातोया घोरा नद्यः प्रविस्तृताः ।
निशाचरमहायोधऋक्षवानरसंभवाः ।
प्रावर्तयन्नदीं घोरां भीरूणां भयवर्धिनीम् ।
असृग्दानमहापङ्कां नानाकीर्णान्त्रशैवलाम् ।
छिन्नकायशिरोमीनां बद्धावयवशङ्कताम् ।
गृध्रहंसबकाकीर्णां कङ्कसारसनादिताम् ।
विल्हीरवसमायुक्तां काकवायससेवितां ।
मेदोमज्जावशाकीर्णामावर्तस्तनितस्तटाम् ।
शरीरसंघातवहा बभूवुः फेनिलापगाः ।
मातंगरथकूलाश्च समरे त्वायुधद्रुमाः ।
कपिराक्षसदेहेभ्यः प्रवृद्धाः केशशाड्वलाः ।
वर्तमाने महारौद्रे संग्रामेऽतिभयंकरे ।
बभूवायोधनं घोरं गोमायुरुतसंकुलम् ।
भल्लैः खड्गैर्गदाभिश्च शक्तितोमरसायकैः ।
ध्वजवर्मरथानश्वान्नागान्प्रहरणानि च ।
अपविद्धैश्च भग्नैश्च शरैः सांग्रामिकैर्हयैः ।
निहतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः ।
चक्राक्षयुगशस्त्रैश्च भग्नैश्च तलमास्थितैः ।
कृत्वा च तुमुलं युद्धं परिश्रान्ता रणाजिरे ।
निवृत्ता युध्यमानास्तु स्थितास्ते हरिराक्षसाः ।
एतस्मिन्नन्तरे चैव असंभ्रान्ताः शनैः शनैः ।
युद्धादपसृताः सर्वे रावणाद्या निशाचराः ।
विविशुर्नगरीं लङ्कां रक्षोगणनिषेविताम् ।
उपविश्यासने राजा सचिवानिदमब्रवीत् ।
सज्जीभवन्तु ते सर्वे राक्षसा भीमविक्रमाः ।
*संग्रामादपक्रान्ते पुरीं रक्षःपतौ गते ।
विश्राम्यान्तरमासाद्य निवासार्थं ससैनिकाः ।
आरुरुहुर्नगं रम्यं रामसुग्रीवलक्ष्मणाः ।
दशरथनृपपुत्रवाहिनी तदानीं
क्षतजविराजमानविग्रहा रणान्ते ।
रिपुजननिधनपरिश्रमप्रहृष्टा
रजनिमुखे न्यवसद्यथासुखं च रामः ।

इत्यार्षे रामायणे लङ्काकाण्डे युद्धपर्वणि तत्रनिवासो नाम सर्गः ॥

ते तां रात्रिमुषित्वा तु रामाद्या हरियूथपाः ।
लङ्कां च ददृशुर्वीराः सर्वे युद्धाभिकाङ्क्षिणः ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

20

After 6.31.63^{a,b}, D13 ins.:

उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम् ।
आसीनं सूर्यसंकाशे काञ्चने परमासने ।
रुक्मवेदिगतं दिव्यं ज्वलन्तमिव पावकम् ।
दशास्यं विंशतिभुजं दर्शनीयमरिंदमम् ।
विशालाक्षं सुताम्राक्षं राजलक्षणशोभितम् । [5]
स्निग्धवैडूर्यसंकाशं तप्तकाञ्चनभूषितम् ।
सुभुजं श्वेतदशनं महास्यं पर्वतोपमम् ।
देवगन्धर्वभूतानामृषीणां च महात्मनाम् ।
अजेयं समरे शत्रुं ख्यातं रणकृतान्तकम् ।
देवासुरविमर्देषु वज्राशनिकृतव्रणम् । [10]
ऐरावतविषाणाग्रैः शतशः क्षतलक्षणम् ।
विष्णुं चक्रादिबाणैश्च महायुद्धेषु ताडितम् ।
आहिताङ्कं समस्तैश्च देवप्रहरणैस्तथा ।
अक्षोभ्यानां समस्तानां क्षोभणं क्षिप्रकारिणम् ।
भङ्कारं पर्वताग्राणां सुराणां च महाबलम् । [15]
उच्छेत्तारं च वर्णानां परदाराभिमर्शनम् ।
महर्षीणां च भेत्तारं व्रतानां चाभिदूषणम् ।
देवानां च सयक्षाणां गन्धर्वाणां च संयुगे ।
अस्त्राणां च प्रयोक्तारं सद्विषं च महारथम् ।
पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम् । [20]
तक्षकस्य तथा भार्यां परिष्वज्य जहार यः ।
येन वैश्रवणो राजा रणेऽतिक्रम्य निर्जितः ।
कैलासपर्वतश्रेष्ठं योऽध्यास्तेऽमरवाहनः ।
वनं चैत्ररथं दिव्यं नलिनीनन्दनं शिवम् ।
व्यनाशयत यः क्रोधाद्देवोद्यानानि वीर्यवान् । [25]
चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परंतपौ ।
निवारयेत बाहुभ्यां यः शैलशिखरोपमः ।
बहिर्धानेषु यः साममभिजघ्ने महाबलः ।
पञ्चयज्ञहुतक्रूरं ब्रह्मघ्नं दुष्टचारिणम् ।
कर्कशं निरनुक्रोशं प्रजानां भयदं तथा । [30]
देवदानवगन्धर्वैः पिशाचैः पन्नगोरगैः ।
अवध्यं राक्षसैश्चापि संग्रामेषु च मानुषैः ।
रावणं सर्वभूतानां सर्वलोकनिवारणम् ।
राक्षसेन्द्रं महेन्द्राभं पौलस्त्यकुलनन्दनम् ।
दिव्यचन्दनदिग्धाङ्गं दिव्यमाल्योपशोभितम् [35]

21

After 6.33. 20, Ś V D1–4.8.12.13 ins.; Ñ1 B1 ins. l. 59–60 only after 6.33. 20; Ñ2 ins. l. 11–58 after 6.33.31 and l. 59–60 after 6.33. 20; B2 ins. l. 1–10, 59–60 after 6.33. 20 and l. 11–58 after 6.33. 28; while B3 ins. l. 1 only after 6.33. 20:

अतिकायोऽतिबलवान्देवदानवदर्पहा ।
रम्भं च विनतं चैव ताडयामास मार्गणैः ।
तौ शिलावृक्षवर्षेण तस्य सैन्यं निजघ्नतुः ।
जलदाविव संरब्धौ वातवृष्ट्या गवां गणम् ।
महोदरः सुसंरब्धः सुषेणं पञ्चभिः शरैः । [5]
हृदि विव्याध नाराचैर्ललाटे च त्रिभिः शरैः ।
स तथाभिहतस्तेन रक्षसा वानरोत्तमः ।
जघान शिलया तस्य रथं साश्वं ससारथिम् ।
तौ जयाकाङ्क्षिणौ दृप्तौ वीर्यवन्तौ दुरासदौ ।
चक्रतुस्तुमुलं युद्धं स्वसैन्यपरिवारितौ । [10]
जाम्बवानृक्षराजस्तु मकराक्षं खरात्मजम् ।
प्राहिणोद्वृक्षमुत्पाट्य तं स चिच्छेद मार्गणैः ।
ततो निशाचरः क्रुद्धो जाम्बवन्तं शितैः शरैः ।
हृदि बाह्वोर्ललाटे च विव्याध लघुहस्तवत् ।
स तथाभिहतस्तेन क्षिप्रहस्तेन यूथपः । [15]
व्यश्वसूतरथं चक्रे नातिकृच्छ्रात्खरात्मजम् ।
भृशं शतबलिर्विद्धो विद्युज्जिह्वेन रक्षसा ।
निजघानाश्वकर्णेन विद्युज्जिह्वं स्तनान्तरे ।
निघ्नन्तं राक्षसान्वीरान्गजं प्रतपनो हरिम् ।
शूलेन जघ्निवान्पार्श्वे ननाद च महास्वनम् । [20]
स तु रोषपरीताङ्गः सालवृक्षेण राक्षसम् ।

21

शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः ।
बिभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च ।
विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान् ।
त्रस्ताः सर्वे हरिगणाः शरैः संकृत्तदेहिनः ।
अङ्गदं संप्रधावन्ति प्रजापतिमिव प्रजाः । [95]
ततो हरिगणान्भग्नान्दृष्ट्वा वालिसुतस्तदा ।
क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत ।
वज्रदंष्ट्रोऽङ्गदश्चोभौ संगतौ हरिराक्षसौ ।
चेरतुः परमक्रुद्धौ हरिमत्तगजाविव ।
ततः शतसहस्रेण वालिपुत्रं महाबलम् । [100]
जघान मर्मदेशेषु शरैरग्निशिखोपमैः ।

M3 शूरा ये (for शूरास्ते). D5.7.9–11 G1.2 M5 ते सर्वे; D6 सर्वे तु; T2.3 M3 सर्वे ते (for सर्वे च). M1.2 वानराश्चापि बलिनः सर्वे युद्धविशारदाः. —(l. 75) T2 M3 [अ]पि (for [ए]व). D5 T1 M1–3 गिरीन्; D9 T2.3 G M5 महा- (for गिरि-). D6 T2 महाबलाः; G3 महोपलान् (for महाशिलाः). ❀ Ck: गिरिवृक्षानिति षष्ठीसमासः. ❀ —(l. 78) G1 -बलानां; G2 M5 -हरीणां (for -गणानां). D6 T1 M1.2 रक्षसां वानराणां च (for the prior half). G3 अभि- (for सम-). ❀ Cg: तद्राक्षसगणानां चेति । ते च राक्षसगणाश्च तद्राक्षसगणाः । तेषाम् । तच्छब्देन वानरा उच्यन्ते ।; so also Ct. ❀ —(l. 79) D6 G1 प्रभग्न-; D9–11 अभग्न-; T3 विभिन्न- (for प्रभिन्न-). T3 छिन्नाः; G1.2 भग्नैः; G3 भिन्न- (for छिन्नैः). G2 केशैश्; Cm.g as above (for पादैश्). G3 M5 सहस्रशः; Cm.g as above (for च बाहुभिः). —(l. 80) T3 शरैर् (for शस्त्रैर्). D5.6 T1 G1.3 M1.2.5 Cg अर्पित-; M3 अर्चित- (for अर्दित-). G1 ते; M1.2 च (for तु). —(l. 81) G1 M1.2 [अ]पि (for [ए]व). G3 शेरते वानरास्तत्र (for the prior half). D9.11 शरवेगं; G3 M5 सर्वतो गां (for शेरते गां). M1.2 स्म रणक्षितौ (for गां समाश्रिताः). —(l. 82) D6 -बलाकाढ्या; D7 T2.3 -बलाकाश्च; D9 -वराहाश्च; G1 -बलाश्चैव; G2 -बलक्षाढ्या; G3 -बलाश्चापि; M1.2 -बलाकीर्णा; M3 -बलैराढ्या (for -बलाढ्याश्च). D5.7.9–11 T3 -कुल- (for -गण-). —(l. 83) M1.2 कबंधाश्च (for कबन्धानि). G1.2 M5 अभीक्ष्णं (for भीरूणां). —G1 damaged from वै up to शि in l. 84. D7 G2 M5 च (for वै). M1.2 भीरूणां तु भयावहाः (for the post. half). —(l. 84) G2 M5 -काय- (for -पाणि-). M1.2 छिन्नबाहुशिरः-पादि(M3 °दा) (for the prior half). D5–7 T1.2 G1.2 M1.2.5 भिन्न-; G3 भग्न- (for छिन्न-). T2 तु (for च). —D9 om. (hapl.?); D7 reads in marg. l. 85. —(l. 85) G3 राक्षसैश् (for राक्षसाश्). D7.10.11 भूतले (for वै रणे). M1.2 पेतुः शतसहस्रशः (for the post. half). —(l. 86) G2.3 M5 -राजेन (for -सैन्येन). M1.2 तु रक्षसां (for निशाचरम्). ❀ Cr: निशाचरं नैशाचरम् । वृद्धयभाव आर्षः । यद्वा निशि चरतीति निशाचरम्।; so also Cm.g.t. ❀ —(l. 87) D5.6 T1.2 G2 पार्श्वतः (for पश्यतः). —After l. 88, D11 erroneously repeats निशाचरं प्राभज्यत बलं सर्वं. —(l. 89) M1.2 [अ]भूद् (for स). —(l. 90) M1.2 विवेश च (for प्रविवेश). G1 -यूथपान् (for -वाहिनीम्). —(l. 92) M1.2 जघान (for बिभेद). —D7 om. l. 93. —(l. 93) T2 G3 M1.2.5 महाबलः (for प्रतापवान्). —(l. 94) M1.2 शर- (for शरैः). G1.2 M5 उत्कृत्त- (for संकृत्त-). M1–3 -कंधराः (for -देहिनः) —(l. 95) M1.2 समधावंत; M5 प्रतिधावंति; Cm.g.t as above (for संप्रधावन्ति). —(l. 96) G3 भीतान् (for भग्नान्). M5 वायु- (for वालि-). G3 M5 रणे; M1.2 बली (for तदा). —(l. 97) D9 महताविष्टो (for वज्रदंष्ट्रं तम्). D9 वज्रदंष्ट्रम्; T3 आपतंतम्; M1–3 उदै(M3 °द्धी)क्षंतम् (for उदीक्षन्तम्). M5 उदैक्षत महाबलः (for the post. half). —For l. 94–97, D6 T2 subst.:

2* चेलुः पेतुश्च मम्लुश्च वानराः शरपीडिताः ।
वज्रदंष्ट्रेण हरयो वातनुन्ना इव द्रुमाः ।
ततो भग्नास्तु हरयो वज्रदंष्ट्रभयार्दिताः ।
वालिसूनुं महात्मानं त्रातारमभिपेदिरे ।
तान्सर्वानङ्गदो वीरः समाश्वास्य महाकपीन् । [5]
वज्रदंष्ट्रवधार्थाय मनश्चक्रे प्लवंगमः ।
उत्पाट्य वृक्षं सहसा वज्रदंष्ट्रमभिद्रवत् ।
तं तु विव्याध नाराचैः सप्तभिर्वालिनन्दनम् ।
मर्मण्यभिजघानाशु वज्रदंष्ट्रः प्रतापवान् ।

[(l. 1) D6 चेरुः पेतुश्च ममृपुश्च (hypm.) (for the prior half). —(l. 2) T2 द्रुमा इव (by transp.).]

—(l. 98) G3 अंगदो वज्रदंष्ट्रस्तौ (for the prior half). D10.11 Ck.t योयुध्येते परस्परं (for the post. half). —(l. 99) M1.2 युयुधाते ततः क्रुद्धौ (for the prior half). ❀ Cm.k.t: हरिमत्तगजाविव । हरिरिह शार्दूलः । Ck adds स्वप्नेऽपि सिंहदर्शने गजानां मरणात् । Cm.t. cite Kataka. ❀ —(l. 100) D5.7 T3 M1–3 शर- (for शत-). M5 -सहस्राणि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः ।
चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ।
दृष्ट्वा पतन्तं तं वृक्षमसंभ्रान्तश्च राक्षसः ।
चिच्छेद बहुधा सोऽपि मथितः पतितो भुवि । [105]
तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः ।
प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च ।
समापतन्तं तं दृष्ट्वा रथादाप्लुत्य वीर्यवान् ।
गदापाणिरसंभ्रान्तः पृथिव्यां समतिष्ठत ।
साङ्गदेन शिला क्षिप्ता गत्वा तु रणमूर्धनि । [110]
सचक्रकूबरं साश्वं प्रममाथ रथं तदा ।
ततोऽन्यं गिरिमाक्षिप्य विपुलं द्रुमभूषितम् ।
वज्रदंष्ट्रस्य शिरसि पातयामास वानरः ।
अभवच्छोणितोद्गारी वज्रदंष्ट्रः सुमूर्छितः ।
मुहूर्तमभवन्मूढो गदामालिङ्ग्य निश्वसन् । [115]
स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् ।
जघान परमक्रुद्धो वक्षोदेशे निशाचरः ।
गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमकुर्वत ।
अन्योऽन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ ।
रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ । [120]
बभूवतुः सविक्रान्तावङ्गारकबुधाविव ।
ततः परमतेजस्वी अङ्गदः कपिकुञ्जरः ।
उत्पाट्य वृक्षं स्थितवानासीत्पुष्पफलाचितम् ।
स जग्राहार्षभं चर्म खड्गं च विपुलं शुभम् ।
किङ्किणीजालसंछन्नं चर्मणा च परिष्कृतम् । [125]
विचित्रांश्चरतुर्मार्गान्नुषितौ कपिराक्षसौ ।
जघ्नतुश्च तदान्योन्यं निर्दयं जयकाङ्क्षिणौ ।
व्रणैः सास्रैरशोभेतां पुष्पिताविव किंशुकौ ।
युध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ।
निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः । [130]
उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ।
निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः ।
जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ।
रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा ।
सरोषपरिवृत्ताक्षं शुभं खड्गहतं शिरः । [135]

(for °सेण). D6.7.9–11 हरि- (for वालि-). D5 G1.2 M1–3 महाबलः (for °बलम्). —(l. 101) D5 T1 M1–3 मातंगमिव तोमरैः (for the post. half). —(l. 102) D6 T3 -पुत्रो (for -सूनुर्). —(l. 104) M1.2 निशाचरः (for च राक्षसः). —(l. 105) D6 चिक्षेप (for चिच्छेद). G2 भूमौ (for सोऽपि). M1–3 निकृत्तः (for मथितः). D10.11 प्रापतद् (for पतितो). —(l. 107) G1 शिलां प्रगृह्य विपुलां (for the prior half). —(l. 108) D6.9–11 M5 तमापतंतं; M1.2 आपतंतं स (for समापतन्तं). D9–11 दृष्ट्वा स (for तं दृष्ट्वा). G1 समापतंतीं तां दृष्ट्वा (for the prior half). T3 उत्प्लुत्य (for आप्लुत्य). —(l. 110) D9–11 T3 अंगदेन (for साङ्गं°). M3 गदा (for शिला). D5 T1 M1.2 सोंगदेन बलोत्क्षिप्तो (for the prior half). T2 रथ- (for रण-). —(l. 111) G3 ततः (for तदा). —(l. 112) G3 तदा (for ततो). D6 आसाद्य; G3 आदाय (for आक्षिप्य). D7.9–11 T3 ततोन्यच्छिखरं गृह्य (for the prior half). T3 M5 विपुल-; G2 M1.2 विविध- (for विपुलं). G3 हरिसत्तमः. —(l. 113) M1.2 अंगदो वज्रदंष्ट्रस्य (for the prior half). G2 रक्षसः; G3 वीर्यवान्; M1.2 मूर्धनि; M3 सोंगदः (for वानरः). —After l. 113, D6 ins.:

3* शिला बलवता क्षिप्ता छेदयामास तच्छिरः ।

—(l. 114) D6 T2 शोणितोद्गामी. D6 T2.3 G1 M3 स मूर्छितः; G3 M5 महाबलः; M1.2 [s]मिताडितः (for सुमूर्छितः). —(l. 115) G1 इव संमूढो (for अभवन्मूढो). D6 निःश्वसन्; M5 वीर्यवान् (for निश्वसन्). —(l. 116) T3 प्राप्त- (for लब्ध-). —M1 damaged for l. 117. —(l. 117) M3 समरे (for परम-). —(l. 118) T3 तदा (for ततस्). T3 वीरो; M1.2 तेन (for तत्र). D5.6 T2 G1 M3 अवर्तत; M1.2 चकार ह (for अकुर्वत). —(l. 119) D9.11 T2.3 निष्पतुस् (for जघ्नतुस्). —(l. 120) M1.2 रुधिरोक्षितसर्वांगौ (for the prior half). G3 प्रहारैर्जर्झरीकृतौ (for the post. half). —(l. 122) Note hiatus between the two halves. T3 (to avoid hiatus) चांगदः; M1 (to avoid hiatus) त्वंगदः (for अङ्गदः). D7.9–11 T3 प्लवगर्षभः (for कपिकुञ्जरः). M1.3 वालिपुत्रो हरीश्वरः (for the post. half). —(l. 123) M2.3 बहु- (for आसीत्). D7.9–11 M1 -फलैर्युतं; T3 G1.2 M5 -फलान्वि(T3 °यु)तं (for -फलाचितम्). —After l. 123, G2 ins.:

4* चिक्षेप परमक्रुद्धो वालिसूनुर्महाबलः ।
तं प्रचिच्छेद बाणौघैर्वज्रदंष्ट्रः स राक्षसः ।

—(l. 124) D9–11 T3 G2.3 M3.5 जग्राह(M5 °हार) चार्षभं चर्म (for the prior half). M1.2 शितं (for शुभम्). ❀ Cr: स जग्राहेति । सः वज्रदंष्ट्रः. ❀ —(l. 125) D5.7 -संछिन्नं (for -संछन्नं). —After l. 125, D7 G2 ins.:

5* वज्रदंष्ट्रोऽथ जग्राह सोऽङ्गदोऽप्यसिचर्मणी ।

—(l. 126) D9–11 T3 चित्रांश्च रुचिरान्मा(T3 °र्गौ मा)र्गांश्च (for the prior half). D9–11 T3 चेरतुः (for नुषितौ). G1.2 M1.2 हरि- (for कपि-). M5 कपिकुंजरराक्षसौ (for the post. half). —(l. 127) T2.3 निष्पतुश्च. G2 तथा (for तदा). D9–11 G1 नर्दं(D9 °दं)तौ; T2.3 G2 निर्दयौ; M5 निर्भयं (for निर्दयं). —(l. 128) D6.7.9–11 T2.3 G M5 व्रणैः समृद्धैः (D7 G3 °मग्नैः; D9–11 T3 Ct °मुत्थैः; M5 °मस्तैः) शोभेतां (for the prior half). —(l. 130) Note hiatus between the two halves. D7.9.10 निमिष-. M5 (to avoid hiatus) त्वंगदः (for अङ्गदः). —(l. 132) D6.9 तु; M5 च (for सु-). D7 (अ)हरच् (for महच्). —(l. 133) D6 -पुत्रो (for -सूनुर्). G2 महाहवे (for °बलः). ❀ Cr: अस्य शिरो जघानेत्यनेन वृक्षे प्रतिहते, अङ्गदोऽपि चर्मासी जग्राहेत्यवगम्यते ।; Cg: अस्य वज्रदंष्ट्रस्येत्यन्वयः । केचित्तु स जग्राहार्षभं चर्मेति पठित्वा स वज्रदंष्ट्रः खड्गं जग्राह । अङ्गदो वृक्षं जग्राहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वृक्षे प्रतिहतेऽङ्गदोऽपि चर्मासी जग्राहेत्यनेनावगम्यत इत्यपि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः ।
त्रस्ताः प्रत्यपतँल्लङ्कां वध्यमानाः प्लवंगमैः ।
विषण्णवदना दीना ह्रिया किंचिदवाङ्मुखाः ।
निहत्य तं वज्रधरप्रभावः
स वालिसूनुः कपिसैन्यमध्ये । [140]
जगाम हर्षं महितो महाबलः
सहस्रनेत्रस्त्रिदशैरिवावृतः ।

Colophon

27

After Sarga 6.44, T2.3 ins. :

अकम्पने तु निहते हतशेषा निशाचराः ।
शशंसू राक्षसेन्द्राय निहतोऽकम्पनस्त्विति ।
अकम्पनं हतं श्रुत्वा रावणो लोकरावणः ।
संदिदेश महाकायं राक्षसं भीमदर्शनम् ।
निष्क्रमस्व महाबाहो स्वसैन्यपरिवारितः । [5]
वानराणां वधार्थाय तथा राघवयोर्द्वयोः ।
एवमुक्तो महाकायो रावणेन महाबलः ।
प्रणम्य च दशग्रीवं निष्पपात ततो द्रुतम् ।
अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षं ततोऽब्रवीत् ।
अद्य वानरसैन्यानि प्लावयिष्ये शरोर्मिभिः । [10]
भर्तृवैरविमोक्षार्थं करिष्ये कर्म दुष्करम् ।
चतुश्चक्रसमायुक्तं रथं सांग्रामिकं मम ।
मयूरध्वजमुच्छ्रित्य पताकाभिरलंकृतम् ।
सर्वशस्त्रसमायुक्तं किङ्किणीजालशोभितम् ।
पिशाचवदनैश्चैव खरैर्युक्तं महारथम् । [15]
सहस्रेण समग्रेण महापवनरंहसा ।
संकल्प्य च रथं शीघ्रमानय त्वं ममान्तिकम् ।
तथा च सर्वसैन्यं मे नानाप्रहरणान्वितम् ।
भेरीशङ्खविमिश्रेण तूर्यनादेन नादितम् ।
द्वारेण दक्षिणेनैव निर्गच्छतु ममाज्ञया । [20]
महाकायवचः श्रुत्वा बलाध्यक्षो महाबलः ।
प्रणम्य च दशग्रीवं निष्पपात ततो द्रुतम् ।
त्वरयामास लङ्कायां महाकायस्य तद्बलम् ।
परिवार्य महाकायं चतुरङ्गं महाबलम् ।
परस्परकृतोत्साहं प्रयान्तं दक्षिणामुखम् । [25]
व्यूढं दृष्ट्वा महासैन्यमारुरोह महारथम् ।
महाकायो नदन्हृष्टः संनद्धकवचस्तदा ।
सैन्यैः परिवृतोऽगच्छद्युद्धभूमिं महाबलः ।
निर्गच्छति महाकाये उत्पाताश्च सुदारुणाः ।
अभवन्भयदा नृणां महाकायस्य पश्यतः । [30]
अस्थिवर्षं पपातार्थ समांसं शोणितं बहु ।
सशर्करोऽनिलश्चासीत्सनिर्घातो महारवः ।
सेनायाश्चापि मध्ये तु गोमायुश्चाप्यधावत ।
रथाच्छत्रं पपातार्थ समे च स्खलिता हयाः ।
रथे च न्यपतद्गृध्रो व्यनदन्नशिवं शिवाः । [35]
भूम्यामन्तर्गता भूत्वा प्रद्रवन्ति जगर्जिरे ।
मृगाश्च महिषाश्चैव ह्यपसव्यं प्रचक्रिरे ।
स उत्पातान्न गणयन्महाकायो युयुत्सया ।
स दक्षिणेन द्वारेण निर्ययौ रणकोविदः ।
आलोक्य वानरानीकं तद्राक्षसबलं महत् । [40]
अभ्यधावत वेगेन रणे चाभिमुखं तदा ।
वानराणामपि चमूर्दृष्ट्वा तद्राक्षसं बलम् ।
आभिमुख्येन धावन्तं युद्धाय समुपस्थिता ।
जगृहुः पर्वताग्राणि द्रुमांश्चाथ प्लवंगमाः ।
शिलाश्च विविधाकाराः केचिच्च नखदंष्ट्रिणः । [45]
ततः प्रववृते युद्धं घोररूपं भयावहम् ।
रक्षसां वानराणां च निघ्नतामितरेतरम् ।
नानारथवरौघश्च सादिनश्च सहस्रशः ।
पदातिनः पराक्रान्ता राक्षसा परिघायुधाः ।
जघ्निरे वानरान्वीरान्नामानि च बभाषिरे । [50]
रजः संध्याभ्रकपिलं प्रच्छादयत भास्करम् ।
संछादिताभवद्भूमिस्तदा वानरराक्षसैः ।
अश्मवृष्टिस्तदाकाशे शस्त्रवृष्टिः पपात च ।
रेणुना शस्त्रवृष्ट्या च न किंचित्प्रत्यदृश्यत ।
अन्धकारे कृते तस्मिन्कश्मलं महदाविशत् । [55]
रुरोध च रजस्तत्र कर्णनेत्राणि युध्यताम् ।
अन्योन्यं निगृहीताः स्म कश्मलाभिहता भृशम् ।
एवं युयुधिरे तत्र संज्ञाभिरितरेतरम् ।
केशाकेशि समालग्ना राक्षसा वानरास्तदा ।
रजसा पिहिते तस्मिन्भास्करे निष्प्रभे कृते । [60]
तत्र तत्रैव रजसा पततां धरणीतले ।

वर्णयन्ति ❀ —G2 om. l. 135–136. —(l. 135) D9–11 T3 तच्च तस्य(T3 रोष-) परीताक्षं (for the prior half). G3 -हृतं (for -हतं). —(l. 137) D7.9–11 T2.3 M1 ह्यभ्यद्रवन्; G1 M2.5 ह्य(M2 चा)भ्यपतन् (for प्रत्यपतन्). G2.3 स(G3 सं)त्रस्ताभ्य(G3 °भ्यु)पतल्लंकां (for the prior half). —(l. 138) D7 म्लाना (for दीना). —After l. 138, D6 ins. :

6* रावणाय वधं प्रोचुर्वज्रदंष्ट्रस्य राक्षसाः ।

—(l. 139) D5.6.10 वज्रधरः . D7.9–11 -प्रतापवान्; G1 M5 -प्रभावं (for -प्रभावः). G2 वज्रसमप्रभावं. —(l. 141) D6 T2 सहितो; G3 M6 मुदितो; Cm.k.t as above (for महितो). D6 T2 महाबलैः (for °लः).

Colophon. —*Sarga name*: D9 वज्रदंष्ट्रवधः . —*Sarga no.* (figures, words or both): D5 (erroneously) 53 ; D6.7.10.11 T1.2 G M 54 ; D9 30 ; T3 55. —After colophon, G M1.2.5 conclude with श्रीरामाय नमः .

27

(l. 16) T3 -परम- (for -पवन-). —(l. 33) T3 मध्येन (for मध्ये तु). —(l. 38) T3 अगणयन् (for न गणयन्). —(l. 43) T3 समुपस्थितं. —(l. 44) T3 [अ]पि (for [अ]थ). —(l. 48) T3 नागा रथवरौघाश्च (for the prior half). —(l. 51) T3 -कपिशं (for -कपिलं). —(l. 53) T3 ह (for च). —(l. 57) T3 च (for स). —(l. 61)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

च्युतानामिव तालेभ्यः फलानां श्रूयते ध्वनिः ।
शिरोभिः पतितैर्भाति रुधिरार्द्रैस्तदा मही ।
तपनीयनिभैः काले नलिनैरिव पुष्पितैः ।
उपशाम्यत्यधो घोरं रजः परमदारुणम् । [65]
रुधिरौघेण महता प्लाविते धरणीतले ।
ततो दृष्ट्वा सहस्राणि ऋक्षवानररक्षसाम् ।
रुधिरार्द्राण्यदृश्यन्त गैरिकानिव ते तदा ।
घ्नन्तमन्यं जघानान्यो दशन्तमपरोऽदशत् ।
देहीत्यन्यो ददामीति तदान्योन्यं बभाषिरे । [70]
तत्र तत्रैव शिरसां पततां धरणीतले ।
ऊरुभिश्च समं तावद्विनिकृत्तैर्महाहवे ।
बाहुभिर्विनिकृत्तैश्च हस्तपादैश्च सर्वतः ।
कबन्धशतसंकीर्णा भूर्बभूवोग्रदर्शना ।
ऋक्षाणां वानराणां च राक्षसानां गजैः सह । [75]
हयानां च रथानां च पतितानां महीतले ।
राशयः समदृश्यन्त गिरिमात्राः समन्ततः ।
संजज्ञे रणभूम्यां तु परलोका महानदी ।
शोणितौघा महारौद्रा श्वापदैरुपशोभिता ।
कूलापहारिणी सा तु याम्या वैतरणी यथा । [80]
मृतानां स्तनमानानामृक्षवानररक्षसाम् ।
शरीराणि वहन्ती सा सशब्दा व्याकुला तदा ।
मेदोमज्जाकर्दमा च भुजवृक्णाश्मशर्करा ।
शूराणां हर्षजननी भीरूणां भयवर्धनी ।
प्रावर्तत नदी घोरा युद्धे देवासुरोपमे । [85]
राक्षसा वानराश्चैव तां नदीमवगाहिरे ।
राक्षसैर्हन्यमानं तु शरशक्त्यष्टितोमरैः ।
परिघैर्भिण्डिवालैश्च शूलमुद्गरपट्टसैः ।
विह्वलं वानरं सैन्यमभज्यत दिशो दश ।
तच्च भग्नं बलं दृष्ट्वा वालिपुत्रोऽङ्गदोऽब्रवीत् । [90]
निवर्तध्वमधर्मज्ञा युध्यध्वं किं स्थितेन च ।
इह कीर्तिर्न हातव्या हत्वा शत्रून्रणाजिरे ।
रामकार्यं तु कर्तव्यं सीतायाः परिमार्गणम् ।
युध्यन्तु सहिताः सर्वे न प्राणान्परिरक्षथ ।
एवमुक्त्वा तदा शूरः शिखरं गृह्य पाणिना । [95]
अङ्गदोऽभ्यद्रवत्क्रुद्धो राक्षसानां महाचमूम् ।
अङ्गदे संनिवृत्ते तु निवृत्ताः सर्वयूथपाः ।
पृथुश्च ऋषभश्चैव गवाक्षः पनसस्तदा ।
गजश्च गिरिसंकाशो वीरः शतबलिस्तथा ।
तथान्ये वानरश्रेष्ठा युद्धं चक्रुः सुदारुणम् । [100]
अङ्गदस्तेन शृङ्गेण राक्षसान्विनिपातयत् ।
तथान्यान्वृक्षवृष्ट्या तु शिलावर्षेण चापरान् ।
तलप्रहारैश्च तदा निजघानाथ राक्षसान् ।
हन्यमानाः पुनस्तेन वालिपुत्रेण धीमता ।
आयुधानि परित्यज्य प्रद्रुता भयपीडिताः । [105]
केचिल्लङ्कां प्रविष्टास्तु वानरैरर्दिता भृशम् ।
समुद्रे पतिताः केचित्केचित्तत्रैव तस्थिरे ।
राक्षसान्विद्रुतान्दृष्ट्वा वज्रनाभो न्यवर्तत ।
रुधिराशी महावीर्यः कालदंष्ट्रस्तथैव च ।
कालकल्पो विपाशश्च शतमायश्च राक्षसः । [110]
धूम्रश्च दुर्धरश्चैव तथैव च महाशिराः ।
महानादश्च बलवांस्तथान्ये रजनीचराः ।
निवृत्ता ह्यागतास्तत्र वानराञ्त्रणमूर्धनि ।
निजघ्नुः शैलशूलैस्ते विव्यधुश्च परस्परम् ।
सिंहनादान्विनेदुश्च रणे वानरराक्षसाः । [115]
प्लवंगमा गर्वितहृष्टचेष्टाः
संग्राममासाद्य भयं विमुच्य ।
युद्धं समन्तात्सह राक्षसैस्ते-
नानाविधैश्चक्रुरदीनसत्त्वाः ।

Colophon

निवृत्तानां निवृत्तैस्तै रक्षसां वानरैः सह । [120]
संबभूवाद्भुतं युद्धं दारुणं रोमहर्षणम् ।
राक्षसं वज्रनाभं तु पृथुस्तु समयोधयत् ।
रुधिराशं गवाक्षस्तु योधयामास राक्षसम् ।
ऋषभः कालदंष्ट्रं तु महावीर्यमयोधयत् ।
पनसः कालकल्पं तु विपाशं च गजस्तथा । [125]
तथा शतबलिर्वीरः शतमायं निशाचरम् ।
धूम्रश्च दुर्धरश्चैव राक्षसौ सुमहाबलौ ।
क्रथनो मेघपुष्पश्च संक्रुद्धौ तावयुध्यताम् ।
महादंष्ट्रश्च संक्रुद्धो महाकायश्च राक्षसः ।
चक्रतुः सुमहद्युद्धं शरशक्तिसमाकुलम् । [130]
वानराणां सहस्राणि जघ्नस्तुस्तौ समन्ततः ।
वानरैर्हन्यमानैस्तु अङ्गदस्तानभिद्रवत् ।
अयुध्यन्त तथैवान्ये राक्षसा वानरैः सह ।
ते तत्र भृशसंतप्ता वध्यमानाः परस्परम् ।
व्याकुले ते बले ह्यास्तां वर्षासु सरिताविव । [135]
आविवेश तदा तीव्रं राक्षसानां महद्भयम् ।
हरीणां तु तथाभूतं महद्भयमजायत ।

T₃ शिरसा (for रजसा). —(l. 67) T₃ तस्मिन् (for दृष्ट्वा). —(l. 68) T₃ -[अ]क्तानि (for -[आ]र्द्राणि) and रूषितानीव गैरिकैः (for the post. half). —(l. 70) T₃ ततो (for तदा). —(l. 73) T₃ सर्वशः (for सर्वतः). —(l. 78) T₃ परलोक-. —(l. 81) T₃ समरे घोरे (for स्तनमानानाम्). —(l. 91) T₃ च धर्मज्ञा (for अधर्मज्ञा). —(l. 92) T₃ हंतव्या (for हातव्या). —(l. 93) T₃ परिमोक्षणं (for °मार्गणम्). —(l. 96) T₃ महा-चमूः . —(l. 98) T₃ कंपनस्तथा (for पनसस्तदा). —(l. 101) T₃ राक्षसं (for राक्षसान्). —(l. 103) T₃ तथा (for तदा). —(l. 110) T₂ [s]थ पार्श्वश्च (for विपाशश्च). —(l. 113) T₃ ह्यागतामर्षाः —After the prior half, T₃ ins. :

1* सर्वे युद्धविशारदाः ।
हन्तुं व्यवसितास्तत्र.

—(l. 114) T₃ च (for ते) and परश्वधैः (for परस्परम्). Colophon. —*Sarga no.* : T₂ 57 ; T₃ 58. —(l. 122) T₃ समयोजयत्. —(l. 125) T₃ तु (for च). —Note hiatus between the two halves of l. 132. —(l. 134) T₃

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

वध्यमानेषु सैन्येषु नदत्सु सुमहत्सु च ।
कूजतां स्तनतां चैव शब्दश्चासीत्सुदारुणः ।
रुधिरस्रावदिग्धाङ्गाः पुष्पिता इव किंशुकाः । [140]
वानरा राक्षसाश्चैव गैरिका इव चाभवन् ।
कबन्धानि समुत्पेतुर्ऋक्षवानररक्षसाम् ।
उत्पत्य निपतन्ति स्म नृत्यन्ते चापराणि च ।
संग्रामे वर्तमाने तु यमराष्ट्रविवर्धने ।
वज्रनाभो धनुर्गृह्य पृथुं सप्तभिरर्दयत् । [145]
शरैश्च तीक्ष्णधारैस्तु कर्मारपरिमार्जितैः ।
पुनः शरशतेनैनं क्षिप्रहस्तो निशाचरः ।
पृथुर्विद्धः शरैर्गाढैरुत्पाट्य शिखरं गिरेः ।
भ्रामयित्वा मुमोचाशु वज्रनाभस्य रक्षसः ।
मुक्तं तु शिखरं दृष्ट्वा संपतन्तं तदाशुगैः । [150]
शरैश्चिच्छेद सहसा तद्विकीर्णं पपात ह ।
पातिते गिरिशृङ्गे तु पृथुर्दृष्ट्वा महाबलः ।
उत्पत्य पततां श्रेष्ठो रथस्य निपपात ह ।
अच्छिनत्प धनुस्तस्य बभञ्ज च महाबलः ।
अश्वाञ्जघान तरसा स्यन्दनं च बभञ्ज ह । [155]
रथे भग्ने ततः क्षिप्रं शूलं जग्राह राक्षसः ।
आजघानाथ शूलेन पृथुं वानरपुंगवम् ।
स तु शूलविभिन्नाङ्गः पृथुर्वानरपुंगवः ।
स जघान शिरोमध्यं मुष्टिना तं निशाचरम् ।
विह्वलं तमुपालभ्य मुष्टिपातेन राक्षसम् । [160]
पादयोः स तु जग्राह भ्रामयामास तं पुनः ।
भ्रामयित्वा ततः पृथ्व्यां वज्रनाभं निशाचरम् ।
निष्पिपेष पृथुः पश्चात्पुनरप्याजघान ह ।
रुधिराशो गवाक्षं तु आकर्णविनियोजितैः ।
शरैरशनिसंकाशैर्बाह्वोरपि स चार्दयत् । [165]
स तु बाणविभिन्नाङ्गो गवाक्षो हरिसत्तमः ।
शिलापादपवर्षं च मुमोच सुमहद्बली ।
तच्छिलापादपं वर्षं निपात्य निशितैः शरैः ।
स शरैरग्निसंकाशैर्गवाक्षं तु न्यपातयत् ।
गवाक्षं पतितं दृष्ट्वा तारस्तु वनगोचरः । [170]
अभ्यद्रवत वेगेन रुधिराशं निशाचरम् ।
प्रगृह्य सालवृक्षं च भ्रामयामास सत्वरः ।
मुमोच सुमहाकायो निशाचरवधं प्रति ।
तमापतन्तं संप्रेक्ष्य शरेणैकेन सोऽच्छिनत् ।
वानरं दशभिर्विद्ध्वा सिंहनादं ननाद च । [175]
शरभूतं तु तं कृत्वा पातयित्वा च भूतले ।
रुधिराशो महावीर्यो व्यधमद्वानरं बलम् ।
वानराणां समन्तात्तु शरैः शतसहस्रशः ।
आवर्त इव तोयानां गतो याति निशाचरः ।
तस्य वानरसैन्यस्य अन्तकालस्तु सोऽभवत् । [180]
रुधिराशो दुराधर्षो राक्षसः शरचापभृत् ।
पातितैः पात्यमानैश्च गतसत्त्वैश्च मेदिनी ।
बभूव निखिला सर्वा पर्वतैरिव संतता ।
रुधिरौघसमाकीर्णा कबन्धशतसंकुला ।
अनेकतनुवृत्ता तु दुर्गमार्गा वसुंधरा । [185]
एतस्मिन्नन्तरे काले गवाक्षो वनगोचरः ।
संज्ञां प्राप्य मुहूर्तेन तारश्च पुनरुत्थितः ।
गवाक्षश्च महाकायः शिलां गृह्य च सत्वरः ।
भ्रामयित्वा मुमोचैनां निशाचरवधं प्रति ।
अनिवार्यशिलां तां तु दृष्ट्वा राक्षसपुंगवः । [190]
उत्पपात रथाच्छीघ्रं खड्गमादाय चर्म च ।
ससारथिं सचक्रं च सध्वजं तं सकूबरम् ।
रथं संचूर्णयामास सा शिला वानरेरिता ।
राक्षसं खड्गपाणिं तं समीक्ष्यायान्तमाहवे ।
गवाक्षः परिघं गृह्य तस्य चाभिमुखं ययौ । [195]
यावत्तु खड्गमहरद्धरिणा क्षिप्रकारिणा ।
परिघेण हतस्तावत्पपात च ममार च ।
रुधिराशं हतं दृष्ट्वा कालदंष्ट्रो निशाचरः ।
अभ्यद्रवच्च वेगेन ऋषभं वानरर्षभम् ।
ऐरावतकुले जातमारुह्य स गजोत्तमम् । [200]
छादयामास संक्रुद्धो ऋषभश्चापि दन्तिनम् ।
स गजं तूर्णमुत्पत्य ऋषभो वानरोत्तमः ।
तलेनाशनिकल्पेन कुम्भमध्ये ह्यताडयत् ।
तलप्रहाराभिहतो नादं कृत्वाथ संगरात् ।
अपासर्पद्धनुर्मात्रं शीघ्रं च प्रजहौ मदम् । [205]
राक्षसं कालदंष्ट्रं तु वानरो ऋषभस्तदा ।
रुधिरेण तु दिग्धाङ्गं सधातुमिव पर्वतम् ।
अभिदुद्राव वेगेन पुनस्तत्र महागजम् ।
विषाणं तस्य निष्कृष्य ताडयामास राक्षसम् ।
गजदन्तहतः सोऽथ उत्तमाङ्गे निशाचरः । [210]
पिण्डीकृत्य पपाताथ गतसत्त्वो महीतले ।
वानरेण हतः सोऽपि स्वेन दन्तेन कुञ्जरः ।
निपपात महीपृष्ठे वज्राहत इवाचलः ।
हाहाकारमभूत्सर्वं तदा तद्राक्षसं बलम् ।
कालदंष्ट्रे हते वीरे हृष्टा ह्यासन्वनौकसः । [215]

परस्परैः. —(l. 135) T₃ चले (for बले). —(l. 139) T₃ स्वनतां (for स्तनतां). —(l. 146) T₃ कर्दूर- (for कर्मार-). —(l. 150) T₃ तथा शरैः (for तदाशुगैः). —(l. 151) T₃ शतधा (for सहसा). —T₃ om. (hapl.) from पुंगवम् in l. 157 up to वानर in l. 158. —(l. 159) T₃ नि- (for स) and -मध्ये (for -मध्यं). —(l. 162) T₃ तु तं (for ततः). —(l. 163) T₃ चासीत् (for पश्चात्). —Note hiatus between the two halves of l. 164. —(l. 168) T₃ निवार्य (for निपात्य). —(l. 172) T₃ सत्वरं. —(l. 175) T₃ भिद्य (for विद्ध्वा) and ह (for च). —(l. 176) T₃ शरघातं (for °भूतं). —(l. 179) T₃ यतो (for गतो). —Note hiatus between the two halves of l. 180. —(l. 184) T₃ -समाकीर्ण-. —(l. 185) T₃ -युक्ता (for -वृत्ता). —(l. 186) T₃ वीरो (for काले). —(l. 188) T₃ तत्परः (for सत्वरः). —(l. 193) T₃ तं (for सं-). —(l. 201) T₃ चोदयामास. —(l. 206) T₃ तथा (for तदा). —Note hiatus between the two halves of l. 210. —(l. 211) T₃ पिंडीकृत्वा. —(l. 213) T₃

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

कालदंष्ट्रं हतं दृष्ट्वा कालकल्पो निशाचरः ।
पनसं ताडयामास शरैः पावकसंनिभैः ।
शरैः संपूरिततनू रथेऽस्य निपपात ह ।
बभञ्ज च रथं स्वर्णं हयांश्च निजघान सः ।
मुष्टिना चाहनत्तं तु कालकल्पनिशाचरम् । [220]
मुष्टिप्रहाराभिहतो विह्वलो निपपात ह ।
लाक्षारससमवर्णं तु मुखात्सुस्राव शोणितम् ।
जीवितेन प्रमुक्तश्च निष्क्रान्तदशनेक्षणः ।
तं हत्वा राक्षसं तूर्णं पनसो मुदितोऽभवत् ।
ननाद च महानादं मेघगम्भीरनिस्वनः । [225]
वारयन्वानरीं सेनां विपाशोऽथ धनुर्धरः ।
शरैरनेकसाहस्रैः सूदयामास वानरान् ।
सूदमानं च तं दृष्ट्वा वानराञ्रणमूर्धनि ।
गजस्तु गिरिसंकाशो राक्षसान्समभिद्रवत् ।
द्रुमवर्षं ववर्षाथ राक्षसं प्रति वानरः । [230]
क्रोधेन महताविष्टः समूलविटपैर्द्रुमैः ।
तां छादयन्तीं चाकाशं वृक्षवृष्टिं दुरासदाम् ।
चिच्छेद निशितैर्बाणैः शतशोऽथ सहस्रशः ।
स विध्य दशभिर्बाणैर्गजं तु गजगामिनम् ।
पुनश्च सप्तभिर्बाणैः स्तनयोरन्तरं महत् । [235]
आजघान च विंशत्या मुखे पञ्च शरैः शितैः ।
ततः शरसहस्रेण विपाशो वानरोत्तमम् ।
स तदा भिन्नमर्माङ्गो गजस्तु गजसंनिभः ।
वैनतेय इव क्षिप्रं तस्याङ्के निपपात ह ।
उत्पाटयत्ततस्तस्य शिरो ज्वलितकुण्डलम् । [240]
विपाशस्य महावीर्यो गजस्तालफलं यथा ।
विपाशं निहतं दृष्ट्वा शतमायो निशाचरः ।
अभ्यद्रवत वेगेन गजं प्रति गजो यथा ।
गजस्तु परिघं गृह्य राक्षसं समभिद्रवत् ।
वीरः शतबलिश्चैव ऋषभः पनसस्तथा । [245]
अन्ये च वानरश्रेष्ठाः शतमायं निशाचरम् ।
वृक्षैः शैलैर्महाकायाः शिलाभिः शिखरैस्तदा ।
शतमायश्च संक्रुद्धः शरवर्षं मुमोच ह ।
शक्तितोमरवर्षेण शूलवर्षेण राक्षसः ।
ववर्ष चैव चक्राणि गदाश्च मुसलानि च । [250]
परिघान्भिण्डवालांश्च पाषाणानथ पर्वतान् ।
शतमायेन चोत्सृष्टं वानराणामथोपरि ।
मायाविहितमेतत्तु शस्त्रवर्षं पपात ह ।
ते हताः शस्त्रवर्षेण वानराः सर्व एव ते ।
युयुधुः संयुगे तस्मिंस्त्यक्त्वा प्राणान्सुदुस्त्यजान् । [255]

विभंज्ञान्वानरान्दृष्ट्वा वालिपुत्रोऽङ्गदस्तदा ।
अभिदुद्राव सहसा शतमायं महाबलम् ।
वेष्टयित्वा तु तैः सर्वैर्वानरैः पर्वतोपमैः ।
सह सैन्येन सर्वेण युद्धं चक्रे सुदारुणम् ।
ऋक्षाः शाखामृगाश्चैव वृक्षसंघांश्च चिक्षिपुः । [260]
शरवर्षेण तान्सर्वान्राक्षसः संप्रचिच्छिदे ।
गवाक्षः शृङ्गमुत्पाट्य चिक्षेप तरसा बली ।
ऋषभो द्रुमवृष्टिं च पनसः शिखरं गिरेः ।
शिलाश्चैव गजस्तस्मिन्विससर्ज चमूमुखे ।
रथचक्रं शतबलिः क्रथनः परिघं तथा । [265]
तानापतत एवाशु सर्वेषां च भुजच्युतान् ।
शरैरशनिसंकाशैश्चिच्छेद स पृथक्पृथक् ।
गवाक्षप्रहितं तत्र विस्तीर्णं शृङ्गमुत्तमम् ।
ऋषभेण द्रुमान्क्षिप्तानप्राप्तानन्तरेऽच्छिनत् ।
गजेन च शिलां मुक्तां रथचक्रं च सायकैः । [270]
चिच्छेद शतमायस्तु पनसस्य गिरिं तथा ।
एवं छित्त्वा शरैस्तीक्ष्णैर्वानरान्प्रत्ययुध्यत ।
तत्कृत्वा दारुणं कर्म सिंहनादं ननाद च ।
एतस्मिन्नन्तरे क्रुद्धौ राक्षसौ धूम्रदुर्धरौ ।
शतमायं पुरस्कृत्य वानरांस्तौ निजघ्नतुः । [275]
क्रथनो वानरश्रेष्ठो जीवितं त्यज्य दूरतः ।
अभिदुद्राव वेगेन दुर्धरं राक्षसं रणे ।
प्राहरच्च तलेनैव गिरिशृङ्गोपमं शिरः ।
पपात च हतः संख्ये दुर्धरस्त्यक्तजीवितः ।
तं दृष्ट्वा युद्धशौण्डेन सखा तस्यैव रक्षसः । [280]
शिलया मेघतुल्येन धूम्रः प्राणैर्वियोजितः ।
धूम्रं च दुर्धरं चैव प्रेक्ष्य संख्ये निपातितौ ।
शतमायो रणे क्रुद्धो वानरान्समयोधयत् ।
एकमेकेन बाणेन त्रिभिस्त्रीन्दशभिर्दश ।
एकेन च शतं वीरो वानराणां जघान ह । [285]
अङ्गदं पञ्चविंशत्या गवाक्षं नवभिः शरैः ।
पृथु च दशभिर्बाणैर्ऋषभं सप्तभिस्तदा ।
पनसं चैकविंशत्या गजं षड्भिः शिलीमुखैः ।
शरेण गृध्रपत्रेण वीरं शतबलिं तदा ।
अन्यांश्च वानरगणाञ्शतशोऽथ सहस्रशः । [290]
व्यधमत्सायकैस्तीक्ष्णैः राक्षसो धन्विनां वरः ।
ततस्तद्वानरबलं शरैरासीत्सुदुर्लभम् ।
पलायत दिशः सर्वा वर्जयित्वा तु यूथपान् ।
प्रनष्टान्वानरान्दृष्ट्वा अङ्गदप्रमुखास्तदा ।
राक्षसस्य च तद्वीर्यं निराशा जीवितेऽभवन् । [295]

स (for नि-). —(l. 214) T₃ तद्वानरं (for तद्राक्षसं). —(l. 220) T₃ चाहरत्तं तु कालकल्पं. —(l. 231) T₃ -विट-पद्रुमैः. —(l. 236) T₃ मुखे पंचशतैरपि (for the post. half). —(l. 237) T₃ शत- (for शर-). —(l. 240) T₃ तत्र (for तस्य). —(l. 247) T₃ तथा (for तदा). —(l. 248) T₃ तु (for च). —(l. 251) T₃ अपि (for अथ). —(l. 253) T₃ -पिहितम् (for -विहितम्). —(l. 257) T₃ निशाचरं (for महाबलम्). —(l. 264) T₃ गिरेस् (for गजस्). —(l. 265) T₂ प्रधनः (for क्रथनः) and तदा (for तथा). —T₃ om. (hapl.?) l. 266–271. —(l. 272) T₃ प्रत्यविध्यत (for प्रत्ययुध्यत). —(l. 276) T₃ वानरान् (for जीवितं). —(l. 279) T₃ आपपात (for पपात च). —(l. 284) T₃ त्रि- (for त्रीन्). —(l. 287) T₃ नवभिर् (for दशभिर्). —(l. 288) T₃ [ए]व (for [ए]क-). —(l. 289) T₃ परं (for वीरं) and तथा (for तदा). —(l. 292) T₃ सुदुर्बलं (for सुदुर्लभम्). —(l. 294)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

जयो वास्तु वधो वेति बुद्धिं कृत्वा प्लवंगमाः ।
शिखराणि प्रगृह्याशु शतमायं प्रचिक्षिपुः ।
तानि तैः संप्रयुक्तानि अन्तरिक्षे शितैः शरैः ।
शिखराणि द्रुतं छित्त्वा शङ्खशब्दमथाकरोत् ।
सहस्रेण पृषत्कानां सहस्रमहनत्कपीन् । [300]
एकैकेन तु बाणेन यूथपान्समताडयत् ।
ततस्ते यूथपश्रेष्ठा भिद्यमानाः शिलीमुखैः ।
आकर्णपूरितैर्मुक्तै राक्षसेन पुनः पुनः ।
आकाशं सहसोत्पत्य समं सर्वेऽपतंस्तदा ।
रथे तस्य महाकाया यूथपा गिरिसंनिभाः । [305]
जघान स हयांस्तस्य गवाक्षोऽथ ध्वजं गजः ।
पनसश्च रथं तस्य विध्वंसयत वानरः ।
ऋषभः सारथिं तस्य आयुधानि पृथुस्तथा ।
वीरः शतबलिश्चैनं मुष्टिनाभिजघान ह ।
शतमायस्ततः क्रुद्धः खड्गमादाय चर्म च । [310]
गरुत्मानिव वेगेन उत्पपात विहायसा ।
असिं शतबलिश्चापि प्रगृह्य प्रसभं बली ।
आकाशं शस्त्रसंकाशमुत्पपात हरीश्वरः ।
तावुभावम्बरे वीरौ तदा वानरराक्षसौ ।
खड्गपाणी सुसंक्रुद्धावन्योन्यमभिजघ्नतुः । [315]
खड्गेनाप्रहरद्रक्षो वानरेन्द्रस्य वक्षसि ।
चर्मणा वञ्चयामास पतन्तमसिमुत्तमम् ।
वञ्चयित्वा प्रहारं तु वीरः शतबलिः पुनः ।
ऊरुमुद्दिश्य खड्गं तु ऊरुभ्यां प्राहिणोत्तदा ।
छिन्नोरुरथशीर्षो वै वेष्टमानो यथोरगः । [320]
निपपात हतः सोऽथ गरुडेनेव पन्नगः ।
दृष्ट्वा तु शतमायं च गतासुं पतितं क्षितौ ।
प्रहृष्टा वानराः सर्वे विनेदुर्जलदा इव ।

Colophon

सचिवान्निहतं दृष्ट्वा शतमायं च राक्षसम् ।
निःशेषं च बलं सर्वं कृतं दृष्ट्वा प्लवंगमैः । [325]
रोषसंरम्भताम्राक्षो भ्रात्रा सह कनीयसा ।
वानरानभिदुद्राव महाकायो महाबलः ।
धनुः शक्रधनुःप्रख्यं सज्यं वेगेन वै कृतम् ।
आदाय सहसा वीरो जगामाभिमुखः परान् ।
रथमास्थाय शक्तिर्दशहस्तप्रमाणतः । [330]
छत्रेण ध्रियमाणेन मयूरेण ध्वजेन च ।
कवचेन विचित्रेण वीज्यमानश्च चामरैः ।
लक्ष्म्या परमया युक्तः सारथिं वाक्यमब्रवीत् ।
चोदयाश्वानसंभ्रान्तः समेषु विषमेषु च ।
वानरान्हन्तुमिच्छामि यैर्हतं राक्षसं बलम् । [335]
एतान्हत्वा ह्यहं संख्ये ततो रामं सलक्ष्मणम् ।
सुग्रीवं च हनिष्यामि हनूमन्तं च वानरम् ।
अप्रमत्तो भवाश्वेषु सारथे वारणे तथा ।
मम त्वं युध्यमानस्य रथे तिष्ठस्व वीर्यभीः ।
प्रतिज्ञाय तु तद्वाक्यं सारथिस्तस्य रक्षसः । [340]
सहस्रं वाजिनां क्षिप्रं चोदयामास संयुगे ।
ततस्ते वानराः सर्वे शैलवृक्षशिलायुधाः ।
अभिसंगम्य वेगेन महाकायं प्रदुद्रुवुः ।
राक्षसोऽथ महाकायः शरैस्तान्समयोधयत् ।
चिच्छेद पर्वताग्राणि शिलावृक्षततानि च । [345]
ततस्तु शरवर्षेण प्रच्छाद्य हरिवाहिनीम् ।
आकाशं छादयामास शरवृष्ट्या निशाचरः ।
दिशः प्रच्छादिताः सर्वास्तमोभूता इवाभवन् ।
अन्धकारीकृतं सर्वं न प्रज्ञायत किंचन ।
धनुषो निष्पतन्तश्च शरा बर्हिणवाससः । [350]
रक्ताः पीताः सिताः श्वेताः शलभानां प्रजा इव ।
आलात इव चाविद्धं धनुस्तस्य प्रजायते ।
विद्युद्भिरावृतं यद्वद्द्वितीयेन्द्रधनुर्दिवि ।
संघर्षजश्च बाणानां शब्द आसीत्सुदारुणः ।
दह्यतामिव वेणूनामभवद्दारुणो महान् । [355]
पर्वतैः पतितैश्चैव तरुभिश्चैव चूर्णितैः ।
वानराणां शिरोभिश्च शरीरैश्चैव संवृता ।
हस्तपादसमाकीर्णा ऋक्षवानरसंकुला ।
क्षणेनागम्यरूपा सा संबभौ युद्धमेदिनी ।
ततस्ते वानराः सर्वे बाणसंधानपीडिताः । [360]
न शेकुश्चेष्टितं यत्र शकुना इव पञ्जरम् ।
हन्यमानाः शरौघैस्तैर्निष्पन्दास्तु ततः स्थिताः ।
निरुच्छ्वासाः कृताः सर्वे शिलावृष्ट्या यथा द्विजाः ।
न तेषामङ्गुलमपि विवृतं समदृश्यत ।
निरन्तरीकृता बाणैः कदम्बा इव केसरैः । [365]
अशोकस्तबकाकारा रुधिरेण समुक्षिताः ।
निश्चेष्टाश्च कृताः सर्वे दाडिमप्रतिमैर्मुखैः ।
निश्चेष्टान्गतसत्त्वांश्च दृष्ट्वा सर्वान्प्लवंगमान् ।
अङ्गदो वानरश्रेष्ठो वानरान्वाक्यमब्रवीत् ।
न भेतव्यं न भेतव्यमेतस्य युधि रक्षसः । [370]
अहमेनं वधिष्यामि सत्यमेतद्ब्रवीमि वः ।
भवन्तः कृतकर्माणस्तिष्ठध्वं वानरोत्तमाः ।

Note hiatus between the two halves. T₃ तथा (for तदा). —Note hiatus between the two halves of l. 298. —(l. 304) T₃ तथा (for तदा). —(l. 306) T₃ [आ]दौ (for स). —(l. 307) T₃ स (for च). —(l. 308) Note hiatus between the two halves. T₃ तदा (for तथा). —Note hiatus between the two halves of l. 311. —(l. 316) T₂ प्रहरद् (for [अ]प्रहरद्). —Note hiatus between the two halves of l. 319. —(l. 320) T₃ भिन्नोरुरद-. —(l. 321) T₃ [स]पि (for स्थ). Colophon. —*Sarga no.*: T₂ 58; T₃ 59. —(l. 331) T₃ छित्रेण (for छत्रेण). —(l. 332) T₃ च चित्रेण (for विचित्रेण). —(l. 338) T₃ रथाश्वेषु (for भवाश्वेषु) and वानरे (for वारणे). —(l. 339) T₃ रणे (for रथे). —T₃ om. l. 349-355. —(l. 358) T₃ -समाकीर्ण-. —(l. 359) T₂ lacuna for -रुषा सा. T₃ -संधिताः (for -पीडिताः). —(l. 361) T₃ कुंजरे (for पञ्जरम्). —(l. 362) T₃ ततः (for स्थिताः).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

भागोऽवशिष्ट एकोऽयं मम रक्षो महाबलः ।
वानरानेवमुक्त्वा तु विधूयाङ्गेषु तान्शरान् ।
अभ्यधावत वेगेन प्रगृह्य महतीं शिलाम् । [375]
राक्षसाय मुमोचाथ तां शिलां योजनायताम् ।
जल्पमानो हतोऽसीति महाकायरथं प्रति ।
आपतन्तीं शिलां दृष्ट्वा पातयामास पत्रिभिः ।
त्रिभिः शरैरसंभ्रान्तो वानरं पञ्चभिर्भुजे ।
शिरस्येकेन बाणेन उरस्येकेन कर्णिना । [380]
निर्बिभेद च गात्रेषु स भृशं राक्षसर्षभः ।
स तदा भिन्नसर्वाङ्गो वालिपुत्रः प्रतापवान् ।
पाणिना मुखमामृज्य शोणिताङ्कमथाङ्गदः ।
वृक्षानुत्पाट्य तरसा द्रुमवृष्टिं ववर्ष ह ।
मुक्तामुक्तांस्ततस्तांस्ताञ्शरैश्चिच्छेद राक्षसः । [385]
छित्त्वा तु तांस्ततो वृक्षानङ्गदं प्रत्यविध्यत ।
शराणां च सहस्रेण धनुर्मुक्तेन संयुगे ।
महानादक्षिभिर्बाणैः परीप्सन्भ्रातरं रणे ।
अङ्गदस्तु ततः क्रुद्धस्ततोऽपि महतीं शिलाम् ।
भ्रामयित्वा मुमोचाशु महानादरथं प्रति । [390]
आपतन्तीं शिलां दृष्ट्वा गदां तस्यां मुमोच ह ।
गदया भस्मसाद्भूता निपपात शिला भुवि ।
ततो रोषसमाविष्टो रथेऽस्य निपपात ह ।
अङ्गदो धनुराच्छिद्य बभञ्ज च महाबलः ।
भङ्क्त्वा तस्य धनुर्दिव्यं केशान्संगृह्य राक्षसम् । [395]
क्षितावाविध्य वेगेन क्षिप्रं प्राणैर्व्ययोजयत् ।
भ्रातरं निहतं दृष्ट्वा महाकायो महाबलः ।
अङ्गदं ताडयामास वालिपुत्रं स्तनान्तरे ।
स तु तेन प्रहारेण मूर्छितो भ्रान्तचेतनः ।
पपात सहसा भूमौ विसंज्ञो वेदनार्दितः । [400]
अङ्गदं पतितं दृष्ट्वा वानराः सर्व एव ते ।
शिलापादपवर्षेण राक्षसं समवाकिरन् ।
छाद्यमानस्ततस्तैस्तु महाकायो निशाचरः ।
अविध्यत ततो बाणैर्वानरांस्त्वरयान्वितः ।
गवाक्षं दशभिर्बाणैः पृथुं पञ्चभिरायसैः । [405]
गजं शरशतेनैव तथा शतबलिं त्रिभिः ।
अशीत्या ऋषभं बाणैः पनसं सप्तभिः शरैः ।
सप्तत्या क्रथनं चैव मेघपुष्पं शतेन च ।
एवं स यूथपान्बद्ध्वा क्षिप्रहस्तो निशाचरः ।
एकैकेन च तान्सर्वान्प्रत्यविध्य प्लवंगमान् । [410]
एतस्मिन्नन्तरे वीरः प्राप्य संज्ञां हरीश्वरः ।
अङ्गदः पाणिना नेत्रे प्रमृज्य रुधिरप्लुते ।
आयसीं तु गदां गृह्य हयांस्तस्याहनद्बली ।
सहस्रं वाजिनां तस्य सारथिं च व्यपातयत् ।
गदया चाहनत्तं तु राक्षसं मूर्ध्नि सत्वरम् । [415]
स तु तं रथमुत्सृज्य हताश्वं हतसारथिम् ।
महाकायो गदां गृह्य वालिपुत्रमभिद्रवत् ।
ततस्तौ तु गदाहस्तावुभौ वानरराक्षसौ ।
आजघ्नतुस्तदान्योन्यं वीरव्रतमनुव्रतौ ।
राक्षसस्ताडयामास मूर्ध्नि वानरपुंगवम् । [420]
प्रास्फोटच्च तदा मूर्ध्नि प्रसुस्राव च शोणितम् ।
अङ्गदश्चापि तं रोषाद्राक्षसश्चापि चाङ्गदम् ।
शातयानौ ततस्तौ तु समं च समवापतुः ।
ततस्तौ जर्जरीभूतौ पुष्पिताविव किंशुकौ ।
दन्ताभ्यामिव मातंगौ गदाभ्यां युध्यतो भृशम् । [425]
ते गदे शकलीभूते समुत्सृज्य प्रचक्रतुः ।
बाहुयुद्धं महाघोरं बलिशक्रौ यथा पुरा ।
तयोः पादाभिघाताच्च भस्मीभूतं रजोद्धतम् ।
प्रच्छादयन्तौ तं देशं दृश्येतां तेन तेजसा ।
तौ भुजैः समसृज्येतामायसैः परिघैरिव । [430]
अनुप्रहारैः पतितैः शिरोभ्यां पादघट्टनैः ।
पादप्रहारैः करजैः पादकीलैः पुनः पुनः ।
हाहाकारमकुर्वन्त वानराः पार्श्वतः स्थिताः ।
वालिपुत्र महावीर्य वालितुल्यपराक्रम ।
जयस्व शत्रुं दुर्धर्षं पिता ते दुन्दुभिं यथा । [435]
एवं संस्तूयमानस्तु बलेनापूर्यतां गतः ।
तलेनाशनिकल्पेन राक्षसं समताडयत् ।
पुनश्चैनं समुक्षिप्य पातयामास भूतले ।
तस्योपरि समारुह्य पशुमारममारयत् ।
हते तस्मिन्महाकाये सिंहनादो महानभूत् । [440]
वानराणां प्रहृष्टानां साधु साध्विति वादिनाम् ।
हतशेषास्तु ये तत्र राक्षसा विप्रदुद्रुवुः ।
लङ्कां प्रविविशुस्तूर्णं भयार्ता वानरार्दिताः ।
वानराः संगतास्ते तु रामपार्श्वं समागमन् ।
शशंसुश्च तदा सर्वे महाकायं निपातितम् । [445]
संग्रामं च महद्वृत्तमङ्गदं च परैः सह ।
तच्छ्रुत्वा राघवः प्रीतो वालिपुत्रं परिष्वजत् ।
सुग्रीवो वानराश्चान्ये हनूमाँल्लक्ष्मणस्तथा ।
विभीषणश्च संहृष्टो राघवं वाक्यमब्रवीत् ।
महाकाये हते राम रावणो निहतो ध्रुवम् । [450]
अङ्गदेन कृतं कर्म महद्राम न संशयः ।

—(l. 365) T₃ निरंतरैः कृता. —(l. 371) T₃ हनिष्यामि (for वधिष्यामि). —Note hiatus between the two halves of l. 380. —(l. 383) T₃ शोणिताक्तम्. —(l. 385) T₃ मत्तान्मुक्तांस् (for मुक्तामुक्तांस). —(l. 386) T₃ [अ]पि (for तु) and प्रत्ययुध्यत (for प्रत्यविध्यत). —(l. 388) T₃ परीष्यन् (for परीप्सन्). —(l. 395) T₃ केशे (for केशान्). —(l. 396) T₃ वियोजयत् (for व्ययोजयत्). —(l. 406) T₃ शत- (for शर-). —(l. 409) T₃ विध्य (for विद्ध्वा). —(l. 412) T₃ प्रगृह्य (for प्रमृज्य). —(l. 414) T₃ व्यपोथयत् (for व्यपातयत्). —(l. 415) T₃ [अ] हरत् (for [अ]हनत्). —(l. 418) T₃ राक्षसवानरौ (by transp.). —(l. 423) T₃ सममापतुः (for समवापतुः). —(l. 425) T₃ युध्यतां** (moth-eaten). —(l. 429) T₃ दृश्यतां स्वेन (for दृश्येतां तेन). —(l. 430) T₃ सह सृज्येताम्. —(l. 437) T₃ तमताडयत्. —(l. 444)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

संहर्षणं तत्र जगाम रामः
श्रुत्वा महाकायवधं महात्मा ।
तथा महाकायवधं महोग्रं
ततोऽङ्गदं प्रीतमना ददर्श । [455]

Colophon

रुधिरस्रावदिग्धाङ्गा राक्षसास्ते रणाजिरात् ।
प्रविश्य लङ्कां वेगेन रावणाय शशंसिरे ।
महाकायं हतं श्रुत्वा शतमायं च राक्षसम् ।
तथान्यान्निहताञ्श्रुत्वा महादैन्यमुपागत् ।
शोकाविष्टश्चिरं ध्यात्वा दिशः समवलोक्य च । [460]
नेदमस्तीति संचिन्त्य अधोदृष्टिर्बभूव ह ।

28

After 911*, Ñ V(V_2 missing up to l. 149, cf. v.l. 6.45.1) B_{2-4} $D_{4.13}$ ins.:

युद्धादन्यतमं चैव न युक्तं समवैक्षत ।
वज्रदंष्ट्रं ततो वीरं व्यादिदेश महाबलः ।
क्षिप्रं निर्याहि सहितो राक्षसैः सुमहाबलैः ।
हयै रथैस्तथा नागैर्बहुभिस्त्वभिसंवृतः ।
हत्वा रामं सह भ्रात्रा सुग्रीवं च हरीश्वरम् । [5]
निवर्तस्व रणे वीर न हि तेऽस्ति समो युधि ।
क्रुद्धस्य युध्यमानस्य घोरान्विसृजतः शरान् ।
प्रमुखे नोत्सहेत्स्थातुं वज्रपाणिरपि स्वयम् ।
असकृत्त्वत्सहायेन मया देवाः पराजिताः ।
यमश्च निर्जितः संख्ये सर्वव्याधिपुरस्कृतः । [10]
वज्रदंष्ट्रस्त्वेवमुक्तो राक्षसेन्द्रेण वीर्यवान् ।
कृत्वा प्रणामं संहृष्टः प्रत्युवाच दशाननम् ।
एष निर्यामि शत्रुघ्न तव शत्रुवधाय वै ।
सुखी त्वं भुङ्क्ष्व लोकांस्त्रीन्सीतां च निहतेश्वराम् ।
अद्य तौ नाशयिष्यामि मिथ्याप्रव्रजितौ रणे । [15]
शिवेन ध्याय मां राजन्नेष हन्मि रिपुं तव ।
ततस्तस्य बलाध्यक्षः समानीय महद्बलम् ।
सूतश्चाश्वरथं सज्जं तस्य क्षिप्रमुपानयत् ।
आरुरोह ततो दिव्यं रथं हेमविभूषितम् ।
नानाप्रहरणाकीर्णं सचन्द्रमिव पर्वतम् । [20]
वानरैः सह संग्रामे युद्धकामस्य धीमतः ।
वज्रदंष्ट्रस्य वीरस्य शान्तिं चक्रुर्निशाचराः ।
अथर्वाणं समुद्दिश्य मन्त्रसंस्तवचोदिताः ।
रणप्रवेशसदृशीं कृत्वा वैजयिकीं क्रियाम् ।
ततः सर्वास्त्रविद्वांसः समरेष्वनिवर्तिनः । [25]
विद्याव्रतसमायुक्ताः कृतस्वस्त्ययनक्रियाः ।
धनुर्हस्ताः कवचिनो वेगेनाप्लुत्य राक्षसाः ।
बान्धवान्संपरिष्वज्य निषेतुः संयुगक्षमाः ।
तद्बलं प्रेक्ष्य निर्गच्छत्रावणाज्ञाप्रचोदितम् ।
आस्थितः परमं दिव्यं रथं पररथारुजम् । [30]
महायुधधरः श्रीमाञ्शुभवर्मधरः प्रभुः ।
शिरस्त्राणतनुत्राणी धन्वी परमदुर्जयः ।
स नील इव शैलेन्द्रो वर्मितः समशोभत ।

T_3 उपागमन् (for समागमन्). —(l. 446) T_3 अंगदस्य (for अङ्गदं च). —(l. 452) T_3 प्रहर्षणं चात्र. Colophon. — *Sarga no.* : T_2 59 ; T_3 60. —(l. 457) T_3 [आ]शशंसिरे. —Note hiatus between the two halves of l. 461.

28

(l. 1) D_{13} निवर्तितुं (for अन्यतमं). D_4 नैव (for चैव). Ñ$_1$ $V_{1.3}$ B_{2-4} समवेक्षत. D_4 युक्तरूपमवैक्षत (for the post. half). —(l. 2) Ñ$_2$ B_2 महावीर्यं (B_2 °रम्) (for ततो वीरं). B_2 आदिदेश. Ñ$_2$ B_2 स रावणः ; B_4 D_{13} महाबलं (for °बलः). —(l. 3) D_4 त्वं च (for शीघ्रं). B_3 तत्सैन्यं (for सहितो). —(l. 4) V_1 D_4 [अ]थ; V_3 [अ]नु- (for [अ]भि-). —(l. 5) D_{13} स- (for च). Ñ$_2$ B_2 महाकपिं (for हरीश्वरम्). —(l. 6) D_{13} सहैभिर्वानरैस्तथा (for the post. half). —(l. 7) B_4 वध्यमानस्य (for युध्य°). Ñ$_2$ संसृजतः . —(l. 8) D_4 प्रमुखं. D_{13} इव (for अपि). —(l. 9) D_{13} अजेयास् (for असकृत्). —V_5 om. l. 10–11. —(l. 10) $D_{4.13}$ -पुरःसरः (for -पुरस्कृतः). —(l. 11) Ñ$_2$ D_4 च (for तु). —(l. 12) D_4 कृतप्रणाम- (for कृत्वा प्रणामं). —(l. 14) V_3 सुभद्र (for सुखी त्वं). D_4 सुखं त्वं भुंक्ष्व लंकां च सर्वराक्षससेवितां. —(l. 15) $B_{2.4}$ निहनिष्यामि; D_{13} मारयिष्यामि (for नाशयिष्यामि). V_3 -प्रव्राजितौ. Ñ$_1$ $V_{1.3}$ B_4 वने (for रणे). —B_4 om. l. 16. —(l. 16) Ñ$_1$ ध्यायसे; V_1 ध्याहि मां. D_4 स्वामिन् (for राजन्). D_{13} शिवं ते ध्यायमानोहं (for the prior half). $V_{1.3}$ अयं हन्मि; D_4 यत्नेन हन्मि (hypm.); D_{13} हनिष्यामि (for एष हन्मि). Ñ$_2$ रिपूंस्. —(l. 17) B_3 महत्सैन्यं (for बलाध्यक्षः). D_4 बलाद् (for महद्). —(l. 18) V_3 व्यूह्य (for सूतश्). Ñ$_1$ साश्वं; V_1 चाथ; V_3 B_3 साश्व- ; B_2 चास्य (for चाश्व-). V_1 दिव्यं सज्जं (for सज्जं and तस्य). B_4 om. शीघ्रम्. —(l. 19) D_4 रथं (for ततो). —(l. 20) $V_{1.3}$ तोयदं (for पर्वतम्). —(l. 21) B_4 D_{13} युध्यमानस्य (for युद्धकामस्य). —(l. 22) B_3 प्रयाणे तस्य (for वज्रदंष्ट्रस्य). —(l. 23) $D_{4.13}$ अथ वा तं (for अथर्वाणं). B_3 समुद्दीश्य. D_{13} -संभव- (for -संस्तव-). B_4 D_{13} -चोदितां. D_4 मंत्रसंश्रवनोदिता: (for the post. half). —(l. 24) V_3 $B_{2.3}$ वन- (for रण-). D_{13} -प्रदेश- (for -प्रवेश-). D_4 रणे प्रचेतःसदृशीं (for the prior half). B_2 ते वैदिकीं; D_{13} वैजयिकां (for वैजयिकीं). D_4 क्रमात् (for क्रियाम्). —(l. 25) D_4 -विद्वीरः (for -विद्वांसः). D_{13} [अ]निवर्तिनः (for [अ]निवर्तिनः). —(l. 26) Ñ$_2$ B_2 दिव्य- (for विद्या-). —(l. 27) D_4 वेगम् (for वेगेन). B_4 D_{13} [आ]क्रम्य; D_4 [उ]त्प्लुत्य (for [आ]प्लुत्य). —(l. 28) Ñ$_2$ अन्योन्यं (for बान्धवान्). Ñ$_1$ $V_{1.3}$ संपरित्यज्य. Ñ$_2$ संयुगक्रियाः ; V_1 $B_{2.4}$ °प्रियाः ; V_3 समरेच्छया; D_{13} संगरक्रियां (for संयुगक्षमाः). —(l. 29) B_4 निर्यांतं (for निर्गच्छन्). Ñ$_2$ B_2 D_4 -प्रचो(D_4 °णो)दितः; B_3 D_{13} -प्रदेशितं (for -प्रचोदितम्). —(l. 30) Ñ$_1$ V_1 परमदारुणं (for पररथारुजम्). —(l. 31) B_2 -रथः (for first -धरः). Ñ$_1$ V_1 शुभवर्मः ; $B_{2.3}$ शुभकर्मः (for °वर्मः). —(l. 33) $B_{2.3}$ वर्धितः ; B_4 सत्कृतः

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सिंहशार्दूलदर्पाश्च हयास्ते किङ्किणीचिताः ।
तस्य राक्षसवीरस्य चक्रुरग्रे रथोत्तमम् । [35]
कुक्षिपक्षगताश्चान्ये हयाः परमदुर्जयाः ।
सप्ततिर्द्वे सहस्रे च गजास्तावन्त एव च ।
मध्ये व्यूहरथस्थस्तु वज्रदंष्ट्रो महाबलः ।
धनुर्विस्फारयन्घोरं ननाद प्रजहास च ।
धनुःशतसहस्राणि राक्षसानां महात्मनाम् । [40]
नानाप्रहरणानां च बभूवुस्तस्य संयुगे ।
गदाभिः परिघैः शूलैः पट्टिशैः कूटमुद्गरैः ।
प्रगृहीतैर्व्यराजन्त राक्षसाः पर्वता इव ।
गर्जन्तो विनदन्तश्च क्रोशन्तश्चैव राक्षसाः ।
ततो युद्धाय निर्जग्मुः समरेष्वनिवर्तिनः । [45]
तत्र तूर्यसहस्राणां संजज्ञे निनदो महान् ।
हयानां च गजानां च गर्जतामतिवेगिनाम् ।
स तु दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः ।
शुश्रुवे शङ्खशब्दश्च राक्षसैः सुसमीरितः ।
तेन शङ्खनिनादेन भेरीतूर्यरवेण च । [50]
रथानां च निनादेन चुक्रोशेव नभस्तलम् ।
सागरप्रतिमौघेन बलेन महता वृतः ।
वज्रदंष्ट्रोऽतिसंक्रुद्धो निर्ययौ कालचोदितः ।
तस्य निष्पततो वेगाद्युद्धार्थं युद्धकाङ्क्षिणः ।
हया निपतिताश्चास्य गद्गदश्चाभवत्स्वरः । [55]

अन्तरिक्षात्पपातोल्का वायुश्च परुषो ववौ ।
वमन्ति स्म शिखिज्वालाः शिवा घोराश्च पश्यतः ।
उत्पातांस्तान्महाघोरान्प्रदृश्य युधि दुर्जयः ।
उवाच वचनं श्रीमांस्तत्कालक्षममुत्तमम् ।
अद्याहं दर्शयिष्यामि स्वबाहुबलमूर्जितम् । [60]
अद्य मद्बाणनिहतांस्तान्द्रक्ष्यथ वनौकसः ।
बान्धवा निहता येषां हरिभिर्यत्र संयुगे ।
अद्य ते निर्वपिष्यन्ति शत्रुमांसेन राक्षसाः ।
इदमद्य समुद्भूतं रजः समरमूर्धनि ।
अहं वै शमयिष्यामि शत्रुशोणितविस्रवैः । [65]
हृष्टाः संप्रति मोदध्वं त्यक्त्वा वै राघवाद्भयम् ।
अद्याहं निहनिष्यामि स्वबाहुबलमाश्रितः ।
कालमिन्द्रं कुबेरं च वरुणं समरुद्गणम् ।
तोषयिष्यामि राजानं रावणं विक्रमैः स्वकैः ।
वानरान्सकलान्हत्वा सुग्रीवं च हरीश्वरम् । [70]
मानुषौ भक्षयिष्यामि तावुभौ छद्मतापसौ ।
अक्षयाः सन्ति मे बाणाः सर्वे ह्याशीविषोपमाः ।
स्थातुं मम पुरः शक्ताः के रणे जीवितार्थिनः ।
हत्वा रिपुजनं संख्ये पुनरेष्याम्यहं पुरीम् ।
हतस्य त्रिदिवे वासो नास्ति युद्धसमा गतिः । [75]
भवन्तः पृष्ठतः कृत्वा भयं राक्षससत्तमाः ।
निहत्यैतान्हरीन्सर्वान्मोदन्तां सुखिता इव ।

(for वर्मितः). D4 धर्मतः परिभाषितः; D13 वर्मितः सन्प्रभासते (for the post. half).—(l. 34) D13 -दृप्ता ये (for -दर्पाश्च). V1.3 वाजिनः; D13 हया वै (for हयास्ते). V3 किंकिणी-युताः.—(l. 35) Ñ1 B3 D4 -राजस्य (for -वीरस्य). Ñ1 भर्तुर्; V3 B2.3 D4 (with hiatus) ऊहुर् (for चक्रुर्). V3 अश्वा (for अग्रे). Ñ2 तस्थुरग्रे रथोत्तमे; B4 जग्मुरग्रे तथोत्तमं (for the post. half).—V3 om. l. 36-38.—(l. 36) Ñ2 रुक्मपत्र-; B2 केचित्पक्ष-; B4 D4 कुक्षिपक्षि- (for कुक्षिपक्ष-).—(l. 37) D13 सहस्रं तु (for °स्रे च). B3 सप्तभिर्वै सहस्रेण; D4 सप्ततिर्द्विसहस्रे च (for the prior half).—(l. 38) Ñ2 V1 व्यूहे. Ñ1 B2.4 मध्य(Ñ1 °ध्ये)व्यूहोदरस्थस्तु(B4 °श्च); D4 मध्ये व्यूहे रथस्तस्य (for the prior half).—(l. 39) Ñ2 स धनुः (for धनुर्वि-). Ñ1 D4 विस्फारयद्. B2.4 ह (for च).—(l. 40) D4 सप्त- (for -शत-).—(l. 41) Ñ2 B2 तत्र (for तस्य).—(l. 43) B2 प्रगृहीता.—(l. 44) D4 नर्दतश् (for क्रोशन्तश्). V3 वानराः (for राक्षसाः).—(l. 46) B3 D13 ततस् (for तत्र).—(l. 47) D4 ध्वजानां (for गजानां). Ñ1 V1 B3 नदताम्; V3 नर्दताम् (for गर्जताम्). B2.4 नर्दतां परि(B4 °तामभि)धावतां; D4 नदतामश्ववेगिनां; D13 नैर्ऋतानां च वेगिनां (for the post. half).—V3 om. l. 48.—(l. 48) Ñ2 च (for तु). Ñ1 V1 B3 -निर्घोषैः.—(l. 49) B4 शुश्राव (for शुश्रुवे). V3 D13 -शब्दस्तु; B3 -शब्दैश्च (for -शब्दश्च). V3 समुदीरितः; B4 च समी°; D4 च समंततः; D13 स्वयमी° (for सुसमीरितः).—(l. 50) V3 भीम- (for भेरी-).—(l. 51) B4 चुक्रुशे च; D13 चुक्रोश च. B4 D4 नभस्थलं (for °स्तलम्).—(l. 53) Ñ2 [s]पि सं-; V1 भृशं; V3 B4 D13 [s]भि सं- (for sतिसं-). D13 प्रययौ. D4 -नोदितः; D13 -देशितः (for -चोदितः).—(l. 54) V3 वेगं. D13 युद्धार्थे (for युद्धार्थं).—(l. 55) Ñ1 D4 तस्य; V1 भूमौ (for चास्य).—(l. 56) Ñ V1.3 B2-4 D4 अंतरीक्षात्.—V3 om. l. 57.—(l. 58) D13 तु (for तान्). B3 उत्थितान् (for प्रहस्य).—(l. 59) V3 तद्रक्षोबलम् (for तत्कालक्षमम्).—B4 om. l. 60.—(l. 60) Ñ1 V1.3 सुबाहु-; D4 प्रबाहु-. Ñ2 (wrongly) आश्रितः (for ऊर्जितम्).—(l. 61) D13 द्रक्ष्यसि (for द्रक्ष्यथ).—(l. 62) D4 तेषां (for येषां). Ñ1 D4 ये तु; V1.3 चात्र (for यत्र). B3 संयुताः (for संयुगे).—(l. 63) Ñ2 अद्य तान्निर्वपिष्यामि; D4 अद्य तेन जीविष्यंति; D13 अद्य निर्वापयिष्यामि (for the prior half). B4 निर्जिताः (for राक्षसाः).—(l. 64) D4 अहम् (for इदम्). B4 अन्यत् (for अद्य).—(l. 65) B3 अद्य (for अहं). Ñ2 नाशयिष्यामि (for शम°). V3 D13 -निःस्रवैः (for -विस्रवैः).—(l. 66) D4 प्रहृष्टाः प्रतिमोदध्वं (for the prior half). B4 D4 संत्यक्त्वा (for त्यक्त्वा वै).—(l. 67) B4 अथाहं. B4 D13 दर्शयिष्यामि (for निहनि°). Ñ1 V1 सुबाहु-. B4 -बलपूजितः; D4 °विक्रमः (for °माश्रितः). V3 वानरान्वश-माश्रितान् (for the post. half).—(l. 68) V3 D13 मित्रं (for इन्द्रं).—(l. 69) Ñ2 राजेंद्रं; V3 तान्हत्वा (for राजानं). D4 निजैः (for स्वकैः).—(l. 70) Ñ2 B2 महाकपिं (for हरीश्वरम्).—(l. 71) B4 D13 रामलक्ष्मणौ (for छद्मतापसौ).—(l. 72) D4 (with hiatus) आशीविषोपमाः.—(l. 73) V3 विजयार्थिनः (for जीविता°).—(l. 74) Ñ2 B2 रिपुबलं. D13 सर्वं (for संख्ये). D4 हत्वारिबलं संख्ये च (for the prior half). D4 यास्यामि (for एष्यामि).—D4 om. l. 75-77.—(l. 76) D13 -पुंगवाः (for -सत्तमाः).—D13 om. l. 77.—(l. 77) V1.3 B4 तान् (for [ए]तान्). Ñ2 परान् (for हरीन्).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

Colophon

वज्रदंष्ट्रं तु निर्यान्तं राक्षसैर्बहुभिर्वृतम् ।
गर्जन्तं समहाकायं भीमं भीमपराक्रमम् ।
ददर्श महती सेना सुग्रीवेणाभिपालिता । [80]
अभिसंजातहर्षाणां वानरैर्युद्धमिच्छताम् ।
आपतन्तं महानीकं राक्षसानां तरस्विनाम् ।
प्रत्युद्ययुः शिलाहस्ता वानरा जितकाशिनः ।
प्रविश्य ध्वजिनीं क्षिप्रं घातयामासु राक्षसान् ।
राक्षसाश्चापि संक्रुद्धा निजघ्नुर्वानराञ्रणे । [85]
सर्वे रुधिरदिग्धाङ्गा राक्षसैर्जनितश्रमाः ।
वज्रदंष्ट्रबलं सर्वं निर्ममन्थुर्वनौकसः ।
ततो मुमोच बाणौघान्वज्रदंष्ट्रो रणे स्थितः ।
ददाह च रणे क्रुद्धो वानरान्सह यूथपैः ।
स सायकमयैर्जालैः सूदयामास तां चमूम् । [90]
उद्धूतमिव वातेन महताभ्रमहाचयम् ।
अमृष्यमाणो निधनं स्वस्य सैन्यस्य राक्षपः ।
चकार कदनं घोरं धनुष्पाणिरवस्थितः ।
आवर्त इव संजज्ञे बलस्य महतो महान् ।
क्षुभितस्य यथा सिन्धोर्मथ्यमानस्य संप्लवः । [95]
वलीमुखशरीरैश्च ऋक्षाणां चैव मेदिनी ।
बभूव निचिता घोरैः पर्वतैरिव सर्वतः ।
हतवीरौघवप्रान्ता भग्नायुधमहाद्रुमा ।
शोणितौघमहातोया यममागरगामिनी ।
असृग्घनमहापङ्का नानाकीर्णाग्रशैवला । [100]
छिन्नकायशिरोमीना अङ्गावयवशाद्वला ।
गृध्रकाकसमाकीर्णा कङ्कसारससेविता ।
मेदोमज्जास्थिसंकीर्णा आर्तस्तनितनिस्वना ।
वज्रदंष्ट्रशरोद्धूता ऋक्षवानरसंभवा ।
प्रावर्तत नदी घोरा भीरूणां भयवर्धिनी । [105]
तत्समीक्ष्य बलं सर्वं राक्षसेन निपातितम् ।
द्रवतो वानरान्सर्वान्राक्षसान्क्रमतोऽपि च ।
सहस्रांशुसुतः क्रुद्ध उत्पपात महाबलः ।

Colophon : D_{13} om. —*Kāṇḍa name* : Ñ $V_{1.3}$ B_{2-4} D_4 लंकांकाडे. —*Sarga name* : Ñ $V_{1.3}$ B_{2-4} D_4 वज्रदंष्ट्रनिर्या (V3 °प्रया)णं. —*Sarga no.* (figures, words or both) : $Ñ_1$ V_3 B_2 D_4 om. ; $Ñ_2$ 31 ; V_1 32 ; B_3 29 ; B_4 33. —(l. 78) D_4 च (for तु). —(l. 79) D_4 आयांतं. V_3 तु महाकायं; D_4 सुमहावीर्यं (for सुमहाकायं). —After l. 79, B_2 ins. :

1* वानरा ददृशुस्तं वै कालमेघमिवागतम् ।

—(l. 80) $Ñ_2$ B_2 D_4 [अ]नु- (for [अ]भि-). V_3 corrupt (for the post. half). —(l. 81) D_4 उप- (for अभि-). $V_{1.3}$ $B_{2.4}$ D_{13} रक्षोभिर् (for वानरैर्). B_2 योद्धुम् (for युद्धम्). V_1 इच्छती. D_4 युद्धकांक्षिणां. $Ñ_2$ वानराणां जयैषिणां (for the post. half). —(l. 82) D_{13} आगतं तं. D_4 महासैन्यं (for °नीकं). B_2 यशस्विनां (for तर°). —D_4 om. l. 83-84. —(l. 83) V_3 D_{13} प्रत्ययुध्यञ् (for प्रत्युद्ययुः). B_3 बलेन (for वानरा). —(l. 84) D_{13} पतिताः (for ध्वजिनीं). V_1 B_3 शीघ्रं (for क्षिप्रं). V_3 प्रविश्य राक्षसीं सेनां (for the prior half). $Ñ_2$ V_3 D_{13} पातयामास; V_1 जघ्नुः सर्वत्र; B_4 पातयामासु (for घातयामासु). —(l. 85) B_3 वानराञ् (for राक्षसाञ्). B_2 चाभि- (for चापि). D_4 निर्जघ्नुर्. —(l. 86) V_3 विजित- (for जनित-). —(l. 87) D_{13} तत्र (for सर्वं). —(l. 88) V_3 illeg. for बाणौघान्. V_3 B_4 D_4 रथे स्थितः ; D_{13} महाबलः (for रणे स्थितः). —V_3 om. l. 90. —(l. 90) D_4 अर्दयामास (for सूदया°). —(l. 91) V_3 उद्धूतशरवातेन महताभ्रचयोपमं. —(l. 92) D_4 विमृष्टमाणो. —B_3 om. from the post. half of l. 92 up to the prior half of l. 95. B_2 $D_{4.13}$ स्वसैन्यस्य च(B_2 स) (for स्वस्य सैन्यस्य). —D_4 reads l. 94 after l. 88. —(l. 95) V_3 D_4 महार्सिधोर्. —For l. 96-105, cf. 6.46.23-27. —(l. 96) V_3 वलीमुखैः प्रवीरैश्च (for the prior half). V_1 रक्षसां (for ऋक्षाणां). D_{13} राक्षसानां च मेदसा (for the post. half). —V_3 illeg. for l. 97. —(l. 97) D_4 निहता (for निचिता). —B_4 D_{13} read accusative in place of nominative in l. 98-105. —(l. 98) D_{13} -संभ्रांतां (for -वप्रान्ता). V_3 ***रौघवप्रांता; D_4 तद्वीरौघैः सुसंव्याप्ता (for the prior half). B_3 -[आ]मुच- ; B_4 -स्कंध- ; D_{13} -ध्वज- (for -[आ]युध-). $V_{1.3}$ भग्नद्रुममहाझषा (for the post. half). —(l. 99) D_{13} शोणितौघां. —(l. 100) $Ñ_1$ V_1 B_3 शक्रुद्धन- ; $Ñ_2$ illeg. ; B_4 शक्रुन्मूत्र- ; D_4 वपामांस- (for असृग्घन-). V_3 B_3 -महापक्षा. $Ñ_2$ B_2 -केशांत- ; B_4 D_4 -वर्णांत्र- (for -कीर्णांत्र-). V_3 नानामस्तकच्छपा (for the post. half). —(l. 101) Note hiatus between the two halves. D_4 -शिरोग्रीवा (for °मीना). V_3 आवहंती भुजन्नागं (for the prior half). V_3 महावयव- ; D_{13} बद्धावयव-. $Ñ_2$ $V_{1.3}$ $B_{2.4}$ D_{13} -शर्करा(B_4 D_{13} °रां) (for -शाद्वला). D_4 स्वंगापरमकातराः (for the post. half). —(l. 102) $V_{1.3}$ D_4 गृध्रगोमायुसंकीर्णा(D_4 °युक्ता च) (for the prior half). $Ñ_2$ हंस- ; D_4 काक- (for कङ्क-). $V_{1.3}$ B_3 D_{13} -वायस- (for -सारस-). —(l. 103) Note hiatus between the two halves. $Ñ_1$ $V_{1.3}$ B_3 -[अं]त्रयाकीर्णा; B_4 -[अ]स्थ्युपाकीर्णाम् ; D_4 -[उ]च्छ्रया° ; D_{13} -वशाकीर्णाम् (for -[अ]स्थिसंकीर्णा). V_3 तल- (for आर्त-). B_4 -नादिनीं (for -निस्वना). $D_{4.13}$ आवर्तस्तनितस्वना(D_{13} °नां) (for the post. half). —(l. 104) $B_{2.3}$ -शरोद्भूता (for -शरोद्धता). B_3 -सेविता (for -संभवा). —(l. 105) B_2 आवर्तते; B_4 D_{13} प्रावर्तयन्. $Ñ_2$ B_2 दारुणा (for भीरूणां). —(l. 106) V_3 राक्षसेंद्रेण पातितं (for the post. half). D_4 तां समीक्ष्य विलंबार्थां वानरं तं निपातितं. —(l. 107) V_3 दूरतो (for द्रवतो). V_3 भ्रमतो (for क्रमतो). B_4 वा (for च). D_4 राक्षसाद्भयसंयुतान् ; D_{13} क्रमतो राक्षसानपि (for the post. half). —(l. 108) V_3 सहस्राभसुतः . —(l. 109)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अभ्यद्रवच्च वेगेन राक्षसं जितकाशिनम् ।
स विनद्य महानादं त्रैलोक्यमभिनादयन् । [110]
जनयन्निव निर्ह्रादान्विधमन्निव पर्वतान् ।
प्रेक्ष्य पिङ्गाक्षमायान्तं राक्षसा विप्रदुद्रुवुः ।
तांस्तु विद्रवतो दृष्ट्वा राक्षसांस्त्रस्तमानसान् ।
स धनुर्धन्विनां श्रेष्ठो विक्रम्य रणमूर्धनि ।
ववर्ष शरवर्षेण सुग्रीवं प्रति वीर्यवान् । [115]
रोषितः शरवर्षेण बलेन महता तदा ।
निजघान हयान्क्रोधात्सुग्रीवो वानराधिपः ।
प्रवृद्धशाखाविटपं तरुणाङ्कुरपल्लवम् ।
समूलमुत्पाट्य बली स्कन्धवन्तं सुपुष्पितम् ।
तमिन्द्रचापप्रतिमं सारवन्तं महाद्रुमम् । [120]
उत्पाट्य कुपितस्तस्मै शालं बलसमन्वितः ।
राक्षसं तं समादिश्य प्रेषयामास वानरः ।
तमापतन्तं शतधा स चिच्छेद शिलीमुखैः ।
तस्य दृष्ट्वा महाघोरं कर्म सर्वेऽथ राक्षसाः ।
सिंहनादं नदन्ति स्म वज्रदंष्ट्रप्रहर्षणम् । [125]
ततः संपरिगृह्यासौ वीरः सुमहतीं शिलाम् ।
क्रोधाद्द्विगुणरक्ताक्षः पितुस्तुल्यपराक्रमः ।
तां शिलां पातयामास राक्षसस्य रथं प्रति ।
आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् ।
रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत । [130]

प्रमथ्य च रथं तस्य निपपात शिला भुवि ।
सचक्रकूबरधुरं सध्वजं सशरासनम् ।
भङ्क्त्वा तु स रथं तस्य सुग्रीवः प्लवगेश्वरः ।
रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ।
ते छिन्नशिरसो भग्ना राक्षसाः शोणितोक्षिताः । [135]
द्रुमैः प्रमथितास्तत्र निपेतुर्धरणीतले ।
विद्राव्य राक्षसानीकं विनदन्भैरवं रवम् ।
गिरिशृङ्गमथादाय तद्रक्षः समुपाद्रवत् ।
तमापतन्तं वेगेन गदामुद्यम्य वीर्यवान् ।
विनदन्नर्दयामास वानरेन्द्रं महाबलम् । [140]
तस्य क्रुद्धस्य रोषेण गदां तां बहुकण्टकाम् ।
न्यपातयत सुग्रीवे सा गदा शतधा गता ।
स हरिः क्रोधताम्राक्षस्तं प्रहारमचिन्तयन् ।
राक्षसस्योपरि महद्गिरिशृङ्गमपातयत् ।
स विह्वलितसर्वाङ्गो गिरिशृङ्गाभिताडितः । [145]
पपात सहसा भूमौ विशीर्ण इव पर्वतः ।
सुस्राव चास्य गात्रेभ्यः फेनिलं रुधिरं बहु ।
ततस्ते राक्षसा दृष्ट्वा वज्रदंष्ट्रं निपातितम् ।
विविशुर्नगरीं लङ्कां वध्यमाना वलीमुखैः ।
विमुक्तकेशाः क्षतजोक्षिताङ्गाः [150]
शिलातलैर्भिन्नविशस्तबाहवः ।

यदि रामः स्वयं विष्णुर्लक्ष्मणोऽपि शतक्रतुः ।
सुग्रीवरुग्यम्बकः साक्षात्स्वयं ब्रह्मा तु जाम्बवान् ।
अहो शास्त्राण्यधीतानि यस्य ते बुद्धिरीदृशी ।
अत्यन्तं वैरिणं रामं यो नमस्कर्तुमिच्छसि । [65]
देवत्वं यः परित्यज्य मानुषीं योनिमास्थितः ।
अस्मान्हन्तुं किलायातः स संधेयः कथं मया ।

यदि वा राघवो विष्णुर्यक्तं ते श्रोत्रमागतः ।
देवतानां हितार्थाय प्रविष्टो मानुषीं तनुम् ।
स वानराणां राजानं सुग्रीवं शरणं गतः । [70]
अहोऽस्य सदृशं सख्यं तिर्यग्योनिगतैः सह ।
वीर्यहीनस्तु किं विष्णुर्यो गतो ऋक्षवानरान् ।
अथ वा वीर्यहीनोऽसौ येन पूर्वं महासुरः ।
वामनं रूपमास्थाय याचितस्त्रिपदक्रमम् ।
बलिस्तु दीक्षितो यज्ञे तेन त्वं सख्यमिच्छसि । [75]
येन दत्ता मही सर्वा ससागरवनान्तरा ।
उपचारः कृतः पूर्वं स बद्धो यज्ञदीक्षितः ।
उपकारी हतस्तेन सोऽस्मान्नक्षति वैरिणः ।
यदा मे निर्जिता देवाः स्वर्गं गत्वा त्वया सह ।
तदा किं नास्ति विष्णुत्वं तस्य देवस्य राक्षस । [80]

—D13 om. from गते up to मानु- in l. 56. D9 T2.3 सम्- (for त्वाम्). —(l. 54) B2 ते; D1 स्म; D3 च (for तु). V1 B3 (m. also as above) नित्यं समरभीतास्तु (for the prior half). D1.4 तु; D3 च; D9 ते; T2.3 मे (for सु-). V2.3 D2-4 T3 -महाबलाः. Ś D8.12 मानुषाः संति चाबलाः (for the post. half). —(l. 55) T3 भावयित्वा. Ś1 Ñ2 यः; Ś2 V2 D2.8.12 यत्; D4 यं (for तान्). T2.3 सर्वान्. D9 विमेमि (for नमामि). —(l. 56) B2 रूपं (for रामं). D9 च (for तु). D9 T2.3 च (for वै). —(l. 57) B3 हि; D9 T2.3 [ऽ]स्मि (for तु). —D1 om. from the post. half up to the prior half of l. 59. B2 अनुजानामि. —(l. 58) V2 T2 तु (for तं). D2 राघवं प्रणमे कस्माद; D9 राघवं मानुषं नत्वा (for the prior half). Ñ2 समुपास्यास्य; B3 दीनरूपो हि. Ś D2.4.8.12 ह्युपास्य वै (D2.4 तं); D9 ह्यनाथवत् (for ऽथ दासवत्). T2.3 दी(T3 ही)नवीर्यपराक्रमं (for the post. half). —(l. 59) V2 वृद्धिं; T2.3 बुद्धिं (for ऋद्धिं). V B2.3 D3.9.13 T2.3 च (for तां). D9 [ऽ]द्य (for ऽस्य). Ñ2 परऋद्धिं समालोक्य (for the prior half). —(l. 60) Ñ2 वैरं; T2.3 आगः (for मानं). B3 तस्य; D1 धृत्वा (for कृत्वा). D3 च (for सु-). —(l. 61) D9 कृपणो (for रावणो). V3 om. (subm.) (for ते). D1 -निश्चयः (for -निर्णयः). Ś D8.12 एष बुद्धेर्विपर्ययः; D2.4 एष बुद्धिवि(D4 °द्धेश्च)निर्णयः (for the post. half). —(l. 62) D1 om. (hapl.) from the post. half up to the prior half of l. 68. D9 वा; T2.3 च (for ऽपि). —(l. 63) D9 T2.3 शंकरः (for त्र्यम्बकः). Ś D2.4.8.12 च (for तु). D2.9 T2.3 रावणः; D3 राघवः (for जाम्बवान्). —(l. 64) Ś V3 D2-4.8.12 [अ]श्रु(V3 D3 [अ]ती)तानि (for [अ]धीतानि). L (ed.) तस्य (for यस्य). D3 मतिर् (for बुद्धिर्). —T3 om. l. 65. —(l. 65) Ś Ñ2 D2.8.12 T2 अत्यंत-; D9 पश्यंतु (for अत्यन्तं). T2 -मानुषं (for वैरिणं). V B2.3 अतीताश्रमिणं (V3 °मकं) रामं (for the prior half). Ñ2 D13 मित्रं (for नमस्). Ś2 V1.3 इच्छति; V2 D3 अर्हति(D3 °सि) (for इच्छसि). D9 यो नरं विष्णुमिच्छति (for the post. half). —(l. 66) V2 परिष्वज्य (for °त्यज्य). Ñ2 देवत्वं च परित्यक्तं (for the prior half). B2 तनुम् (for योनिम्). Ñ2 V1.2 B2 D13 T2.3 आश्रितः (for आस्थितः). —(l. 67) Ś D8 इह; B2 किम्; D3.9 सम्- (for किल). —(l. 68) V3 D13 व्यक्तम् (for व्यक्तं). D1 तत् (for ते). —D4 om. from श्रोत्र up to सुग्रीवं in l. 70. Ś D8 आगतं. D9 T2.3 अस्मान्हंतुमिहा(D9 °तुं समा)गतः (for the post. half). —(l. 69) D3 देवानां (subm.). Ñ2 V B2.3 D3.13 हितार्थं तु (for हितार्थाय). —(l. 70) D9 T2.3 यो (for स). —(l. 71) Ś D8.12 अस्याहो (by transp.); V2 D3 अतोस्य; D1 अहो सु-. Ś D8.12 -गणैः (for -गतैः). —V3 om. l. 72. —(l. 72) D9 वै (for किं). V1 B3 D1.3 यः श्रितो; B2 श्रितो यः; D9 T2.3 आश्रितो (for यो गतो). Ś D8.12 ऋक्ष-; Ñ2 युधि; D3 चर्क्ष- (for ऋक्ष-). —(l. 73) D9 T2.3 अवतीर्यं महीं योसौ (for the prior half). D13 पूर्वं. —(l. 74) Ś2 याचितं. Ñ2 त्रिपदक्रमः; V B2.3 त्रिपदः पदं; D9 प्रददौ बलिः; T2.3 त्रिपदं तदा(T3 °था) (for त्रिपदक्रमम्). —(l. 75) D9 दत्त्वा च; T2.3 बलिश्च (for बलिस्तु). D1 येन; D4 [ऽ]नेन (for यज्ञे). —D4 om. (hapl.) from the post. half up to the prior half of l. 78. B3 येन त्वं; D9 बद्धस्तत् (for तेन त्वं). Ñ2 सख्यं त्वम् (by transp.). —(l. 76) D1 पूर्वं (for सर्वा). D9 T2.3 तेन व्याप्ता मही कृत्स्ना(D9 सर्वा) (for the prior half). Ś Ñ2 V1.2 D8.12 -वनाकरा(V1.2 °र्णवा); D9 T2.3 -धराधरा (for -वनान्तरा). —D9 T2.3 om. l. 77. —(l. 77) B2 उपकारः. V1.2 D3.13 उपचारकृना(D13 °तं). Ś D2.8.12 सर्वो (for पूर्वं). Ñ2 पूर्वं कृतोपकारस्तु (for the prior half). V3 प्रबद्धो. Ś D2.8.12 बद्धो यज्ञस्य दीक्षितः (for the post. half). —(l. 78) D2 उपचारी (for उपकारी). Ś Ñ2 D8.12.13 येन (for तेन). D9 वै कथं (for वैरिणः). Ś D2.4.8.12 य(D2.4 सो)स्मान्नः कृतवैरिणः (for the post. half). —(l. 79) T2 यथा (for यदा). V3 B2 ते (for मे). Ś D8.12 निहंताः. D9 लोकाः (for देवाः). —(l. 80) D9 T3 तदानीं; T2 तथा किं (for तदा किं). D3 नास्य.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

साम्प्रतं कुत आयातः स विष्णुर्येन बिभ्यसि ।
शरीररक्षणार्थाय ध्रुवं ते वाक्यमीदृशम् ।
नायं क्लीबयितुं कालः कालो योद्धुं निशाचर ।
आयुः पितामहात्प्राप्तं त्रैलोक्यं च वशीकृतम् ।
राघवं प्रणमे कस्माद्दीनवीर्यपराक्रमम् । [85]
गच्छस्व शयनीयाय शेषे च विगतज्वरः ।
शयानं न च हन्यास्त्वां राघवो लक्ष्मणस्तथा ।
अहं रामं वधिष्यामि ससुग्रीवं सलक्ष्मणम् ।
वानरांश्च हनिष्यामि ततो देवान्महारणे ।
विष्णुं चैव वधिष्यामि ये च विष्ण्वनुयायिनः । [90]

गच्छ गच्छ स्वकं क्षेत्रं चिरं जीव सुखी भव ।
भ्रातरं त्वेवमुक्त्वासौ रावणः कालचोदितः ।
सावलेपं सगर्वं च पुनर्वचनमब्रवीत् ।
जानामि सीतां धरणीप्रसूतां
जानामि रामं मधुसूदनं च । [95]
अहं हि जाने त्वहमस्य वध्य-
स्तेनाहृता मे जनकात्मजैषा ।
न कामाच्चैव न क्रोधाद्धरामि जनकात्मजाम् ।
निहतो गन्तुमिच्छामि तद्विष्णोः परमं पदम् ।
रावणस्य वचः श्रुत्वा क्रुद्धस्य परिदेवितम् । [100]
कुम्भकर्णः पुनर्वाक्यं साश्रुपूर्णमभाषत ।

V3 om. (hapl.) देवस्य. Ñ2 तस्य राक्षसपुंगव (for the post. half).—(l. 81) V3(with hiatus) यश्च; T3 कृत (for कुत). Ś D8.12 आयाति; T3 °सः (for आयातः). V1.2 B2.3 यस्य (for येन). Ñ2 V B2.3 D3.13 बिभ्यसे; D1 भेष्यसे (for बिभ्यसि).—(l. 82) D9 T2.3 -रक्षणार्थं त्वं (for °र्थाय). Ñ2 D13 त्वं ब्रूषे; V B2.3 D1 ब्रूषे(V3 कथं) त्वं; D3 यद्ब्रूषे; D9 T2.3 वदसे (for ध्रुवं ते).—(l. 83) B2 अलं (for नायं). Ś B3 D2.8.12 युद्धे (for योद्धुं). D4 युद्धकालो; L (ed.) कालयुद्धे (for कालो योद्धुं).—(l. 84) V2 B2.3 स्वाम्यं; D9 राज्यं (for आयुः). D9 T2.3 निरामयं (for पितामहात्). Ñ2 V B2.3 D2–4.13 वशगं(Ñ2 D4 च वशे; V3 शरणं; D2 वशवत्) कृतं; D1 सचराचरं; D9 T2.3 वशमागतं (for च वशीकृतम्).—(l. 85) T2.3 दीन- (for हीन-). Ś2 -वीर्यं.—(l. 86) Ñ2 D1 गच्छ त्वं; V B2.3 तद्गच्छ (for गच्छस्व). V B2.3 D9 शयनीयं त्वं(D9 हि); D4 शयनार्थाय; T2.3 शय निर्याहि (for °नीयाय). Ñ2 D13 स्वप त्वं(Ñ2 *) वि-; V B2.3 पिब त्वं वि-; D1 सभां वापि; D2 शेष्व त्वं वि-; D3 शय त्वं वि-; D4(*sup. lin.* also as in Ñ2) श्रेष्ठ त्वं वि-; D9 यथा पूर्वं; T2.3 यथा त्वं वि-; (for शेषे च वि-).—(l. 87) Ñ2 D2 च न(by transp.); B3 न हि (for न च). V B2 D1.3.13 शयमानं न. Ñ2 D2.4 तदा (for तथा).—(l. 88) Ś B3 D3.8.9.12 हनिष्यामि (for वधिष्यामि).—After the prior half, D12 wrongly reads the post. half of l. 89 and the prior half of l. 90, repeating them in their proper place. V1.3 B2.3 D13 सुग्रीवं च (for ससुग्रीवं). V2 सुग्रीवं सहलक्ष्मणं (for the post. half).—(l. 89) Ś D2.4.8.9.12 T2.3 वधिष्यामि (for हनि°). V3 -बले (for -रणे).—(l. 90) D9 वापि (for चैव). Ś Ñ2 D1.8.12 हनिष्यामि (for वधि°). D4 ये विष्णोरनु-. V2 -[अ]नुजीविनः; V3 °***नः (illeg.); T2.3 -निवासिनः (for -[अ]नुयायिनः). D9 विष्णुलोकनिवासिनं (for the post. half).—(l. 91) V B2.3 D13 गच्छस्व तत्(B2 ते) (for गच्छ स्वकं). B3(*inf. lin.* as above) क्षिप्रं (for क्षेत्रं). D1 स्वतंत्रस्त्वं; D3 स्वप क्षिप्रं; D4 तु दुर्बुद्धे (for स्वकं क्षेत्रं). D9 T2.3 गच्छ गच्छस्व रक्षोघ (for the prior half).—D4 om. from the post. half up to the prior half of l. 92.—(l. 92) T3 उक्तो. D9 [अ]थ; T2.3 हि (for [अ]सौ). D1–4 कालनोदितः; D13 °देशितः (for कालचोदितः).—(l. 93) V1 D2 सगर्जं; V2.3 B2 च स(V3 ग)र्वं (for सगर्वं). Ś D4.8.12 स गर्जन्वै. D9 सावमानं सावलेपं (for the prior half).—D4 om. l. 94–97. For l. 94–97, cf. l. 111–114 of App. I (No. 30).—(l. 94) Ñ2 धरणि-; V2 D3 जनक- (for धरणी-). T2.3 -सुतां च. D9 च पयोधिजातां (for धरणीप्रसूतां).—Ñ2 illeg. from l. 95–97.—(l. 95) T2 त्वं (for च). Ś V1.3 D1–3.8.12.13 जानामि रामो मधुसूदनोयं.—(l. 96) B2.3 एतद्; D12 अयं (for अहं). V D1–3.13 वि-; T2.3 तु (for हि). Ś D2.8.12 वयम्; L (ed.) स्वयम् (for त्वहम्). B2 अद्य (for अस्य). Ś D2.8.12 वध्यास्. D9 तच्चापि जानामि यदस्य कार्यं.—(l. 97) D9 तदा (for तेन). D13 ते (for मे). D9 T2.3 [इ]यं (for [ए]षा).—(l. 98) Ś V3 D2.3.8.12 T2 नैव च; D4 चापि न (for चैव न). T3 च कामान्न च (for कामाच्चैव न). Ś D4.8.9.12 त्यजामि (for हरामि). T2.3 हृता मे जनकात्मजा (for the post. half).—After l. 99, B2.3 D2 G (ed.) read an addl. colophon :

[*Kāṇḍa name*: B2.3 लंकाकांडे; D2 लंकापर्वणि.—*Sarga name* : B2.3 D2 रावणवाक्यं.—*Sarga no.* (figures, words or both) : B2.3 D2 om.; G (ed.) 41.]

—Ñ2 illeg. for l. 100.—(l. 100) D9 T2.3 इति ब्रुवाणं तं क्रुद्धं(D9 क्रुद्धं तु) (for the prior half). D1 -वेष्टितं (for -देवितम्). D9 रणे कृतविनिश्चयं; T2.3 मरणे कृतनिश्चयं (for the post. half).—B2.3 D9 om. (hapl.); Ñ2 illeg. for l. 101.—(l. 101) V1.2 शनैर् (for पुनर्). D1 साश्रुकंठम्; T2.3 सांत्वपूर्वम्; L (ed.) अश्रुपूर्णम्. Ś D8.12 साश्रुपूर्णमुखोब्रवीत् (for the post. half).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

33

After colophon of 6.51, Ś D2.8.12 ins.:

कुम्भकर्णवचः श्रुत्वा रावणो लोकरावणः ।
गन्तुमैच्छदतिक्रुद्धः सर्वसैन्येन संवृतः ।
संग्राममभिकाङ्क्षन्तं श्रुत्वा तं राक्षसेश्वरम् ।
तत्रोत्थाय ययौ देवी शीघ्रं मन्दोदरी तदा ।
माल्यवन्तं करे गृह्य यूपाक्षसहिता तथा । [5]
मन्त्रिभिर्मन्त्रतत्त्वज्ञैस्तथान्यैर्मन्त्रिसत्तमैः ।
राक्षसैरावृता सर्वैर्वेत्रमुद्गरपाणिभिः ।
योषिद्भिश्चैव वृद्धाभिस्तथा कन्याभिरावृता ।
आयुधव्यग्रहस्तैश्च राक्षसैश्च समन्ततः ।
सभां तु प्रस्थिता देवी यत्रास्ते राक्षसाधिपः । [10]
छत्रेण ध्रियमाणेन अतिकायपुरःसरैः ।
चामरैर्वीज्यमाना च ह्यतिमात्रमलंकृतम् ।
राजमार्गं सुविपुलं ध्वजमालोपशोभितम् ।
उत्सारणं प्रकुर्वद्भिर्वेत्रमुद्गरपाणिभिः ।
प्रविश्य च सभां दिव्यां प्रभया द्योतमानया । [15]
द्रष्टुं वै रावणं सा तमपश्यद्गन्तुमुद्यतम् ।
प्राप्तां देवीं तु तां राजा प्रियां मन्दोदरीं तदा ।
दृष्ट्वा ससंभ्रमस्तूर्णं परिष्वज्य दशाननः ।
मन्त्रिणां तु ततस्तेषामासनान्यादिदेश ह ।
सौवर्णानि विचित्राणि सोपधानानि सर्वशः । [20]
स्वासनेषूपविष्टेषु प्रणामान्ते च मन्त्रिषु ।
पर्यङ्के चोपविष्टं तु तदा मन्दोदरीसुतः ।
अतिकायो महाबाहुः पितरं चाभिवाद्य तम् ।
मातरं चाभिवाद्याथ तथासनगतोऽभवत् ।
प्रहस्तवधसंतप्तो महाकायवधार्दितः । [25]
लङ्कायाश्चावमर्देन कषायीकृतलोचनः ।
संग्राममभिकाङ्क्षन्स व्याकुलेनान्तरात्मना ।
अब्रवीद्विविधं चैव महागम्भीरनिस्वनः ।
किमागमनकृत्यं तु देवि शीघ्रं तदुच्यताम् ।
तूर्णं मम समीपं तु किमर्थं त्वमिहागता । [30]
मन्त्रिभिः सहिता किं नु ब्रूहि साध्वि यथातथम् ।
एवमुक्ते तु वचने देवी वचनमब्रवीत् ।
विज्ञाप्यं शृणु राजेन्द्र याचे त्वाहं कृताञ्जलिः ।
नापराधश्च कर्तव्यो वदन्त्या मम मानद ।
श्रुता मे नगरी रुद्धा श्रुता मे राक्षसा हताः । [35]
धूम्राक्षसहिता वीर प्रहस्तसहितास्तथा ।
भवान्वै युद्धकामश्च निर्गन्तुं कृतनिश्चयः ।
इति जानीहि राजेन्द्र ममागमनकारणम् ।
न च युक्तं प्रमुखतः स्थातुं तस्य महात्मनः ।
एकेन येन वै पूर्वं बहवो राक्षसा हताः । [40]
चतुर्दशसहस्राणि जनस्थाननिवासिनाम् ।
खरश्च निहतः संख्ये सोऽयं रामो न मानुषः ।
त्रिशिराश्च कबन्धश्च विराधो दण्डके हतः ।
शरेणैकेन मारीचस्तदा रामो न मानुषः ।
शङ्के चैनं महाराज मारीचस्य वधात्तदा । [45]
पितुश्च वचनाद्रामः प्रविष्टो दण्डकं वनम् ।
ब्रह्मचर्यव्रते युक्तः सह भ्रात्रा वनेचरः ।
तस्य भार्या जनस्थानात्किमानीता पतिव्रता ।
अकारणकृतं तत्ते दोषोऽयं समुपस्थितः ।
पतिव्रतावरोधश्च महान्तं दोषमावहेत् । [50]
न मह्यं रोचते बुद्ध्या न चैषां मन्त्रिणां तथा ।
रामभार्या सती ह्येषा रामाय प्रतिदीयताम् ।
विभीषणेन चैवोक्तं पूर्वमेव महात्मना ।
गतस्तत्रैव रामश्च तद्वाचायं करिष्यति ।
वस्त्राणि चैव रत्नानि प्रेषयाम रघूत्तमे । [55]

33

[Cf. No. 30. This follows NW tradition with variants and stars and so is given separately.]

(l. 3) D2 रावणं श्रुत्य भामिनी (for the post. half). —(l. 4) D12 ततो (for तत्र). Ś [आ]ययौ (for ययौ). D2 नाम्ना and तथा (for शीघ्रं and तदा respy.). —(l. 5) D2 कपिं and तदा (for करे and तथा respy.). —(l. 11) Note hiatus between the two halves. D2 -पुरःसरा. —(l. 12) D2.8.12 वीज्यमान(D2 °नै)श् (for वीज्यमाना). Ś2 सा (for च). Ś2 D12 अलंकृतां(D12 °तैः) (for अलंकृतम्). D2 वीज्यमाना स्वलंकृतैः (for the post. half). —(l. 13) D2 सीतार्थं मार्ग- (for राजमार्गं सु-). —(l. 15) D2 तु (for च). —(l. 16) D2 तु (for तम्) and मयस्य दुहिता तदा (for the post. half). —(l. 17) D2 ततो (for तु तां). —(l. 18) Ś1 ससंभ्रमात्. —(l. 21) D2 तेष्वासनोप-. Ś1 D2 प्रणामांतेषु (for °मान्ते च). —(l. 22) D2 देवी (for तदा). —(l. 24) D2 [अ]भ्यवाद्य. D2.12 तदा (for तथा). —(l. 28) Ś D8 -निःस्वनः. —(l. 29) D2 ते (for तु). —D12 om. (hapl.) from देवि up to तु in l. 30. —(l. 30) D2 समीपे. —(l. 31) D2.8 तु (for नु). —(l. 32) Ś2 [इ]ति (for तु). —(l. 36) D2 वीराः (for वीर) and प्रहस्तेन सहैव तु (for the post. half). —(l. 38) D2 संचिंत्य (for जानीहि). —After l. 39, D2 ins.:

1* रामस्य सुमहाभाग यस्य भार्या हृता त्वया ।
रामस्य च ससौमित्रेर्यस्य नास्ति समो युधि ।
न च मानुषमात्रोऽसौ रामो दशरथात्मजः ।

—(l. 41) Ś2 -निवासिनः. —(l. 42) D2 तथा (for सोऽयं). —(l. 43) D2 कथं वध्यो (for कबन्धश्च). —(l. 44) D2 वाली च (for मारीचस). —(l. 49) D2 दोषाय समुपस्थितं (for the post. half). —(l. 50) D2 दोषमावहते महान् (for the post. half). —(l. 51) D2 तेषां (for चैषां). —(l. 52) D2 प्रिय (for प्रति-). —(l. 54) D2 त्वद्वचोयं. —(l. 56) D8 om. second च (subm.). —(l. 59) D2

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सीतां चैव महाराज सुवर्णं वाहनानि च ।
मणिमुक्ताप्रवालं च तथा रजतमेव च ।
माल्यवान्गृह्य संयातु यूपाक्षश्च तथैव च ।
अतिकायस्तथा चायं कार्याकार्यविशारदः ।
विभीषणो गतः पूर्वमेभिस्त्वं गुणैर्ध्रुवम् । [60]
संधिं करिष्यति व्यक्तं राघवं प्रणिपत्य हि ।
सामात्यो मैथिलीं चास्मै प्रदास्यति विभीषणः ।
माल्यवांश्च महामायो राक्षसानां हिते रतः ।
राघवं याच्य तरसा संधिं कुर्वन्तु राक्षसाः ।
सान्त्वं भेदस्तथा दानं राज्ञामेतत्त्रयं शुभम् । [65]
असुखं तु स्मृतं युद्धं तस्माद्युद्धं विवर्जय ।
त्रिभिर्नयैर्जितं तत्र विक्रमेण जितं भवेत् ।
स्वजनस्य क्षयं दृष्ट्वा पुत्रभ्रातृवधं तदा ।
संशयं चात्मनो गत्वा किं जितेन करिष्यसि ।
चञ्चला युद्धसिद्धिस्तु जीयते न च जीयते । [70]
तस्माद्युद्धं न रोचेत संधिं कुरु दशानन ।
प्रणिपत्य महाबाहो राघवं वै प्रसाद्य च ।
दीयतामद्य सा सीता संधिस्तेनेह रोचताम् ।
साम्प्रतं संशयो राज्ञः पुरस्य सह बान्धवैः ।
आत्मनो राक्षसश्रेष्ठ वर्तते नात्र संशयः । [75]
मा कृथाः सर्वनाशं तु मा कृथाः पुत्रसंक्षयम् ।
तव सत्यं ब्रवीम्येषा कुरुष्व वचनं मम ।
तस्माद्राजन्ब्रवीम्येषा पुरस्य च कुलस्य च ।
रक्षणीयस्त्वयात्मा वै सर्वमात्मन्यधिष्ठितम् ।
क्षमाशीलस्तथा रामः सत्यवादी च राघवः । [80]
धर्मनित्यो महाराज शरणागतवत्सलः ।
कुरु तेनाहतः संधिं रामे दशरथात्मजे ।
लक्ष्मणश्च महाधन्वी नित्यं भ्रातृहिते रतः ।
प्रहस्तेन कृतं किंचिद्युद्धं ते राक्षसेश्वर
धूम्राक्षेण च राजेन्द्र नित्यं समरगृध्निणा । [85]
महाकायेन च तथा महामायेन रक्षसा ।
अकम्पनेन वीरेण युध्यता राक्षसेश्वर ।
तथान्यैर्युध्यमानैश्च किं कृतं वानरे बले ।
न हतो यूथपः कश्चिद्बलोद्देशेऽपि रावण ।
येषां वीर्याद्बिभेतीन्द्रः कुबेरवरुणावपि । [90]
स च वैवस्वतो येषां तथान्ये देवदानवाः ।
येषां नास्ति समो वीर्ये ते हता वानरैर्युधि ।
न चापि वानराः शक्या हन्तुं पादपयोधिनः ।
रक्ष्यमाणास्तु रामेण सुग्रीवेण च पालिताः ।
तत्र ते रोचतां संधिः सह रामेण रावण । [95]
योग्यश्च राघवो मित्रं कार्तवीर्योऽर्जुनो यथा ।
मा कृथा मोघमानित्वं मा कृथाः कुलसंक्षयम् ।
मा कृथा गुरुनाशं च मा कृथाः पुत्रसंक्षयम् ।

Colophon

तस्यास्तु वचनं श्रुत्वा प्रियाया राक्षसेश्वरः ।
दीर्घमुष्णं च निःश्वस्य विलोक्य च सभासदः । [100]
हस्ते मन्दोदरीं गृह्य वाक्यमेतदुवाच ह ।
त्वया वै हितकाङ्क्षिण्या वचो यद्बहु भाषितम् ।
न तन्मनसि मे देवि यत्प्रोक्तोऽहं प्रियं प्रिये ।
देवान्जित्वा रणे पूर्वं ससुरासुरमानवान् ।
प्रणमे मानुषं कस्माद्वानरान्यः समाश्रितः । [105]
प्रणम्य रामं काकुत्स्थं किं वक्ष्ये सर्वदेवताः ।
कीदृशं वा भवेन्मह्यं जीवितं हतचेतसः ।
हृत्वा तस्य पुरा भार्यां मानं कृत्वा सुदारुणम् ।
राक्षसान्घातयित्वा तु लङ्कां संपीड्य सर्वतः ।
राघवं प्रणमे कस्माद्धीनवीर्यं इवाचलः । [110]
राघवं वै प्रणम्याहं कथं जीवितुमुत्सहे ।

कार्यः (for चायं).—(l. 60) D8 यातः (for गतः). D8.12 ध्रुवन् (for ध्रुवम्).—(l. 61) Ś1 प्रतिपद्य (for प्रणिपत्य).—(l. 62) D12 सामात्यौ (for °त्यो).—(l. 63) Ś2 महाकायो (for °मायो).—(l. 64) Ś1 वाच्य (for याच्य). D2 संधिं कुर्यात्तु रावण; D12 om. (for the post. half).—(l. 65) D2 भेदं (for भेदस्). D8 तदा (for तथा). D2 श्रुतं (for शुभम्).—(l. 66) D12 विसर्जय.—(l. 67) D2 [अ]जितं (for second जितं).—(l. 68) D2 कृत्वा (for दृष्ट्वा). Ś2 D2 तथा (for तदा).—(l. 70) D2 हनते हन्यतेपि च (for the post. half).—(l. 71) D12 कुर्वन् (for कुरु).—(l. 72) D2 च (for वै).—(l. 74) D2 राजन् (for राज्ञः) and न पुरस्य सबांधवैः (for the post. half).—(l. 77) D2 सर्वं (for सत्यं).—(l. 78) D2.12 [अ]थ (for first च).—(l. 79) D2 तया त्वं (for त्वयात्मा).—(l. 82) Ś1 रामेण सह मंत्रिभिः (for the post. half).—(l. 84) D2 युध्यता राक्षसे बले (for the post. half).—(l. 85) D8 -मीरुणा (for -गृध्निणा).—(l. 87) Ś2 वीर्येण (for वीरेण).—(l. 89) D2 महतो (for न हतो).—(l. 96) D2 नित्यं (for मित्रं).—(l. 97) D2मा कृथाः पुरनाशं हि (for the prior half).—After l. 98, D2.12 ins. (followed by colophon):

2* सर्वं ब्रवीमि चैवान्ते कुरुष्व वचनं मम ।
[D12 सत्यं (for सर्वं).]

[Colophon:—*Kāṇḍa name*: D2 लंकाकांडे.—*Sarga name*: Ś1 D2.8.12 मंदोदरीवाक्यं.—*Sarga no.* (figures, words or both): S1 D2.8.12 om.; Ś2 42.—After colophon, D2 concludes with राम.]

—(l. 100) D2 उच्छ्वासं दीर्घनिश्वस्य; D12 दीर्घमूलं च निश्वास्य (for the prior half). D2 निरीक्ष्य (for विलोक्य).—(l. 102) D2 हि (for वै).—(l. 103) Ś2 तत्र (by transp.); D12 नैतं (for न तन्). D2 यथोक्तो (for यत्प्रोक्तो).—(l. 104) D2 देवं (for देवान्). D2 पूर्णं (for पूर्वं). D8 असुर- (for ससुर-). D2 वशं ससुरमानवान् (for the post. half).—(l. 108) D2 कृत्वा (for हत्वा).—(l. 110) D8 [अ]नलः (for [अ]चलः).—(l. 112)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एष मे सहजो भावो नित्यं मनसि धिष्ठितः।
अधिरुह्य तदा देवान्न नमेयं तु कस्यचित्।
त्रैलोक्ये स पुमान्नास्ति यो मया न जितो रणे।
देवतानां बलं हत्वा देवराजो मया जितः। [115]
राघवं प्रणमे कस्मात्कृत्ये स्थित्वा हि देहिनाम्।
मा कृथा हृदि संतापं विजयिष्ये शुचिस्मिते।
हनिष्ये राघवं चैव लक्ष्मणं च सवानरम्।
सुग्रीवं च हनिष्यामि हनूमन्तं च वानरम्।
न तु संधिं करिष्यामि राघवेण कदाचन। [120]
वैदेहीं नार्पयिष्यामि राघवस्य भयादहम्।
साम्प्रतं न च संधिं तु करिष्यति स राघवः।
सागरं तु महत्तीर्त्वा लङ्कां रुद्ध्वा सकाननाम्।
राक्षसप्रवरान्हत्वा संधिं कुर्यात्कथं प्रिये।
न त्वहं संधिमिच्छामि कदाचिदपि भामिनि। [125]
गच्छ त्वं भव विस्रब्धा भवेत्सर्वं सुखोदयम्।
मा कृथा हृदि संतापमहं यास्ये रणाजिरम्।
अथ सर्वान्हनिष्यामि शत्रून्समरमूर्धनि।
पुत्राश्च ते महावीर्या मेघनादपुरोगमाः।
न तेषां मुच्यते कश्चिदपि मृत्युर्वरानने। [130]
अन्तःपुराय गच्छ त्वं सुखिनी भव सन्तुषा।
एवमुक्त्वा परिष्वज्य भार्यां प्रीतमना इव।
प्रविवेश च सा देवी तदा स्वभवनं शुभम्।
चिन्तयामास तं घोरं विग्रहं समुपस्थितम्।
रावणस्तु ततो वाक्यं राक्षसानिदमब्रवीत्। [135]
कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः।
अद्य क्रोधं विमोक्ष्यामि निगूढं हृदयोद्भवम्।
देवासुरे यथा पूर्वं रुद्रेण निहतोऽन्धकः।
चिरकालस्थितं ह्येतद्युद्धं मे राघवेण ह।
अद्य तूणेशया बाणा निर्मुक्ता इव पन्नगाः। [140]
रामं समभिधावन्तु विषाग्निप्रतिमाः शिताः।
सुतेजनैर्रुक्मपुङ्खैरतिधौतैर्हिरण्मयैः।
सागरं दीपयाम्येष मुक्तामिरिव कुञ्जरम्।
वानरान्सुबहून्गृह्य राघवं संप्रवेशितान्।
मामनुस्मृत्य विक्रान्तान्रामपार्श्वसमागतान्। [145]

Colophon

अथादाय शितं शूलं शत्रुशोणितरञ्जितम्।
कुम्भकर्णो महातेजा रावणं वाक्यमब्रवीत्।
रावणं च समालक्ष्य भ्रातरं कुपितेन्द्रियम्।

34

After 6.55.35^{ab}, D_3 ins. :

विभीषणो महाप्राज्ञ उवाच रघुनन्दनम्।
निर्याति स्फुटदशनो दशाननस्य
भ्रातायं विपुलवपुर्यतः कनीयान्।
कुर्वाणश्चरणभराज्जगद्विलोलं
प्रान्तेभक्षुभितक*: * कुम्भकर्णः। [5]
विन्ध्याद्रेरपि विपुलः शरीरबन्धो
धीः सूक्ष्मा कुशशिखरादपीष्यतेऽस्य।
अन्यस्य व्रतसमुपार्जितः प्रतापः
संजातः * * सहसायमद्भुतेन।
एतस्य त्रिजगदिदं तृणं रणाग्रे [10]
स्वप्नत्वात्कुशलममुष्य विष्टपानाम्।
निःशङ्कं निवसति रावणोऽस्य बाहु-
प्राकारव्यवहितशत्रुवाहिनीकः।
संनद्धः स्वसदृशवाहिनीसमग्रः
संग्रामे क इव निवेद्यतामयं ते। [15]
वक्तव्यं किमपरमेहि सावधानः
संजातं जगदखिलं तुलाधिरूढम्।
सुग्रीवः स्वयमभवत्ततः पुरस्ता-
दध्यास्त श्वसनसुतः प्रदेशमूलम्।
संचक्रुर्भयमितरे कथंचिदस्मि- [20]
न्सौमित्री रघुपतिरन्तिके चकार।
तारेयश्चरणरजोऽङ्घ्रिजैर्दुधाव
क्ष्माभृद्भिर्दहनसुतो ममर्द जङ्घे।
तस्यायं खरनखरायुधः सवेगः
सामीरिः समरखले समाससाद। [25]

$Ś_2$ [अ]धिष्ठितः (for धिष्ठितः). —(l. 113) D_2 देवी (for देवान्). —(l. 116) D_2 कृत्यं (for कृत्ये). $D_{2.12}$ तु (for हि). —(l. 117) D_2 तं (for वि-). —(l. 118) D_2 लक्ष्मणं वानरांश्च तान् (for the post. half). —(l. 119) D_2 om. first च (subm.). D_2 वधिष्यामि (for हनि°). —(l. 120) D_2 सहैव तु (for कदाचन). —(l. 122) D_2 करिष्यामि च राघवे (for the post. half). —(l. 123) D_2 बद्ध्वा (for तीर्त्वा). —(l. 124) D_2 कुर्या (for कुर्यात्). —(l. 126) D_2 सर्वमेतत् (for भवेत्सर्वं). —(l. 128) D_2 अद्य (for अथ). —(l. 130) D_8 वर्तते (for मुच्यते). D_8 अप- (for अपि). —(l. 132) D_2 प्रियमना. —(l. 133) D_2 तदा and स्वयं (for च सा and तदा respy.). —(l. 136) $D_{2.8}$ कल्पतां. —(l. 137) D_{12} अधि- (for अद्य). D_2 हृदये भवं. —(l. 139) D_2 -काले (for -काल-). D_8 एवं (for युद्धं). $Ś_1$ हि (for ह). —(l. 141) D_2 विषाग्निप्रतिभासिताः (for the post. half). —(l. 142) D_2 सुतेजसै and तैर्धौतैर्हि (for सुतेजनै and अतिधौतैर् respy.). —(l. 143) D_2 [ए]व (for [ए]ष). —(l. 144) D_2 राघवात्सं * देशितान् (for the post. half). —(l. 145) D_2 रामपार्श्वमुपागतान् (for the post. half).

[Colophon: —*Kāṇḍa name*: D_2 लंकाकांडे. —*Sarga name*: Ś $D_{2.8.12}$ रावणवाक्यं. —*Sarga no.* (figures, words or both): $Ś_1$ $D_{2.8.12}$ om.; $Ś_2$ 43. —After colophon, D_2 concludes with राम.]

—(l. 148) D_2 अतीव हि (for रावणं च).

—Thereafter, all the above MSS. (except D_2) repeat 6.51.28°–29^b, while D_2 repeats 28°–29.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

नीलाद्याः कपिपतयः सहस्रभाज
आसीदलुदरसमीप एव तस्य ।
सुग्रीवः स्वयमपि संगमोद्धुरत्वा-
द्वित्राणि द्युतिभिरवापदूर्ध्वकायम् ।
नापश्यत्प्रलघुतया बहून्नतोऽपि [30]
स्पर्शेण स्फुटमवधीत्तु बहूनुपेतान् ।
सोऽङ्घ्रिभ्यां मृद इव पर्यटन्ननेपी-
च्चूर्णत्वं रणचतुरा हरीन्द्रकोटीः ।

35

After 6.55.76, D7.10.11 G1 K (ed., within brackets) ins. :

पीड्यमानस्तदास्त्रं तु विशेषं तत्स राक्षसः ।
ततश्चुक्रोप बलवान्सुमित्रानन्दवर्धनः ।
अथास्य कवचं शुभ्रं जाम्बूनदमयं शुभम् ।
प्रच्छादयामास शरैः संध्याभ्रमिव मारुतः ।
नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः । [5]
आपीड्यमानः शुशुभे मेघैः सूर्य इवांशुमान् ।
ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम् ।
सावज्ञमेव प्रोवाच वाक्यं मेघौघनिस्वनः ।
अन्तकस्याप्यकष्टेन युधि जेतारमाहवे ।
युध्यता मामभीतेन ख्यापिता वीरता त्वया । [10]
प्रगृहीतायुधस्येह मृत्योरिव महामृधे ।
तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः ।
ऐरावतं समारूढो वृतः सर्वामरैः प्रभुः ।
नैव शक्रोऽपि समरे स्थितपूर्वः कदाचन ।
अद्य त्वयाहं सौमित्रे बालेनापि पराक्रमैः । [15]
तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम् ।
यत्तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया ।
राममेवैकमिच्छामि हन्तुं यस्मिन्हते हतम् ।
रामे मयात्र निहते येऽन्ये स्थास्यन्ति संयुगे ।
तानहं योधयिष्यामि स्वबलेन प्रमाथिना । 20]
इत्युक्तवाक्यं तद्रक्षः प्रोवाच स्तुतिसंहितम् ।
मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव ।
यस्त्वं शक्रादिभिर्देवैरसह्यं प्राप्य पौरुषम् ।
तत्सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः ।
एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः । [25]
इति श्रुत्वा ह्यनादृत्य लक्ष्मणं स निशाचरः ।

36

After 6.55.91, Ś Ñ2 (preceded by an addl. colophon) B2 D2.8.9.12 T2.3 (after the first occurrence of 6.55.91) ins. ; while D1 ins. after 6.55.74 ; whereas D3 ins. after 6.55.92 ; K (ed.) ins. within brackets after 6.55.98 :

पुरस्ताद्राघवस्यार्थे गदापाणिर्विभीषणः ।
अभिदुद्राव वेगेन भ्राता भ्रातरमाहवे ।
विभीषणं पुरो दृष्ट्वा कुम्भकर्णोऽब्रवीदिदम् ।
प्रहरस्व रणे शीघ्रं क्षत्रधर्मे स्थितो भव ।
भ्रातृस्नेहं परित्यज्य राघवस्य प्रियं कुरु । [5]

35

(l. 1) D10 तद् (for तदा). G1 K (ed.) भिद्यमानस्तदा बाणैर् (K [ed.] तैस्तु) (for the prior half). D7 G1 विषेहे (for विशेषं). G1 यत्. —(l. 2) G1 चुक्रोध (for चुक्रोप) and -नंदि- (for -नन्द-). —(l. 4) G1 प्रचिच्छेद शरैस्तस्य (for the prior half). —(l. 5) K (ed.) -प्रख्यैः. —(l. 6) G1 आचीयमानः ; K (ed.) आच्छाद्यमानः. —(l. 7) G1 वीरः (for भीमः) and -नंदि- (for -नन्द-). —(l. 8) G1 अवज्ञयैव (for सावज्ञमेव). D7 K (ed.) -निःस्वनः (K [ed.]°नं) ; G1 -निस्वनं. —D11 repeats l. 9–10 consecutively. —(l. 9) D7 कष्टस्य; G1 रुष्टस्य; K (ed.) क्रुद्धस्य (for [अ]कष्टेन). G1 भयदातारम् (for युधि जेतारम्). —(l. 10) G1 विभिंदता मां तरसा (for the prior half) and विख्याता (for ख्यापिता). —(l. 11) G1 [ए]व; K (ed.) [इ]व (for [इ]ह). —(l. 12) G1 तिष्ठतो (for तिष्ठन्) and को मे (for किमु). —(l. 13) D7 G1 ऐरावत-. G1 -गज- (for सम्-) and चापि (for सर्व-). —(l. 15) D11 G1 बलेन. —(l. 17) G1 सत्त्ववीर्यबलोपेतस् ; K (ed.) सत्त्ववैर्यबलौघेन (for the prior half). —(l. 18) G1 गमिष्यामि (for [ए]कमिच्छामि). —(l. 19) D7 चेन् (for [अ]त्र). G1 तु निहते वीर (for मयात्र निहते) and यदि स्थास्यति (for येऽन्ये स्थास्यन्ति). —(l. 20) G1 तद् (for तान्). —(l. 21) G1 -सत्कृतः (for -संहितम्). —(l. 22) K (ed.) इदं (for मृधे). G1 रक्षोवरं (for घोरतरं). —(l. 23) K (ed.) प्राह (for प्राप्य). G1 असह्यः पापपूरुषः (for the post. half). —(l. 24) G1 सर्वं (for सत्यं). —(l. 25) K (ed.) [अ]परः (for [अ]चलः). —D11 om. (hapl.?) from l. 26 up to 6.55.77ab.

36

Ś D2.8.12 om. l. 1. —(l. 1) T2.3 ततस्तु (for पुरस्ताद्). K (ed.) गदायुक्तो. —(l. 2) Ś D2.8.12 रक्षो; T2 त्राता (for भ्राता). —(l. 3) D1 पुनर् (for पुरो). Ś D2.8.12 पालनीयं लघुं (D8 तनुं) स (D2 त)दा (for the post. half). —After l. 3, Ś D2.8.12 ins. :

1* करुणाक्रोधलज्जाभिर्व्याप्तोऽन्तर्वाक्यमब्रवीत् ।

[D2 बाष्पांतर् (for व्याप्तोऽन्तर्).]

—(l. 4) B2 वने (for रणे). Ñ2 B2 D3 क्षात्र- (for क्षत्र-). D1.3.9 -धर्मे- (for -धर्मे). K (ed.) स्थिरो. Ś D2.3.8.12 भवान् (for भव). —(l. 6) Ñ2 स त्वं; B2 D1.2.9 यत्त्वं (for यस्त्वं). B2 उपाश्रितः. —(l. 7) Ñ2 B2 D3 -[अ]नु- (for -[अ]भि-). —(l. 8) B2 D1.3 धर्मा (B2 सत्या) भिसक्तानां; T2.3 K (ed.)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अस्मत्कार्यं कृतं वत्स यस्त्वं राममुपागतः ।
त्वमेको रक्षसां लोके सत्यधर्माभिरक्षिता ।
नास्ति सत्याभिपक्तानां व्यसनं तु कदाचन ।
सन्तानार्थं त्वमेवैकः कुलस्यास्य भविष्यसि ।
राघवस्य प्रसादाच्च रक्षसां राज्यमाप्स्यसि । [10]
परिहृत्य च दुर्धर्षं शीघ्रं मार्गादपक्रम ।
न स्थातव्यं पुरस्तान्मे संभ्रमान्नष्टचेतसः ।
न वेद्मि संयुगे सक्तः स्वान्परान्वा निशाचर ।
रक्षणीयोऽसि मे वत्स सत्यमेतद्ब्रवीमि ते ।
एवमुक्तो वचस्तेन कुम्भकर्णेन धीमता । [15]
विभीषणो महाबाहुः कुम्भकर्णमुवाच ह ।
गदितं मे कुलस्यास्य रक्षणार्थमरिंदम ।
न कृतं सर्वरक्षोभिस्ततोऽहं राममागतः ।
तत्क्षन्तव्यं हि भवता सुकृतं दुष्कृतं तु वा ।
एवमुक्त्वाश्रुपूर्णाक्षो गदापाणिर्विभीषणः । [20]
एकान्तमाश्रितो भूत्वा चिन्तयामास तत्क्षयम् ।

37

After 1292*, M₃ B (ed.) K (ed.) (both eds. within brackets) ins.:

उन्मत्तस्तु तदा दृष्ट्वा गतासुं भ्रातरं रणे ।
चुकोप परमक्रुद्धः प्रलयाग्निसमद्युतिः ।
ततः समादाय गदां स वीरो
वित्रासयन्वानरसैन्यमुग्रम् ।
दुद्राव वेगेन तु सैन्यमध्ये [5]
दहन्यथा वह्निरतिप्रचण्डः ।

आपतन्तं तदा दृष्ट्वा राक्षसं भीमविक्रमम् ।
शैलमादाय दुद्राव गवाक्षः पर्वतोपमः ।
जिघांसू राक्षसं भीमं तं शैलेन महाबलः ।
आपतन्तं तदा दृष्ट्वा उन्मत्तोऽपि महागिरिम् । [10]
चिच्छेद गदया वीरः शतधा तत्र संयुगे ।
चूर्णीकृतं गिरिं दृष्ट्वा रक्षसा कपिकुञ्जरः ।
विस्मितोऽभून्महाबाहुर्जगर्ज च मुहुर्मुहुः ।
उन्मत्तस्तु सुसंक्रुद्धो ज्वलन्तीं राक्षसोत्तमः ।
गदामादाय वेगेन कपेर्वक्षस्यताडयत् । [15]
स तया गदया वीरस्ताडितः कपिकुञ्जरः ।
पपात भूमौ निःसंज्ञः सुस्राव रुधिरं बहु ।
पुनः संज्ञामथास्थाय वानरः स समुत्थितः ।
तलेन ताडयामास ततस्तस्य शिरः कपिः ।
तेन प्रताडितो वीरो राक्षसः पर्वतोपमः । [20]
विस्रस्तदन्तनयनो निपपात महीतले ।
सुस्राव रुधिरं सोष्णं गतासुश्च ततोऽभवत् ।

38

After 6.59, D₃.₅–₇.₉–₁₁ T₁.₂ G M ins.; while Ñ V₁.₂ B₂–₄ D₄.₁₃ ins. after 6.61; T₃ ins. after 6.60.2:

अतिकायं हतं श्रुत्वा लक्ष्मणेन महात्मना ।
उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ।
धूम्राक्षः परमामर्षी धन्वी शस्त्रभृतां वरः ।

धर्मानु (K [ed.] °भि)रक्तस्य. Ś D₈.₁₂ हि (for तु). —(l. 9) T₂.₃ transp. त्वमेवैक: and कुलस्याय. —(l. 10) K (ed.) त्वं (for च). T₃ अत्स्यसि (for आप्स्यसि). —(l. 11) Ś D₈.₁₂ त्वं प्रकृत्यातिदुर्धर्षः; Ñ₂ B₂ D₉ प्रकृत्या क्षांतिदुर्धर्षः; D₁–₃ (with hiatus) प्रकृत्या (D₁ °ह्रत्य) अपि दुर्धर्षः (D₁ °र्षं); K (ed.) प्रकृत्या मम दुर्धर्षं (for the prior half). Ś₂ Ñ₂ B₂ D₁.₉ अपाक्रम (for अपक्रम). —(l. 12) B₂ T₂.₃ संभ्रमावि (B₂ °द्रु)ष्ट-. —(l. 13) K (ed.) वेत्तुं (for वेद्मि). D₉ शक्तः (for सक्तः). D₁ निशाचरान्. —(l. 15) T₂.₃ ततस् (for वचस्). —(l. 16) Ñ₂ illeg. from मु up to l. 21. B₂ D₉ अभाषत; D₃ उपावहन् (for उवाच ह). —(l. 17) L (ed.) मंत्रितं (for गदितं). Ś D₈.₁₂ च (for मे). —(l. 18) D₁ श्रुत्वा; T₂.₃ श्रुतं (for कृतं). B₂ D₉ तेन (for ततो). —(l. 19) D₁ भगवता (for हि भवता). Ś D₂.₈.₁₂ कांक्षितव्यं तु भवता; K (ed.) कृतं तु तन्महाभाग (for the prior half). D₁ दुःकृतं सुकृतं. Ś D₈ न; B₂ D₉.₁₂ नु (for तु). T₂.₃ क्षंतव्यं भवता सर्वं सुकृतं वा तु दुष्कृतं. —After l. 19, T₂.₃ ins.:

2* यत्त्वया विदितं सर्वं सर्वज्ञोऽसि पितुः समः ।

—(l. 20) T₂.₃ गदाहस्तो (for °पाणिर्). —(l. 21) T₂ आस्थितो (for आश्रितो). D₁ शक्तितः; D₃ बुद्धिमान्; K (ed.) सुस्थितः (for तत्क्षयम्). T₂.₃ चिंतयावनतस्थितः (for the post. half).

—Thereafter D₁ reads 93 (first time) and 90°–98.

श्रीराम.

37

(l. 10) Note hiatus between the two halves. —(l. 22) K (ed.) चोष्णं (for सोष्णं).

38

(l. 1) D₈ G₁.₂ M₃ महौजसा (for महात्मना). —For l. 1–2, Ñ V₁.₂ B₂–₄ D₄.₁₃ subst.; while D₆ T₂.₃ subst. only l. 2 for l. 2:

1* अथ सर्वमिदं ज्ञात्वा रावणो लोकरावणः ।
उद्विग्नमानसो राजा सचिवानिदमब्रवीत् ।

[(l. 2) D₆ T₂.₃ समुद्विग्नमना (for उद्विग्नमानसो).]

—(l. 3) Ñ V₁.₂ B₂–₄ D₄.₁₃ समर- (for परम-). Ñ₁ D₃.₇.₉–₁₁ सर्व- (for धन्वी). —(l. 4) D₁₀ अतिकंपनः (hypm.). —T₁ damaged from स्तथैव च up to l. 8. T₂.₃ (with hiatus) अतिकायो महोदरः (for the post. half). Ñ V₁.₂ B₂–₄ D₄.₁₃ अकंपनो वज्रदंष्ट्रः प्रहस्तश्च महाबलः. —After l. 4, Ñ V₁.₂ B₂.₄ D₁₃ ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च ।
एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः । [5]
जेतारः परसैन्यानां परैर्नित्यापराजिताः ।
ससैन्यास्ते हता वीरा रामेणाक्लिष्टकर्मणा ।
राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः ।
अन्ये च बहवः शूरा महात्मानो निपातिताः ।
प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम । [10]
यौ हि तौ भ्रातरौ वीरौ बद्धौ दत्तवरैः शरैः ।
यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः ।
मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वकिंनरैः ।
तन्न जाने प्रभावैर्वा मायया मोहनेन वा ।
शरबन्धाद्विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ । [15]

ये योधा निर्गताः शूरा राक्षसा मम शासनात् ।
ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ।
तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम् ।
नाशयेत्सबलं वीरं ससुग्रीवं विभीषणम् ।
अहो सुबलवान्रामो महदस्त्रबलं च वै । [20]
यस्य विक्रममासाद्य राक्षसा निधनं गताः ।
तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा ।
अप्रमत्तैश्च सर्वत्र गुल्मै रक्ष्या पुरी त्वियम् ।
अशोकवनिकायां च यत्र सीताभिरक्ष्यते ।
निष्क्रमो वा प्रवेशो वा ज्ञातव्यः सर्वदैव नः । [25]
यत्र यत्र भवेद्गुल्मस्तत्र तत्र पुनः पुनः ।
सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः ।

2* कुम्भकर्णश्च दुर्धर्षो देवान्तकनरान्तकौ ।
त्रिशिराश्चातिकायश्च महापार्श्वमहोदरौ ।

[(l. 1) B4 सु- (for च).]

—(l. 5) G1 सर्वे महा- (for महाबला). Ñ V1.2 B2–4 D13 शूरा (for वीरा). Ñ1 -शंसिनः; V1.2 B4 D13 -शालिनः; B3 -दुर्मदाः (for -काङ्क्षिणः). D4 शूरा वै राक्षसा युद्धे नानायुधैश्च शालिनः. —(l. 6) Ñ V1.2 B2.4 D4.13 सुर- (for पर-). Ñ2 B2 परैर्नैव; D13 सुरैरपि (for परैर्नित्य-). Ñ2 B2 पराजिताः. —(l. 7) M5 ससैन्याश्च. M1.2 महावीरा; M5 महावीर्या (for हता वीरा). D5.7 G2.3 M3 निहतास्ते महावीर्या (D5 °रा; G2 °काया) (for the prior half). Ñ V1.2 B2–4 D4.13 सह वानरैः; D6 T2.3 किल संयुगे (for [अ]क्लिष्टकर्मणा). —(l. 8) B2 D4 च (for सु-). G3 -वीर्या (for -काया). D4.9.11 नानाशास्त्र-. V1 -भृतां वराः (for -विशारदाः). —Ñ V1.2 B2–4 D4.13 om. l. 9. —(l. 9) M5 [s]भिपातिताः (for निपातिताः). —(l. 10) D13 प्रख्याता. Ñ1 समं; M5 युधि (for मम). —(l. 11) Ñ2 V1.2 B2 T3 यौ हतौ; B3 D13 मोहितौ; B4 D6 यौ च तौ; D4 यावेतौ; T2 G2.3 येन तौ. Ñ V1.2 B2–4 युद्धे (for वीरौ). D3.9–11 Cr.t तौ भ्रातरौ तदा बद्धौ; G1 यौ तौ हि भ्रातरौ बद्धौ (for the prior half). D3.9–11 G1 घोरैर्; Cm.g as above (for बद्धौ). —(l. 12) D13 च (for वा). —M5 om. (hapl.) l. 13–17. —(l. 13) Ñ V1.2 B2–4 D4.13 हि (for तद्). T2 Cr घोरैर्; Cm.g as above (for घोरं). V1 D3.9–11 T2.3 -पन्नगैः; G1 M1 -गुह्यकैः (for -किंनरैः). D6 (erroneously) विमुक्तौ रामलक्ष्मणौ; D7 सर्वैः समुदितैरपि (for the post. half). —(l. 14) D13 तत्र ज्ञान- (for तन्न जाने). Ñ V1.2 B2–4 D4.13 प्रभावेन (for प्रभावैर्वा). Ñ1 V1.2 B4 D4.13 मोहनादपि; Ñ2 B2 °नाद्धि वा; B3 °हितावपि (for मोहनेन वा). —(l. 15) G1 -बंध-; Cr.m.g as above (for -बन्धाद्). Ñ V1.2 B2.3 D4 विनिर्मुक्तौ; B4 विमुक्तौ तु. —(l. 16) Ñ1 येत्र; Ñ2 V1 B2–4 D4.13 ये च; V2 यत्र; T2.3 चापि; M1.2 ये वि- (for योधा). G3 वीरा (for शूरा). —D4 om. (hapl.) from the post. half up to the prior half of l. 21. D5.7 T1 G2 transp. निर्गताः and राक्षसा. T2.3 भीमविक्रमाः (for मम शासनात्). —(l. 17) D5 om. निहता युद्धे. —(l. 18) D13 न तं (by transp.). D6 बुद्धया (for युद्धे). D13 transp. योऽद्य and रामं. —(l. 19) D5.7 T1 G M शासयेत् (for नाशयेत्). D13 सुग्रीवं च. Ñ V1.2 B2.4 D13 समारुतिं (for विभीषणम्). —(l. 20) T3 असौ (for अहो). D5.7 नु; T3 च (for सु-). G2 वीरो (for रामो). Ñ V1.2 B4 D13 तथा; B2 तदा (for च वै). —(l. 21) B2 तत्पराक्रमम् (for यस्य विक्रमम्). —After l. 21, D3.6.7.9 G2.3 M3 ins.:

3* तं मन्ये राघवं वीरं नारायणमनामयम् ।

—B2.3 D10.11 om. l. 22. —(l. 22) D3.7.9 M2.5 यद्-; (for तद्-). Ñ V1.2 B4 D4.13 तस्मादियं (D4 °देषा); G2 तद्लाद्धि (for तद्भयाद्धि). Ñ V1.2 B4 D4.7.13 G2.3 -गोपुरा (for -तोरणा). —After l. 22, Ñ V1.2 B4 D4.13 ins.:

4* अप्रमत्तैस्त्वरावद्भिः क्रियतां मम शासनात् ।
सज्जयन्त्रायुधोपेतैः कल्पितैश्च गजोत्तमैः ।

[(l. 1) D4 च रक्षोभिः (for त्वरावद्भिः). —(l. 2) D4 सज्जमानैर्युधोपेतैः (metri causa) (for the prior half). D4 कल्पिताम्-; D13 कल्पिताश्च- (for कल्पितैश्च). D4 -शरोत्तमैः.]

—(l. 23) Ñ V1 B2.3 D4.13 हि (for च). D5.7 T1 G2.3 युष्माभिर् (for सर्वत्र). Ñ2 B2 रक्षणीया; M3 गुप्तै रक्ष्या (for गुल्मै रक्ष्या). ❀ Cg: गुप्तैः स्वयं कृतरक्षणैः । गुल्मैरिति वा पाठः. ❀ —(l. 24) V1 D4.6 M5 -वनिकायाश्च (V1 °यास्तु; D6 यां तु); D10.11 M1.2 -वनिका चैव (M1.2 चेयं) (for -वनिकायां च). D13 -वीक्ष्यते (for -रक्ष्यते). —(l. 25) Ñ1 D13 निकाशो; Ñ2 V1.2 B2.4 D4 निष्काशो; B3 प्रकाशो; D3.11 G2 M1.2.5 Cm.g.t निष्क्रामो; T2.3 निर्गमो; Ck as above (for निष्क्रमो). Ñ V1.2 B2–4 D13 प्र(B3 [अ]प्र)काशो (for प्रवेशो). Ñ V1.2 B2.4 D4 तत्र सर्वथा (D4 °दा); B3 तैश्च सर्वदा; D13 तत्र तत्र च; G1.2 M सर्वथैव नः (for सर्वदैव नः). ❀ Cm.g: नः अस्माभिः ज्ञातव्यः (Cm ज्ञातव्य इत्यर्थः). ❀ —T2 om. (hapl.?) l. 26. —(l. 26) D6 गुल्मं; D13 बालस् (for गुल्मस्). B3 भवेत् (for first पुनः). —(l. 27) G1 तत्र तत्र च (for सर्वतश्चापि). Ñ V1.2 B2–4 D4.13 भ्रमितव्यं च; D6 चापि तिष्ठंतु; T2.3 चापि रक्षध्वं (for चापि तिष्ठध्वं). D3.7.9–11 सैन्यैः (for स्वैः स्वैः). Ñ V1.2 B2–4 D4 परिवृतैर्; D13 तैः संवृतैर्. —(l. 28) D13 विष्टभ्य (for द्रष्टव्यं).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

द्रष्टव्यं च पदं तेषां वानराणां निशाचराः।
प्रदोषे वार्धरात्रे वा प्रत्यूषे वापि सर्वशः।
नावज्ञा तत्र कर्तव्या वानरेषु कदाचन। [30]
द्विषतां बलमुद्युक्तमापतत्किं स्थितं यथा।
ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत्।
वचनं सर्वमातिष्ठन्यथावत्तु महाबलाः।
तान्सर्वान्स समादिश्य रावणो राक्षसाधिपः।
मन्युशल्यं वहन्दीनः प्रविवेश स्वमालयम्। [35]
ततः स संदीपितकोपवह्नि-
निशाचराणामधिपो महाबलः
तदेव पुत्रव्यसनं विचिन्तय-
न्मुहुर्मुहुश्चैव तदा विनिश्वसन्।
Colophon

39

After 1342*, D1.5–7.9–11 S cont.; while Ś Ñ V B (B1 after 38^{ab} owing to om.) D2–4.8.12.13 ins. l. 1–42 after 6.83.39:

ततस्ते वानरा घोरा राक्षसांस्तांस्त्रणाजिरे।
जघ्नुः शैलैर्द्रुमैश्चैव रावणस्यैव पश्यतः।
रावणिस्तु ततः क्रुद्धस्तान्निरीक्ष्य निशाचरान्।

D7 T2.3 G1.2 M5 बलं; Cg.k.t as above (for पदं). V1.2 महाबलाः; B4 तरस्विनां; D6 M1.2 महात्मनां (for निशाचराः). —(l. 29) Ñ2 B2–4 D4.13 च (for first वा). D13 च (for second वा). Ñ1 B3.4 प्रत्यूषस्य; V1 B2 D4 °षे च; G2 प्रभाते वा (for प्रत्यूषे वा). V2 B2 D4.5.7 T1 G2.3 सर्वतः; M3 सर्वथा (for सर्वशः). D3 सर्वशस्त्रभृतां वराः; D13 यथा पश्यामि सर्वशः (for the post. half). —M3 reads l. 30 twice. —(l. 30) Ñ1 D4.13 खलु; Ñ2 V1 B2–4 [अ]भ्यनु-; D5.7 T1 G2.3 तेषु (for तत्र). Ñ V1.2 B2–4 D4.13 पुरुषेण (for वानरेषु). —M1.2 om. l. 31. —(l. 31) D3.6.9 T2 G1 M5 आपतंतं; G2 आपतत्सु-; Cr.m.g.t as above (for आपतत्कि). D6 T2.3 M3.5 तदा; D7 सदा (for यथा). ❀ Cg: आपतन्तम्। लिङ्गादिव्यत्यय आर्षः। आपतत्किमिति सदा द्रष्टव्यमित्यर्थः। आपतत्किमिति पाठः सुशोभनः।; so also Ct. ❀ —For l. 31, Ñ V1.2 B2–4 D4.13 subst.:

5* द्विषामपि बले न्यूने किमुताग्रे बले स्थिते।

[D4 रिपौ कर्म- (for द्विषामपि). B2.3 [अ]ग्रये; B4 [अ]ग्र- (for [अ]ग्रे). D4 किं वा सौम्ये बलेपि वा (for the post. half).]

—Then, D4 cont.:

6* अवज्ञा न तु कर्तव्या सर्वदा शास्त्रदर्शिना।

—(l. 32) Ñ V1.2 B2–4 D4.13 T2.3 सचिवाः (for राक्षसाः). V1 च; D5 T1 तु (for तत्). D4 -प्रभोर्वचः (for -[अ]धिपस्य तत्). —(l. 33) Ñ2 B2–4 D13 ते; M1.2 च (for तु). G3 यथा वक्तुं (for यथावत्तु). D4 तथैव कृतवंतस्ते सचिवा रावणेरिताः. ❀ Cv.r.: "यथा वक्तुं महाबलाः" इति (Cr. °बलीति) पाठः। Cv adds अन्यथा ते इति पुनरुक्तिः स्यात्. ❀ —(l. 34) D3 om. (hapl.); D9–11 हि (for स). Ñ V1.2 B2–4 D4.13 तांस्तु सर्वान्; D5 T1 M3 स तान्सर्वान् (by transp.); G3 स तान्प्रति (for तान्सर्वान्स). V2 राक्षसान् (for रावणो). —(l. 35) D7 G2 दीनं (for दीनः). Ñ1 महालयं; D7 G2 निवेशनं (for स्वमालयम्). ❀ Ck.t: मन्युशल्यं मन्युरूपं शल्यम्. ❀ —(l. 36) B2 T2 M1.2 सु- (for स). Ñ V1.2 B2.4 प्रदीप्तासपशोक- (for स संदीपित-कोप-). D4 ततः प्रदीप्तः समकोपवह्निना. —(l. 37) D7 G2 भृशार्तः; D13 तदानीं (for महाबल.). —(l. 38) Ñ V1.2 B2.3 D13 भ्रातृ-; B4 D4 बंधु- (for पुत्र-). Ñ1 D9 व्यचिंतयन्; D4 विचिंत्य; G1 विमृश्य (for विचिन्तयन्). —(l. 39) D5 मृदुश् (for मुहुश्). Ñ V1.2 निरश्वसत्तदा; B2 विनिःश्वसन्तदा; B3 व्यनिःश्वसत्तदा; B4 D4.13 विनिश्वसन्तदा (by transp.); D5 T G3 तदा व्यनि(D5 °निः)श्वसत्; D6 तदा विनिःश्वसन्. D7 G2 मुहुर्मुहुर्निःश्वसति स्म दीर्घं (D7 घर्मं).

Colophon.—*Kāṇḍa name*: Ñ B2–4 D4.13 लंकाकांडे. —*Sarga name*: Ñ1 V1°B3 D3 रावणपरिवेदनं (Ñ1 V1 °दितं); Ñ2 V2 B2.4 D4.13 रावणपरिदेवनं (B4 D4.13 °वितं); D9 लंका-सावधानो रावणविलापः. —*Sarga no.* (figures, words or both): Ñ1 B2.4 D4.13 om.; Ñ2 55; V1 D3 54; V2 53; B3 48; D5–7.10.11 T1 G M3.5 72; D9 49; T2 77; T3 79; M1.2 73. —After colophon, G M1.2 conclude with श्रीरामाय नमः; M5 with श्रीरामस्वामिने नमः.

39

D1.6 T2.3 repeat l. 1–42 after 6.83.39. —(l. 1) D13 राक्षसानां (for °सांस्तान्). D1.5–7.9–11 S (D1.6 T2.3 first time) तोमरैरंकुशैश्चापि वानराजघ्नुराहवे (D1 °राणां जिघांसया). —V3 D1.5–7.9–11 S (D1.6 T2.3 first time) om. l. 2. —(l. 2) Ñ V1.2 B2–4 तलैर्; D1 (second time) शरैर् (for शैलैर्). D4 नर्दमाना (for द्रुमैश्चैव). Ñ V1.2 B2–4 D4 प्रपश्यतः (for [ए]व पश्यतः). D13 रामरावणसंयुगे (for the post. half). —(l. 3) Ś Ñ V B D2–4.6.8.12.13 T2.3 (D6 T2.3 second time) रावणस् (for रावणिस्). D4 च (for तु). D5 T1 G2.3 Cv r स रावणिस; Cg as above (for रावणिस्तु). D4.10.11 G1 सुसंक्रुद्धस (for ततः क्रुद्धस). D1 (second time) ततः स रावणः क्रुद्धस; D9 रावणस्तूर्यसंक्रुद्धस (for the prior half). Ś D8 आह स्म; Ñ V1.2 B2–4 शशास; V3 जगाद; D1 (second time) आह च; D2.3.6 (second time).12 आह स; D5.7 T1 G2.3 Ct समीक्ष्य; D6 T2.3 (all first time) M1.2 उवाच; T2.3 (both second time) आह स्व- (for निरीक्ष्य). D13 आदिदेश (for तान्निरीक्ष्य). B1 तानाह स च राक्षसान् (for the post. half). —(l. 4) D4.5 दृष्ट्वा (for हृष्टा). Ś D8.12.13 युध्यध्वं (for युध्यन्तु). D1 (first time) प्रहृष्टेभवदत्यर्थं; D9 हृष्टा भवंतु ते सर्वे (for the prior half). —V3 damaged from जिघांसया up to l. 5. D1

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया ।
ततस्ते राक्षसाः सर्वे नर्दन्तो जयकाङ्क्षिणः । [5]
अभ्यवर्षंस्ततो घोरान्वानराञ्शरवृष्टिभिः ।
स तु नालीकनाराचैर्गदाभिर्मुसलैरपि ।
रक्षोभिः संवृतः संख्ये वानरान्विचकर्ष ह ।
ते वध्यमानाः समरे वानराः पादपायुधाः ।
अभ्यद्रवन्त सहसा रावणिं घोरदर्शनम् । [10]

इन्द्रजित्तु ततः क्रुद्धो महातेजा महाबलः ।
वानराणां शरीराणि व्यधमद्रावणात्मजः ।
शरेणैकेन च हरीन्नव पञ्च च सप्त च ।
बिभेद समरे क्रुद्धो राक्षसान्संप्रहर्षयन् ।
स शरैः सूर्यसंकाशैः शातकुम्भविभूषितैः । [15]
वानरान्समरे वीरः प्रममाथ सुदुर्जयः ।
ते भिन्नगात्राः समरे वानराः शरपीडिताः ।

(first time) वानराञ्जघ्नुराहवे (for the post. half). —(l. 5) M1.2 तथोक्ता (for ततस्ते). Ś Ñ1 V2 B4 D1(both times).2–4.8.12.13 G2 M5 नदंतो; D7.9–11 गर्जंतो (for नर्दन्तो). Ñ1 V2 D1(first time).13 युद्ध- (for जय-). —(l. 6) D5.13 तदा (for ततो). Ś D6.8.12 T2.3 (D6 T2.3 first time) G2 M1.2 घोरा; D5 T1 G1.3 M5 घोरं (for घोरान्). Ñ V B D1–3.6 T2.3 (D1 both times, D6 T2.3 second time) अभ्यवर्ष(D3 °र्तं)त तान्सर्वान् (B1 D1–3 T2.3 °न्घोरान्); D4 अभ्यघ्नंस्तान्ततो घोरान् (for the prior half). ❀ Cv.g: ततः, तस्मात् रावणिवचनात् । द्वितीयस्ततःशब्दः पश्चादर्थः. ❀ —After l. 6, Ś2 Ñ V (V3 l. 1 only) B D1–4.6.8.12.13 T2.3 (D1.6 T2.3 second time) ins.; while Ś1 ins. l. 1 only after l. 12:

1* मुद्गरैः शक्तिभिः शूलैर्गदामुसलतोमरैः ।
परिघैरङ्कुशैर्बाणैर्वानराञ्जघ्नुराहवे ।

[Ś2 D8.12 repeat l. 1 after l. 12. —(l. 1) D3 om. (hapl.?) from शूलै up to विकर्णिभिः (see var.) in l. 8. D2 -परिघ- (for -मुसल-). —(l. 2) Ś1 घोरं; D1.8.12 घोरैर् (for बाणैर्). D13 शातकुंभनिषेवितैः (for the post. half).]

—V3 om. l. 7. —(l. 7) M1.2 च (for तु). Ś Ñ V1.2 B D1.2.4.6.8.12 T2.3 (D1.6 T2.3 second time) रावणश्चापि; D13 रक्षसां चापि (for स तु नालीक-). M5 स तु नानाविधैरस्त्रैर् (for the prior half). Ś Ñ V1.2 B D1.2.4.6.8.12.13 T2.3 (D1.6 T2.3 second time) वत्सदंतैरयो(V1 B1–3 °जा)मुखैः (for the post. half). —B2 om. l. 8. —(l. 8) Ś D8.12 कर्णिभिश्चायसैश्चैव; Ñ V B1.4 D1–4.6 T2.3 (D1.6 T2.3 second time) विकर्णिभिः (D3 om.; D4 °कीर्णैश्च) क्षुरप्रै(D2 °प्रै)श्च (B1 सुरश्रेष्ठ); B3 कर्णिभिश्च क्षुराग्रैश्च (for the prior half). —V3 damaged from विचकर्ष up to first पा in l. 9. Ś B1 D1–4.6.8.12 T2.3 (D1.6 T2.3 second time) अभ्यवर्ष(D3 °र्तं)त; Ñ V1.2 B3.4 पर्यवर्षत; D5 G2 M3 Cg विचकर्त ह (G2 च); D6 T2.3 (all first time) निजघान ह; D13 अभ्यपातयत्; M5 विजघान ह (for विचकर्ष ह). M1.2 वानरेषु ववर्ष ह (for the post. half). ❀ Cr.m: रक्षोभिः सहित (Cr °भिः सह) इति वा पाठः. ❀ —(l. 9) B3 युध्यमानाः (for वध्यमानाः). G3 मेघसंनिभाः (for पादपायुधाः). —(l. 10) Ś D1–3.6.8.12 T2.3 (D1.6 T2.3 second time) अभ्यद्रवन्वै; V2 अभिद्रवंति; D7.10.11 G2 M1.2 Ct अभ्यवर्ष(D7 G2 °र्तं)त; T1 अभिद्रवंत; G (ed.) °धावंत (for अभ्यद्रवन्त). Ś1 दृष्ट्वा तं; Ñ V1.2 B D1–4.6.7.9 T2.3 G1.2 M3 (D1 T2.3 second time; D6 both times) सहिता; V3 समरे; D13 सर्वे हि (for सहसा). Ś Ñ V B D1–4.6.8.12.13 T2.3 (D1.6 T2.3 second time) रावणं; Cg as above (for रावणिं). Ñ V B2–4 D1.6.13 T2.3 G1 M5 (D1.6 T2.3 first time) घोर(D1.6 T2.3 G1 M5 भीम)विक्रमं(Ñ1 D1 G1 M5 °माः); D5.7 T1 G2.3 M3 रणकर्कशं; D9 पादपायुधाः; D10.11 M1.2 शैलपादपैः (for घोरदर्शनम्). —(l. 11) Ś Ñ V B D1–4.6.8.12.13 T2.3 (D1.6 T2.3 second time) रावणस् (for इन्द्रजित्). D9–12 तदा; G3 महा- (for ततः). Ś Ñ V B D1–4.6.8.12.13 T2.3 (D1.6 T2.3 second time) महाबलपराक्रमः (for the post. half). —(l. 12) Ñ2 B3.4 D13 सहस्राणि (for शरीराणि). Ś2 विव्याध (for व्यधमद्). Ś Ñ V B D1–4.6.8.12.13 T2.3 (D1.6 T2.3 second time) शरवृष्टिभिः (for रावणात्मजः). —D6 T2.3 (all second time) om. l. 13–18. —(l. 13) V3 damaged from णै up to पञ्च च. Ñ V1.2 B2–4 D1(first time).4 M1.2 स (M1.2 तु) हरीन्; D13 प्रहसन् (for च हरीन्). Ñ1 सप्तधा; B3 सप्ततः (for सप्त च). Ś B1 D1(second time).3.8.12 transp. पञ्च and सप्त. D1 (first time) नवभिः पंचभिस्त्रिभिः; D13 हरीन्षट् सप्त पंच च (for the post. half). —(l. 14) D13 विव्याध; M3 चिच्छेद (for बिभेद). Ś Ñ V B D1(second time).2–4.8.12 वीरो; D13 वेगाद् (for क्रुद्धो). D1 (first time) निर्बिभेद स संक्रुद्धो (for the prior half). —V3 om. l. 15–16. —(l. 15) B1 D1(second time).2–4 तैः शरैर्; B4 स बाणैर्; D13 शरौघैर् (for स शरैः). Ś Ñ V1.2 B1.3.4 D1(second time).2–4.8.12.13 अग्नि-; B2 रक्त- (for सूर्य-). Ś D2.8.12 शातकौंभ-. Ś V1 B2 D1(first time).5.7–12 -विभूषणैः; V2 -परिष्कृतैः; D13 -निषेवितैः (for -विभूषितैः). —(l. 16) D1(second time).2 भीमः (for वीरः). Ñ1 V2 D13 सुदुर्जयान्; D1 (first time) G1 स दुर्जयः. —(l. 17) B3 भिन्नगात्राश्च; D1 (first time) भिन्नास्थिगात्राः; G2 ते भग्नगात्राः (for ते भिन्नगात्राः). G2 चापि; M5 शल्य- (for शर-). —(l. 18) D1 (second time) व्यथित-; D5 T1 G2 प्रभि(T1 °छि)न्न-; Cm.g.k.t as above (for मथित-). Ś Ñ V B D1(second time).2–4.8.12.13 -सर्वांगाः (for -संकल्पाः). Ś D8.12 देवैर्; D5 T1 सुरा (for सुरैर्). Ś D8 इह (for इव). D5 T1 महासुरैः. —V3 om. l. 19–28. —(l. 19) D1.5.6.9.11 T3 (D1.6 T3 first time) तं (D11 ते) पतंतम्; D7 प्रपतंतम्; D10 T2 (first time) ते तपंतम्; G2 प्रदहंतम्. D5 महा- (for इव). Ś B3 D8.12.13 शतपत्रैर्यथादित्यो; Ñ V1.2 B1.2.4 D1–4.6 T2.3

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पेतुर्मथितसंकल्पाः सुरैरिव महासुराः ।
तं तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः ।
अभ्यधावन्त संक्रुद्धाः संयुगे वानरर्षभाः । [20]
ततस्ते वानराः सर्वे भिन्नदेहा विचेतसः ।
व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः ।
रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः ।
नर्दन्तस्ते निवृत्तास्तु समरे सशिलायुधाः ।
ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः । [25]

अभ्यवर्षन्त समरे रावणिं पर्यवस्थिताः ।
तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ।
व्यपोहत महातेजा रावणिः समितिंजयः ।
ततः पावकसंकाशैः शरैराशीविषोपमैः ।
वानराणामनीकानि विभेद समरे प्रभुः । [30]
अष्टादशशरैस्तीक्ष्णैः स विद्धा गन्धमादनम् ।
विव्याध नवभिश्चैव नलं दूरादवस्थितम् ।
सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः ।

(D1.6 T2.3 second time) स(Ñ2 B1.4 D3 सं-; T2.3 प्र-) तपन्वै (D2.4 आतपते; D6 गगने वै) यथादित्यो (for the prior half). D6 (first time) बाणैर्. B3 -पतत्रिभिः (for -गभस्तिभिः). —(l. 20) Ś Ñ V1.2 B D1-4.6.8.12.13 T2.3 G (ed.) (D1.6 T2.3 second time) अभ्यधावत्सु(V1 °व*; D1.12 °वत्स; G [ed.]°वत)संक्रुद्धः (for the prior half). Ñ2 D6(second time).7 T2.3 (both both times) G1 समरे; D13 स घोरो (for संयुगे). Ś Ñ V1.2 B D1-4.6.8.12.13 T2.3 (D1.6 T2.3 second time) वानरर्षभान्. —(l. 21) Ñ V1.2 B2-4 D1.6.9-11 T2.3(D1 T2.3 first time; D6 both times) G1.3 M3.5 तु (for ते). T2(second time) छिन्नदेहा. —(l. 22) G3 रोदिता (for व्यथिता). Ś D8.12 प्र- (for वि-). Ñ2 V1 B2.4 G3 समुत्थिताः (for समुक्षिताः). —(l. 23) Ś Ñ V1.2 B D1-4.6.8.12.13 T2.3 (D1.6 T2.3 second time) पराक्रांता; D5 T1 G2 तु ये वीरा (for पराक्रम्य). —(l. 24) G1 M3 [s]भि- (for नि-). Ś Ñ2 B1.4 D1-3.6.8.12 T2.3 (D1.6 T2.3 second time) नर्दंतश्च नि(Ś D8.12 °श्चानि)वृत्ता-(B1 विवृद्धा)स्ते (Ñ2 B4 °श्च); Ñ1 V1.2 B2 नर्दं(B2 °दं)तस्ते वि(V2 नि)वृत्ताश्च(B2 °स्याः); B3 D13 नर्दंतो(D13 बहवो) विनिवृत्ताश्च; D4 नर्दंतो न निवृत्तास्ते; D5 T1 G2.3 नर्दं(G2 °दं)तस्ते-भिवर्तंते; D6 T2(both first time) नर्दंतो भीम(D6 °तोभिप्र)-वृत्तास्तु; T3(first time) नर्दंतो विनिकृत्तास्तु; M5 नर्दंतस्ते प्रमत्तास्तु (for the prior half). Ś D8.12 च; D2 तं; D6 (second time) [s]द्रि- (for स-). B1.3 T3(second time) समरेषु(T3 °द्य); T2 (second time) रणे द्रुम- (for समरे स-). T2(first time) निशित-; G2 सनग-; Ck.t as above (for सशिला-). —(l. 25) D3 तैर्; G2 तं (for ते). D2 पर्वतैश्चैव (for पर्वताग्रैश्च). Ś Ñ V1.2 B D1-4.6.8.12.13 T2.3 M1.2(D1 both times; D6 T2.3 second time) मुष्टिभिश्च(D1[second time].4 °स्ते); M5 शिलाहस्ताः (for शिलाभिश्च). G2 वलीमुखाः (for प्लवंगमाः). —G1 reads l. 26 twice. —(l. 26) Ñ V1.2 B D2-4.8.13 G1(both times).2 M1.2 अभ्यद्रवं(D3.8 G1.2 M1.2 °वन्)त; D6 T2.3(all second time) अभ्यर्दयंतः (for °वर्षन्त). Ś Ñ V1.2 B D1-4.6.8.12.13 T2.3 (D1.6 T2.3 second time) रावणं; Cm as above (for रावणिं). Ś Ñ1 V1.2 B1-3 D2.3.8.12 M5 पर्यवस्थितं; Ñ2 B4 D7.9-11 समवस्थिताः(Ñ2 B4 °तं); D1(first time) समुप° (for पर्यवस्थिताः). —Ś D1(second time).8.12 om. l. 27-28. —(l. 27) Ñ V1.2 B2.4 G2 तद्; D2.4.13 G1 ते; T2.3(both second time) स (for तं). B1 D6(second time) M5 द्रुमाणां च(B1 तु). T3(first time) शराणां (for शिलानां). B3 ततो द्रुमाणां शैलानां; D1 (first time) तं शिलानां द्रुमाणां च (for the prior half). D4 वर्षं (for वर्षं). D1 (first time) G2 M1.2.5 प्र(M1.2 प्रा)हरणं(G2 M5 °तां); D4 प्राणहरे (for °हरं). D2-4 तदा (for महत्). —(l. 28) D1 (first time) व्यपोथयत्; D2.3 व्यपोह्य तु(D3 सु-); D5.9.10 T1.2(first time) व्यापोहत; Cm.g.t as above (for व्यपोहत). B2 महाबाहू (for °तेजा). Ñ V1.2 B D2-4.6.13 T2.3 (D6 T2.3 second time) रावणः(D4 °णं). Ñ V1.2 B D2-4.6.13 T2.3 (D6 T2.3 second time) पर्यवस्थितः(D4 °तं) (for समितिंजयः). —(l. 29) D9 पादप-; G2 पर्वत- (for पावक-). Ñ V B D1-4.6.13 T2.3(D1.6 T2.3 second time) बाणैर् (for शरैर्). —(l. 30) Ś2 G3 अनेकानि. D1(first time).4 विभुः (for प्रभुः). —(l. 31) Ś Ñ V B D1-4.6.8.12 T2.3 (D1.6 T2.3 second time) अष्ट(Ñ V2.3 D2.4.12 °ष्टा; B3 [before corr. *sup. lin.* as in Ś] इषु)भिर्दशभिश्चैव; D13 अष्टाभिश्चैव विव्याध (for the prior half). D13 om.; M5 स भित्त्वा (for स विद्धा). —(l. 32) Ś B1 D1-3.6.8.12 T2.3 (D1 T3 second time; D6 T2 both times) दशभिश् (for नवभिश्). D4 संख्ये (for चैव). Ñ V B2-4 विव्याधाथ(Ñ2 V2 °ध च) नवत्या वै(V1.3 च) (for the prior half). Ś B1.2 D1(second time).2.3.8 नीलं; V2 नूनं (for नलं). —(l. 33) Ñ V B2-4 सप्तत्या (for सप्तभिस्). Ś B1 D1.2.4.6(both times).8.12.13 T2.3 (D1 T2.3 second time) च (for तु). Ś B1 D1(second time).2.3.8.12.13 महाकायं (D12 °यो); Ñ V B2-4 °घोरैर्(V3 °रं); D1(first time) °वेगैर्; D6 T(D6 both times; T2.3 first time) °वीर्यं; M5 °वीरो (for महावीर्यो). Ś V2 B1 D1-3.6.8.12.13 T3(D1.6 T3 second time) भित्त्वा; Ñ V1.3 B2-4 D4 विद्धा; T2 (second time) हत्वा (for मर्म-). Ś Ñ V B D1(second time).2.3.8.12.13 सुदारुणैः(Ñ1 °णः; V1 B2.4 °णं); D4.6 T2.3 (D6 T2.3 second time) शिलीमुखैः (for -विदारणैः). D6 T2.3 (all first time) मैंदं मर्मण्यताडयत् (for the post. half). —(l. 34) G3 द्वादशैर् (for पञ्चभिर्). D1-3.6 T2 (D1.6 T2 second time) निशितैश् (for विशिखैश्). D1 T3 (both first time) M1.2 [अ]पि; D6(first time) [अ]त्र; T2(first time) [अ]थ (for [ए]व). Ñ V B2.4 पश्चात्शतेन

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पञ्चभिर्विंशिखैश्चैव गजं विव्याध संयुगे ।
विंशत्या च हनूमन्तं नलं च दशभिः शरैः । [35]
गवाक्षं पञ्चविंशत्या शक्रजानुं शतेन च ।
द्विविदं षड्भिराहत्य पनसं दशभिः शरैः ।
कुमुदं पञ्चदशभिर्जाम्बवन्तं च सप्तभिः ।
तारं चैव त्रिभिर्बाणैर्विनतं चाष्टभिस्तथा ।
अशीत्या वालिनः पुत्रमङ्गदं त्रिभिदे शरैः । [40]
शरभं च महातेजाः शरेणोरस्यताडयत् ।
ऋषभं च त्रिभिर्बाणैर्ललाटे प्रत्यविध्यत ।
जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च ।
सुग्रीवसृषभं चैव सोऽङ्गदं द्विविदं तथा ।
घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा । [45]
अन्यानपि तदा मुख्यान्वानरान्बहुभिः शरैः ।
अर्दयामास संक्रुद्धः कालाग्निरिव मूर्छितः ।
स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः ।
वानराणामनीकानि निर्ममन्थ महारणे ।
आकुलां वानरीं सेनां शरजालेन मोहिताम् । [50]

हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् ।
पुनरेव महातेजा राक्षसेन्द्रात्मजो बली ।
संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम् ।
ममर्द वानरानीकमिन्द्रजित्त्वरितो बली ।

40

After 6.61.59, D6 T2.3 ins.:

ततश्चिन्तां सुमहतीं जगाम पवनात्मजः ।
वृथागमनमित्येव तत्रौषध्योऽप्यचिन्वत ।
प्रकृश्याहं वृथा शैलमागतोऽस्मीत्यचिन्तयत् ।
हा कष्टमिति निश्वस्य ततश्चिन्तामगात्कपिः ।
नायं द्रोणगिरिर्मन्ये याश्चात्र न महौषधीः । [5]
विपुलश्चैव संजातो महानद्य परिश्रमः ।
पुनः संचिन्त्य हनुमान्बुद्धिमान्मारुतात्मजः ।
नीतिशास्त्रार्थविद्वाग्मी कार्यकारणवित्प्रभुः ।
एनं पर्वतराजानं साम्नैव प्रतिसान्त्वये ।
कर्तुमर्हाम्यशेषेण कार्यं यदिह साम्प्रतम् । [10]

राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत् । [5]
सोऽतिविद्धो बलवता शत्रुणा शत्रुघातिना ।
असक्तं प्रेषयामास लक्ष्मणाय बहूञ्शरान् ।
तानप्राप्ताञ्शितैर्बाणैश्चिच्छेद रघुनन्दनः ।
सारथेरस्य च रणे रथिनो रथिसत्तमः ।
शिरो जहार धर्मात्मा भल्लेनानतपर्वणा । [10]

मंडलधनुर्वीरो (for the prior half). —For l. 25, Ñ V1.3 B2–3 D4 subst.:

4* हरीञ्जघान संक्रुद्धः परस्परजयैषिणः ।

[B3 -वधैषिणः; D4 -जयैषिणं (for -जयैषिणः).]

—(l. 26) V3 damaged for माना हरयो. B3 भृश- (for भीम-). V3 -वि ** (damaged); B3 -विक्षताः; D6.10.11 M1.2 -विक्रमैः (for -विक्रमाः). —V3 om. l. 27. —(l. 27) D4 सौमित्रेः (for सौमित्रिं). Ñ V1 B2–4 D4 जगमुः (for प्राप्ताः). D4.9 [अ]मराः (for प्रजाः). —(l. 28) Ñ V1.3 B2–4 D4 परम- (for समर-). Ñ V1.3 B2–4 D4 कु(B2 कं)पितो (for ज्वलितो). —B3 om. l. 29. —(l. 29) D4 om. (hapl.) from the post. half up to the prior half of 5*. Ñ2 हस्त- (for पाणि-). —(l. 30) Ñ V1.3 B2–4 D6.7.9–11 G1 सज्जं (for सज्यं). B2.3 त्वरान्वितः; D9 M5 इसन्निव (for त्वरन्निव). ❀ Cm.t त्वरन्निव शीघ्रमेव।; Cg : त्वरन्निवेति । इवशब्दो वाक्यालंकारे. ❀ —V3 om. l. 31–32. —(l. 31) Ñ2 D7 शितैर्; M1.2 त्वरन् (for त्रिभिर्). —(l. 32) D5 तथा and भिन्न- (for अथ and छिन्न- respy.). —For l. 32, Ñ V1 B2–4 D4 subst.:

5* छित्त्वा तु कार्मुकं तस्य लक्ष्मणस्त्वरयान्वितः ।

[B4 च (for तु).]

—(l. 33) Ñ V1.3 B2–4 D4 संक्रुद्धो (for सौमित्री). —(l. 34) G2 तस्य कायं विनिर्भिद्य (for the prior half). Ñ2 D4.5.11 T G1 M5 -निसृताः (for -निःसृताः). —(l. 35) Ñ V1.3 B2–4 D4 विविशुर् (for निपेतुर्). D9 क्रुद्धा (for रक्ता). —V3 om. l. 36. —(l. 36) B3.4 D5 T1 भिन्नमर्मा; D6 T2.3 छिन्नवर्मा; D9–11 G1 छिन्नधन्वा; Cr as above (for भिन्नवर्मा). —V3 repeats l. 37 (followed by $6.78.4^{ab}$ and $6.78.5^{ab}$) after l. 17 of App. I (No. 47). —(l. 37) V3 (second time) damaged for the prior half. Ñ1 सज्जं तच्च चकार ह; Ñ2 V1.3 (both times) B2–4 D4 सज्यं तच्च(V3 [first time] चैव) चकार सः(B3 ह) (for the post. half).

47

Ñ V1.3 B2–4 D4 om. l. 1–2. —(l. 1) D6 आ-; D7 G2 नि-; D9 M1.2 स (for सं-). G1 M3.5 दर्शयामास च(M5 स) तदा (for the prior half). M5 लाघवं (for रावणिं). G2 om. (hapl.) l. 3–12. —(l. 3) G1 स (for तान्). —(l. 4) D11 परमः (for परम-). D6 संप्रमर्दयन्; T2 स प्रदर्शयन्. D5 T1 M1.2 शीघ्रमस्त्रं प्रदर्शयन् (for the post. half). ❀ Cg : शीघ्रास्त्रं शीघ्रमस्त्रम्।; Ck : शीघ्रास्त्रमिति । क्षणमात्रेण सर्ववेधनसाधनमस्त्रं शीघ्रास्त्रम्। अपि च भावप्रधानो निर्देशः । अ(स्त्र)विषयकशीघ्रप्रयोगसामर्थ्यं शीघ्रास्त्रम्। तत्त्वं प्रदर्शयतीति ।; so also Ct. ❀ —For l. 4, Ñ V1 B2–4 D4 subst.; while V3 ins. after l. 3 :

1* विव्याध मार्गणैस्ते च त्रिधा भूताः क्षितिं ययुः ।

[V1 तु; D4 [ऽ]पि (for च). V3 B3 तस्य (for ते च). B3 भूत्वा (for भूताः). Ñ1 D4 त्रिभिर्भू(Ñ1 °धा भू)त्वापतद्भुवि (for the post. half).]

—V3 om. l. 5–10. Ñ V1 B2–4 D4 om. l. 5–8. —(l. 5) D5.10.11 T1 G1.3 M2.5 राक्षसेंद्रस्तु(M2 °स्य) तं चापि (for the prior half). —(l. 6) D6.7 T2.3 [ऽ]पि; D9 [ऽ]भि- (for ऽति-). D5 T G3 M5 शत्रुतापिना; D6 °तापनः (for °घातिना). M1.2 रावणिः क्रोधमूर्छितः (for the post. half). —(l. 7) T2 अ**(moth-eaten); M1.2 इंद्रजित्; Cm.g.k.t as above (for असक्तं). D5.7 T1 G1.3 शरान्बहून् (by transp.). —(l. 8) D9.11 तान्प्राप्ताञ् (subm.) (for तानप्राप्ताञ्). D9–11 परवीरहा (for रघुनन्दनः). —(l. 9) Ñ1 V1 B2.3 D4 चास्य; Ñ2 B4 तस्य (for अस्य). Ñ V1 B2–4 D4.6 चरतो (for च रणे). D5.7.9–11 रथ-; D6 T2.3 G1 रघु- (for रथि-). Ñ V1 B2–4 D4 रथेन रघुनंदनः (for the post. half). —(l. 10) Ñ2 शरेण (for भल्लेन). D5 T1 G3 M1.3 नत- (for [आ]नत-). —After l. 10, Ñ2 ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

असूतास्ते हयास्तत्र रथमूहुरविक्लवाः ।
मण्डलान्यभिधावन्तस्तदद्भुतमिवाभवत् ।
अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः ।
प्रत्यविध्यद्भयांस्तस्य शरैर्वित्रासयन्रणे ।
अमृष्यमाणस्तत्कर्म रावणस्य सुतो बली । [15]
विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम् ।
ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः ।
विलयं जग्मुराहत्य कवचं काञ्चनप्रभम् ।

48

After 6.78.34, D13 ins.:

भुजाभ्यामपि छिन्नाभ्यां गृहीत्वा तन्महच्छिरः ।
इन्द्रजिद्योजयित्वा तु पितृव्यं वाक्यमब्रवीत् ।
त्वयेदं कुलजातेन कृतं कर्म यशस्करम् ।
कथयिष्यन्ति पुरुषास्त्रिषु लोकेषु राक्षसाः ।
स्वपुत्रनिधनं घोरं यत्कृत्वा नैव लज्जसे । [5]
लालयित्वा कथं बालं विषं दद्यादचेतनः ।
अनासक्तेन युद्धेषु लक्ष्मणाय निवेदितः ।
शत्रूणा युध्यमानं मां कथं द्रक्ष्यसि राक्षस ।
यस्मिन्मुखे त्वया क्षिप्तं भोजनं विविधं पुरा ।
छेदयित्वा च तद्वक्त्रं हृदयं किं न दीर्यते । [10]
कङ्कणैस्तापनीयैस्तु यौ भुजौ छादितौ त्वया ।
ताविमौ पश्य छिन्नौ यावित्युक्त्वा चुक्रुधे तदा ।
उत्पाट्य तच्छिरो दिव्यं व्याविध्यत पुनः पुनः ।
लक्ष्मणाय प्रचिक्षेप इन्द्राशनिसमप्रभम् ।
तमापतन्तं सहसा स दृष्ट्वा राघवानुजः । [15]
बिभेद शरमुत्क्षिप्य प्रजगाम नभस्तलम् ।
गते तस्मिन्मुहूर्ते तु प्रादुरासीन्महास्वनः ।
आजगाम पुनर्वेगाद्धन्तुकामं च लक्ष्मणम् ।
ततो जग्राह तेजस्वी ब्रह्मास्त्रं राघवानुजः ।
तापसिक्त इवार्चिष्मान्व्यपतत्तु ततो भुवि । [20]

49

After 6.78.48, D6 T2.3 ins.:

प्रतिनन्द्य महात्मानं सौमित्रिं प्रियदर्शनम् ।
स्वर्गं ययुः सुराः सर्वे सर्वशोभासमन्विताः ।
विमलं गगनं चासीत्प्रसन्नाश्च दिशो दश ।
ततः स्थिराभवत्पृथ्वी निहते रावणात्मजे ।
निहतं रावणिं दृष्ट्वा महापर्वतसंनिभम् । [5]
गतश्रमः स सौमित्रिर्जयलक्ष्म्या समावृतः ।
शङ्खमापूरयामास रणमध्ये तु लक्ष्मणः ।
ज्यानिनादं ततः कृत्वा सिंहनादं चकार सः ।
धनुर्ज्यासिंहनादैस्तैर्वानरा लक्ष्मणस्य ते ।
प्रहृष्टाः प्राप्य सौमित्रिं कीर्तयन्ति सुभाषितैः । [10]
विभीषणोऽपि संतुष्ट आलिङ्ग्योपलिलेप च ।
प्रमुमोदाथ सुग्रीवो हनूमानङ्गदो नलः ।
नीलः सुषेणः पनसो जाम्बवानृषभो बली ।
गजो गवाक्षो गवयः शरभो गन्धमादनः ।
मैन्दश्च द्विविदश्चैव ये चान्ये वानरोत्तमाः । [15]
ते समेत्य रघुश्रेष्ठं प्रणम्यालिङ्ग्य सादरम् ।
कीर्तयन्ति रघुश्रेष्ठं शुभलक्षणसंयुतम् ।
केचिद्गायन्ति समरे ननृतुर्वानराः परे ।
आह्वयन्ति रणे केचिद्वानरा जयमागताः ।

50

After 6.84.14^{ab}, Ś Ñ V B D1-4.6.8.12.13 T2.3 ins.:

रथेनासाद्य सुग्रीवं ववर्ष शरवृष्टिभिः ।
तस्य तानशनिप्रख्यान्शरान्दृढधनुश्च्युतान् ।
अचिन्तयित्वा सुग्रीवः समराभिमुखो नदन् ।
सोऽवप्लुत्य महावेगो हरिरिन्द्रपराक्रमः ।

2* आदधार हयान्***** युद्धपण्डितः (illeg.) ।

—(l. 11) G3 अघातास् (for असूतास्). D6 तस्य (for तत्र). Ñ V1.3 B2-4 D4 अ(B2-4 आ)विद्धास्ते हयास्तस्य (for the prior half). V3 रथमुत्तार् (for रथमूहुर्). Ñ2 V1 अविह्वलाः (for अविक्लवाः). Ñ1 B3.4 रथमुद्व(B4 °कूब)रविह्वलाः; D4 रथं बहुविधं तथा; M1.2 रथस्थं रथिनां वरं (for the post. half). —(l. 12) Ñ2 V3 D10.11 [अ]भिधावंति; B3 D6 T2.3 [अ]भ्यधावंत; M1.3 [अ]भ्ययू रुह्य (for [अ]भिधावन्तस्). —(l. 13) T3 -परम् (for -वशम्). G1 क्रू- (for दृढ-). —Ñ V1.3 B2-4 D4 om. l. 14. —(l. 14) T2 त* (moth eaten); G1 अस्य; G2 तत्र (for तस्य). T2 शनैर् (for शरैर्). —D9 om. l. 15. —(l. 15) V3 D10.11 अमर्षमाणस् (for अमृष्यमाणस्). G1 दशग्रीव- (for रावणस्य). D10.11 रणे (for बली). —After l. 15, Ñ V1.3 B2-4 D4 (only l. 2) read 1710* and then D4 repeats 5^{cd}. —D4 om. l. 16-18. Ñ V1.3 B2-4 om. l. 16. —(l. 16) D8-11 रोमहर्षणं; G2 तममर्षणः (for तममर्षणम्). —(l. 17) V3 damaged for the post. half. Ñ2 V1 B2 D6.9 सर्व- (for सर्प-). —After l. 17, V3 repeats l. 37 of App. I (No. 46), 6.78. 4^{ab} and 6.78. 5^{ab}. —V3 om. l. 18. —(l. 18) G1 निलयं. D7.9-11 G1 आगत्य (for आहत्य). —Thereafter, Ñ V1 B2-4 repeat 6.78.5.

49

(l. 2) T2.3 -शुभान्विताः (for -समन्विताः). —(l. 5) D6 श्रुत्वा (for दृष्ट्वा). —(l. 6) D8 समाश्रितः. —(l. 11) D6 [उ]पलिप्य (subm.); T3 °लिप्य (for °लिलेप). —(l. 16) T2 om. (hapl.) from the post. half up to the prior half of l. 17.

50

(l. 1) Ñ1 B3 रथादाप्लुत्य. Ś D8.12 om. (hapl.?) from ववर्ष up to सुग्रीवः in l. 3. —V3 om. l. 2-3. —(l. 2) D13 तत्र (for तस्य). D6 श्वसन् (for शरान्). D1 तत- (for दृढ-). —(l. 3) B1 चिंतयित्वा तु (for अचिन्तयित्वा). Ś D8.12 संयातो; Ñ2 V1.2 सरोष-; B1.2 समरे; D1 ससार; D6 T2.3 सशर- (for समर-). B1 वसन्; B4 ययौ (for नदन्). —(l. 4) Ñ V B2-4 [स]भिसृत्य; B1 [स]वसृत्य;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

आक्रम्य स्यन्दनं तस्य धुरि पादेन पश्यतः । [5]
वानरेन्द्रसमाक्रान्ताद्रथात्पेतुर्हया भुवि ।
विनिष्पतिततनेत्रास्ते भग्नग्रीवास्तुरंगमाः ।
आक्रम्य स रथं वीरो वृक्षषण्डेन वानरः ।
सारथिं निजघानाशु विरूपाक्षस्त्वपाक्रमत् ।
अपक्रान्ते विरूपाक्षे सुग्रीवसचिवा रथम् । [10]
बभञ्जुस्तरसा वीरा हरयो वातरंहसः ।
विरूपाक्षो हतरथो धन्वी तूणी तनुत्रवान् ।
बहुशस्ताडयामास नाराचैः प्लवगेश्वरम् ।
एतस्मिन्नन्तरे रक्षो रावणः क्रोधमूर्छितः ।
नाराचैर्बहुभिः संख्ये सुग्रीवं चाभ्यताडयत् । [15]
ततस्तु विविधैर्बाणैः सर्वान्विव्याध वानरान् ।
ततस्तु विहताः सर्वे वानराः शरपीडिताः ।
राघवं शरणं जग्मुः प्रजापतिमिव प्रजाः ।
रावणेन प्रयुक्तस्तु विरूपाक्षो महागजम् ।
आरुरोह रणे वीरो बहुशस्त्रोपकल्पितम् । [20]

51

After 6.87.6, Ś Ñ V B D1-4.6.12 T2.3 (Ñ V1.3 B4 l. 61-72 only) ins.; while D8 ins. l. 13-72 only after 6.87.2; D13 cont. l. 1 only after 6.87.1969*:

स विस्फार्य महच्चापं किरीटी मृष्टकुण्डलः ।
नाम विश्रावयामास जगर्ज च ननाद च ।
तेन सिंहप्रणादेन नामसंकीर्तनेन च ।
स्यन्दनस्य च नादेन पूरयामास रोदसी ।
त्रिविक्रमे यथा विष्णोः सर्वे दैत्यवराः पुरा । [5]
भयार्ता वानराः सर्वे विविशुस्ते परस्परम् ।
ते राक्षसेन्द्रं तं दृष्ट्वा वानराश्चस्तचेतसः ।
शरण्यं शरणं जग्मुर्मनसा पुरुषोत्तमम् ।

D6 T2.3 [ऽ]भिप्लुत्य (for ऽवप्लुत्य). B4 महाकायो. —D12 om. l. 5-9. —(l. 5) Ś Ñ1 D6.13 आक्रामत्; Ñ2 V1.2 B3 D1-3 आक्रमत्; B1 आकर्ण्य (for आक्रम्य). —V3 damaged from स्यन्दनं up to वानरेन्द्र- in l. 6. V2 वीरो (for तस्य). D2 हरिः; D3 रिपोः; D4 रिपुः; D13 करि- (for धुरि). D4 पोथयत्; D6 T2.3 चिक्षिपे (for पश्यतः). B4 आक्रमत्स्यंदनं तस्य विरूपाक्षस्य पश्यतः. —(l. 6) Ñ2 D3 वानरेण (for वानरेन्द्र-). Ś D8 -पराक्रांताद्; B1 D2.3.13 -पदा°; D1 -बला°; D4 -पराक्रांत-; D6 T2.3 -पराक्रांता (for -समाक्रान्ताद्). B3 तथोत्पत्य (for रथात्पेतुर्). Ñ V1 B3.4 भयाद्; B1 हता; D8 हतो (for हया). —(l. 7) B1 विनिष्पातित-. Ñ1 V B3 D4 -नेत्रास्या; Ñ2 B4 -नेत्रास्य-; B2 -नेत्राभ्यां; D1.3 -नेत्रास्तु (for -नेत्रास्ते). V1 भिन्न- (for भग्न-). —(l. 8) V2 तु (for स). D13 धीमान् (for वीरो). Ś D4 स्यंदनं (for स रथं). Ś भीमो (for वीरो). B1 D1.2 -दंडेन; D3.4.8.13 -खंडेन (for -षण्डेन). Ñ V B2-4 विरूपाक्षस्य वै तदा (for the post. half). —(l. 9) V3 damaged from थिं up to सु in l. 10. Ñ2 V1.2 B2.4 [अ]स्य; D13 [अ]थ (for [आ]शु). Ś विरूपाक्षमुपाक्रमत्; D13 विरूपाक्षस्य रक्षसः (for the post. half). —(l. 10) Ś अभिक्रांते; B1.2 D3.4.8 अपा°; D6 T2.3 परा°; D12 अभियाते (for अपक्रान्ते). D13 ततः सुग्रीवसचिवा विरूपाक्षस्य वै रथं. —(l. 11) Ś D12 ममंथुस् (for बभञ्जुस्). D13 सहसा (for तरसा). D8 तद्रथा वी* (for तरसा वीरा). D8 चाति- (for वात-). D6 -रंहसा. —(l. 12) Ś D12 तूण- (for तूणी). D3 खड्गी धन्वी (for धन्वी तूणी). D8 रसत्रवान्; D4 महारथः (for तनुत्रवान्). —After l. 12, D13 ins.:

1* रथादाप्लुत्य वेगेन वसुधायां व्यवस्थितः ।

—D13 repeats l. 13 after 6.84.15. —(l. 13) Ñ V B2-4 बहुभिस्; D13(first time) बाहुभ्यां (for बहुशस्). D13 (second time) त्रासयामास. D13(first time) संयुगे (for नाराचैः). Ś Ñ2 D12 प्लवगर्षभं; T2 प्लवगेश्वरान् (for प्लवगेश्वरम्). V3 ना******* (damaged); B2 संग्रामेष्वरिमर्दनः (for the post. half). —Ś D12 om. l. 14-20. Ñ V B D1-4.8.13 om. l. 14-18. —D6 reads l. 15 in marg. —(l. 17) D6 विकृताः; T2.3 विदृताः (for विहताः). —(l. 19) V3 damaged up to विरूपाक्षो. Ñ1 V1.2 B4 D1-3.8.13 प्रयुक्तं तु(Ñ1 B4 तं); B3 [उ]पयुक्तं तु. D4 विरूपाक्षं महागजः (for the post. half). —(l. 20) B1 प्रारुरोह. B1 D1.2.4.8 महावीर्यो (for रणे वीरो). Ñ V B2-4 शीघ्रमारुरुहे वीरो (for the prior half). B3 -[उ]पशोभितं. B1.2 बहुशश्चोपकल्पितं (for the post. half).

51

(l. 1) D1 विस्फारयन् (hypm.) (for विस्फार्य). Ś B3 D12 महाचापं; D4 धनुर्धरः (for महच्चापं). D13 विस्फार्य च तदा चापं (for the prior half). B3 किंकिणी- (for किरीटी). —After l. 1, B2 reads l. 61 for the first time, repeating it in its proper place. —(l. 2) V2 B1-3 D1-3 सं- (for वि-). B2 D4 जगाम; D6 ससर्ज (for जगर्ज). D2 transp. जगर्ज and ननाद. —(l. 4) V2 B1.2 मेदिनीं (for रोदसी). —After l. 4, D4 ins.:

1* शङ्खज्यातलनिर्घोषैस्त्रैलोक्यं त्रासयन्मुहुः ।
द्रावयन्हरिसैन्यं तद्रावणो राममभ्यगात् ।

—(l. 5) B2.3 यथा त्रिविक्रमे (by transp.). Ś2 V2 B1.2 D2.6 T2.3 सर्व-; B3 तथा; D1.3 त्रस्ता (for सर्वे). B3 देव- (for दैत्य-). Ś D12 -जनाः; V2 B1 -वधे (for -वराः). D4 त्रिविक्रमं यथा विष्णुं दैत्यदानवराक्षसाः. —G (ed.) om. l. 6. —(l. 6) D4 रावणं दृष्ट्वा (for वानराः सर्वे). B2 पलायंते; D4 दुद्रुवुस्ते (for विविशुस्ते). —(l. 7) V2 B1 राक्षसेंद्रं च ते; D4 ततस्ते रावणं (for ते राक्षसेन्द्रं तं). G (ed.) दृष्ट्वा वै (for तं दृष्ट्वा) V2 B1 नष्ट- (for त्रस्त-). B2 वानरेंद्रस्य चेतसः; D4 भीता वानरपुंगवाः (for the post. half). —(l. 8) B2 सर्वे च (for मनसा). D4 देवं रघुकुलोद्वहं (for the post. half). —After l. 8, D4 ins.:

2* कालदण्डोद्यतं घोरं धर्मं दृष्ट्वा यथा प्रजा ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततस्तं रावणं दृष्ट्वा रथस्थं पर्वतोपमम् ।
विधुन्वानं धनुर्घोरं व्यादितास्यमिवान्तकम् । [10]
स तं दृष्ट्वा महारौद्रं गर्जन्तं कालमेघवत् ।
वानरान्सान्त्वयित्वा च विभीषणमुवाच ह ।
कोऽयं पर्वतसंकाशो धनुष्मान्कवची शरी ।
दिव्यं रथं समास्थाय वानरान्प्रजिघांसति ।
आचक्ष्व मे महाबाहो कोऽयं राक्षसपुंगवः । [15]
यं दृष्ट्वा वानराः सर्वे भयार्ता विप्रदुद्रुवुः ।
स पृष्टो राजपुत्रेण रामेणामिततेजसा ।
आचचक्षे महातेजा राघवाय विभीषणः ।
दशग्रीवो महातेजा राजा वैश्रवणानुजः ।
भीमकर्मा महोत्साहो रावणो राक्षसाधिपः । [20]
पुत्रो विश्रवसः साक्षात्क्रूरकर्मा सुदारुणः ।
दारुणो दारुणाचारो देवदानवदर्पहा ।
एतस्मिन्क्रियतां यत्नः क्षुद्रे पुरुषपुंगव ।
पुरा वानरसैन्यानि क्षयं नयति सायकैः ।
विभीषणवचः श्रुत्वा रामो राजीवलोचनः । [25]
जग्राह कार्मुकश्रेष्ठं वाक्यं चेदमुवाच ह ।
दिष्ट्या मे दर्शनं प्राप्तो नैर्ऋतेन्द्रः सुदुर्मतिः ।
वधेनास्य नृशंसस्य तुष्टिमेष्यामि संयुगे ।
इत्युक्त्वा बाणमाकर्ण पूरयित्वा ससर्ज ह ।
तं राक्षसेन्द्रश्चिच्छेद त्रिभिर्भल्लैरमर्षणः । [30]
निकृत्तं सायकं दृष्ट्वा सौमित्रिः कुपितो भृशम् ।
त्रासयामास रक्षांसि ज्याघोषेण महाबलः ।

—(l. 9) V2 B1 D1 ततस्ते; B3 चरंतं; D6 T2.3 ततस्तु (for ततस्तं). Ś2 वानरा; B2.3 D2-4 राघवो; D1 राघवं (for रावणं). Ś राक्षसं (for रथस्थं). D1 पर्वतोत्तमं. —After l. 9, D4 ins.:

3* ग्रसन्तमिव लोकांस्त्रींस्तमूर्जितमिवानलम् ।

—(l. 10) D4 महा- (for धनुर्). B3 -घोषं (for -घोरं). D6 T2.3 om. from the post. half up to the prior half of l. 11. G (ed.) reads the post. half of l. 11 in place of the post. half of l. 10. —(l. 11) D1-3 विरूपाक्षं (for स तं दृष्ट्वा). V2 B1.3 तदा (for महा-). Ś D1.2.12 -घोरं (for -रौद्रं). G (ed.) om. from the post. half up to the prior half of l. 25. —After l. 11, D4 ins.:

4* रामः सौमित्रिणा सार्धं विस्मयोत्फुल्ललोचनः ।;

while D6 ins.:

5* ततोऽब्रवीन्महातेजा रामः शस्त्रभृतां वरः ।

—(l. 12) V2 B1 तु; D3 [अ]थ (for च). D4 सांत्वयित्वा हरिश्रेष्ठान् (for the prior half). —(l. 13) D6 T2.3 [ऽ]सौ (for ऽयं). B3 वपुष्मान् (for धनुष्मान्). —(l. 14) V2 B1 समासाद्य; D4 समारुह्य; D12 समादाय (for समास्थाय). Ś V2 B1.2 सं-; D4.12 स (for प्र-). B3 वानराणां जिघांसति (for the post. half). —(l. 15) D2.8 आचक्ष मे; D12 आचक्षेह (for आचक्ष्व मे). —(l. 16) D4 दुद्रुवुर्दिशः (for विप्रदुद्रुवुः). —(l. 17) D6 T2.3 [अ]क्लिष्टकर्मणा (for [अ]मिततेजसा). —(l. 18) D6 T2.3 महाबाहू; D8 °बाहो (for °तेजा). —B2 om. l. 19. —(l. 19) D4 श्रीमान् (for राजा). —(l. 20) B2 महाबाहो; D3 महातेजा; D4 सदासौम्यो (for महोत्साहो). D4 राक्षसेश्वरः. —(l. 21) D4 देव (for साक्षात्). B2.3 निशाचरः (for सुदारुणः). D4 महारौद्रो महाबपुः (for the post. half). —(l. 22) D4 निर्घृणः पापकर्मा च; D8 रावणो दारुणाकारो (for the prior half). —After l. 22, D1-3.6 T2.3 repeat l. 16. —After l. 22, D4 ins. (sic):

6* दुराचारो दुराधर्षो पलंकु रघुनन्दन ।
स तं निवारयितुं संख्ये न शक्ता वानरोत्तमाः ।

—D4 om. l. 23-24. —(l. 23) V2 B1 तदस्मिन्. Ś1 महान्; B2 D8 युद्धे; D12 महा- (for क्षुद्रे). D8 राघव- (for पुरुष-). —After l. 23, Ś D12 repeat l. 16. —(l. 24) V2 B1 स च (for पुरा). D8 स्वयं (for क्षयं). V2 B1 नेष्यति (for नयति). —After l. 24, D6 T2.3 ins.:

7* तपःप्रभावात्पूर्वं वै येन देवाः सदानवाः ।
निर्जिता युगपत्सर्वे रणे रणविशारद ।

—(l. 26) D1.3.8 कार्मुकं (for कार्मुक-). D8 घोरं (for -श्रेष्ठं). V2 B1 एतद् (for चेदम्). —(l. 27) D3 राक्षसेंद्र सु-; D4 राक्षसेंद्रोति- (for नैर्ऋतेन्द्रः सु-). D8 राक्षसेंद्र सुदुर्मते (for the post half). —(l. 28) V2 B1 वधे च (for वधेन). B2.3 हि संगम्य (for नृशंसस्य). D4 निहत्य तं दुराचारं (for the prior half). —After l. 28, D3 ins.:

8* पापमेनं कथं हन्यां महापापकरं सदा ।
दर्शनेनापि पापस्य अस्य मे कम्पते मनः ।
यज्ञविध्वंसकर्तारं देवब्राह्मणकण्टकम् ।
ऋषिकन्यादेवकन्यापराभवकरं शठम् ।
विभीषण कथं हन्यां राघवोऽहं स रावणम् । [5]
अथवा स्वेन पापेन पापोऽयं नाशमेष्यति ।

—(l. 29) B2 [उ]क्तो (for [उ]क्त्वा). B2.3 D3 आकर्णात्; D1 आयुक्तं (for आकर्णं). D4 कार्मुके बाणं (for बाणमाकर्णं). B1 च (for ह). D1 तं छिन्नं रक्षसा क्षणात्; D4 संधायाकृष्य दुःसहं (for the post. half). —After l. 29, D1 ins.:

9* दृष्ट्वा चुक्रोध सौमित्रिस्त्रासयन्धनुषा रिपून् ।;

while D4 ins.:

10* मुमोच वीक्ष्य तं शत्रुं क्रोधसंरक्तलोचनः ।

—D1 om. l. 30-32. —(l. 30) Ś D12 बाणैर् (for भल्लैर्). D4 महाघनैः (for अमर्षणः). —(l. 31) B2 छिंदंतं; D4 निवृत्तं; D6 विकृत्तं; T2 सकृत्तं (for निकृत्तं). D6 [ऽ]भवत् (for भृशम्). —After l. 31, B2 ins.:

11* जग्राह कार्मुकश्रेष्ठं विस्फार्यं च ननाद च ।

—(l. 32) D6 T2.3 नाशयामास. D4 -निनादैर् (for -घोषेण). B3 महास्वनः. —After l. 32, D4 ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पूरयन्स महाशैलानर्णवांश्च दिशस्तथा ।
सौमित्रेर्धनुषो घोषं श्रुत्वाप्रतिभयं तदा ।
विसिष्मिये महातेजा राक्षसेन्द्रो भृशं बली । [35]
स रावणः प्रकुपितो दृष्ट्वा लक्ष्मणमग्रतः ।
आदाय निशितं बाणमिदं वचनमब्रवीत् ।
तिष्ठ प्राणान्परित्यज्य गमिष्यसि यमक्षयम् ।
पश्य मे निशितान्बाणानरिदर्पनिषूदनान् ।
सितपीतामलांस्तीक्ष्णान्मुक्तारजतभूषणान् । [40]
एष ते सूर्यसंकाशो बाणः पास्यति शोणितम् ।
मृगराडिव संक्रुद्धो नागराजस्य शोणितम् ।
त्यज सर्वात्मना बाणांस्ततस्त्यक्ष्यसि जीवितम् ।
ततः स रक्षोवचनं निशम्य
सगर्वितं संयति राजपुत्रः । [45]
न चैव चुक्रोध बले स्थिरात्मा
प्रोवाच चेदं वचनं महात्मा ।
कर्मणा दर्शयात्मानं न विकत्थितुमर्हसि ।

12* पूरयामास समरे शरं शत्रुविनाशनम् ।
सुग्रीवो हनुमान्नीलो ह्यङ्गदः कुमुदो नलः ।
ऋषभः शरभो धूम्रः पनसश्च नलोऽनलः ।
गजो गवाक्षो गवयः केसरी जाम्बवान्बली ।
तेऽतिक्रुद्धा महावीर्याः सिंहनादान्भयावहान् । [5]
महाकाया महारौद्राश्चक्रुरभ्येत्य रावणम् ।
तैः शब्दैरसुरास्त्रेसुश्चचाल वसुधा तदा ।
लोकाः समस्ताः संभ्रान्ताः सुरगन्धर्वराक्षसाः ।

—D4 om. l. 33. —(l. 33) V2 B1 D8 सु-; B2.3 च (for स). D6 T2.3 पूरयंतं (for पूरयन्स). Ś B3 D1.12 महीं; D8 -महान् (for महा-). V2 B1 अंबरं; D1–3.6.8 T2.3 अर्णवं (for अर्णवांश्). D6 T2.3 तदा (for तथा). B2.3 दिशश्च विदिशस्तथा (for the post. half). —(l. 34) D4 सौमित्रि- (for सौमित्रेर्). V2 B1.2 T2.3 घोरं (for घोषं). D12 धनुर्घोषेण (for धनुषो घोषं). B2 तथा (for तदा). D4 श्रुत्वा शत्रूभयावहं (for the post. half). —(l. 35) B2.3 D8 महाबलः (D8 °ली); D1 भृशं तदा (for भृशं बली). D4 विस्मयं परमं प्रापुर्भयसंत्रस्तमानसाः. —After l. 35, D3 ins.:

13* रक्षसां तु हृदः स्फोटो जातस्तेन स्वनेन वै ।
जगर्जुर्वानराः सर्वे हनुमत्प्रमुखा रणे ।

—(l. 36) B3 रावणोथ (for स रावणः). B2 [ऽ]थ कुपितो; D4 सुसंक्रुद्धो; D8 प्रकुपितं (for प्रकुपितो). —After l. 36, D4 ins.:

14* हतं तेन सुतं स्मृत्वा सर्वलोकेषु विश्रुतम् ।

—(l. 37) B2.3 निशितान्बाणान् (for निशितं बाणम्). Ś D12 om. from the post. half up to the prior half of l. 39. D4 संधायास्य दशाननं (for the post. half). —For l. 38, D4 subst.:

15* यदि स्थास्यसि संग्रामे हतः प्राप्स्यसि वै यमम् ।

—Thereafter cont.:

16* कृतकृत्योऽसि सौमित्रे त्वं मे दृष्टिपथं गतः ।
पराक्रमेण रूपेण वैरेण विनयेन च ।
कीर्तयन्ति जना देवास्त्वामेकं पुरुषोत्तमम् ।
निहत्वा निर्भयो भूयां पुरतो मे स्थितो रणे ।
तस्मात्त्वां समरे हत्वा गमिष्ये भुवनत्रये ।
स्थितो युध्यस्व सौमित्रे न पलायस्व पार्थिव ।

—(l. 39) B3 त्वं (for मे). D4 द्रक्ष्यसे (for पश्य मे). V2 B1.3 रिपु- (for अरि-). D3.8 -पक्ष- (for -दर्प-). Ś D12 -निषूदनं. B2.3 D6 T3 -विनाशनान्; D1 -विनाशन (for -निषूदनान्) D4 अद्य मे रघुनंदन (for the post. half). —D8 om. l. 40. —(l. 40) D1 -पक्ष- (for -पीत-). D6 T2.3 सि(T2 शी)त-(T3 सीते) पीतमुखान् (for सितपीतामलांस). Ś D12 सितपीतांचलं तीक्ष्णं; D4 सिताः पीतामलारतीक्ष्णा (for the prior half). B2 तप्तकांचन- (for मुक्तारजत-). Ś D12 -भूषणं; D3 -भूषितान्; D4 -भूषिताः (for -भूषणान्). B3 G(ed.) शिताः शिता (G[ed.]°तामला)श्चातितीक्ष्णा दृष्ट्वा (G ed. मुक्ता)रजतभूषणाः. —D4 om. l. 41. —(l. 41) Ś D12 वर्षांते (for एष ते). Ś1.2(marg. also) रवि-; V2 B1 D1–3.8 सर्प- (for सूर्य-). D3 शरः (for बाणः). B2.3 एते ते सर्पसंकाशा बाणाः पास्यंति शोणितं. —D1.6.12 T2.3 om. (hapl.) l. 42. —(l. 42) D4 गज- (for नाग-). —After l. 42, D4 ins.:

17* न्यस्तशस्त्रमपि त्वा तु वधिष्यामि न संशयः ।
द्रवन्तमपि सर्वत्र पुत्रहन्तारमाहवे ।
तिष्ठ लक्ष्मण यत्नेन कुरु युद्धं स्थिरो भव ।

[(l. 3) After लक्ष्मण, क्रुद्धो गजराजस्य शोणितं न्यस्तत्रे is erroneously written.]

—D4 om. l. 43. —(l. 43) Ś D12 बाणं (for बाणांस). —(l. 45) Ś D3.12 सु- (for स). —(l. 46) D4 [ए]ष (for [ए]व). Ś D12 बल-; G(ed.) रणे (for बले). V2 B1 धृतात्मा; D2.3.8 T2.3 स्थितात्मा (for स्थिरात्मा) D4 महानुभावः (for बले स्थिरात्मा). B2.3 न चैव क्रुद्धो धरणीधृत्ता(B3 °धरा)त्मा. —(l. 47) B2 उवाच (for प्रोवाच). Ś D4.12 चैनं; D8 देवं (for चेदं). B2 *बली; B3 स ततो; D1 स तदा; D4 सुतरां (for वचनं). —After l. 47, B1 D4 read an addl. colophon. [*Kāṇḍa name*: B1 D4 लंकाकांडे. —*Sarga name*: B1 रावणवाक्यं; D4 लक्ष्मणवाक्यं. —*Sarga no.* (figures, words or both): D4 om.; B1 74.]

—After the addl. colophon, D4 ins.:

18* दशग्रीववचः श्रुत्वा सौमित्रिः शत्रुतापनः ।
धनुराकृष्य सशरं प्रत्युवाच निशाचरम् ।

—(l. 48) V2 B1 विकल्पितुम्; D8 विकंपितुम् (for विकत्थितुम्). —After l. 48, Ś B2.3 D2.4.12 ins.:

19* पौरुषेण हि युक्तेन न विकत्थितुमर्हसि ।

[B3 तु; D2 च (for हि). B2.3 D4 यो युक्तो; D2 संयुक्तो (for युक्तेन). Ś D12 सं- (for न). B3 D4 अर्हति(D4 °ते) (for अर्हसि). B2 न स कत्थति संयुगे (for the post. half).]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

सर्वायुधसमायुक्तो धन्वी रथवरे स्थितः ।
स शरैर्यदि वा शस्त्रैर्दर्शयस्व पराक्रमम् । [50]
ततः शिरांसि ते बाणैः पातयिष्याम्यहं रणे ।
मारुतः कालपक्वानि फलानीव वनस्पतेः ।
अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः ।
पास्यन्ति रुधिरं देहात्सुरामृतमिवोत्थितम् ।
लक्ष्मणस्य वचः श्रुत्वा हेतुमद्वीर्यसंयुतम् । [55]
रावणः परमक्रुद्धो बाणमुत्तममाददे ।
तमापतन्तं सौमित्रिस्त्रिधा चिच्छेद लाघवात् ।

रावणः परमामर्षी शरवर्षेण सोऽभ्ययात् ।
ततः शरसहस्रेण संच्छाद्य रघुनन्दनम् ।
विभीषणं च सुग्रीवं वानरांश्चाभिदुद्रुवे । [60]
संत्रास्य वानरानीकं शरवर्षैर्महाभुजः ।
राममेवाभिदुद्राव शरैरग्निशिखोपमैः ।
तमापतन्तं सहसा प्रत्यगृह्णान्महाभुजः ।
रामोऽपि राक्षसश्रेष्ठं शरैरर्काग्निसंनिभैः ।
संक्रुद्धयोस्तयोरासीत्संयुगं लोमहर्षणम् । [65]
ततः प्रववृते युद्धं रामरावणयोर्महत् ।

—(l. 49) D3 -समाविष्टो (for -समायुक्तो). —(l. 50) D4 अस्त्रैर्वा (for स शरैर्). D1-3.8 [अ]प्यस्त्रैर् (for शस्त्रैर्). B2 समर्थैरायुधैर्युद्धे; B3 D6 T2.3 शरैर्वा यदि वाप्यस्त्रैर् (for the prior half). —(l. 51) D2.3.8 तैर् (for ते). D6 T2.3 त्वां निशितैर् (for (for शिरांसि ते). D4 भूतले (for [अ]हं रणे). —(l. 52) Ś1 [ए]व (for [इ]व). —(l. 53) D1 T2 मे (for ते). Ś1 त्यक्त-; D4 तथा (for तप्त-). —(l. 54) D1 मोहात्; D4 गात्रात् (for देहात्). सुरामृतम् metri-causa. B2 अमृतं विबुधा इव; D1 सुधामदमिवामराः; D3.8 पुरामृतमिवामराः; D6 T2.3 सुधामिव दिवौकसः (for the post. half). —After l. 54, D3 ins.:

20* हितं वा शृणु मे वाक्यं रावणाद्य रणाङ्गणे ।
सीतामर्पय रामाय कपीन्प्रणम चादरात् ।
अभयं ते मया दत्तं रामं प्रणम रावण ।
कृपाभिरामः श्रीरामः प्रपन्नाय न कुप्यति ।
विभीषणो राज्यमेतत्करोतु हतकण्टकम् । [5]
दत्तं रामेण एतस्मै कोऽन्यथा तत्करिष्यति ।
प्रयाहि सबलोऽन्यत्र धनदं वा समाश्रय ।
त्वां प्राप्तं शरणं भ्राता धनदः पालयिष्यति ।
एष ते जीवनोपायः सर्वभावो न संशयः ।
मया दयामयेनात्र दर्शितस्तव रावण । [10]
अन्यथा जीवितं नास्ति तव रावण निश्चितम् ।
पूर्वं पलायनं कृत्वा गतो रावण मन्दिरम् ।
कुम्भकर्णो हरिभिर्वीरैर्दत्तो विश्राममाहवे ।
अद्य सर्वे हता वीरा एको दीनो भवान्स्थितः ।
त्वं तु मद्वाक्यमाश्रित्य चिरं जीव हितं ध्रुवम् । [15]

—D4 om. l. 55-56. —(l. 55) D12 -संस्थितं (for -संयुतम्). B3 ग्राहकं वचः; D1 सारसंमितं (for वीर्यसंयुतम्). V2 B1.2 D2.3.8 हेतूत्साहसमन्वितं (for the post. half). —After l. 55, D3 ins.:

21* भवितव्यस्य योगेन रावणो रोषमाप्तवान् ।
उवाच वचनं चेदं लक्ष्मणं प्रतिमानधृक् ।
हतेषु तेषु वीरेषु दग्धे लङ्कापुरेऽधुना ।
बद्धे वारिनिधौ चाद्य मृते भ्रातरि पुत्रके ।
त्रैलोक्यकण्टकख्याते जित्वा देवान्सवासवान् । [5]
अभिमानपरो भूत्वा सदा व्याकुलदीनवत् ।
कथं सीतां प्रयच्छामि प्रणमामि कथं कपीन् ।
कथं रामं नमाम्यद्य दर्पवान्रावणो ह्यहम् ।

संग्रामे मरणं श्रेयो न तु मानपरिच्युतिः ।
विशेषाद्रामहस्तेन मरणं मम वल्लभम् । [10]
रामो वा रावणो वापि भविताद्य महारणे ।

—(l. 56) B1-3 D1.8 परमः (for परम-). D3 इत्युक्त्वा रावणः क्रुद्धो (for the prior half). —After l. 56, B2 ins.:

22* शरं संप्रेषयामास कालान्तकयमोपमः ।

—(l. 57) T3 त्रेधा (for त्रिधा). V2 B1 सायकैः (for लाघवात्). D4 चिच्छेदाशु शरेण सः (for the post. half). —(l. 58) B2 समर- (for परम-). V2 B1 सोभ्यगात्; B2.3 चाभ्ययात् (for सोऽभ्ययात्). D4 रावणः शरवर्षेण छादयामास राघवं. —(l. 59) D1 शतसहस्राणि (for शरसहस्रेण). D4 ततस्तं शरवर्षेण (for the prior half). D1 प्रच्छाद्य (for संछाद्य). B2.3 युधि लक्ष्मणं (for रघुनन्दनम्). —(l. 60) Ś2 तु; V2 B1.3 D2.3.8 स- (for च). B3 सविभीषणसुग्रीवं; D1 विभीषणसुग्रीवान् (for the prior half). Ś2 D1.3.4.6.8 T3 [अ]पि (for [अ]भि-). —After l. 60, D4 ins. a passage, as No. 52. —Ś D12 om. (hapl.) l. 62-63. —(l. 62) D4 रावणश्च (for राममेव). V3 बाणैर् (for शरैर्). B2 आशीविषोपमैः (for अग्निशिखोपमैः). —V3 damaged for l. 63. —(l. 63) D1.6.8 T2.3 प्रत्यगृह्णन् (for प्रत्यगृह्णान्). D4 रघूत्तमः (for महाभुजः). —(l. 64) D2 हि (for ऽपि). D1 रावणं श्रेष्ठैः; D8 रक्षसां श्रेष्ठं (for राक्षसश्रेष्ठं). B4 उल्काग्नि-; D2 अग्न्यर्क- (for अर्काग्नि-). Ñ1 B3 D1 अग्निशिखोपमैः (for अर्काग्निसंनिभैः). D4 राघवो राक्षसं रौद्रं शरैर्मर्मस्वताडयत्. —After l. 64, Ñ V1.3 B2-4 ins.:

23* ततोऽभवद्युद्धमनुत्तमं तयो-
र्महत्तदा रामनिशाचरेन्द्रयोः ।
जिगीषतोर्वन्यगजेन्द्रयोर्वने
प्रभिन्नयोर्यूथपयोर्यथाभवत् ।

[(l. 3) V3 damaged from वन्य- up to l. 68.]

—Thereafter, B3 reads an addl. colophon in marg. इत्यार्षे रामायणे युद्धकांडे 3(?). —Ñ V1 B2-4 D3.4.8 om. l. 65. —(l. 65) V2 B1 अथ संक्रुद्धयोर्; D1 सुसंक्रुद्धयोर् (subm.) (for संक्रुद्धयोस्तयोर्). D6 T2.3 संक्रुद्धयोस्तदा ह्यासीत् (for the prior half). V2 B1 D6 T2.3 रोम- (for लोम-). D1 संयुगो लोमहर्षणः (for the post. half). —(l. 66) D6 T2.3 प्रवृत्तं (T3 °द्धं) युद्धं तु (for प्रववृते युद्धं). Ñ V1 B2-4 D1 तदा

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

जीवितान्तकरं घोरं परस्परवधैषिणोः ।
लाघवं शरमोक्षं च शरव्याघातमेव च ।
आत्मनः प्रतिघातं च दृष्ट्वा रक्षो न विव्यथे ।
ततः शरशतैस्तीक्ष्णैर्व्यवच्छेदप्रवेगितैः । [70]
राघवः परमामर्षी विव्याध सुमहाबलः ।
चचाल पृथिवी सर्वा ससागरवनद्रुमा ।

52

After l. 60 of Appendix I No. 51, D4 ins.:

स्वबले वर्षमानं तं शरवर्षैरनेकधा ।
व्यथितान्वानरान्वीक्ष्य नदन्तं रावणं तथा ।
सौमित्रिरथ संक्रुद्धः सर्वलोकहितोद्यतः ।
अभिदुद्राव वेगेन धनुराकृष्य शोभनम् ।
शस्त्रैराभिमुखं वीक्ष्य सौमित्री रौद्रदर्शनम् । [5]
सुग्रीवो हनुमान्नीलो ह्यङ्गदो ऋषभोऽनिलः ।
गजो गवाक्षो गवयः शरभो गन्धमादनः ।
सुषेणो विनतो धूम्रः पनसः कुमुदोल्मुकः ।
प्रजङ्घः क्रथनः सौम्यो वीरबाहुर्महाहनुः ।
सुनलः प्रथनस्तारः संपातिर्विजयो जयः । [10]
जाम्बवांस्तु महावीर्यो वानरा लोकविश्रुताः ।
सर्वलोकहिते यत्ताः स्वामिकार्यकृतोद्यमाः ।
वरायुधा महाकाया महावेगा महाबलाः ।
परिवार्य रघुश्रेष्ठं तस्थुर्विजयकाङ्क्षिणः ।
तं तथाभिमुखं वीक्ष्य शत्रुसंहरणक्षमम् । [15]
कृत्वा नादं महाभीमं लङ्केशो न व्यकम्पत ।
सौमित्रिर्वानरैः सार्धं शरवर्षं ववर्ष सः ।
वर्षन्तं प्रेक्ष्य रक्षेन्द्रं सौमित्रिः प्राह सत्वरः ।
पश्य पुत्रं हतं संख्ये मम बाणैर्मनोजवैः ।
जेतारं सर्वलोकानामिन्द्रजेतारमुत्तमम् । [20]
राक्षसानां सुखकरं सर्वशोभासमन्वितम् ।
सर्वशास्त्रार्थकुशलं सर्वमायाधरं प्रियम् ।
इन्द्रादिलोकपालैश्च सेव्यमानं पुरे पुरा ।
तमिमं सुभगं पुत्रं भ्रष्टशस्त्रं हतं मया ।
जीवितान्तं च लङ्केश राक्षसस्त्रीविभूषण । [25]
पश्य रावण दुर्बुद्धे किं न जानासि मे बलम् ।
हतमिन्द्रजितं दृष्ट्वा मत्पार्श्वे निर्भयः स्थितः ।
न हि मे शस्त्रसंघातं दृश्यते मम लाघवम् ।
यदि स्थास्यसि संग्रामे स्थिरचित्तो धृतायुधः ।
वधिष्यामि न संदेहो देवानां क्लेशकारिणम् । [30]
सर्वथाहं वधिष्यामि कुरु युद्धं स्थिरो भव ।
सर्वदेवा मुनिश्रेष्ठा यक्षगन्धर्वकिंनराः ।
प्रहर्षं परमं सर्वे गमिष्यन्ति न संशयः ।
दुर्विनीतं दशग्रीव निहतात्राक्षसोत्तमान् ।
प्रहस्तं समरे वीरं सुरजेतारमुद्धतम् । [35]
अकम्पनं विरूपाक्षं सुरमानुषकण्टकम् ।
तव पुत्रान्महावीर्यान्निहतान्वानरोत्तमैः ।
दृष्ट्वा योद्धुं रणक्रूर आगतस्त्वं मदोद्धतः ।
इत्युक्त्वा लक्ष्मणः श्रीमान्प्राह वानरयूथपान् ।
सर्वयत्नेन योद्धव्यं हनिष्यामि दशाननम् । [40]
ततस्ते वानराः सर्वे ववर्षुः शैलपादपैः ।
राक्षसानां हरीणां च संप्रहारो महानभूत् ।
उद्धतान्वानरान्वीक्ष्य दशग्रीवः प्रतापवान् ।
विनद्य सुमहानादं कम्पयन्वानरोत्तमान् ।
हरिसैन्ये ववर्षोच्चैः शरवर्षं त्वनेकधा । [45]
विद्राव्यमानान्सर्वांश्च अतिक्रुद्धो दशाननः ।
तिष्ठ तिष्ठेति सौमित्रिं स हि दुद्राव राक्षसः ।
सौमित्रिमेत्य समरे प्राह गम्भीरया गिरा ।
मम पुत्रं रणे हत्वा स्वस्थोऽहमिति मन्यसे ।
शस्त्रास्त्रसंघैः समरे वधिष्यामि स्थिरो भव । [50]
त्वां च रामं च तथा सर्वारातीन्प्रगर्वितान् ।
एवमुक्त्वार्धचन्द्रेण शरेणोग्रेण शोभिना ।
कार्मुकं तु रघोस्तस्य चिच्छेद सहसा शुभम् ।
तथा शरसमूहेन छादयामास राघवम् ।
जगर्जोच्चैर्महानादं कम्पयन्वसुधातलम् । [55]
संधाय च तथा संख्ये कोपसंरक्तलोचनः ।
संच्छाद्य शरजालैस्तु सौमित्रिरतिवेगवान् ।
अर्धचन्द्रशरेणास्य धनुश्चिच्छेद रोषितः ।
छिन्ने धनुषि रक्षेन्द्रः शक्तिं जग्राह भास्वराम् ।
दशग्रीवकरस्थां तां सौमित्रिः परवीरहा । [60]
चिच्छेद दशभिर्बाणैस्तं च विव्याध पञ्चभिः ।
भिन्नगात्रो दशग्रीवो युगान्ताग्निसमप्रभः ।
गदामाविध्य वेगेन लक्ष्मणं सोऽभ्यगाद्बली ।
चिक्षेप ज्वलमानां तां विनद्य च महास्वनम् ।
आयान्तीं ज्वलमानां तां दृष्ट्वा सौमित्रिरद्भुताम् । [65]

(for महत्). D4 तयोर्युद्धमभूद्घोरं सर्वलोकभयावहं. —(l. 67) D8 पिशितांतकरं. D1 om. घोरं. Ś D12 -वधैषिणः; Ñ V1.2 B1.4 D4.6 T2.3 -जयैषिणोः; B2.3 -जयैषिणौ (for -वधैषिणोः). —(l. 68) Ñ2 रामस्य; B3 (marg. also) राघवे (for लाघवं). D4 -ज्याघातम्; D6 T2.3 -संघातम् (for -व्याघातम्). —(l. 69) D8 आत्मानं. Ñ V1 D2.3 परिघातं (for प्रति°). V3 B4 रामः (for रक्षे). Ñ V1.3 B2–4 प्रचुक्षुभे (for न विव्यथे). —(l. 70) D3 om. शर-. Ñ1 B2 -सहस्रैस्तं; Ñ2 V1.3 B3.4 -सहस्रेण (for -शतैस्तीक्ष्णैर्). Ś1 D6.12 रावणं सं-; Ñ2 B4 प्रचिच्छेद; B3 व्यवच्छेद्य; D4 वक्षस्येव; D6 अविच्छेद- (for व्यवच्छेद-). Ñ2 V1 -परेरितैः (Ñ2 °तं); V2 -**कृतः; V3 -प्रवेपितैः; B2.4 -प्रचोदितैः (B4 °तः); B3 पुरे बभौ; D6 T2.3 -प्रवेशितैः (for -प्रवेगितैः). —(l. 71) V2 B1 D1–4.6.8 T2.3 राघवं (for राघवः). Ñ2 समर- (for परम-). V3 damaged from the post. half up to the prior half of l. 72. B2 D3.6.8 T3 स (for सु-). Ś D12 प्रविव्याध (for विव्याध सु-). D6 महारथः (for -महाबलः). —V1 om. l. 72. —(l. 72) D6 T2.3 च मही (for पृथिवी). D8 कृत्स्ना (for सर्वा). Ñ B2–4 संचचाल दशग्रीवः (for the prior half). Ñ V3 B2–4 क्रुद्धश्चैव महाबलः (for the post. half).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

बिभेद शरजालेन नानास्त्रैश्च महास्त्रवैः ।
ततः संचिन्त्यमानस्तु रावणोऽमितविक्रमः ।
अजेयं लक्ष्मणं ज्ञात्वा महामायामचोदयत् ।
मायां प्रयुज्य रक्षेन्द्रो धनुराकृष्य वीर्यवान् ।
ववर्ष शरजालानि लक्ष्मणे वानरान्विते । [70]
खड्गपाशासिमुसलैर्भिन्दिपालैः परश्वधैः ।
भित्त्वा सर्वायुधैः सर्वानन्तरं प्राप्य रावणः ।
किमेति मम कार्यं स्यादिति प्राह स बुद्धिमान् ।
मरणं मम रामेण श्लाघ्यमित्यवधार्य सः ।
श्रियं निभूतिं राज्यं च ऐश्वर्यं जीवितं तथा । [75]
तत्याज्य रावणः संख्ये निहते राक्षसे बले ।

53

After 6.87.6, Dn ins. :

चिन्तयित्वा महावीरस्तस्थौ राक्षसत्तमः ।
स प्रविश्य पुरीं राजा राक्षसो दीनमानसः ।
स्मृत्वा तु तौ महावीर्यौ कुम्भकर्णनरान्तकौ ।
देवान्तकमिन्द्रजितं कुम्भकर्णसुतावुभौ ।
अतिकायं त्रिशिरसं प्रकम्पनमहोदरौ । [5]
एवमेते महावीर्याः कुमारा मद्विनैषिणः ।
राक्षसांस्तांस्तदा स्मृत्वा महाकायान्सहस्रशः ।
क्षीणशेषं हतं दृष्ट्वा आत्मसर्वार्थसाधनम् ।
राजा राक्षसमुख्यानां रावणो वाक्यमब्रवीत् ।
न देवैर्न च गन्धर्वैर्न यक्षैर्न च पन्नगैः । [10]
तत्तपो दारुणं घोरं मया तप्तं पुरा तदा ।
तपस्तप्यमानस्य प्रधावयति मारुतः ।
आदित्यो निष्प्रभश्चैव मन्दतेजा हुताशनः ।
अपुष्पा फलदा वृक्षाः मन्दसस्या मही तदा ।
नक्षत्राणि न भासन्ते न च वर्षति वासवः । [15]
प्रज्वलन्ति दिशः सर्वा उल्कापाताः समन्ततः ।
पशवः पक्षिणश्चैव निर्विकारा महीतले ।
नद्यश्च प्रतिकूलं हि वहन्ति न हि संशयः ।
दृष्ट्वा महत्तपो घोरं संभ्रान्तश्च पितामहः ।
देवदेवो विमानेन समायातः पितामहः । [20]
उवाच च गुरुः श्रीमान्स हि सर्वैर्दिवौकसैः ।
अन्तरिक्षेऽब्रवीद्वाक्यं पद्मयोनिः पितामहः ।
हंहो राक्षसराजेन्द्र महाबलपराक्रम ।
उग्रे तपसि च त्वत्तः परितुष्टोऽस्मि सुव्रत ।
देवताः क्षोभमापन्ना दृष्ट्वा ते तपसो बलम् । [25]
तदृष्ट्वा ते महाघोरं माहात्म्यं तपसो महत् ।
तदर्थमिह संप्राप्तः किं वरं ते ददाम्यहम् ।
पद्मयोनिवचः श्रुत्वा रावणो वाक्यमब्रवीत् ।
यक्षाणां च महर्षीणां सुराणां प्रवरो गुरुः ।
त्वं ममानेन तपसा प्रीतो यदि पितामह । [30]
दशवर्षसहस्राणि तोषितश्च महेश्वरः ।
परितुष्टश्च देवेशो वरमेनं प्रयच्छ मे ।

Lacuna

सुरासुरगणैश्चैव यक्षराक्षसपन्नगैः ।
अवध्यः सर्वभूतानां त्वत्प्रसादाद्भवाम्यहम् ।
इच्छामि च वशीकर्तुं लोकांस्त्रीन्समहेश्वरान् । [35]
अद्यैतदीप्सितं कामं वरं दातुं त्वमर्हसि ।

Lacuna

मम श्रुत्वा वचो देवो वाक्यमेतदुवाच ह ।
एते विद्याधराद्यास्ते यत्त्वया समुदाहृताः ।
एवमस्तु महावीर्य यत्त्वया समुदाहृतम् ।
मानुषस्य च वध्यश्चेन्न खल्वन्यस्य कस्यचित् । [40]
श्रुत्वा वै वचनं तस्य ब्रह्मणश्चैव बुद्धिमान् ।
पश्यतां भगवान्ब्रह्मा सुराणां प्रवरो गुरुः ।
मानुषे मम का शङ्का भक्ष्या ये मानुषा मम ।
एवं मे वचनं दत्त्वा लङ्केश्वर्यैऽभिषिच्य च ।
गच्छ रावण भद्रं ते लङ्का नाम पुरं प्रति । [45]
विश्वकर्मा ससर्जान्यां यां सकाञ्चनतोरणाम् ।
तरुणादित्यसंकाशां सर्वकामदुहां पुरीम् ।
तत्र त्वमीश्वरश्रेष्ठो राक्षसान्पालयिष्यसि ।
ततः प्रणम्य देवेशं लङ्कां प्रतिगतं मम ।
पद्मयोनिश्च तद्दत्त्वा ययौ दिवमनुत्तमम् । [50]
भूयो मया महादेव ईश्वरः परितोषितः ।
पुनरेव मया छिन्नं शंकराय निवेदितम् ।
तथान्यानि सहस्राणि निकृत्तानि शिरांसि मे ।
दशमं तु शिरश्छित्त्वा तदेवाय निवेदितम् ।
ततः स भगवान्देवः सहदेवो महेश्वरः । [55]
उवाच वचनं मां वै तुष्टोऽहमिति रावण ।
दशग्रीव इति ख्यातो लङ्केशस्त्वं भविष्यसि ।
यत्त्वया मम भक्तानां शिरश्छित्त्वा निवेदितम् ।
यत्त्वया बलवत्कार्यं सुदुष्करमिदं कृतम् ।
ब्रूहि राक्षसराज त्वं किं वरं ते ददाम्यहम् । [60]
ततः प्रणम्य शिरसा मया प्रोक्तो महेश्वरः ।
कृत्वा प्रणामं दत्तानि शिरांसि च मया पुनः ।
गन्धर्वेष्वप्यवध्योऽहं भवेयं हि महेश्वर ।
एवमस्तु महावीर यत्त्वया समुदाहृतम् ।
सर्वेष्वङ्गेष्ववध्यस्त्वं मम वध्यो भविष्यसि । [65]
न जानीमश्च दुर्धर्षमिहायातः स पूर्वकृत् ।
ये विष्णुना हता लोका येषां लोके मनः स्फुटम् ।
यदि निर्यातयिष्यामि सीतां वै जनकात्मजाम् ।
तदा न हन्याद्वै रामः सूर्यवंशसमुद्भवः ।
भ्राता मे परुषाण्युक्तः कनीयान्सर्वधर्मवित् । [70]
तथापि बोध्यमानोऽहं धर्मज्ञेनानुजेन वै ।
सीता प्रदीयतां साध्वी स च रामः प्रसाद्यताम् ।
इत्येवं वदतस्तस्य मया न वचनं कृतम् ।
प्रिया चैव मयाज्ञेन तथा मन्दोदरी हता ।
सोऽयं देवाधिदेवस्य परं पारपरायणम् । [75]
येन सृष्टास्त्रयो देवाः ससुरासुरपन्नगाः ।
तेन पूर्वविरोधेन दृष्ट्वा देवो महाद्युतिः ।
दिष्ट्या देवगृहात्प्राप्तो विष्णुर्देहान्तरं गतः ।
** हन्ति प्रियां चैव मया यज्ञे च शासितः ।
सोऽहं कालवशात्प्राप्तो मानुषाद्भयमागतः । [80]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

मूढेन च हृता बाला मया लङ्कां प्रवेशिता ।
जनकस्य सुता सीता रामपत्नी यशस्विनी ।
इयं त्रैलोक्यनाथस्य रामस्य महिषी प्रिया ।
अवलिप्ते न मे शान्तिस्त्रैलोक्येऽपि भविष्यति ।
इत्येवं चिन्तयानेन नैव निर्यातितालयम् । [85]
भ्राता च परुषाण्युक्तः कनिष्ठोऽयं विभीषणः ।
कुम्भकर्णो हतो भ्राता दूषणश्च निपातितः ।
विद्युज्जिह्वो महावीर्यः शङ्कुकर्णो यमस्तथा ।
हतो निकुम्भो कुम्भश्च प्रहस्तश्च महाबलः ।
एते चान्ये च बहवो रामेण निहता रणे । [90]
निष्प्रधानीकृता लङ्का रामेणाक्लिष्टकर्मणा ।
बालवृद्धावशेषा तु साट्टप्राकारतोरणा ।
किमहं क्वचिदात्मानं त्ववगच्छामि रावणम् ।
सोऽहं रक्षोगणैर्युक्तः प्रजानामिव संक्षयात् ।
सर्वथा तु विनष्टोऽहं कः कालस्य व्यतिक्रमः । [95]
प्राकृतस्येव नीचस्य बुद्धिर्विक्लवसंगता ।
अविषादेन धैर्येण बुद्धिर्भवति शोधना ।
अद्यप्रभृति सर्वांश्च सदेवासुरमानुषान् ।
समन्तात्सर्वभूतानि त्रीँल्लोकान्ससुरासुरान् ।
यदि चेन्द्रसहस्राणि शंकराणां शतानि च । [100]
विष्णूनां च सहस्राणि पितामहशतानि च ।
कोटीनां वानराणां च सहस्राणि शतानि च ।
विष्णूनां यदि वा कोट्यो रामरूपेण संस्थिताः ।
यमो दण्डश्च कालश्च रुद्रश्चापि स्वयं भवेत् ।
मत्कार्मुकविनिर्मुक्तैः शरैराशीविषोपमैः । [105]
वैवस्वतपुरं घोरं सर्वानेव नयाम्यहम् ।
अद्य गोमायवो गृध्रा ये चान्ये मांसैः शरार्दितैः ।
यमपुरगमनोत्सुकानथैता-
न्कपिवृषभान्विनिहत्य तौ प्रसह्य ।
स्वपुरनिशिचरांश्चिरं समेता- [110]
न्रुधिरवशाभिहतं नयामि तृप्तिम् ।

इत्यार्षे रामायणे लङ्काकाण्डे युद्धपर्वणि रावणक्रोधवाक्यं नाम सर्गः ।

उपविश्यासने मुख्ये रावणो राक्षसाधिपः ।
अब्रवीन्मन्त्रिणौ वीरौ भ्रातरौ शुकसारणौ ।
कल्पयध्वं रथं शीघ्रं धनुरानीयतां च मे ।
चन्द्रहासमिमं क्षिप्रं देवदत्तशरांश्च तान् । [115]
आह्वानं राक्षसानां तु ये विशिष्टा हितैषिणः ।
रथैर्ध्वजैः समुन्नद्धा वाजिभिश्चाशु विक्रमैः ।
निर्यान्तु मम सैन्यानि संनद्धकवचानि च ।
द्रुतमाज्ञां ततो दत्त्वा रावणो लोकरावणः ।
चिन्ताशोकसमाविष्टो दशग्रीवो महाबलः । [120]
तत्तस्य वचनं श्रुत्वा रावणस्य निशाचराः ।
कल्पयन्तो रथं शीघ्रं दशनन्दं प्रमाणतः ।
वज्रवैडूर्यसंछन्नं जाम्बूनदविभूषितम् ।
इन्द्रनीलसमं चैव कूबरं चात्र संस्थितम् ।
तपनीयमयं दिव्यं हुतार्चिर्ज्वलनोपमम् । [125]
उच्छ्रितध्वजकेतुं च राजकेतनभूषितम् ।
सर्वरत्नमयं चित्रं नानाशिल्पविभूषितम् ।
नानावर्णविकारैश्च पताकाभिरलंकृतम् ।
ध्वजैश्च विविधाकारैरुच्छ्रितैः रोमहर्षणैः ।
निवासं सर्वभूतानामद्भुतानां निदर्शनम् । [130]
आवासः सर्वरत्नानां स्रजां च निलयं महत् ।
उदयन्तमिवादित्यं शक्त्याभ्रशिखरोपमम् ।
कल्पितं तु रथं दृष्ट्वा देवताः क्षोभमागताः ।
गन्धर्वाप्सरसश्चैव विद्रवन्ति स्म किंनराः ।
एकादशैव रुद्राश्च आदित्या द्वादशैव तु । [135]
अष्टाविंशतिनक्षत्राण्यष्टौ च वसवस्तथा ।
गताः सर्वे सुवित्रस्ता मेदिनी च प्रकम्पिता ।
दृष्ट्वा रथवरं तस्य रावणस्य दुरात्मनः ।
युक्तं वाजिसहस्रेण रथानां हेममालिनाम् ।
षष्टी रथसहस्राणि रथानां सपताकिनाम् । [140]
चत्वारिंशत्सहस्राणि कुञ्जराणां बलीयसाम् ।
चतुर्दशसहस्राणि सारोहाणां तु वाजिनाम् ।
तिस्रो राक्षसकोट्यस्तु पदातीनां तदा रणे ।
एवं न्यवेदयंस्तस्य सज्जं रथवरं प्रभोः ।
शतं सुयुक्तं शतसूर्यवर्चसं [145]
सहस्रधारं शशिकान्तिसंनिभम् ।
महाभ्रमेघप्रतिमं सुनिःस्वनं
महायुधं वासवसंचरोपमम् ।
सविद्युदिन्द्रायुधदाममुज्ज्वलं
नानासुघण्टाशतशब्दनादितम् । [150]
समग्रकेतूज्ज्वलचारुचामरं
तदोपनिन्युः सचिवा महारथाः ।

इत्यार्षे रामायणे लङ्काकाण्डे युद्धपर्वणि रावणरथकल्पनो नाम सर्गः ।

रावणस्तु महाबाहुः स्नातः शुचिपरायणः ।
शुक्लाम्बरधरो वीरो गृहीत्वा दधिमत्रकम् ।
मन्त्रिभिश्चानुगच्छद्भी रथं तूर्णमुपागतम् । [155]
दधिमत्स्वक्षतांश्चैव शुक्लपुष्पं तथैव च ।
बलिं करोति रक्षस्तु तस्मिन्रथवरोत्तमे ।
अन्वालभत तानश्वान्घृतेन मधुना सह ।
शृङ्खलानि च गायन्ते रथेषु तु पताकिषु ।
कपिला हेमशृङ्गाश्च ब्राह्मणेभ्यो ददौ तदा । [160]
सुवर्णशतसाहस्रं तिलान्सर्पिस्तथैव च ।
चालयित्वा च विप्राणामभिवाद्य च रावणः ।
जयशब्दं सुमहता पुण्याहं च जयाशिषः ।
इत्येवमुच्चैरुच्चुस्ते ब्राह्मणा वेदपारगाः ।
गत्वा च भवनं विप्राः प्रतिगृह्य प्रतिग्रहम् । [165]
शान्तिं सुमहतीं चक्रू रक्षःश्रेयस्करां तदा ।
रावणोऽपि महाबाहू रथं कृत्वा प्रदक्षिणम् ।
स आरुह्य रथं दिव्यं खुराग्रे वाजिनां प्रति ।
रावणः क्रोधसम्पन्नो जगर्ज च मुहुर्मुहुः ।
कवचं बबन्ध वीरो रावणो युद्धलालसः । [170]

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

वृतो जनपदैस्तत्र नानारत्नविभूषितः।
न बबन्ध च संनाहं रावणो भीमविक्रमः।
अब्रवीद्राक्षसांस्तत्र समीपे समवस्थितान्।
अद्य रामं ससुग्रीवं लक्ष्मणं सविभीषणम्।
वानरेन्द्रांश्च तान्सर्वान्हनूमन्तं तथाङ्गदम्। [175]
केसरिं पनसं चैव गन्धमादनमेव च।
तान्हत्वा कङ्कगृध्राश्च ये चान्ये मांसभोजनाः।
सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्दितैः।
रावणस्य वचः श्रुत्वा सारथिर्वाक्यमब्रवीत्।
आरुोह रथं दिव्यमास्थाय जहि शात्रवम्। [180]
आरूढः स्यन्दनं दिव्यं रावणः पश्यते तदा।
कृष्णाभ्रसदृशाकारां रक्तवस्त्रधरां तदा।
पाशदण्डधरा चैव पुराग्रे विद्यते बलम्।
कृष्णवस्त्रधरां चैव स्त्रियं पश्यति दारुणाम्।
गृहीतं तु तथात्मानं पश्यते कालदेशितः। [185]
कालग्रासो न जानीते नीयमानः स रावणः।
पश्यते च महावीरो ध्वजाग्रं गृध्रसंकुलम्।
कम्पते च महाबाहुर्नग्नश्चाप्यभवत्पुनः।
श्वापदांश्चैव तत्रस्थान्रावणः पश्यते तदा।
अपश्यद्वापि तां नारीमपश्यत्करसंवृताम्। [190]
स्वार्तां च बर्हिणं त्रस्तं श्वेतपक्षं च वायसम्।
स दृष्ट्वा तान्युत्पातानि रावणो दैन्यमागतः।
देशकालमनुप्राप्तं वाक्यं चेदमुवाच ह।
अहो दारुणमेतद्धि निमित्तमिह दृश्यते।
यदि जीवाम्यहं तत्र शाश्वतं मम जीवितम्। [195]
ततस्ते राक्षसाः सर्वे मां प्रत्यावेदयन्मुहुः।
मङ्गलैस्तूयमानास्तु गच्छन्ति रणसागरम्।
ततः पश्चात्सुमहती पृतना प्रस्थिता तथा।
प्रच्छाद्य महतीं भूमिं प्रययौ येन रावणः।
ततः प्रजविताश्वेषु रथेषु रथिनां वरः। [200]
कुञ्जरैस्तु सुसंनद्धा गच्छन्ति दिशमुत्तराम्।
नानाकवचसंनद्धा नानाप्रहरणैर्युताः।
ततो निमेषमात्रेण राक्षसाः कामरूपिणः।
नदन्ति क्रीडमानाश्च ***** दारुणम्।
वादित्रेण विचित्रेण नादस्तत्र इतस्ततः। [205]
राक्षसानां निनादेन कुञ्जराणां च बृंहितैः।
शङ्खभेरीरवैश्चापि कम्पयित्वा वसुंधराम्।
प्रयातास्तत्र वेगेन सागरस्योर्मयो यथा।
नीलपीतपताकाभिश्चामरापीडधारिभिः।
वाहनानामनीकानि योधानां वै समन्ततः। [210]
विचित्रकवचाः सर्वे नानाप्रहरणायुधाः।
सर्वे शूरा महावीर्याः सर्वे च जितकाशिनः।
काङ्क्षमाणा जयं सर्वे ते सर्वे युद्धलालसाः।
हस्त्यश्वरथपत्तीनां नर्दतां निःस्वनेन च।
स्यन्दनस्य च घोषेण पूरयामास रोदसी। [215]
महाभटै राक्षसजातदर्पै-
राक्ष्वेडितास्फोटितसिंहनादैः।
निष्क्रम्य राजामरराजशत्रु-
र्ययौ तदायोधनभूमिमुग्राम्।
अतिबलभरतनि** तदा [220]
***** ज्वलिताश्च बाणजिह्वाः।
समरमभिमुखा युयुत्सवस्ते
दशशिरसा सह यान्ति राघवाय।
इत्यार्षे रामायणे लङ्काकाण्डे रावणनिर्याणं नाम सर्गः।
निर्यातं रावणं दृष्ट्वा राक्षसैर्बहुभिर्वृतम्।
रामश्च लक्ष्मणश्चैव वानराश्च महाबलाः। [225]
अभीयुर्निर्भयाः सन्तो यत्रासौ राक्षसाधिपः।
राक्षसास्तु महावीर्या हस्त्यश्वैश्च रथैस्तथा।
आह्वयंश्च समन्ताच्च अन्योन्यं समरोत्सुकाः।
वानराश्च तथा शूराः शिलावृक्षायुधास्तथा।
गर्जन्तस्तु समन्ताच्च सम्यग्लीना महाबलाः। [230]
राक्षसाश्च भृशं क्रुद्धा निजघ्नुर्वानरर्षभान्।
प्रभिन्नकरटैर्घोरैर्नदद्भिश्च प्रहारिभिः।
स्वलंकृतैर्बद्धतूणैर्नदद्भिश्च महास्वनैः।
नानाशस्त्रधरा वीरा मेघा इव सविद्युतः।
तुरंगखुरविध्वस्तरथनेमिसमुद्धतम्। [235]
कण्ठान्यरौत्सीद्योधानां चक्षूंषि च महीरजः।
रुधिरार्द्रां महीं चक्रुस्तदा दारुणकर्दमाम्।
सा मही रुधिरौघेण प्रच्छन्ना संप्रकाशते।
संछन्ना माधवे मासि पलाशैरिव पुष्पितैः।
कबन्धाश्च समुत्पेतुस्तस्मिन्युद्धे सुदारुणे। [240]
बभूवायोधनं घोरं गोमायुरुतसंकुलम्।
शोणितेपुमहातोयां यमसागरगामिनीम्।
शरीरसंघातवहा मुमुचुः फेनिलापगाः।
असृग्दानमहापङ्कां विकीर्णकेशशैवलीम्।
छिन्नकायशिरोमीनां बद्धावयवशर्करीम्। [245]
गृध्रहंसबकाकीर्णां कङ्कसारसनादिताम्।
मातंगरथकूलाश्च समरे च ध्वजद्रुमाः।
मेदफेनचयाकीर्णां योधस्वनितनिःस्वनाम्।
तां कापुरुषदुस्तारां युद्धभूमिं महानदीम्।
व्यगाहन्त तदा वीरा हरिराक्षसपुंगवाः। [250]
ततो युद्धं महाघोरं वर्तते कपिरक्षसाम्।
अन्योन्यं जघ्निरे वीराः सिंहा इव महाबलाः।
सुग्रीवश्चाङ्गदश्चैव हनूमाञ्जाम्बवांस्तथा।
केसरी पनसश्चैव नलो दधिमुखः कपिः।
गोलाङ्गूला महाकाया विक्रान्ता बलशालिनः। [255]
गजो गवाक्षो गवयः शरभो गन्धमादनः।
मैन्दश्च द्विविदश्चैव बहवो वानरा रणे।
राक्षसैर्द्वंद्वमापन्नाः सर्वे जयहितैषिणः।
धावन्तश्चैव गर्जन्त आह्वयन्तश्च राक्षसान्।
सर्वे किलकिलाशब्दा वायुविक्रमवेगिनः। [260]
सुग्रीवेण सुसंरब्धा मैन्देन द्विविदेन च।
कुमुदेन गवाक्षेण शरभेण च राक्षसाः।
अङ्गदेनापि संरब्धा रामेण सह रावणः।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तदा समरसंक्षोभे द्वंद्वयुद्धमुपागतः।
तथा युद्धं महाघोरं रामरावणयो रणे। [265]
राक्षसाश्च महाघोरा नानाकवचदंशिलाः (ताः?)।
शरवर्षं विमुञ्चन्तो नर्दन्तश्च महास्वनाः।
वानराश्च महावीर्याः शैलवृक्षायुधोद्यताः।
ततः समभवद्युद्धं घोरं च कपिरक्षसाम्।
विस्मिता देवताः सर्वाः सविद्याधरचारणाः। [270]
दैत्यदानवगन्धर्वा यक्षरक्षोमहोरगाः।
पुष्पवर्षं ततोऽमुञ्चन्साधु साधिवति चाब्रुवन्।
अदृष्टं विहितं युद्धमेवं च परिरक्षते।
बभूव तुमुलं युद्धं कबन्धचयसंकुलम्।
रामेण सह संरब्धो रथस्थो राक्षसेश्वरः। [275]
मुमोच शरवर्षाणि रामे दशरथात्मजे।

अभिनच्च रथं रामः सपताकाध्वजं तथा।
स रथो राक्षसेन्द्रस्य रामेणाभ्याहतः शरैः। [5]
साश्वसारथिनोपेतः सध्वजः पतितो भुवि।
पदातिर्नष्टसंज्ञश्च कृतो वै रक्षसां पतिः।
रथस्य पतनं दृष्ट्वा रावणो लोकरावणः।
निमेषान्तरमात्रेण सज्जमन्यद्रथोत्तमम्।
आरुरोह ततः शीघ्रं रावणो राक्षसाधिपः। [10]
मायया निहितैर्बाणै रामं विव्याध संयुगे।
मोहनं शोषणं चैव प्रस्वापनविलापनम्।
गान्धर्वनर्तनं चैव निद्रामोहनमेव च।
रामलक्ष्मणगात्रेषु रावणो राक्षसाधिपः।
निचखान ततो बाणान्सर्वगात्रेषु राक्षसः। [15]
दिव्यास्त्रदारिताङ्गस्तु राघवो विह्वलस्तथा।
अस्त्रेण मोहनेनाशु मुह्यते रघुनन्दनः।
संतापनेन बाणेन रामः संताप्यते तदा।
गान्धर्वेण तदास्त्रेण नृत्यते रघुनन्दनः।
निद्रापनेन बाणेन निद्रां गच्छति राघवः। [20]
नर्तनेन तथास्त्रेण नृत्यते रघुनन्दनः।
मोहनेन तथास्त्रेण मुह्यते च पुनः पुनः।
विषण्णवदनस्तत्र किंचिद्रामे सुविह्वले।
अविषादे मनः कृत्वा हनूमानङ्गदस्तथा।
जाम्बवांश्च महावीर्यो लक्ष्मणश्च धनुर्धरः। [25]

53

Note hiatus between the two halves of l. 8, l. 135 and l. 228. —l. 107 post. half hypm. —l. 121–122 are repeated consecutively. —For l. 242–248, cf. 6.46.23–27.

54

(l. 1) V3 om. वै. Ñ1 D4.13 प्रावृट्काले यथा मेघो (for the prior half). —V3 damaged from the post. half up to l. 2. B4 जल- (for धारा-). Ñ2 विमुंचते; D4 प्रमुंचति. —(l. 2) Ñ1 V2 D4.13 महात्मा वै; B2.3 महाबाहुर् (for महात्मा तु). D13 शर- (for बाण-). V1 D13 विमुंचति (for व्यमुञ्चत). Ñ1 V2 शरवर्षाणि मुंचति; D4 शरवर्षाण्यमुंचत (for the post. half). —Ñ1 V2 B2 (repeats) D13 read l. 3; Ñ2 reads l. 3–4 after l. 40. —(l. 3) Ñ1 V2 B2 (second time) D13 रावणं पर्वतोपमं; V3 गगनान्मंदरं यथा (for the post. half). —For l. 3, D4 subst.:

1* ततः शरसमूहैश्च द्यां भूमिं च समावृणोत्।

—Ñ1 V2 D13 om. l. 4. —(l. 4) Ñ2 अभिनत्तं. B2 अभिनत्स रथं वीरः; D4 अच्छिनच्च रथं तस्य (for the prior half). V1 B2.3 सपताक- (for सपताका-). —After l. 4, B2.3 (in marg.) ins. 2000*. —B3 reads in marg. l. 5–33 (including colophon). —(l. 5) V2 B3 [अ]भिहतः (for [अ]भ्याहतः). —(l. 6) B2.3 D13 साश्वः. —(l. 7) D13 पदा विष्णो नष्टसंज्ञो (for the prior half). —D13 om. from the post. half up to the prior half of l. 8. B2 [s]सौ (for वै). —(l. 9) B2 अन्यं (for अन्यद्). D13 संज्ञां लब्ध्वा (for सज्जमन्यद्). —(l. 10) D13 रथं (for ततः). D13 राक्षसेश्वरः. —V2 B3 (both hapl.) D13 om. l. 11–14. —(l. 11) Ñ2 निहतैर्; B2 विततैर् (for निहितैर्). —(l. 12) B2 -विलापने (for -विलापनम्). —(l. 13) Ñ2 B2 गांधर्व. B2 प्रसंगविह्वले तथा (for the post. half). —(l. 14) B2 रामलक्ष्मणयोर्गात्रे (for the prior half). —(l. 15) Ñ2 B2 विचखान (for निः). —(l. 16) V2 B3 विफलस् (for विह्वलस्). B3 तदा (for तथा). Ñ2 D13 विह्वलो राघव- (Ñ2 °क्षस)स्तदा (for the post. half). —(l. 17) B3 आह्वयन् (for अस्त्रेण). D13 [अ]भिहतेन (for मोहनेन). B3 मुह्यति (for मुह्यते). —(l. 18) D13 संतप्तेनेन (for संतापनेन). Ñ1 V2 संतप्यते; B3 संतप्स्यते; D13 संतपते (for संताप्यते). —(l. 19) Ñ1 D13 तथा (for तदा). Ñ1 दूयते; V2 गीयते; B3 मुह्यति (for नृत्यते). Ñ1 V2 B3 नंदिवर्धनः (for रघुनन्दनः). D13 कौसल्यानंदवर्धनः (for the post. half). —(l. 20) B3 निद्रायोगेन; D13 निद्रायितेन (for निद्रापनेन). —(l. 21) D13 नर्तकेन (for नर्तनेन). B2 तदा (for तथा). B3 नृत्यति; D13 हन्यते (for नृत्यते). —Ñ2 om. l. 22. —(l. 22) B2 तदा. B3 मुह्यति (for मुह्यते). —(l. 23) Ñ1 V2 B3 -वदनास् (for -वदनस्). D13 किंचिन्मोहेन विह्वलः (for the post. half). —After l. 23, B3 ins.:

2* वानरानीकपतयस्तथैवासन्सुविह्वलाः।

—(l. 24) D13 अविध्यद्दशभिः क्रुद्धो (for the prior half). Ñ1 B3 D13 तदा (for तथा). —(l. 26) B2.3 एकायनं (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एकाधीनं समाधाय युद्धमेव प्रचक्रमुः ।
विभीषणस्तु तत्त्वज्ञश्छिद्रान्वेषणतत्परः ।
अविषादेन धैर्येण विषण्णान्वानरर्षभान् ।
सान्त्वयामास तेजस्वी मायाविनि दशानने ।
स बलरणपराक्रमैर्महात्मा [30]
वरदबलैर्बहुभीषणैः सुतीक्ष्णैः ।
क्षतजविकृतमवेक्ष्य रामभद्र
दशवदनोऽपि कृतार्थतामुपैति ।

Colophon

राघवं विकृवं दृष्ट्वा लक्ष्मणः संनिवर्तितः ।
बालचन्द्रनिभं कृत्वा विकटं तद्दुरायुधम् । [35]
आह तं स महानादैरथ धैर्येण कर्कशम् ।
अद्य ते कण्ठनिःशीर्णं मही पास्यति शोणितम् ।
मत्कार्मुकविनिर्भिन्नस्त्वमद्य न भविष्यसि ।
एवं स परुषाण्युक्तः शरवर्षं व्यमुञ्चत ।
पृथिवीं चान्तरिक्षं च शरवर्षनिरन्तरम् । [40]
अन्धकारीकृतं बाणै रथमार्गं न दृश्यते ।

55

After Sarga 6.88, $D_{3.4.9}$ $T_{2.3}$ ins. :

स निश्वसन्निसहहतो यथा गजो
रणाजिरे राघवसायकार्तः ।
गरुत्मतेवाहिपतिर्विनिर्जितो
विवेश लङ्कां विनिकीर्णभूषणः ।
स्मरन्स पथ्यं वचनं समीरितं [5]
महात्मना मन्त्रविनिर्णये पुरा ।
विभीषणेनात्मकुलस्य शान्तये
स्मरन्स रामस्य महास्त्रमोक्षणम् ।
स कुम्भकर्णं निहतं तदा रणे
तथातिकायं रणचण्डविक्रमम् । [10]
महाबलं शक्ररिपुं च पातितं
निर्वेदमानो विलपन्क्षितिं गतः ।
स लब्धसंज्ञो विलपन्नघूत्तमा-
त्कुलस्य नाशं प्रसमीक्ष्य रावणः ।
महाबलस्यातिबलस्य रावणः [15]
स्मरन्नमोघामिषुजालसंततिम् ।
विलप्य स चिरं राजा रावणो भीमविक्रमः ।
अन्तःपुरं ततो गत्वा इदमाह सुदुःखितः ।
रणे रामस्य कर्माणि चिन्तयानो मुहुर्मुहुः ।

एकाधीनं). B_2 समाधत्त (for समाधाय). D_{13} एकधा दशधा चैव (for the prior half). B_3 प्रचक्रमे. —(l. 27) V_2 $B_{2.3}$ D_{13} च (for तु). B_3 तत्त्वरतु; D_{13} धर्मज्ञः (for तत्त्वज्ञश्). D_{13} संयुगे तत्परोभवत् (for the post. half). —(l. 28) D_{13} अतिगाढेन (for अविषादेन). —(l. 29) $\tilde{N}_1$ V_2 B_3 मायैषेति (for मायाविनि). D_{13} स्वयमेव परंतपः (for the post. half). —(l. 30) B_2 D_{13} स्वबलबल- (for स बलरण-). V_2 B_3 स्वबलपराक्रमविक्रमैर्महात्मा. —(l. 31) B_2 विशिखवरैर्; B_3 om. (for वरदबलैर्). D_{13} वरदघोरैर्विभीषणैः सुतीक्ष्णैः. —(l. 32) $\tilde{N}_2$ V_2 om. विकृतम्. $\tilde{N}_1$ अवेत्य; B_3 om. (for अवेक्ष्य). D_{13} क्षतजनितनिकृत्यमेत्य रामं. —(l. 33) D_{13} रघुकुलतिलकं विनिवर्तितः परं च.

Colophon : V_2 om. —*Kāṇḍa name*: B_4 om. $\tilde{N}$ B_2 D_{13} लंकाकांडे. —*Sarga name*: $\tilde{N}$ B_3 प्रथम($\tilde{N}_1$ °मं)द्वंद्वयुद्धं; B_2 द्वंद्वयुद्धं; B_4 प्रथमद्वंद्वः; D_{13} युद्धपर्वणि द्वंद्वयुद्धं. —*Sarga no.* (figures, words or both): $\tilde{N}_1$ B_{2-4} D_{13} om.; $\tilde{N}_2$ 82.

—B_3 om. l. 34–41. D_{13} om. l. 34. —(l. 34) B_2 संनिवर्तत (for संनिवर्तितः). —(l. 35) $\tilde{N}_2$ दृष्ट्वा (for कृत्वा). B_2 तं (for तद्). D_{13} वरायुधं (for दुरायुधम्). —(l. 36) $\tilde{N}_1$ आहूतं स; D_{13} आह्लादयन् (for आह तं स). $\tilde{N}_2$ illeg. for धैर्येण. V_2 अथ धैर्यवि-; B_2 D_{13} रावणं बल- (D_{13} रण-) (for अथ धैर्येण). —(l. 37) $\tilde{N}_2$ -निः **; V_2 B_2 -निर्गीर्णं; D_{13} -निर्यातं (for -निःशीर्णं). D_{13} बाणः (for मही). —(l. 38) D_{13} ममास्त्र-जालसंपन्नः (for the prior half) and पतितस्त्वं (for त्वमद्य न). —(l. 39) B_2 D_{13} उक्त्वा (for उक्तः). B_2 बाण- (for शर-). $\tilde{N}_1$ प्रमुंचति; D_{13} अमुंचत (for व्यमुञ्चत). —$\tilde{N}_2$ om. l. 40–41. —(l. 40) V_2 अंतरीक्षं; B_2 चांतरीक्षं (for चान्तरिक्षं). $\tilde{N}_1$ -वर्षैर् (for -वर्ष-). —(l. 41) D_{13} अंधकारं (for अन्धकारी-). $\tilde{N}_1$ D_{13} -मार्गे (for -मार्गं). —Thereafter, D_{13} cont. :

3* तस्य सैन्यं महाघोरं रावणस्य महाबलम् ।
नाशयामास बाणौघैर्लक्ष्मणः परवीरहा ।

55

(l. 1) D_3 निःश्वसन्. D_9 T_3 -गतो (for -हतो). D_4 महा-; D_9 *था (for यथा). —(l. 2) $D_{3.4}$ -बाहु(D_4 °ण)पीडितः; D_9 -बाणमर्दितः (for -सायकार्तः). —(l. 3) D_3 गरुत्मता सर्प इवाभिमर्दितो. —(l. 5) D_9 $T_{2.3}$ पश्यन् (for पथ्यं). D_4 महात्मनां (for समीरितं). —(l. 6) D_9 नीतिविनिर्णयः (for मन्त्रविनिर्णये). D_3 तदा (for पुरा). D_4 समीरितं मंत्रविनिश्चये पुरा. —(l. 7) D_4 -हितेन (for -कुलस्य). D_3 विभीषणेनाद्भुतभीमकर्मणा. —(l. 8) D_9 -मोक्षं (for -मोक्षणम्). D_3 स्वपक्षपक्षक्षयकृत्स रावणः. —(l. 9) D_3 स्मरंस्तदा; T_2 तथा रणे (for तदा रणे). —D_3 om. (hapl.) l. 11–14. —(l. 11) D_4 नि- (for च). —(l. 12) D_9 निर्वेदमायाद् (for निर्वेदमानो). D_4 निर्वेदबाणव्यथितः क्षितिं गतः. —(l. 13) D_4 विलपंतमेव (for विलपन्नघूत्तमात्). —D_9 om. l. 15–16. —(l. 15) D_3 [अ]तिविघातिनो रणे; D_4 [अ]पि च विप्रियं स्मरन् (for [अ]तिबलस्य रावणः). —(l. 16) D_3 -पद्धतिं (for -संततिम्). D_4 रणेन मोघं शरजालसंवृतं. —(l. 17) D_3 विलपित्वा (for विलप्य स). —For l. 17, D_4 subst. :

1* विलप्य चैवं विरराम रावणो
महाबलो राक्षसभीमविक्रमः ।

—(l. 18) Note hiatus between the two halves.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

—(l. 65) B₃ कृतं (for कृत्य-). G (ed.) हृतभार्यस्तु रामोऽपि दुःखसंमूढचेतनः. —(l. 66) B₃ G (ed.) अग्निसाक्षिकपूर्वेण (G [ed.] °र्वं च) (for the prior half). —(l. 70) G (ed.) च (for तु). —(l. 72) D७.९ रक्षोनुजेन; G (ed.) राज्ञा नयेन (for राज्ञानुजेन). —(l. 74) G (ed.) क्षतः (for हतः). —(l. 75) B₃ च (for तु). —(l. 76) B₃ महौषधी. —(l. 77) B₃ आदिष्टो (for यास्यामि). D₉ तां गृहीत्वैव गच्छामि (for the prior half). B₃ यामि राघव सत्वरः (for the post. half). —Ñ₂ om. l. 78. —(l. 78) B₃ आमुहि; G (ed.) अस्तु च (for आश्वस). —(l. 79) B₃ वचो घोरं (for सुघोरं च). Ñ₂ बहु- (for वज्र-). —(l. 81) B₃ हा राम हा लक्ष्मण हा (for the prior half). —(l. 82) G (ed.) -कृतावास and अज- (for जन-). —(l. 83) G (ed.) धिङ्माता मम कैकेयी (for the prior half). —(l. 84) B₃ प्राप्तवान् (for गतवान्). —(l. 86) B₃ अमात्यं (for अमर्षं). —(l. 88) B₃ युक्तं (for व्यक्तं). Ñ₂ दुःकृत-; G (ed.) दुष्कर-. B₃ मयि पापानुकारिणं (for the post. half). —(l. 89) D₉ ओषध्या सह वेगतः (for the post. half). —(l. 90) B₃ घातयिष्यामि (for पात°). —G (ed.) om. l. 91–97. —(l. 93) B₃ [इ]ह (for [इ]व). —(l. 94) B₃ हतपुष्पज्वलांगारे (for the prior half). —(l. 95) B₃ संख्ये (for शङ्ख-). —(l. 96) B₃ -महाध्याने (for -महाज्वाले). —(l. 98) Ñ₂ हुतं (for हितं). —(l. 99) G (ed.) प्रव्रजयंत्या. —(l. 100) B₃ अहो सुदुःसहं पापं (for the prior half). B₃ मयि (for मम). —(l. 102) Ñ₂ हनूमान्. G (ed.) [इ]ति (for हि). —G (ed.) om. l. 103–105. —(l. 104) D७.९ अद्य (for एव). —(l. 105) B₃ om. हि (subm.). B₃ तद् (for त्वद्) and सु- (for च). —(l. 106) D७.९ एवं लालप्यमानं तं (for the prior half). Ñ₂ B₃ (*sup. lin.* also as above) राघवं (for भरतं). —(l. 107) B₃ वानरोत्तमः (for मारुतात्मजः). —Ñ₂ om. l. 108. —(l. 110) G (ed.) वीरं (for रामं). —(l. 111) B₃ -पुरं (for -पुरीं). —(l. 113) D७.९ अन्यतरस् (for धन्य°). —B₃ reads l. 114 in marg. —(l. 116) B₃ एवमाश्वासयति (hypm.); D७ एवमाश्वासति. G (ed.) एवमाश्वासयति तं (for the prior half). —(l. 119) B₂ (reads from तदा up to the post. half in marg.).₃ तदा (for ततः). B₂.₃ प्रहः (for प्राज्ञः). D७ मारुतिः. B₂ (before corr.) भरतो दीनमानसः (for the dost. half). —(l. 120) B₂ परिष्वज्य. B₂ [अ]थ; B₃ हि

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

उवाच भरतं प्राज्ञः स तदा गमनोत्सुकः ।
यास्यामि कैकयीमातर्लक्ष्मणस्यार्थसिद्धये ।
विशल्यानयने वीर मामनुज्ञातुमर्हसि ।
एवमुक्तो हनुमता भरतो दीनमानसः ।
जगाम मनसा रामं वाचा चैव च मारुतिम् । [125]
कामं मद्वचनाद्गत्वा विज्ञाप्यो राघवस्त्वया ।
अभिवादनपूर्वं हि स्मरेथा मम राघव ।
त्वदनुस्मरणाद्राम कूर्माणामिव बालकाः ।
सान्त्वयन्ति मम प्राणा देहे प्राणभृतां वर ।
गच्छ शीघ्रं महाबाहो लक्ष्मणार्थे महाजव । [130]
विशल्यामानय क्षिप्रमेतत्कार्यं हितं मम ।
अवश्यमेव चाप्नोति रामः पुण्यसुखोदयम् ।
न तत्र रहितं किंचिद्यत्र सन्ति भवादृशाः ।
एवमुक्तस्त्वनुज्ञातो भरतेनानिलात्मजः ।
जगाम भरतं कृत्वा प्रदक्षिणमरिंदमः । [135]
भरतोऽपि महाबाहुर्गते वानरसत्तमे ।
अनन्तरं समुद्योगं कर्तुमारभत प्रभुः ।
उद्योगं कारयामास भरतः कैकयीसुतः ।
दूतान्प्रस्थापयामास राज्ञां विक्रमशालिनाम् ।
दूतान्प्रस्थापयामास काशेयाय प्रतर्दने । [140]
दूतान्संप्रेषयत्क्षिप्रं जनकाय महात्मने ।
कैकयेषु स दूतान्स मातुलाय युधाजिते ।
अन्येषामपि राज्ञां स दूतान्प्रस्थापयत्तदा ।
रामस्य विजयार्थाय रावणस्य वधाय च ।

58

After 6.89.16, D4.9 T2.3 ins.; Ś D8.12 ins. l. 1–32 only after 6.89.16; D2 ins. l. 13–17 and l. 21–32 after l. 106 of App. I (No. 56):

समुद्रं त्वमतिक्रम्य लवणोदं महोदधिम् ।
कुशद्वीपमतिक्रम्य क्षीरोदं च महार्णवम् ।
तस्मादुत्तरतो भागे क्षीरोदस्य हरीश्वर ।
संस्थानिकौ महादिव्यौ विशालौ तावतिष्ठतौ ।
चन्द्रश्च नाम्ना द्रोणश्च पर्वतौ तौ महोदधौ । [5]
अमृतं यत्र मथितं तत्र जाता महौषधिः ।
तत्र गन्धर्वराजानो रक्षन्ति गिरिमुत्तमम् ।
तैश्चापि सह योद्धव्यं गन्धर्वैर्युद्धकोविद ।
बहुमार्गेषु तिष्ठन्ति राक्षसाः कामरूपिणः ।
अप्रमत्तेन गन्तव्यं त्वया वीर महाबल । [10]
लक्षत्रयं योजनानां शतानि नव पञ्च च ।
यातव्यं वीर चाध्वानं द्विगुणं तु गतागतैः ।
यावन्न हीयते रात्रिर्यावन्नोत्तिष्ठते रविः ।
तावत्त्वया महाबाहो आगन्तव्यं महाजव ।
निशाक्षये तु निर्वृत्ते उदिते तु दिवाकरे । [15]
भवन्ति ता महावीर ओषध्यो मन्दरश्मयः ।
लक्ष्मणोऽपि विनश्येत नियतं शर्वरीक्षये ।
ओषधीनां च चिह्नानि कथयामि महाकपे ।

(for च). —(l. 121) B2.3 प्रह्वः (for प्राज्ञः). —(l. 122) Ñ2 D7 कैकेयी-. —(l. 123) D9 विशल्यां संगृहीत्वैव (for the prior half). —(l. 124) G (ed.) -वत्सलः (for -मानसः). —(l. 125) B3 तु (for second च). G (ed.) उवाच चैव मारुतिं (for the post. half). —(l. 128) B2.3 तद्- (for त्वद्-). —(l. 129) B2.3 देह- (for प्राण-). —(l. 130) Ñ2 D9 -[अ]र्थं (for -[अ]र्थे). —(l. 131) D9 त्वं नय (for आनय). Ñ2 तत्कार्यं हि (for एतत्कार्यं). —(l. 132) B2 कुशलं (for चाप्नोति) and भविष्यति महात्मनः (for the post. half). —(l. 133) D9 om. न (subm.). B2 चाहितं (for र°). —(l. 137) B2 आरब्धवान् (for आरभत). D9 प्रभुं (for प्रभुः). —G (ed.) om. l. 138–139. —(l. 138) Ñ2 D7 कैकेयी-. —Ñ2 om. (hapl.) l. 139. —B2.3 om. (hapl.) l. 140. —(l. 140) G (ed.) स धीमते (for प्रतर्दने). —(l. 141) G (ed.) स (for सं-). Ñ2 D7.9 प्रेषयत (for संप्रेषयत्). —(l. 142) Ñ2 D7.9 कैकेयेषु. Ñ2 D7 सु-; B2.3 च (for first स). B3 प्रयच्छति (for युधाजिते). —(l. 143) B2 च (for स). G (ed.) प्रास्थापयत्.

58

(l. 1) Ś D8.12 समतिक्रम्य. D4 समुद्रपथमाक्रम्य (for the prior half). —(l. 2) Ś D8.12 क्षीरोदं च समुत्तीर्य कुश- (D12 सम)द्वीपमतीत्य च. —(l. 3) D9 उत्तरदिग्भागे. Ś D8.12 कुशद्वीपस्य वायु(D12 चानु)ज (for the post. half). —D9 om. l. 4. —(l. 4) D4 सुस्थलीकौ (for संस्थानिकौ) and शैलौ देवविनिर्मितौ (for the post. half). Ś D8.12 सुस्थलीकौ च दिव्यौ च विशालौ देवनिर्मितौ; L (ed.) संजीवकौ समौ दिव्यौ विशल्यौ देवनिर्मितौ. —(l. 5) Ś D4.8.12 महोदयौ (for °दधौ). D9 चंद्रो द्रोणश्च वैदेहः पर्वताः सुमहौषधाः. —(l. 6) Ś D8.12 विन्यस्तं (for मथितं). T2.3 यत्र (for तत्र). Ś D8.9.12 L (ed.) महौषधी(L [ed.] °धीः). —(l. 7) Ś D8.12 तं च (for तत्र) and रक्षंते शैलम् (for रक्षन्ति गिरिम्). —(l. 8) Ś D4.8.12 T3 युद्धदुर्म(T3 °कोवि)दैः. —(l. 9) Ś D8.9.12 बहुमायाश्च मार्गे तु(D9 °र्गेषु) (for the prior half). D4 बहुमाया समग्रेषु रक्षसां कामरूपिणां. —(l. 11) D9 दश (for नव). Ś D4.8.12 शतानि(D4 शतैश्च) दशभिर्दिश (for the post. half). —(l. 12) D9 गंतव्यं. D4 वीरमध्वानं (corrupt). Ś D8.12 यातव्यो वीर ते सोध्वा (for the prior half) and द्विगुणस् (for °णं). —(l. 13) Ś D8.9.12 क्षीयते; D2 हीयति (archaic); D4 जीर्यते (for हीयते). D2 निशा (for रात्रिर्). Ś D4.8.12 [उ]दयते; D9 [उ]त्पद्यते (for [उ]त्तिष्ठते). —(l. 14) D4 महाबल; D8 °नघ (for °जव). —(l. 15) Note hiatus between the two halves. Ś D8.12 तु संपन्ने; D2.4.9 निवृत्ते तु (for तु निर्वृत्ते). D2.4 उत्थिते. D4 T2 च (for second तु). —(l. 16) Note hiatus between the two halves. D9 औषध्यो. D4 -तेजसः (for -रश्मयः). Ś D2.8.12 (with hiatus) मंदवीर्यास्ततो(D2 °तेजास्तथा) वीर ओ-(D8 औ)षध्यो हि भवंति वै. —After l. 17, D4 ins.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

पीतलानि च पत्राणि फलानि हरितानि च ।
पुष्पाणि चैव तासां तु रक्तानि हरिपुंगव । [20]
त्वर वीर महाबाहो पार्थिवं मन्त्रयस्व च ।
विभीषणं च सुग्रीवं जाम्बवन्तमथाङ्गदम् ।
इत्युक्तस्तु सुषेणेन रामोऽप्येनमथाब्रवीत् ।
गच्छ वीर महाभाग भ्रातृभिक्षा प्रदीयताम् ।
चतुर्णामेव भ्रातॄणामस्माकं पञ्चमो भवान् । [25]
एवमुक्तस्तु हनुमान्नादमुच्चैर्ननाद ह ।
येन सा चलिता लङ्का क्षुभितश्च महोदधिः ।
पतितं पुष्पवर्षं च दुंदुभिश्चाहतो दिवि ।
प्रणिपत्य ततो राममब्रवीद्वायुनन्दनः ।
देव मा विक्लवं गच्छ मयि भृत्ये च तिष्ठति । [30]
किं तु शैलवनोपेतां सप्तद्वीपां वसुंधराम् ।
क्रमित्वा पुनरायास्ये यावन्नोत्तिष्ठते रविः ।
ततो रामः समालिङ्ग्य मारुतिं स महाबलः ।
प्रेषयामास तं रात्रौ वैनतेयमिवाच्युतः ।
पृष्ठं ते पवनः पातु मूर्धानं ते शतक्रतुः । [35]
वदनं भास्करः पातु चरणौ हव्यवाहनः ।
चन्द्रस्ते मानसं पातु बाहू देवो जनार्दनः ।
पुच्छं महेश्वरः पातु कण्ठदेशं तु चण्डिका ।
गणेशो ह्युदरं पातु गिरं पातु सरस्वती ।
बलं ते वरुणः पातु बुद्धिं देवी तु पार्वती । [40]
इत्यादिभिः प्रशस्ताभिरभिनन्द्य रघूत्तमः ।
प्रियोऽसीत्येव तं प्राह हनूमन्तं महाजवम् ।
ततः स वीरः पवनात्मजोऽपि
प्रणद्य भीमं घनवद्घनाभः ।
पद्भ्यां निहत्याशु महीधरं जवा- [45]
त्समुत्पपाताद्भुतहेमरूपः ।
उद्यम्य बाहूरगराजकल्पौ
पुच्छं समुद्यम्य तडित्प्रकाशम् ।
विकुञ्च्य कर्णौ चरणौ च वेगा-
ज्जगाम नाराच इव प्रमुक्तः । [50]
ततो गिरीन्गह्वरकूटदेशा-
न्नदीनदान्सागरकाननानि ।

1* विलम्बना न कर्तव्या शीघ्रं गच्छ हरीश्वर ।

—(l. 18) D8.9 औषधीनां. Ś D8.12 तु (for च). —(l. 19) D4 शीतलानि; D9 पित्तलानि. Ś D4.8.12 तु (for first च). T2 तलानि च सु- (for शीतलानि च). —(l. 20) D9 T2.3 तेषां (for तासां). D9 हरितानि च (for हरिपुंगव). —After l. 20, D4 ins.:

2* एवं चिह्नं मया सर्वं कथितं ते महाबल ।

—(l. 21) D2 यदि त्वं (for पार्थिवं). Ś D8.12 राममामंत्रयस्व च; D4 लक्ष्मणं जीवय स्वयं (for the post. half). —(l. 22) D4.8 स- (for च). D4.9 च सां(D9 तथां)गदं (for अथाङ्गदम्). D2 अंगदं जांबवं तथा (for the post. half). —(l. 23) Ś D2.8.12 एवमुक्ते(D2 °क्तः; D8 °क्तं); D4 इत्युक्तं च. Ś D8.12 T3 [ए]वमथ; D2 [ए]व तथा (for [ए]नमथ). —(l. 24) D4 शीघ्रं (for वीर). Ś D2.4.8.9.12 महाबाहो (for °भाग). Ś D2.8.12 भ्रातृभिक्षां ददस्व मे (for the post. half). —(l. 25) D4 अथ (for एव). L (ed.) भव (for भवान्). —(l. 26) L (ed.) [ऽ]थ (for तु). D4 नादान्. D4.9 च (for ह). Ś D2.8.12 नादं चक्रे(D2 इदमूचे) कपीश्वरः (for the post. half). —(l. 27) D2 तेजसा चालिता लंका (for the prior half). D9 क्षुभिता and चलितश् (for चलिता and क्षुभितश् respy.). —(l. 28) D9 [अ]र्दितो (for [आ]हतो). D4 पतंति पुष्पवर्षाणि दुंदुभ्यश्च हता दिवि. —(l. 29) D4 वचनं चेदमब्रवीत् (for the post. half). —(l. 30) Ś D8.12 वैक्लव्यं गच्छ मा देव (for the prior half). Ś D8.9.12 [ऽ]व- (for च). —(l. 31) Ś D8.12 अहं (for किं तु). D9 -वनोद्देशां. Ś D2.4.8.12 ससागरां (for वसुंधराम्). —(l. 32) Ś D2.8.12 आगच्छे (for आयास्ये). D4 L (ed.) महीमतीत्य गच्छेयं(L [ed.] °त्यागमिष्ये) (for the prior half). Ś D8.12 उत्तिष्ठते (for नोत्तिष्ठते). —After l. 32, Ś D2.8.12 ins.:

3* रामस्तु पुनरेवेदमुवाच पवनात्मजम् ।
त्वर वीर स्वया गत्या आनयस्व महौषधीः ।
स्वस्ति तेऽस्तु महासत्त्व गच्छ पात्रं प्रसादय ।
एवमुक्तस्तु रामेण सुग्रीवेणाङ्गदेन च ।
सुवेलमधिसंरुह्य क्रमित्वा वायुनन्दनः । [5]
तत्रोत्प्लुत्य गतो वीर उपर्युपरि सागरम् ।

[(l. 2) Note hiatus between the two halves. —(l. 3) Ś1 मां त्वं; Ś2 D2 यात्रां (for पात्रं). D2 प्रसाधय. —(l. 5) D2 -संहृत्य (for -संरुह्य). L (ed.) संपीड्याप्लुत्य चांबरं (for the post. half). —(l. 6) D2 त्वरितं गच्छते वीर; L (ed.) जगाम त्वरया श्रीमान् (for the prior half). D2 सागरात्.]

—Thereafter they cont. l. 119–290 of App. I (No. 56).

—(l. 34) D4.9 यथा हरिः(D9 रविः) (for इवाच्युतः). —(l. 35) D4 om. second ते (subm.). —(l. 37) D4 त्वन्मानसं. —After l. 37, D4 ins.:

4* ऊरू पातु सुरश्रेष्ठो देवस्त्रैलोक्यपूजितः ।

—(l. 38) D4 पृष्ठं (for पुच्छं). D9 कटि- (for कण्ठ-). D4 -देशे च. —(l. 39) D4 उदरं (for ह्युदरं). —(l. 40) D4 वक्षं (for बलं) and च (for तु). —(l. 41) D4 आशीर्भिः स (for अभिनन्द्य). —(l. 42) D4 प्रयाहि (for प्रियोऽसि). D4 महोज्ज्वलः; D9 महाबलं (for महाजवम्). —(l. 43) D4 बली (for ऽपि). —(l. 44) D9 प्रकाशभीमं. D4 विनद्य भीमो घनवर्धनाक्षः. —(l. 45) D4 पद्भ्यां निपीड्याशु महीधराधरां. —(l. 46) D4 खम् (for सम्-) and -घोर- (for -हेम-). D9 समं त्वथोत्पत्य महीधराभः. —(l. 47) D9 गज-; T3 नग- (for [उ]रग-). —(l. 48) D4 समुद्भूय (for °द्यम्य). —(l. 49) D9 निकुंच्य. —(l. 51) D4 मंदर- (for गह्वर-). —(l. 52) T2 -नगान् (for -नदान्). —(l. 53) D4 समुद्रान्सुर-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ग्रामान्समृद्धान्पुरदुर्गमार्गा-
न्ददर्श शाखामृगयूथनाथः ।
पक्वानि पर्णानि फलानि कामं [55]
जगाम पश्यन्सहसा हिमाद्रिम् ।
तं शैलराजं विपुलं विलङ्घ्य
प्रयाति वीरो हनुमानुदीचीम् ।
तस्मिन्गते वानरयूथनाथे
संजीवनार्थं युधि लक्ष्मणस्य । [60]
ज्ञात्वा गतं राक्षसराजधान्यां
चाराः प्रणम्योचुरथेन्द्रशत्रुम् ।
संप्राप्य रावणं रात्रौ चारास्ते संभ्रमान्विताः ।
कथयामासुरेकान्ते राघवस्य विचेष्टितम् ।
राजन्नितो गतो वीरो हनूमान्क्षीरसागरम् । [65]
आनयिष्यत्यतः शीघ्रमोषधीर्देवनिर्मिताः ।
यत्कार्यं तव राजेन्द्र तत्कुरुष्वाविलम्बितम् ।
इदं घोरं वचः श्रुत्वा रावणो दूतभाषितम् ।
पर्यङ्के चिन्तयामास किं कर्तव्यं भवेन्मम ।
ततो ययौ गृहाद्रात्रौ स गृहं कालनेमिनः । [70]
एकाकी गुप्तमार्गश्च चन्द्रहासधरः स्वयम् ।
तत्रस्थाः पुरुषा ये च नार्यश्च गृहमण्डनाः ।
भयात्पतन्ति वित्रस्ताः कालोऽयमिति चागतः ।
कालनेमी च तं दृष्ट्वा रावणं गृहमागतम् ।
कृताञ्जलिरुवाचेदं दशग्रीवं महाद्युतिः । [75]
अर्घ्यादिकं ततः कृत्वा रावणस्याग्रतः स्थितः ।
किं ते करोमि राजेन्द्र किमागमनकारणम् ।
चतुर्मुखं चतुर्बाहुं चतुर्दंष्ट्रं महाजवम् ।
चतुःशृङ्गमुवाचेदं राक्षसं कालनेमिनम् ।
हा कष्टमिति निश्वस्य लङ्काधिपतिराकुलः । [80]
मम तच्छृणु यत्कार्यं प्राप्तोऽहं तव मन्दिरम् ।
शक्त्या हतो मया वीरो लक्ष्मणो रणमूर्धनि ।
तं संजीवयितुं यातो हनूमान्क्षीरसागरम् ।
ओषध्यर्थं महाबाहो यत्र तौ वरपर्वतौ ।
चन्द्रश्च नाम्ना द्रोणश्च तयोर्जाता महौषधिः । [85]
तां च नेतुं प्रयातश्च व्रज पूर्वं विहायसा ।
हनूमतोऽस्य विघ्नं त्वं कर्तुमर्हसि कानने ।
येन कालात्ययस्तस्य तच्छीघ्रं संविधीयताम् ।
कुरु चैवैनमथवा विघ्नं हनुमतः पथि ।
तमहं कथयिष्यामि शृणु येन करिष्यसि । [90]
तस्मिन्द्रोणगिरेः पार्श्वे महत्तिष्ठति काननम् ।
तत्र रम्यं सरः पुण्यं देवदानवनिर्मितम् ।
तस्मिन्सरसि दुर्धर्षा मकरी ग्राहरूपिणी ।
तस्याग्रतो न जीवेत यद्यपि स्यात्पुरंदरः ।
अन्यस्य का कथा जन्तोर्वानरस्य नरस्य हि । [95]
यथा तस्मिञ्जले याति हनूमांस्त्वत्समन्वितः ।
तथा त्वया विधातव्यं मायया परयानघ ।
गच्छ शीघ्रमितो वीर त्वदन्यः कोऽपि नास्ति मे ।
रक्षसां मरणे बन्धो जीवितं त्वय्यधिष्ठितम् ।
तत्र गत्वा महाबाहो मायया कुरु चाश्रमम् । [100]
ऋषिरूपधरो भूत्वा आतिथ्यनिरतो भव ।
यत्र सा वसति ग्राही अमोघा प्राणहारिणी ।
देवता अपि गृह्णाति का संज्ञा वानरस्य तु ।
तत्र त्वयैष हन्तव्य उपायेन प्लवंगमः ।
हनूमतो विनाशेन लक्ष्मणो न भविष्यति । [105]
लक्ष्मणस्य विनाशे तु रामोऽपि न भविष्यति ।
रामस्य तु विनाशे तु सुग्रीवो न भविष्यति ।
सुग्रीवस्य विनाशे तु अङ्गदो न भविष्यति ।
अङ्गदस्य विनाशे तु क्षयं यास्यन्ति वानराः ।
ध्रुवमस्माज्जयो वीर गच्छ शीघ्रं महाबल । [110]

(for समृद्धान्पुर-). —(l. 54) D₄ -नाथत्यक्तः (for -यूथनाथः). —(l. 56) D₄ पश्यन्गतोसौ (for जगाम पश्यन्). —(l. 57) D₉ om. (hapl.) विपुलं. —(l. 58) D₉ वेगाद् (for वीरो). —(l. 61) D₄ रावण- (for राक्षस-). —(l. 62) D₄ चराः (for चाराः) and [ई]शभृत्यं (for [इ]न्द्रशत्रुम्). —After l. 62, D₄.₉ ins. an addl. colophon [*Kāṇḍa name*: D₄ लंका°. —*Sarga name*: D₄ हनुमद्गमनं. —*Sarga no.*: D₄ om.; D₉ 79.]. —(l. 63) D₄ उत्थाप्य; D₉ संवाद्य (for संप्राप्य). D₄ चरास् (for चारास्). T₃ रावणान्विताः. —(l. 65) D₉ वायुनंदनः (for क्षीरसागरम्). —(l. 66) D₄ [अ]सौ (for [अ]तः). D₉ आनयिष्यन्गतः (for °ष्यत्यतः). D₄ T₃ औषधीर्. —(l. 67) D₄ यत्कृत्यं (for यत्कार्यं). D₉ [अ]विचिंतयन् (for [अ]विलम्बितम्). —(l. 69) D₉ सपर्य (corrupt) (for पर्यङ्के). D₄ कथं कार्यं (for किं कर्तव्यं). —(l. 70) D₄.₉ तदोत्थाय ययौ रात्रौ (D₉ गृहाच्छीघ्रं) (for the prior half). D₉ तद् (for स). —(l. 71) D₄ गुप्तमार्गेण. —(l. 73) D₉ अतीव (for पतन्ति). D₄ भय-प्रलीनास्तं दृष्ट्वा (for the prior half). D₉ कुतो (for कालो). —(l. 75) D₄ कृतांजलिम् (for °ञ्जलिर्) and महामतिः (for °द्युतिः). —D₄.₉ om. (hapl.) l. 78. For Kālanemi episode cf. No. 56. —(l. 79) D₄ -शीर्षम् (for -शृङ्गम्). —(l. 81) D₄.₉ [अ]पि (for तच्). —(l. 82) D₄ महा- (for मया). —(l. 83) D₄ स तं; D₉ तं तु (for तं सं-). —D₄.₉ om. l. 84–86. —(l. 85) T₂ महौषधीः. —(l. 86) T₂ ताश् (for तां). —(l. 87) D₄ वै (for त्वं). —(l. 88) D₄ शीघ्रं च स (for तच्छीघ्रं सं-). —(l. 89) D₄ कुरु त्वमेवार्थं बाढं (for the prior half). D₉ om. पथि. —(l. 90) D₄ उपायं (for तमहं). D₉ कथयिष्यामि हनुमते (hypm.) (for the prior half) and येन विघ्नं (for शृणु येन). D₄ भविष्यति (for करिष्यसि). —(l. 91) D₉ -गिरौ पार्श्वमनु (for -गिरेः पार्श्वे महत्). —(l. 92) D₄ रम्यसरः. —After l. 93, D₄.₉ ins.:

5* तिष्ठत्यमरवृन्दानि भक्षयन्ति गजानपि ।

—(l. 95) D₄.₉ वा (for हि). —(l. 96) D₉ यदा (for यथा) and वने (for जले). D₉ सत्त्वसंयुतः (for त्वत्समन्वितः). —(l. 97) D₉ तदा (for तथा). D₄.₉ मोह्य वानरं (for परयानघ). —(l. 99) D₄ रक्ष मे मरणं बंधो (for the prior half). D₄ च त्वयि स्थितं; D₉ त्ववस्थितं (subm.) (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

अर्धराज्यं प्रदास्यामि कृते कर्मणि राक्षस ।
रावणस्य वचः श्रुत्वा कालनेमीत्युवाच तम् ।
राक्षसेन्द्र ब्रवीम्येतच्छृणु तत्संप्रधारय ।
त्वत्प्रियं च करिष्यामि न प्राणान्धारयाम्यहम् ।
मारीचस्य यथा जातं दण्डके मृगरूपिणः । [115]
तथैव मे न संदेहो भविष्यति दशानन ।
खरश्च दूषणश्चैव जम्बुमाली च राक्षसः ।
अक्षस्तव सुतो धीमानिन्द्रजिच्च महाबलः ।
कुम्भकर्णात्मजौ द्वौ तु निकुम्भः कुम्भ एव च ।
मकराक्षः खरसुतो दूषणो रणमूर्धनि । [120]
एते चान्ये च बहवो राक्षसा भीमविक्रमाः ।
अत्रैव निहताः सर्वे वसतस्तव रावण ।
एतान्विघातयित्वा तु पुत्रान्पौत्रांश्च बान्धवान् ।
राज्येन जीवितेनाथ किं करिष्यसि सीतया ।
सीतां प्रयच्छ रामाय राज्यं चैव विभीषणे । [125]
वनं याहि महाबाहो रम्यं कैलासमेव वा ।
युध्यस्व वा रणे वीर राघवेण महात्मना ।
विदार्यमाणो बाणौघैस्त्रिदिवं गन्तुमर्हसि ।
इति तस्य हितं वाक्यं रावणः कालनेमिनः ।
श्रुत्वा खड्गं विनिर्धूय कोपात्तं हन्तुमुद्यतः । [130]
संभाष्य रावणं रात्रौ कालनेमीत्युवाच तम् ।
एष गच्छामि राजेन्द्र पन्थानं घोरमद्भुतम् ।
प्रस्थाप्य तं महाराजो रावणो गृहमागतः ।
प्रदध्यौ तत्र संविग्नः कथं कार्यं भवेन्मम ।
कालनेमी च वेगेन ततो हनुमतः पुरा । [135*]

मायया स ऋषिर्भूत्वा तस्मिन्महति कानने ।
आश्रमं कल्पयामास कदलीवनसंकुलम् ।
सालतालतमालाद्यैश्चूतवृक्षैः समन्वितम् ।
वेदाध्ययनसम्पन्नैः शिष्यैः सर्वत्र मण्डितम् ।
चित्राभिर्दीपमालाभिः शोभितं वल्कलैः शुभैः । [140]
पुष्पोपहारैर्विविधैर्धूपैश्चागरुमिश्रितैः ।
फलैर्मनोहरैः पुष्पैः सर्वं तद्योजनायतम् ।
आज्यधूमाकुलं दीप्तं सर्वप्राकारतोरणम् ।
वैरभावविनिर्मुक्तं शुद्धं निर्मललक्षणम् ।
अस्मिन्महाश्रमे दिव्ये कालनेमी स राक्षसः । [145]
अग्निहोत्रेण दिव्येन उपवासकृशोदरः ।
जटामण्डलभारेण चीरवल्कलसंवृतः ।
दीर्घश्मश्रुधरो भूत्वा तस्थौ जाप्यपरायणः ।
गृह्याक्षमालां हस्तेन तस्यागमनकाङ्क्षया ।
हनूमानपि तेजस्वी समुल्लङ्घ्य बहून्गिरीन् । [150]
तमाश्रमं ददर्शाथ स्वस्थो भूतलमण्डनम् ।
तर्कयामास तं दृष्ट्वा कस्यैतद्वनमुत्तमम् ।
वैरभावविनिर्मुक्तमाकर्षति मनो मम ।
किं वा मार्गभ्रमो जातो मम वेगेन गच्छतः ।
क्व काननं क्व वै मेरुः क्व च वै गन्धमादनः । [155]
क्षीराब्धिः क्व च वै ह्यत्र कुतो द्रोणगिरिः स्थितः ।
विभ्रमो मम किं ह्यत्र कुतश्च द्रुममण्डलम् ।
प्रागयं दृष्टमार्गस्तु दृश्यते नाश्रमो मया ।
अथवा किं कृतकेन नमस्कार्यो महामुनिः ।
पीत्वोदकं ह्यस्य गृहे संपृच्छ्याद्य व्रजाम्यहम् । [160]

त्वय्यधिष्ठितम्). —D4.9 om. l. 100–111. —Note hiatus between the two halves of l. 101, 102 and 108. —(l. 112) D9 कालनेमिरुवाच तं (for the post. half). —(l. 113) D4 तात; D9 तत्त्वं; T3 तत्तु- (for तत्सं-). —(l. 114) D4 प्राणांश्च (for न प्राणान्). —(l. 115) D4 दंडे (for जातं). —(l. 116) D4 तथायं मम देहोपि; D9 तथा भव निःसंदेहो (for the prior half). D9 न कार्यस्ते (for भविष्यति). —(l. 119) D4 तौ तु; D9 द्वौ च (for द्वौ तु). —(l. 120) D4 दुर्धरो; D9 धूम्राक्षो (for दूषणो). —(l. 122) D4 संख्ये पश्यतस् (for सर्वे वसतस्). —(l. 123) D4 वै (for वि-) and [अ]थ (for तु). D9 भ्रातॄंश् (for पौत्रांश्). —(l. 124) D4.9 T3 जीवितेनापि(T3 °द्य). —(l. 126) D4 च (for वा). —(l. 127) D4 *sup. lin.* त्वं (for वा). —(l. 128) D4 दिवं वा (for त्रिदिवं). —(l. 130) D9 रोषात् (for श्रुत्वा). —(l. 131) D4 प्रणम्य (for संभाष्य). D9 प्रहरंतं तु पौलस्त्यं (for the prior half). D4 कालनेम्यभ्युपस्थितः (for the post. half). —(l. 132) D4 (with hiatus) उद्यानं (for पन्थानं). —(l. 133) D4 महातेजा (for °राजो) and आगमत् (for आगतः). —(l. 135) D4 तु (for च). D4 गतो (for ततो) and पुरः (for पुरा). —(l. 136) D4 मायामय- (for मायया स). —(l. 137) D9 आशु वै (for आश्रमं) and -संयुतं (for -संकुलम्). —(l. 138) D4 शाल- (for साल-). D9 तालशाल-. D4 बहुवृक्ष- (for चूतवृक्षैः). —After l. 138, D4 ins.:

6* स्वाहाकारस्वधाकारवषट्कारनिनादितम् ।

—(l. 140) D4.9 दीपमालाविचित्राभिः (for the prior half). D9 पवित्रैरुपशोभितं (for the post. half). —(l. 141) D9 बहुभिर् (for विविधैर्). D4 [अ]गुरु-. —(l. 142) D4 पक्वैर् (for पुष्पैः) and वृतं योजनमायतं (for the post. half). —(l. 143) D4 स्वर्णमहा- (for दीप्तं सर्व-). D9 सर्वेषां च मनोहरं (for the post. half). —(l. 144) D4 -[अ]समायुक्तं (for -विनिर्मुक्तं). D9 वैराजादपि निर्मुक्तं (for the prior half). D4 शुद्ध-. —(l. 145) D4.9 तस्मिन् (for अस्मिन्). D9 कालनेमिः. T3 च (for स). —Note hiatus between the two halves of l. 146. —For l. 146–149, D4.9 subst.:

7* दम्भयोगं समास्थाय चकार शिवपूजनम् ।
[D9 इंद्रयागं (for दम्भयोगं).]

—(l. 150) D4.9 गिरीन्बहून् (by transp.). —(l. 151) D9 -मंडले (for -मण्डनम्). D4 स्वस्थभूतसुमंडलं (for the post. half). —(l. 152) D4 कस्य चेदमृषेर्गृहं; D9 कस्य चैव मुनेर्वनं; T3 कस्यैतन्महर्षेर्वनं (unmetric) (for the post. half). —(l. 153) D4.9 पाप- (for वैर-). —(l. 154) D4 वै (for वा). —D4 om. l. 155–156. —(l. 158) T3 पुरायं (for प्रागयं). D9 [स]स्ति (for तु) and नाश्रमं च कदाचन (for the post. half). D4 न गृहं दृष्टमार्गोस्मि नाश्रमं विद्यते तदा. —(l. 159) D9 T3 नु तर्केण (for कुत°). —(l. 160)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

कथयिष्यत्यसौ विप्रो मम मार्गं न संशयः ।
मुनयः कोपशीलाश्च सापराधं शपन्ति हि ।
लक्ष्मणे पतिते वीरे भोजने मम का कथा ।
मुनिं प्रणम्य विप्राघ्र्यात्पीत्वाम्भः प्रचुरं लघु ।
प्रयास्ये राघवस्यार्थं विहाय फलसंचयम् । [165]
इति कृत्वा मतिं वीरो हनूमांस्तस्य रक्षसः ।
संविवेशाश्रमं रम्यं संक्षिप्य तनुमद्भुताम् ।
अपश्यदाश्रमं रम्यं कदलीषण्डमण्डितम् ।
ऋषिरूपधरं चैव तं चापश्यन्निशाचरम् ।
अभिवाद्य महावीर्यं राक्षसं पवनात्मजः । [170]
उवाच परमप्रीतः प्राञ्जलिर्गौरवेण तम् ।
भगवन्विद्धि मां प्राप्तं हनूमन्तं त्वदाश्रमम् ।
रामकार्येण महता क्षीराब्धिं गन्तुमुद्यतम् ।
तृषा हि बाधते तात उदकं कुत्र विद्यते ।
यथेष्टं पातुमिच्छामि कथयस्व ममानघ । [175]
एवमुक्तो हनुमता कालनेमीत्युवाच तम् ।
कमण्डलुजलं रम्यं मम त्वं पातुमर्हसि ।
भुङ्क्ष्व चेमानि पक्वानि फलानि तदनन्तरम् ।
अत्रैव तिष्ठ स त्वं च निद्रां कुरु मदन्तिके ।
भूतं भव्यं भविष्यच्च वर्तमानं च सर्वतः । [180]
जानामि तपसा सर्वं रामकार्यं विशेषतः ।
रामस्य भार्या वैदेही रावणेन हृता वनात् ।
सीतार्थं सागरो बद्धो वाली च निहतो बलात् ।
रुद्धा च लङ्का रामेण राक्षसा निहता रणे ।
कुम्भकर्णो हतो वीरो मेघनादो निपातितः । [185]

पुत्रशोकाग्नितप्तेन रावणेन बलीयसा ।
निहतो वीर शक्त्या च लक्ष्मणो मयदत्तया ।
तस्य संजीवनार्थाय तवागमनकारणम् ।
त्वं योजनसहस्राणि ह्यागतोऽसि महाजव ।
दूतेन राघवस्याद्य त्वया दृष्टोऽस्मि वानर । [190]
धर्महीना न पश्यन्ति मानवा मां महीतले ।
रामस्यापि मया कार्यं कर्तव्यं करुणात्मना ।
तव मन्त्रान्प्रदास्यामि ह्योषधीः साधयन्ति ते ।
अस्मिन्नेव वने दिव्ये ह्योषध्यः सन्ति जीवदाः ।
पूज्योऽसि मम वत्स त्वं गुणवानतिथिर्यथा । [195]
मम प्रसादाल्लङ्कां च क्षणेनैव गमिष्यसि ।
इति श्रुत्वा वचस्तस्य रक्षसो ब्रह्मरूपिणः ।
तं प्रणम्याह हनुमान्नात्र स्थातुं मयोचितम् ।
लक्ष्मणे निधनं याते मया किं तात भुज्यते ।
कमण्डलोर्जलेनापि मम तृप्तिर्न जायते । [200]
नदीनदजलं वापि तीर्थं वापि जलाशयम् ।
कथय स्वप्रसादेन पातुमिच्छामि तत्त्वतः ।
सूर्योदये हि मरणं लक्ष्मणस्य महात्मनः ।
इदं हनुमतः श्रुत्वा वचनं रजनीचरः ।
प्रहसन्विस्मितः प्राह याहि दिव्यं सरोवरम् । [205]
ममाश्रमस्य चैतस्य पूर्वस्यां दिशि राजते ।
तस्मिन्सरोवरे पुण्ये पिब वार्यमृतोपमम् ।
एते शिष्या गुणवन्तो दर्शयिष्यन्ति तत्सरः ।
मीलिताक्षेण पातव्यं त्वया तद्वारि वानर ।
ततस्त्वमक्षयो भूत्वा शुभां सिद्धिमवाप्स्यसि । [210]

D₄ गृहस्थस्य; T₃ यस्य गृहे. T₃ संपृष्ट्वा. D₉ [अ]त्र (for [अ]द्य). D₄ संगतेन मनोहरं (for the post. half).—(l. 161) D₉ वीरो (for विप्रो).—After l. 161, D₄.₉ ins.:

8* इति संचिन्त्य वेगेन गगनात्पवनात्मजः ।
निपपाताश्रमे तत्र फलानि समलोकयन् ।
अहो फलसमूहं तु न भक्षं मम साम्प्रतम् ।

[(l. 1) D₉ जवेन (for गगनात्).—(l. 2) D₉ [आ]श्रमं (for [आ]श्रमे) and मूलानि स विलोकयन् (for the post. half).—(l. 3) D₉ -समायुक्तं (for -समूहं तु) and मम भक्ष्यं च (for न भक्षं मम).]

—(l. 162) D₄.₉ तापसाः (for मुनयः). D₄ च (for हि).—(l. 163) D₄.₉ भोजनं मम वा कथं (for the post. half).—(l. 164) D₉ विज्ञाप्य (for विप्राघ्र्यात्). D₄ तस्मात्प्रणम्य पीत्वांभः प्रचुरं शीतलं लघु.—(l. 165) D₄ राघवस्याग्रे; D₉ रामकार्यार्थं.—(l. 167) D₄ स विवेश. D₉ [अ]द्भुतं (for [आ]श्रमं). D₄ स्वतनुं मतं (for तनुमद्भुताम्).—D₄.₉ om. l. 168–169.—(l. 170) D₄ महामार्गे (for °वीर्यं).—(l. 171) T₂.₃ प्रांजलिं.—(l. 173) D₄ यातुम् (for गन्तुम्).—(l. 174) Note hiatus between the two halves. D₄ मां (for हि). D₉ वर्तते (for विद्यते).—(l. 175) D₉ यथेच्छं (for यथेष्टं).—(l. 177) D₄ पुण्यं (for रम्यं). D₉ पातुमर्हसि सुव्रत (for the post. half).—(l. 178) D₉ भुक्त्वा (for भुङ्क्ष्व).—(l. 179) D₄ निद्रां च सुखं; D₉ त्वं वापि निद्रां (for स त्वं च निद्रां).—(l. 181) T₂.₃ तापसः (for तपसा).—(l. 184) D₄ तु (for च).—D₄ reads l. 185–186 twice.—(l. 185) D₄ (second time) लक्ष्मणेन (for कुम्भकर्णो).—(l. 187) D₄ लक्ष्मणो निहतो वीर (for the prior half) and शक्त्या च (for लक्ष्मणो).—(l. 188) D₉ त्वदागमन-.—(l. 190) D₄ मया दृष्टोसि (for त्वया दृष्टोऽस्मि).—(l. 191) D₄ च (for मां).—(l. 192) D₄ [उ]भयथा (for [अ]पि मया). D₉ कर्मणात्मना (for करुणा°).—(l. 193) D₄ च (for प्र-). D₄ ह्यौषधीः; D₉ (with hiatus) औषधीः.—(l. 194) D₉ तस्मिन् (for अस्मिन्). D₄ ह्योषधि संति जीवनीः (corrupt) (for the post. half).—(l. 198) D₄.₉ मम (for मया).—(l. 200) D₄ कमंडलु- (for कमण्डलोर्).—(l. 201) D₄ -सरो (for -जलं).—After the prior half of l. 201, T₂ erroneously repeats the post. half of l. 200 and the prior half of l. 201.—(l. 202) D₄ त्वं; D₉ त्वत्- (for स्व-). D₄ सत्वर (for तत्त्वतः).—D₄ om. l. 204. T₂ om. (hapl.) from the post. half of l. 204 up to the prior half of l. 212.—(l. 205) D₄ विस्मितं (for °तः).—(l. 206) D₄ नैकट्ये (for चैतस्य). D₄ भासते (for राजते).—(l. 207) T₃ रम्ये (for पुण्ये).—(l. 208) D₄ ते सरः; D₉ तत्त्वतः (for तत्सरः).—(l. 210) D₉ दिव्यां

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ओषध्यश्चापि वरदाः करिष्यन्ति तव प्रियम् ।
इदं प्रियं वचः श्रुत्वा विषवन्मधुमिश्रितम् ।
हनुमानुत्पपाताशु ततो दिव्यं सरः प्रति ।
स ददर्शाथ तद्दिव्यं सरः सर्वत्र शोभितम् ।
सुवर्णपद्मिनीजालैः कमलैः कुमुदैर्युतम् । [215]
मत्तभ्रमरसंघुष्टं पुण्डरीकैर्विराजितम् ।
नक्षत्रैर्निशि संपूर्णं शरदीव नभस्तलम् ।
तद्विगाह्य महावेगो हनूमान्पवनात्मजः ।
मीलिताक्षः पपौ तोयं मारुतिर्यूथपाग्रणीः ।
पिबन्तं तं समालक्ष्य ग्राही सा घोररूपिणी । [220]
ग्रहीतुकामा व्यात्तास्या जग्राह कपिकुञ्जरम् ।
चरणौ गिलितौ वेगात्तया वायुसुतस्य च ।
अधश्चकर्ष सा चोग्रमाचकर्ष च तं पुनः ।
हनूमांश्चिन्तयामास पङ्के मग्नोऽस्मि दारुणे ।
एवं संचिन्त्य वेगेन ह्यधः पुच्छं चकार सः । [225]
तस्याः पुच्छाग्रभागेन दन्तान्सर्वानपातयत् ।
कण्टकानिति विज्ञाय तीक्ष्णान्पङ्कसमुद्भवान् ।
तीक्ष्णाग्रनखनिर्भिन्ना जिह्वा तस्या द्विधाभवत् ।
ततोऽर्धं गिलिते काये तर्कयामास मारुतिः ।
किं करोमि कथं यामि रामकार्यं कथं भवेत् । [230]
मृते मय्यत्र सरसि रघुवंशो निपातितः ।
सुग्रीवः सह सैन्येन विनाशमनुयास्यति ।
मृतिं प्राप्स्यति वैदेही मयि पङ्के निमज्जति ।
भवत्वेवं करिष्यामि पौरुषं पण्डितो ह्यहम् ।
ततो हस्तेन संस्पृश्य मुखं तस्याश्च मारुतिः । [235]
हनूमता तदा ज्ञातं मकरीति न संशयः ।
अनयैवं गृहीते च मयि कार्यं कथं भवेत् ।
उदरेऽस्या निमज्ज्याशु निपतिष्यामि भूतले ।
ततो ह्रस्वं वपुः कृत्वा विविशे वायुनन्दनः ।
अन्धकारसमं घोरमुदरं स महामनाः । [240]
कुक्षौ प्रविष्टे प्लवगे ग्राही हर्षमुपागता ।
तं गिलन्ती गता मध्यं सरसः संभ्रमान्विता ।
हनूमानपि तेजस्वी तस्याः कुक्षिं गतस्तदा ।
अस्थीनि मांसमज्ञाणि सिराजालानि विच्छिदे ।
ततः सा वेदनाग्रस्ता ग्राही तोयमथापिबत् । [245]
भेकनक्रतिमिग्राहभुजंगमसमन्वितम् ।
मुखतो वारि दुर्धर्षमागतं प्रेक्ष्य मारुतिः ।
प्रावृट्काले तु संप्राप्ते पयःपूरमिवोल्बणम् ।
गले निरुद्धे सा ग्राही बभ्राम जलमध्यतः ।
ममोदरे प्रविष्टं तु भक्ष्यमेतत्सुदुर्जयम् । [250]
मरिष्यामि न संदेहो ह्युदरं स्फुटतीव मे ।
कुक्षिस्थोऽप्युत्पपातोर्ध्वं हनूमान्पवनात्मजः ।
मायापञ्जरसंरुद्धो राजहंसो यथाभवत् ।
भूतलं प्रापिता ग्राही बलेनैव हनूमता ।
भैरवं विनदन्ती सा भूघातैः शिथिलाभवत् । [255]
नखैस्तां च विदार्याशु निश्चक्राम महाकपिः ।
यथा घनं तमश्चार्सैर्निर्भिद्य रविमण्डलम् ।
मूलं विपाटयामास ग्राहीं तां हनुमान्क्षितौ ।
यथा वने गजो मत्तो पदा वेणुं करेण च ।
पातिता कपिसिंहेन मकरी सा ममार च । [260]
तस्याः शोणितवर्णेन रक्तवर्णमभूत्सरः ।
तत्रान्तरेऽपि सा ग्राही दिव्यरूपाभवत्क्षणात् ।

(for शुभां). T3 दिव्यदृष्टिमवाप्स्यसे (for the post. half). —(l. 212) D4 प्रियवचः. D9 मधुवद्विषमिश्रिते (for the post. half). —(l. 214) D4 [आ]यतं (for [अ]थ तद्) and पर्वत- (for सर्वत्र). —(l. 215) D4 कल्हार- (for कमलैः). D9 अपि (for युतम्). —(l. 216) D4 -संयुक्तैः; D9 -संघुष्टैः (for -संघुष्टं). —(l. 217) D4 वनस्थलं (corrupt); T2.3 नभस्थलं. —(l. 218) D9 मारुतात्मजः. —(l. 220) D4 ग्राहिणी; D9 ग्राह्यसौ (for ग्राही सा). —(l. 221) D4 T2 व्याला(T2 °ग्रा)स्या. —(l. 222) T2.3 गलितौ. —(l. 223) D9 तं शूरम् (for सा चोग्रम्) and कपिः (for पुनः). D4 च (with hiatus) अधः कर्षति ग्राही ऊर्ध्वमाकर्षते कपिः. —(l. 224) D9 सागरे (for दारुणे). —(l. 225) D4 युद्धे; T3 कुद्धः (for ह्यधः). —(l. 226) D9 -पातेन (for -भागेन). D4 बभंज तान् (for अपातयत्). —(l. 227) D4 शंकु- (for पङ्क-). —(l. 228) D4 तीक्ष्णकंटैर्विनिर्भिन्ना (for the prior half). T2.3 [अ]पतत् (for [अ]भवत्). —(l. 229) D4 ततः कालकृतं कार्यं चिंतयामास मारुतिः. —D4 om. l. 230. —(l. 231) T3 हते (for मृते). D9 विनाशितः (for निपातितः). —(l. 232) D9 उप- (for अनु-). D4 विमनाश्चानु- (for विनाशमनु-). —(l. 233) D4 मृत्युं (for मृतिं). D9 निमज्जिते (for °ज्जति). —(l. 234) D4 पौरुषे (for पौरुषं). —D9 om. l. 236-240. —(l. 236) D4 [आ]ज्ञाय (for ज्ञातं). —(l. 237) D4 मम (for मयि). —(l. 238) T3 भूतलं (for भूतले). —(l. 239) D4 विवेश हरि- (for विविशे वायु-). —(l. 240) D4 अंधकूप- (for अन्धकार-). —(l. 241) D9 कुक्षिं (for कुक्षौ). D4 उपागमत् (for °गता). —(l. 242) D4 संगिल्य तं; D9 संगिलंती (for तं गिलन्ती). —(l. 244) D4 (with hiatus) अस्थिमांसांत्रमज्जादि चिच्छेद उदरे स्थितः. —(l. 246) D9 om. (hapl.?) from ग्राह up to सा in l. 249. D4 वेगेन मज्जतीं ग्राहीं भुजंगसमचेष्टितः. —(l. 247) D4 आयांतं (for आगतं). —(l. 248) T2 पूर्वम् (for -पूरम्). D4 [ओ]घवत् (for [उ]ल्बणम्). —After l. 248, D4 ins. :

9* संतोद्यान्नाणि तरसा पूरयामास तद्बलम् ।

—(l. 249) D4 ग्राही सा (by transp.) (for सा ग्राही) and संभ्रमाज् (for बभ्राम). —(l. 250) D4 किं भक्षम् (for तु भक्ष्यम्). —(l. 251) T3 हृदयं (for ह्युदरं). —(l. 252) D4.9 हि (for ऽपि). —(l. 253) D4 बभौ (for [अ]भवत्). —(l. 256) D4 उरो (for तां च). —(l. 257) D4.9 घनं तमो यथा प्राच्यां (for the prior half). D4 विभिद्य. —(l. 258) D4 मुखतः पाटयामास; D9 मूलं विदारयामास (for the prior half). —(l. 259) D4 गजं मत्तं (for गजो मत्तो). D4 सिंहरदेन पातितं; D9 सिंहेनेव महाजवः (for the post. half). —(l. 260) D4 पाटिता. D4 transp. सा and च. —(l. 261) D4.9 -पूरेण (for -वर्णेन). —(l. 262) D4

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

बभूव तनुमध्या सा पीनश्रोणिपयोधरा ।
मृगेक्षणा सुदशना नीलकुञ्चितमूर्धजा ।
द्योतयन्ती दिशः सर्वाः सर्वाभरणभूषिता । [265]
दिव्याम्बरधरा नारी दिव्यस्रग्वस्त्रधारिणी ।
वाति गन्धवहस्तस्याः वासयन्सर्वकाननम् ।
विमानं परमारूढा हनूमन्तमुवाच ह ।
साधु साधु महाबाहो स्वागतं ते महाकपे ।
भवत्प्रसादान्मुक्तास्मि शापाद्घोरान्महामते । [270]
भद्राभियातुमिच्छामि त्रिदिवं पवनात्मज ।
राक्षसस्यास्य विश्वासो न कर्तव्यस्त्वया कपे ।
प्रेषितो रावणेनासौ कालनेमीति राक्षसः ।
महाऋषिवपुर्भूत्वा त्वां हन्तुं द्रुतमागतः ।
अत्राश्रमो न कस्यास्ति मायैषात्र प्रदृश्यते । [275]
एनं जहि महावीर राक्षसं रावणात्मकम् ।
अनेन प्रेषितस्त्वं हि मरणार्थं सरोवरे ।
इहेत्युत्तरतः पश्य क्षीरोदं देवदुर्लभम् ।
तस्मिन्द्रोणगिरिः श्रीमांस्तिष्ठत्योषधिपर्वतः ।
श्रुत्वा तस्या वचो रम्यं हनूमान्विस्मयं ययौ । [280]
तामुवाच महाबाहुः कासि त्वमिति भामिनि ।
कथं जातासि मकरी भव्यरूपा सती जले ।
हनूमतो वचः श्रुत्वा तमुवाचाथ खेचरी ।
शृणु वीर मदीयां त्वं कथामाश्चर्यकारिणीम् ।
मां विजानीह्यप्सरसं विद्युन्मालीति विश्रुताम् । [285]
नृत्येन तोषितो देवो मया वै शंकरः पुरा ।
विमानं तेन मे दत्तं सर्वदा कामगं शुभम् ।
तेनानेन विमानेन सर्वत्र विचराम्यहम् ।
इन्द्रलोके च नृत्यन्ती श्रान्तात्यर्थमहं यतः ।
ततोऽस्मिन्पुण्यसलिले क्रीडार्थं समुपागता । [290]
शाण्डिल्येनाथ दृष्टाहं क्रीडन्ती मुनिना वने ।
मामुवाच ततो विप्रो मदनाकुलचेतनः ।
रतिं मे देहि सुश्रोणि हन्ति मां मदनो यतः ।
तव दृष्टिकृपाणेन मनो मे दारितं क्षणात् ।
अधरामृतपानेन जीवयस्व वराङ्गने । [295]
कामातुरो मयोक्तोऽथ ब्रह्मर्षिस्तपसि स्थितः ।
तपस्यसि किमर्थं त्वं मां कथं याचसेऽनघ ।
विप्रः प्रोवाच सिद्धं मे संप्राप्तं तपसः फलम् ।
त्वं यदृष्टासि रम्भोरु तरुणी मम सौख्यदा ।
ध्यात्वा क्षणं मयोक्तोऽथ मुनिस्तस्मिन्महावने । [300]
पुष्पवत्यद्य संजाता न भोग्या तव मानद ।
दिनत्रयं निरीक्षस्व सरस्यस्मिंस्तपोनिधे ।
स्नाताहमागमिष्यामि तव पार्श्वं सुखप्रदा ।
इदं मद्वचनं श्रुत्वा हितमित्येव सोऽब्रवीत् ।
युगत्रयसमं तस्य दिनत्रयमभूत्किल । [305]
तस्मिन्नेव दिने पश्चाद्रावणोऽसौ जगाम ह ।
जित्वा सर्वं जगत्संख्ये पर्वतं गन्धमादनम् ।
तस्य सैन्येन महता गलितो गन्धमादनः ।
शैलो विशीर्णगलितो भग्नशृङ्गमहीरुहः ।
सिंहशार्दूलविहगांस्त्रासयंश्च भुजंगमान् । [310]
ततः प्रदोषे लङ्केशश्चचार गिरिसूर्धनि ।
तत्र वै गायमानाहं दोलारूढा रजस्वला ।

ततोंबरेपि; D9 ततोंतरिक्षे (for तत्रान्तरेऽपि). D9 तदा (for क्षणात्). —(l. 263) T2.3 पीनश्रोणी- . —(l. 265) D4 कांत्या (for सर्वाः). —(l. 266) D4 -अनुलेपना; D9 -गंधधारिणी (for -वस्त्र-धारिणी). —(l. 268) D4.9 विमानवरम् . —(l. 270) D4 तव (for भवत्-). D9 [अ]हं (for [अ]स्मि). —(l. 271) D4 पृष्टोसि (for भद्राभि-). —(l. 272) D9 कार्योरित महा- (for कर्तव्यस्त्वया). —(l. 274) D4 मायामयऋषिर्भूत्वा (for the prior half). D9 त्वाद्भूतं हंतुम् (for त्वां हन्तुं द्रुतम्). —(l. 275) D9 [अ]पि (for [अ]स्ति). D4 ह्यपि (for [अ]त्र प्र-). —(l. 276) D4 बलाद् (for महा-). D4 T3 रावणानु(T3 °त्म)जं. —(l. 277) D4 सरोवरं (for सरोवरे). —(l. 278) D9 T3 इतो हि (for इहेति). D4 द्रुतं हत्वा ततः पश्य (for the prior half) and -निर्मितं (for -दुर्लभम्). —(l. 279) D4 [औ]षधि- (for [ओ]षधि-). —(l. 280) D9 गृह्य (for रम्यं) and विस्मितो जगौ (for विस्मयं ययौ). —(l. 281) D4 महाबुद्धिः (for °बाहुः) and त्वं कस्यासि (for [अ]सि त्विति). D4.9 भाविनि (for भामिनि). —After l. 281, D4 ins. :

10* कौतूहलं महज्जातं ममात्र तव दर्शनात् ।

—(l. 282) D4.9 दिव्य- (for भव्य-). —(l. 283) D4.9 हनूमद्वचनं श्रुत्वा (for the prior half). —D9 om. l. 285. —(l. 285) D4 अहं स्वर्गांगना नित्यं मालिन्यप्सरसां वरा. —(l. 287) D4.9 सर्वकाममयं(D9 °गमं) शुभं (for the post. half). —(l. 289) T2 भ्रांता (for श्रान्ता). D4 कपे (for यतः). D9 श्रांतात्यंतपरिश्रमात् (for the post. half). —(l. 291) D4 क्रीडंती दृष्टाहं (by transp.). D9 मुनिकानने (for मुनिना वने). —(l. 292) D9 तदा भद्रे (for ततो विप्रो). D4.9 -मानसः (for -चेतनः). —(l. 294) D4 -प्रपातेन (for -कृपाणेन) and प्रभुः (for क्षणात्). —(l. 296) D4 [अ]ष्युक्तो (for [उ]क्तोऽथ). T2 एवं कामातुरोक्तोथ (for the prior half). —(l. 297) कथं मां (by transp.). —(l. 298) D9 प्राह च सिद्धिर् (for प्रोवाच सिद्धं). D4 सीदन्स विप्रः प्राहैतत् (for the prior half). —(l. 299) D4 यदीच्छसि (for यद्दृष्टासि). T2.3 तरुणा. D4 सौख्यं मे वचनं वद (for the post. half). —(l. 300) D4 [ऽ]सौ (for ऽथ). —(l. 301) T2.3 [अ]थ (for [अ]द्य). D9 तव भार्याद्य; T2.3 न(T2 सा) भार्या तव (for न भोग्या तव). —(l. 302) D4.9 प्रती(D9 परी)क्षस्व (for निरीक्षस्व). D4 तपोधन; D9 ममानघ (for तपोनिधे). —(l. 303) D4 न संशयः ; D9 सुखप्रदं (for सुखप्रदा). —(l. 304) D4 बाढम् (for हितम्). —(l. 306) D4.9 [ऽ]भ्या(D4 व्या)जगाम (for ऽसौ जगाम). —(l. 307) D4 -संस्थं (for संख्ये). —(l. 308) D4 दलितो (for गलितो). —(l. 309) T3 विस्तीर्ण- (for विशीर्ण-). D4.9 शिला विशीर्णा गलिता भग्नशृंगा महीरुहाः . —(l. 310) D4.9 -मातंगांस्(D4 °गास्) (for -विहगांस्). D4 त्रासिताश्च भुजंगमाः (for the post. half). —(l. 311) D9 प्रदोषे. —(l. 312) D4 तत्रापि गीयमानाहं;

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

दशग्रीवेण दृष्टाहं स्मरनिर्भिन्नचेतसा ।
मम पार्श्वमुपागम्य दशग्रीवोऽब्रवीद्वचः ।
मृगाक्षि कासि त्वं चात्र क्रीडसे रमणं विना । [315]
एषा चात्र मया सार्धं क्रीडां कुरु सुमध्यमे ।
आवयो रजनी यातु स्मरनिर्भिन्नचेतसोः ।
मृगाक्षि मां समालिङ्ग्य प्राप्स्यसे स्तनयोः फलम् ।
रावणं मां विजानीहि देवदानवसूदनम् ।
दशग्रीववचः श्रुत्वा मया तद्भाषितं पुरा । [320]
ब्राह्मणस्य तु जायां मामद्य जानीहि रावण ।
विशेषतश्च रजसा युताहं राक्षसेश्वर ।
युक्तं न ते महाराज यन्मां प्रार्थयसे रतम् ।
मयैवमुक्तः संप्राह रावणः काममोहितः ।
ब्राह्मणस्येदृशी भार्या कथं भवितुमर्हसि । [325]
देवाङ्गनासि बाले त्वं सर्वलोकस्य संमता ।
पुष्पिण्यपि विशेषेण रोचते मम भामिनि ।
परभार्यापरो भद्रे तद्भवत्यां रमाम्यहम् ।
इत्युक्त्वा केशपाशेषु मां गृहीत्वा जगाम ह ।
बलात्संधर्षिता तेन रावणेन दिनत्रयम् । [330]
रम्ये मनोरमे मासि चैत्रे श्रीगन्धमादने ।
ततो ममाभवत्पुत्रो ह्यतिकायोऽतिविश्रुतः ।
पुत्रं निवेद्य तस्याथ गताहं ब्राह्मणान्तिकम् ।
पत्न्यर्थमागता ब्रह्मंस्तव दातुं महत्सुखम् ।
महर्षे मां भजस्वेह प्राप्तं ते तपसः फलम् । [335]

इत्युक्तः स निरीक्ष्याथ मामुवाच महामुनिः ।
तव यौवनसारस्यं प्राप्तमन्येन वै फलम् ।
तरुणि त्वं तु भुक्तासि प्रतीतानि यतस्ततः ।
चर्वितार्धरपत्रासि गजेनेव सरोजिनी ।
वञ्चितोऽस्मि त्वया पापे कुत्सितं ते मनो यतः । [340]
केशेषु च गृहीताशु कामुकेनापकारिणा ।
सरस्यस्मिन्महाघोरा ग्राही भूत्वा वसिष्यसि ।
श्रुत्वा शशाप भगवान्रावणेन प्रधर्षणम् ।
रावणश्च स पुत्रैश्च विनाशमुपयास्यति ।
इति शापे प्रयुक्ते तु मया विप्रोऽथ याचितः । [345]
बलात्संधर्षिता ब्रह्मन्रावणेन दुरात्मना ।
आगो न मे मुनिश्रेष्ठ करुणां त्वं कुरुष्व मे ।
शाण्डिल्येनैव चैवोक्तं सरस्यस्मिन्महाकपिः ।
हनूमान्रामकार्येण यदा त्वां स वधिष्यति ।
तदा त्वमप्सरा भूत्वागमिष्यसि ममान्तिकम् । [350]
इत्युक्त्वा मुनिशार्दूलो ययौ गङ्गातपोवनम् ।
अहमप्यनुयास्यामि शापान्मुक्ता सुरालयम् ।
ततः सा मानिनी रात्रौ तत्रैवान्तरधीयत ।
हनूमानपि तेजस्वी संभ्रमाविष्टचेतनः ।
अगमद्राक्षसाभ्याशं मुनिरूपधरस्य च । [355]
संविग्नः सोऽपि तं प्राह कथं कालव्यतिक्रमः ।
सरोवरे प्रजातस्ते नीतः किं कथयस्व मे ।
जलमेतत्सुखेनासं त्वया वानरपुंगव ।

D9 तत्रापि गीतं गायंती (for the prior half). —(l. 313) D9 [अ]स्मि (for [अ]हं). D4 दृष्ट्वा तु (for दृष्टाहं). —D9 om. l. 314. —(l. 315) D4 किं चित्रं; D9 किं वापि (for त्वं चात्र). —(l. 316) D4 एहि; D9 एतां (for एषा). D9 [अ]पि (for [अ]त्र). —(l. 317) D4 रति- (for स्मर-). —(l. 319) D9 -मर्दनं (for -सूदनम्). —(l. 320) D4 [ए]तद् and तदा (for तद् and पुरा respy.). —(l. 321) D9 भार्यां (for जायां). D4 भार्याहं मा च (for जायां मामद्य). —(l. 322) D4 तु रक्षोभिर् (for च रजसा) and अस्पर्शा रतिकर्मणि (for the post. half). D9 रजस्वलां विशेषेण मां जानीहि निशाचर. —(l. 323) D9 ते न (by transp.). D4 रहः; D9 रतिं (for रतम्). —(l. 324) D9 स (for सं-). D4 [इ]त्युक्तेथ मां (for [ए]वमुक्तः सं-). —(l. 325) D4 T3 अर्हति. —(l. 326) D9 त्वं चारु (for बाले त्वं). —(l. 327) D4.9 पुष्पवती (for पुष्पिण्यपि). D4 रोचसे. D4.9 भाविनि (D9 °नी) (for भामिनि). —(l. 328) D9 वरा (for -परो). D4 [स]स्मीति तस्मात्त्वां सु- (for भद्रे तद्भवत्यां). —(l. 329) D4.9 -पाशे मां. D4.9 गृहीत्वाथ and सः (for मां गृहीत्वा and ह respy.). —(l. 331) D4 मनोहरे (for °रमे). D9 मासे (for मासि). —(l. 332) D4 इति स्मृतः; D9 इति श्रुतः (for sतिविश्रुतः). —(l. 333) D4 [अ]द्य (for [अ]थ). —(l. 334) D4.9 रत्यर्थम् (for पत्न्यर्थम्). D4 कर्तुं (for दातुं). —D4 om. l. 335. —(l. 335) D9 नूनं ते तपसा फलं (for the post. half). —(l. 336) D9 [उ]क्ते (for [उ]क्तः). D4 (m.) ब्राह्मण- स्तामुवाचेदं देवि प्रतारणा कृता. —(l. 337) D9 तत् (for वै). —(l. 338) D4 केन (hypm.) (for तु). D9 उपभुक्तासि तरुणि (for the prior half). D4 खंडितासि; D9 रुजितासि; T2 प्रणीतासि (for प्रतीतानि). —(l. 339) D4 चुंबित-; T2.3 चर्चित- (for चर्वित-). —(l. 340) D9 मे (for ते). —(l. 341) D4 गृहीतासि; D9 गृहीत्वा तु. D4 [अ]थ कामिके; D9 [अ]वरोपिता (for [अ]पकारिणा). —(l. 342) D4 तस्मा- द्ग्राही भविष्यसि (for the post. half). —D4 om. l. 343–344. —(l. 344) D9 सह पुत्रैश्; T3 च सपुत्रश् (for च स पुत्रैश्). —(l. 345) D4 प्रदत्ते; T2.3 प्रमुक्ते (for प्रयुक्ते). D4 [स]भि- (for sथ). —(l. 347) D4.9 इति ज्ञात्वा (for आगो न मे) and शापस्यांतं (for करुणां त्वं). —(l. 348) D4 चोक्तं मे (for चैवोक्तं) and महाकपे (for °कपिः). —(l. 349) D4.9 -कार्यार्थं (D4 °र्थं) (for -कार्येण). D4 संभविष्यति (corrupt) (for स वधिष्यति). —(l. 350) D9 निजालयं (for ममान्तिकम्). D4 स्वर्गं यास्यसि शोभने (for the post. half). —(l. 351) D4 ययौ गंगां तपोधनः (for the post. half). —(l. 353) D4 मालिनी ((for मानिनी). —(l. 354) D4 संभ्रमान्नष्टमानसः (for the post. half). —(l. 355) D4.9 रक्षसोभ्यासं (D9 °शं). —(l. 356) D4.9 कालनेम्यथ (D9 °पि) (for संविग्नः सोऽपि). —D9 om. from the post. half up to the prior half of l. 360. D4 वेला- (for काल-). —(l. 357) T3 [स]त्र (for प्र-). D4 भवतः सरोवरे यातो (hypm.) (for the prior half). D4 वीर; T3 नीतं (for नीतः). —(l. 358)

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

गृहाण मम मन्त्राणि शिष्यो मे भव पुत्रक ।
मन्त्राण्यधीत्य शिष्येण दातव्या गुरुदक्षिणा । [360]
उवाच हनुमान्रक्षो गृहाण शुभदक्षिणाम् ।
इत्युक्त्वा रोषताम्राक्षो जघानोरसि राक्षसम् ।
हृदि मुष्टिप्रहारेण वज्रकल्पेन वेगवान् ।
कालनेमी बभूवाथ चतुःशृङ्गः स राक्षसः ।
गुरवे दक्षिणा दत्ता सुभव्या वानराधम । [365]
इत्युक्त्वा स ययौ रक्षो गृहीत्वा पवनात्मजम् ।
तत्र दन्तैश्चखादाथ कालनेमी रुजन्कपिम् ।
हनूमानपि विक्रम्य सुवेगाद्भुजपञ्जरात् ।
पादयोस्तं गृहीत्वाथ धरणीधरमाविशत् ।
पर्वताग्रे निपीड्याशु हस्ताभ्यां स ममर्द च । [370]
मर्द्यमानोऽपि विक्रान्तो राक्षसः पक्षिरूपधृक् ।
हनूमता धृतो दोर्भ्यां पतितो धरणीतले ।
पतितस्यापि जग्राह पक्षौ तस्य महाकपिः ।
तत्क्षणादथ रक्षोऽपि सिंहरूपेण चागमत् ।
मारुतिं तं जघानाथ दंष्ट्राभिर्दारयन्गजान् । [375]
हनूमांश्चिन्तयामास किं करोमीति साम्प्रतम् ।
एनमाशु गृहीत्वाथ पातयिष्यामि राक्षसम् ।
तस्यास्ये ज्वलितं काष्ठं क्षिप्त्वा जग्राह कर्णयोः ।
तरसा पातयामास मुखतः पवनात्मजः ।
ततः सुग्रीवरूपेण कालनेमीत्युवाच तम् । [380]
वृथा त्वं वानरश्रेष्ठ हन्त कालं विलम्बसे ।
एहि यावोऽधुना वीर उत्थितो लक्ष्मणः स्वयम् ।
भृत्येनाहं त्वया श्लाघ्यो हनूमन्व्रणकोविद ।
कण्ठे बाहू समासज्य रुरोद च मुहुर्मुहुः ।
हनूमतः कालनेमी वानराधिपसंनिभः । [385]
हनूमानपि संचिन्त्य मायासुग्रीव इत्ययम् ।
मन्मोहनाय संजातो राक्षसो वानराकृतिः ।
उत्क्षिप्य बाहू तस्याथ तं जघान महाकपिः ।
तलप्रहारघातेन पतितो राक्षसो भुवि ।
त्यक्त्वा सुग्रीवरूपं तद्बभूव रजनीचरः । [390]
रावणप्रेषितो वीरः कालनेमी निशाचरः ।
रूपं विकुरुते घोरं तदनल्पप्रमाणतः ।
ऊर्ध्वं तु योजनं पञ्च धुन्वन्वृक्षाञ्छिरोरुहान् ।
अष्टौ दंष्ट्राः सुतीक्ष्णाग्राः सृक्किणीश्चापि संलिहन् ।
विवृत्तनयनो घोरो मेघस्वनितनिस्वनः । [395]
अर्धदग्धमलातं तं प्रगृह्याभ्यद्रवत्तदा ।
हनूमानपि दुर्धर्षो दशयोजनमुच्छ्रितम् ।
रूपं कृत्वा सुविपुलं महाकायो महाबलः ।
उत्पत्याकाशमार्गं तु न्यपतत्तस्य चोपरि ।
त्वरितश्चापि वेगेन हनूमांस्तस्य रक्षसः । [400]
स्कन्धयोश्चरणौ दत्त्वा शिरो जग्राह सत्वरम् ।
हस्ताभ्यां त्रोटयामास ग्रीवामाक्रम्य रक्षसः ।
यथा पद्मवनं नालान्मातंगो मदविह्वलः ।
ततस्तु रक्षोगणकेतुभूतो
ममार तस्यां निशि केतुभूतः । [405]
वीरो हनूमानपि तं निहत्य
महाजवाद्रोणगिरिं जगाम ।

Colophon

D₄ पीतं and [अ]द्य (for एतत् and [आ]सं respy.). —(l. 359) D₄ मंत्रं च (for मन्त्राणि). —(l. 360) D₄ मंत्रान् (for मन्त्राणि). —(l. 361) D₄ [अ]सुर-; D₉ वर- (for शुभ-). —(l. 362) D₄ क्रोधरक्ताक्षो. —(l. 363) D₄ वीर्यवान् (for वेगवान्). —(l. 364) D₉ कालनेमिर्. D₄ -शीर्षश्च (for -शृङ्गः स). —(l. 365) D₉ शुभा वानरनायक (for the post. half). —(l. 366) D₄ रुषा (for ययौ). —(l. 367) D₄ तुदन् (for रुजन्). —(l. 368) D₉ तेजस्वी (for विक्रम्य). —(l. 369) D₄.₉ संगृहीत्वा. D₄ आरुहत् (for आविशत्). —(l. 370) D₉ कराभ्यां (for हस्ताभ्यां). D₄ स्वहस्ताभ्यां ममर्द सः (for the post. half). —(l. 371) D₉ [स]थ (for ऽपि). D₄ मृष्टमानोपि निःक्रांतो (for the prior half). T₂ -रूपधृत्. —(l. 372) T₂ हनूमतो. —(l. 373) D₉ भुजौ (for पक्षौ). D₄ स च (for तस्य). —(l. 374) D₄ ततः क्षणाच्च रक्षोथ (for the prior half). —(l. 375) D₄ च; D₉ तु (for तं). D₄ वक्षसा जवात्; D₉ भीषयन्गजान् (for दारयन्गजान्). —(l. 376) T₃ मारुतिश्. D₄ [इ]ह (for [इ]ति). —(l. 377) D₄ बलाद्; D₉ कथं (for आशु). D₄ [आ]शु; D₉ तु (for [अ]थ). —(l. 379) D₄ तं बलात् (for तरसा). —(l. 380) D₉ सुग्रीवरूपेण पुनः कालनेमिरुवाच तं. —(l. 382) Note hiatus between the two halves. D₄.₉ माम (D₉ यामो)धुना. D₄ काले; D₉ कालाद् (for वीर). D₉ उत्तिष्ठल् (for उत्थितो). —(l. 383) T₃ -कोविदः. —(l. 384) D₉ इति (for कण्ठे). D₄.₉ बाहुं. D₄ स (for च). —(l. 385) D₉ कालनेमिर्. D₄ वानरो रण- (for वानराधिप-). —D₄ om. l. 386. —(l. 386) D₉ [अ]पि (for [अ]यम्). —(l. 387) D₄ मम मोहाय (for मन्मोहनाय). —(l. 388) D₄ बाहुं (for बाहू). —After the prior half of l. 389, D₄ ins.:

11* हृदये कालनेमिनम् ।
तेन तलप्रहारेण.

—(l. 390) D₄ तु (for तद्). —D₄.₉ om. l. 391–399. —(l. 395) T₃ -स्तनित- (for -स्वनित-). —(l. 400) D₄.₉ पति(D₉ त्वरि)तेस्य (for त्वरितश्च). —(l. 401) D₄ सत्वरः. —(l. 402) D₉ पोथयामास. D₄ कूजतः; D₉ कूटजं (for रक्षसः). —(l. 403) D₉ पद्माननं; T₃ पद्मवने. D₄ यथा पद्मं जले नालं (for the prior half). D₉ मतंगो. —(l. 404) D₄ स (for तु) and -हेतु- (for -केतु-). —(l. 405) D₄ कूजमानः (for केतुभूतः). —(l. 406) D₉ निपात्य (for निहत्य). —(l. 407) D₄ महाजवो.

Colophon. —*Kāṇḍa name*: D₄ लंका°. —*Sarga name*: D₄ कालनेमिवधः. —*Sarga no.* (figures, words or both): D₄ om.; D₉ 80; T₂ 106; T₃ 110.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

क्षीराब्धिमध्ये स ददर्श भूधरं
विराजमानं नभसीव भास्करम् ।
स च प्रहृष्टः पवनात्मजस्तदा [410]
विलोक्य तं सानुषु धातुभिर्युतम् ।
श्रारुह्य तस्याद्भुतशृङ्गमेव
चचार चामीकरचारुभूषु ।
दवाग्निनावेष्टितदीपितो ह्यसौ
वितर्कयत्काननचारणः कपिः । [415]
अग्निर्भृशं तापकरस्तु देहिना-
माह्लादयत्येष हि मे मनः कथम् ।
इमाश्च दिव्यौषधिवल्लरीर्यथा
लतास्तथा हेममया भवन्ति ।
हिरण्यवर्णा रससारेणवो [420]
विभान्ति नक्षत्रगणानुकारिणः ।
यथा च संख्ये निजवृत्तिसंस्थिता
विशुद्धभावाः खलु नाकगामिनः ।
ज्वलन्ति मार्गेषु चलन्ति रश्मयः
स्फुरन्ति सौगन्ध्यगुणं किरन्ति च । [425]
समागतं मां खलु वीक्ष्य चार्थिनं
सिद्धिं गता देवमहौषधीगणाः ।
ततो महात्मा पवनात्मजस्तदा
निशामयामास महौषधीश्च ताः ।
विचिन्वतस्तस्य ततश्च ताः शुभाः [430]
अदृश्यतां जग्मुरनन्तशक्तयः ।
विसिष्मिये वासवदूतनन्दनो
वनं विलोक्याथ जगाम चोत्सुकम् ।
ततः संप्रार्थयामास हनूमान्देवतागणान् ।
मम सिद्धिं प्रयच्छन्तु महौषध्यादयो वराः । [435]
भो शैलराज मद्वाक्यं शृणु देव सुखप्रद ।
रामकार्यस्य सिद्ध्यर्थं प्रयच्छ मम चौषधीः ।
मृतसंजीवनि श्रेष्ठे सौवर्ण्यकरणि शृणु ।
विशल्यकरणि ख्याते मातर्मे देहि दर्शनम् ।
विलीनाः पर्वतोद्देशे तेजः संछाद्य चात्मनः । [440]
ततः क्रोधादिदं वाक्यं भूधरं प्राह मारुतिः ।
न दया न च दाक्षिण्यं तव पाषाणरूपिणः ।
नखाग्रैस्त्वां खनित्वाहं पातयिष्यामि सागरे ।
इत्युक्त्वा वेष्टयामास पुच्छेन धरणीधरम् ।
वेष्टय चोत्पाटयामास तच्छृङ्गं लीलया कपिः । [445]
पुच्छेनावेष्टय दोर्भ्यां च गृहीत्वौषधिपर्वतम् ।
ननाद हनुमांस्तत्र समुद्र इव पर्वणि ।
तेन शब्देन महता गन्धर्वाः शस्त्रपाणयः ।
अनुजग्मुः सुसंरब्धा योद्धुकामास्तु मारुतिम् ।
कस्त्वं वानररूपेण संप्राप्तो निशि दारुणे । [450]
गन्धर्वाणां वचः श्रुत्वा हनूमान्वाक्यमब्रवीत् ।
श्रुता वा यदि किष्किन्धा जम्बूद्वीपसमाश्रया ।
वानराधिपतिस्तत्र सुग्रीवो नाम विश्रुतः ।
मित्रकार्यार्थमुद्युक्तो रावणेनाथ निग्रहे ।
मित्रभ्राता राक्षसेन शक्त्या च विनिपातितः । [455]
तदर्थं संप्रयातोऽहमोषधिं प्रति पर्वतम् ।
विशल्यकरणीं नाम जानेऽहं प्रथमौषधीम् ।
विघ्नो मेऽत्र न कर्तव्यः प्रसादं कर्तुमर्हथ ।
अहं वानरराजस्य भृत्यस्तस्य गुणैर्वृतः ।
हनूमानिति विख्यातस्तदर्थं प्रार्थयामि वः । [460]
हनूमतो वचः श्रुत्वा गन्धर्वास्ते महाबलाः ।
विचित्रकवचाः सर्वे नानाप्रहरणोद्यताः ।
कोलाहलं प्रकुर्वन्तः सायकैः समभिद्रवन् ।
ततो नानायुधैः सर्वे ते जघ्नुर्मारुतात्मजम् ।
हन्यमानः सुबहुभिरुत्पपातोर्ध्वमञ्जसा । [465]

—(l. 410) D4 लेभे प्रहर्षं (for स च प्रहृष्टः). —(l. 411) D4 तत् (for तं). —(l. 412) D4 एवं; D9 एकं (for एव). —(l. 413) D4.9 -चारुभूषितं (D9 °षणं). —(l. 414) D4.9 T3 दावाग्निना. D4 किंत्विह दीपितोसौ; D9 विरिमतविष्टितो ह्यसौ. —(l. 415) D4 आकुलचेतसा; D9 आप्त स चारुणः (corrupt) (for काननचारणः). —(l. 418) D4 -मंजरिर्भृशं (for -वल्लरीर्यथा). —(l. 419) D9 विभांति (for भवन्ति). D4 लता-स्तथा क्षेमकृते विभांति च. —D9 om. l. 420–423. —(l. 420) D4 सरलासत्रेन वा (for रससारेणवो). —(l. 421) T3 विभांति (for निभान्ति) and [अ]नुसारिणः (for °कारिणः). D4 विभांति नक्षत्रगणेन चंद्रमाः. —(l. 422) D4 ते (for संख्ये). —(l. 423) D4 विशुद्धमानाः. —(l. 424) D9 चरंति (for चलन्ति). —(l. 425) D4.9 सौगंधिगुणं. D9 om. च. —(l. 428) T3 तथा (for तदा). —(l. 429) D4 विचेष्टया-मास (for निशामयामास). —(l. 430) D4 वचैव (for ततश्च). D9 च ताः शुभा लताः (for ततश्च ताः शुभाः). —(l. 431) D4.9 अथो हि सिद्धयः (for अनन्तशक्तयः). —(l. 432) D9 om. -दूत-. —(l. 433) D4 जगाद (for जगाम). D4.9 सो(D9 चो)-स्मुकः. —(l. 434) D4 -गुणः (for -गणान्). —(l. 435) D4.9 दिव्यौषध्यो दया(D9 °ध्यो यथा)पराः (for the post. half). —(l. 436) D4.9 सुखप्रदं(D9 °दाः). —(l. 437) D9 T3 राज(T3 °म)कार्यार्थ- (for रामकार्यस्य). D4 चौषधिं. T3 प्रयच्छतु महौषधीः (for the post. half). —(l. 438) T2 -संजीवनी. T2.3 सौवर्णी(T2 °र्ण्य)करणी शुभे (for the post. half). —(l. 439) T2.3 -करणी (for -करणि). —For l. 438–439, D4 subst.:

12* मृतसंजीवनीं चेष्टां सौवर्णकरणीं तथा ।
विशल्यकरणीं चैव संधिनीं देहि मे गिरे ।

—Thereafter D4 cont.:

13* -करुणं वदतस्तस्य ददुस्तास्तस्य दर्शनम् ।

—(l. 440) D9 पर्वतोद्देशास् (for °द्देशे) and संवार्य (for संछाद्य). —(l. 443) D4.9 नखैस् (for नखाग्रैस). —(l. 445) D4 शतयोजनं; D9 पर्वतस्य तत् (for लीलया कपिः). —(l. 449) D4 समाजग्मुः (for अनु°). —D4.9 om. l. 450–463. —(l. 457) T3 प्रथमौषधिं. —(l. 464) D4 -[आ]युधैर्जघ्नुर्; D9 -विधैः शस्त्रैस् (for -[आ]युधैः सर्वे). D4 गंधर्वास्तत्र मारुतिं (for the post. half). —(l. 465) D4 स (for सु-).

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

ततश्च हनूमांस्तूर्णं रूपं कृत्वा सुदारुणम् ।
गन्धर्वान्हन्तुमारेभे नखदंष्ट्रायुधो हरिः ।
गन्धर्वैर्हनुमान्कस्त्वं त्यक्त्वा गच्छ महीधरम् ।
नो चेत्प्राणान्परित्यज्य स्वर्गं यास्यसि संयुगे ।
इत्युक्तो हनूमांस्तैस्तु पद्भ्यां तान्निजघान सः । [470]
बद्ध्वा पुच्छेन दीर्घेण गन्धर्वान्पर्वतोपमान् ।
हनूमान्भ्रामयामास गरुडः पन्नगानिव ।
केचिन्निपतिता भूमौ केचित्सान्द्रद्रुमेषु च ।
लाङ्गूलेन हताः केचित्केचिद्दन्तैर्विदारिताः ।
मुहूर्तेन हताः सर्वे गन्धर्वा युद्धदुर्मदाः । [475]
तिस्रः कोट्यो हतास्तत्र गन्धर्वाणां महात्मनाम् ।
शिष्टास्तं प्रणताः प्रोचुर्गन्धर्वा गगनान्तरे ।
गच्छ वीर महासत्त्व पन्थानः सन्तु ते शिवाः ।
केनापि न कृतं वीर कर्म त्वं च करिष्यसि ।
बाहुभ्यां धार्यते वीर पर्वतः शतयोजनः । [480]
ततस्तेनैव संत्यक्ता गन्धर्वा मानसं ययुः ।
स्तुवन्तस्तस्य कर्माणि खेचराश्च परस्परम् ।
हनूमानपि तेजस्वी वेगेन गगनं ययौ ।
पुनस्तेनैव मार्गेण पश्यन्नेव महीधरान् ।
तस्यामेव रजन्यां तु भरतः केकयीसुतः । [485]
स्वप्ने रामं ददर्शाथ तैलाभ्यक्तं तपस्विनम् ।
पङ्के निमग्नं दुःखार्तं रोदमानं मुहुर्मुहुः ।
तरसा चरमाणं तं ददर्श भरतस्तदा ।
जले विलुप्तमात्मानं केशहीनं यथाकुलम् ।
दृष्ट्वा प्रबुद्धः स्वप्नान्ते निशान्ते दुःखितोऽभवत् । [490]
निर्गत्य भरतस्तत्र गगनं समलोकयत् ।
गगनस्थानि भूतानि भ्रमन्ति निपतन्ति च ।
शिवा घोरा रुदन्ति स्म सृगालाश्च निपातिताः ।
रूक्षा वाता भृशं वान्ति रजो व्याप्ता दिशो दश ।
इति दृष्ट्वा निमित्तानि भरतश्चिन्तयान्वितः । [495]
किं नु रामस्य कुशलं लक्ष्मणस्य महामतेः ।
सीतायाश्चापि कुशलं कथं वै दण्डकावने ।
एभिर्निमित्तैः पृथ्वीशः पतितो हि न संशयः ।
राजा सर्वत्र रामश्च तस्याहं किंकरः सदा ।
कच्चिदार्यस्य व्यसनं पर्याप्तं दण्डकावने । [500]
किं वा प्राणान्परित्यज्य गतो हि यमसादनम् ।
चतुर्दशसमाः पूर्णा दण्डके परिसर्पतः ।
प्रवृत्तिरपि रामस्य न कच्चिच्छ्रूयतेऽधुना ।
तीर्थायतनपोयज्ञव्रतपूजासु किं च यत् ।
मया हि यत्कृतं पुण्यं तेन रामोऽद्य जीवतु । [505]
आहूय ब्राह्मणान्पूज्यान्कारयामास शान्तिकम् ।
रामस्नेहेन भरतो रुरोद निशि निर्भरम् ।

D₉ ततो हेतिभिर् (for उत्पपातोर्ध्वम्). —D₄.₉ om. l. 466–467. —(l. 468) D₄.₉ उक्तस् (for कस्त्वं). —(l. 469) T₃ प्राप्स्यसि (for यास्यसि). D₄.₉ पतिष्यसि महार्णवे (D₉ °र्णे) (for the post. half). —(l. 470) D₄ विजघान. T₃ ह (for सः). —(l. 473) D₄ T₂ निपातिता. D₄ चांद्र°; D₉ पेतुर् (for सान्द्र-). —D₉ om. l. 474–475. —(l. 474) D₄ केचिद्विशीर्णा भग्नाश्च केचिन्नष्टा यतस्ततः. —D₄ om. l. 475–476. —(l. 477) D₄.₉ प्रणतास्ते (D₉ °स्तु) हरिं प्रोचुर् (for the prior half). —(l. 478) D₉ निर्भयाः (for ते शिवाः). —(l. 479) D₄ कर्मेदं न करिष्यति (for the post. half). —(l. 480) D₄ पुत्र (for वीर). —(l. 481) D₄ च सं (for मानसं). —After l. 481, D₉ ins. :

14* एवं सुतबलं दृष्ट्वा प्रहृष्टः पवनो गतः ।
प्रणिपत्य ततो मूर्ध्ना हनूमानिदमब्रवीत् ।
किमागतोऽसि देवेश जगत्प्राण प्रजेश्वर ।
श्रुत्वा हनूमतो वाक्यं वायुः पुत्रमथाब्रवीत् ।
तुष्टोऽस्मि तव पुत्रस्य दृष्ट्वा दिव्यपराक्रमम् । [5]
शृणुष्व मम वाक्यं च येन जीवति लक्ष्मणः ।
मुहूर्तं धारयेस्त्वेवं यावदागमनं मम ।
पित्राज्ञया व्यतिक्रम्य मुहूर्तं हरिसत्तमः ।
गतो वै पवनो देवः क्षीरो ***** त्तमम् ।
पद्मपत्रे पुटीं कृत्वा क्षीरोदपय उत्तमम् । [10]
आदाय दत्तं हनुमानगृह्णात्पय उत्तमम् ।
इत्युक्त्वासौ गतो वायुः पयो दत्त्वा हनूमति ।
लक्ष्मणाय प्रदातव्या औषधी क्षीरमाश्रिता ।
पितुराज्ञां समाकर्ण्य प्रणम्य पितरं तथा ।
गिरेरादाय शिखरं जगाम स हरीश्वरः । [15]

[= l. 4–18 of 96* of App. I (No. 56). —Note hiatus between the two halves of l. 13.]

—D₉ om. l. 482–483. —(l. 482) T₃ नुदंतस् (for स्तुवन्तस्). D₄ सस्रुस्तस्मिंजले शुभे (for the post. half). —(l. 484) D₄ पश्यन्वै स महीरुहान्; D₉ पश्यन्वै धरणीधरान् (for the post. half). —(l. 485) D₄ कैकेयनंदनः (hypm.). —D₉ om. l. 488. —(l. 488) D₄ राक्षसैर्भक्ष्यमाणं तु (for the prior half). —(l. 489) T₂ lacuna for जले. D₄.₉ मत्स्यविलिप्तम् (for जले विलुप्तम्) and तृषा (D₉ अथा)कुलं (for यथाकुलम्). —(l. 491) D₄ भवनात् (for भरतस्). D₉ निर्गतस्तत्र भवनात् (for the prior half) and पर्वतं (for गगनं). —(l. 492) D₄ च पतंति (for निपतन्ति). —D₉ om. l. 493. —(l. 493) D₄ नदंति (for रुदन्ति) and मृगाश्चाप्यप्रदक्षिणाः (for the post. half). —After l. 493, D₄ ins. :

15* नारी कापि सुदुःखार्ता मुक्तकेशा च रोदिति ।

—(l. 494) D₄.₉ ज्वलंतीव (for रजो व्याप्ता). —(l. 496) D₄ [अ]पि कानने (for महामतेः). —(l. 497) D₄ किं नु (for चापि). T₃ वा (for वै). D₄.₉ दंडके वने. —(l. 498) D₄ एवं; T₃ एतैर् (for एभिर्). D₄ पृथ्वीशाः; T₃ पृच्छद्भिः (for पृथ्वीशः). D₄ पतंतीह (for पतितो हि). T₂ हीन- (for हि न). —(l. 499) D₄ हि (for च). —(l. 500) D₉ पार्षं किं (for पर्याप्तं). D₄.₉ दंडके वने. —(l. 503) D₄ ब्रूयते तु सा (for श्रूयतेऽधुना). —D₉ om. l. 504. —(l. 504) D₄ तीर्थाय दानतपसे व्रतयज्ञोथ पूजनं. —(l. 505) D₄ पूर्वं (for पुण्यं). —(l. 507) D₄ विस्वरं (for निर्भरम्). —(l. 509) D₉ सं-

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तस्मिन्नेव क्षणे धीमान्संप्राप्तः पवनात्मजः।
स दीप्यमानया भासा नन्दिग्रामं महाबलः।
दृष्टवान्भरतं तत्र जटावल्कलधारिणम्। [510]
तपस्विनं घनश्यामं विशालाक्षं धनुर्धरम्।
रामोऽयमिति मत्वासौ लक्ष्मणेन विना कथम्।
अत्रायमागतो रात्रौ विहाय हरियूथपान्।
अनेन सा परित्यक्ता सीता प्राणप्रिया सती।
रावणस्य गृहे रात्रौ संरुद्धा घोररक्षसः। [515]
पुनं पृच्छामि किं यामि संदेहो मम साम्प्रतम्।
तस्यैव रूपसदृश एष कोऽपि भविष्यति।
न राम इति चाशङ्क्य लङ्कामभिमुखो ययौ।
हनूमाञ्शोकविकलः संभ्रान्त इव सत्वरम्।
भरतोऽपि च तं दृष्ट्वा गगने सूर्यसंनिभम्। [520]
दुष्टग्रहा भ्रमन्तीति जग्राह सशरं धनुः।
हन्तुमिच्छति काकुत्स्थो प्रयान्तं दक्षिणामुखम्।
तस्मिन्नेव क्षणेनाथ शुश्राव दिवि भाषितम्।
माविचारं कुरुष्वैवं तव बन्धुर्भविष्यति।
निवृत्तशस्त्रः शुद्धात्मा वाचं श्रुत्वा च खेरिताम्। [525]
स्नात्वा दानं ददौ वीरो विप्रेभ्यो हि तदैव तम्।
अतिचण्डेन वेगेन जगाम पवनात्मजः।
दक्षिणाकाशमार्गेण संप्राप्तो लवणार्णवम्।
सेतुना पूर्वबद्धेन भ्राजमानं यथा नभः।
रावणेन ततो रात्रौ माल्यवान्प्रेषितो द्रुतम्। [530]
बलेन महता युक्तो योद्धुं हनुमता सह।
आकाशगामिभिर्वीरैः राक्षसैः परिवारितः।
बलकोट्ययुतस्तस्थौ गगने सागरोपरि।

तमेव शरजालैश्च सर्वे जघ्नुः समुद्यतैः।
सर्वायुधैः कृपाणैश्च पट्टसैः रणशालिनः। [535]
परिघैर्वज्रधारैश्च छादयन्ति प्लवंगमम्।
आत्मानं राक्षसैः रुद्धं दृष्ट्वा स हनुमानिति।
ननाद घनवद्घोरं युद्धे च निदधे मनः।
हस्ताभ्यां धारयञ्शैलं पादाभ्यां निजघान तान्।
रक्षांस्यादाय पुच्छेन कथ्यामास्फालयद्द्रुतम्। [540]
ततो हलहलाशब्दः संजज्ञे रक्षसां तदा।
तेन शब्देन संत्रस्ताः समुद्रजलवासिनः।
निहतास्ते महाघोरा राक्षसाः कामरूपिणः।
द्रुतं हनुमता तत्र पद्भ्यामेव महार्णवे।
ततोऽतिक्रुद्धो दशकन्धराज्ञको [545]
जघान बाणैः पवनात्मजं हृदि।
शितैः शरैर्माल्यवतोऽभितापित-
स्तदातिकोपाच्च जहार कार्मुकम्।
दीर्घेण लाङ्गूलबलेन रक्षो
बबन्ध पादौ गगने प्लवंगमः। [550]
उद्वेष्टमानः सहसाम्बरस्थितो
विभेद तं शूलवरेण राक्षसः।
शूलं निमग्नं हृदि मारुतिस्तदा
ममर्द वै सागरमध्यसंस्थितः।
न तत्र वृक्षा न वनं न भूधराः [555]
कथं हि युद्धं स चकार मारुतिः।
दोर्भ्यां धृतो ह्यौषधिपर्वतस्तदा
पद्भ्यां तदाहन्यत कन्धरान्हरिः।

(for स). D₄ दीप्यमानः स्वया भासा (for the prior half) and महाबलं (for °बलः).—(l. 512) D₉ विज्ञाय (for मत्वासौ).—(l. 513) D₄.₉ [आ]यातः स्वयं (for [अ]यमागतो).—(l. 514) D₄.₉ कथं (for परि-). D₄ -समा प्रिया (for -प्रिया सती).—(l. 515) D₄ साध्वी (for रात्रौ). D₄ घोरराक्षसैः; D₉ राक्षसीगणैः; T₃ घोररक्षसा.—(l. 518) D₄ अभिमुखं.—(l. 519) D₄ सत्वरः.—(l. 520) D₄ वह्नि- (for सूर्य-).—(l. 521) D₉ [इ]व (for [इ]ति). D₄ दुष्टग्रहोदयभ्रांत्या स जग्राह धनुः शरान्.—After l. 522, D₉ cont. a passage relegated to App. I (No. 57).—D₉ om. l. 523–526.—(l. 523) D₄ क्षणे सोथ.—(l. 525) D₄ निवृत्तः शुद्धः (for निवृत्तशस्त्रः) and तु खेचरीं (for च खेरिताम्).—(l. 526) D₄ तु (for तम्).—(l. 527) D₄ -प्रचंड- (for -चण्डेन) and हनूमान्मारुतात्मजः (for the post. half).—(l. 528) D₄ क्षणाद् (for दक्षिण-). T₃ जगाम (for संप्राप्तो).—(l. 529) D₄ राजमान इवानलः (for the post. half).—(l. 533) D₉ परिशोध्य गत स्वस्थो गगने सागरो यथा.—(l. 534) D₉ ते चैव शरजालेन (for the prior half).—For l. 532–534, D₄ subst.:

16* दृष्ट्वा तमतुलं व्यूहं किमेतदिति चिन्तयत्।
निःशङ्के खे तदा युद्धमभवद्राक्षसैः सह।
तुमुलं युगपद्वीरा बाणैर्जघ्नुश्च मारुतिम्।
गदाभिर्भिन्दिपालैश्च शक्तिभिश्च परश्वधैः।
कर्तरीजालपाशैश्च सर्वे जघ्नुश्च मुद्गरैः। [5]

—(l. 535) D₉ ते (for च). D₄.₉ पट्टिशैः.—(l. 536) D₉ परमैर् (for परिघैर्).—(l. 537) T₂ विद्धं (for रुद्धं). D₄ निशि; T₂ अपि (for इति).—(l. 538) D₄ समुद्रे विदधे मनः (for the post. half).—(l. 539) D₉ वारयञ् (for धारयञ्). T₃ ह (for तान्).—(l. 540) D₄ भृशं (for द्रुतम्).—(l. 542) D₄ -जीविनः (for -वासिनः).—(l. 543) D₄ हता वीरा (for निहतास्ते).—(l. 544) D₉ तेन (for तत्र).—(l. 545) D₉ तु (for ऽति-). D₉ दशकंधराज्ञया; T₂ दशकंठकार्यको.—(l. 547) D₉ T₃ माल्यवताभिता(T₃ °पी)डितस्. D₄ सतैः शरैर्माल्यवताभिपातितैर्.—(l. 548) D₄ बद्धो (for तदा).—(l. 549) D₄ स दीर्घलांगूलवरेण रक्षसो.—(l. 551) D₄ उद्वेल्य पुच्छं; D₉ T₃ विचे(T₃ उद्वे)ष्टमानं. D₄ [अं]बरे.—(l. 553) D₄ मारुतेस् (for मारुतिस्).—(l. 554) D₄ महच्च (for ममर्द).—(l. 555) T₃ वृक्षो (for वृक्षा). D₄ च भूधराश्च (for वनं न भूधराः).—(l. 556) D₄ च (for हि).—(l. 557) D₉ ह्येष स; T₃ ह्योषधि- (for ह्यौषधि-).—(l. 558) D₄ दधारास्य च (for तदाहन्यत) and ऋषिः (for हरिः). D₉ माल्यवतं जघान (for [अ]हन्यत कन्धरान्हरिः).—(l. 559) D₉ -संप्लवांतरे

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

स माल्यवान्शोणितबाहुसंप्लवः
शक्तिं ज्वलन्तीं च मुमोच सत्वरः । [560]
तया हतो नापि चचाल वानरो
भग्ना तदा सापि पपात सागरे ।
शक्तिं ततो भूधरराजदारिणीं
चिक्षेप वायोः सुतवक्षसि दृढे ।
शक्त्या हतो ग्लानिमुपागमत्तदा [565]
वीरोऽपि धीमान्रुधिरेण संवृतः ।
तं पादमूलेन जघान मस्तके
कपिप्रवीरो गगनं प्रविश्य सः ।
पदप्रहारेण विकीर्णमूर्धजो
वीरो हनूमन्तमथाभिदुद्रुवे । [570]
ततश्च संज्ञामुपलभ्य स स्वयं
जग्राह खड्गं निशितं च सत्वरः ।
तेनातितीव्रेण जघान मारुतिं
कटिप्रदेशे दशकन्धराज्ञकः ।
ततस्तु भिन्नाशिकणाः समुत्थिताः [575]
कृपाणघातेन हनूमतो भृशम् ।
नितम्बदेशेन विदारितस्तदा
शब्दो बभूवाथ महातिदारुणः ।
एवं कपिर्माल्यवता प्रभाषितः
संत्यज्य भो वानर शैलमर्णवे । [580]
याहि प्रमुक्तोऽसि मया दिगन्तरं
न लक्ष्मणो जीवति राघवप्रियः ।
नो चेद्धनिष्यामि सहस्व मारुते
ममाग्रपूरं मम तापदारुणम् ।
पूर्वं मयास्मिँल्लवणार्णवे हरि-
र्जितो भृशं पन्नगशत्रुणा सह । [585]
निशम्य तत्तस्य वचोऽतिगर्वितं
प्रोवाच तं वानरयूथपेश्वरः ।
ममोरसि त्वं प्रहरस्व दुर्मते
करेण ते वृद्धतमस्य युध्यतः । [590]
स माल्यवान्वायुसुतस्य जल्पितं
श्रुत्वा जघानोरसि तं वरासिना ।
ततो गलं गन्धवहात्मजस्तदा
संवेष्टय लाङ्गूलवरेण धावतः ।
तं भ्रामयामास नभस्थले रुषा [595]
यथा विहंगाधिपतिर्भुजंगमम् ।
विस्रस्तवस्त्रश्च विकीर्णमूर्धजो
विभ्रष्टसर्वाभरणोऽल्पचेतनः ।
स माल्यवान्कृत्तसमस्तगात्रः
पपात वै भग्नशिरा महाहवे । [600]
तेनैव मार्गेण गतो रसातलं
खरैर्विशालं रमणीयमन्दिरम् ।
स राक्षसो वृद्धतमो रणे जितो
हनूमता संगरदुर्धरेण ।
कृतसमरविधिः स यूथपेन्द्रो [605]
सह गिरिणा रुधिरावलिप्तगात्रः ।
नभसि ययौ सुरपूजितोऽतिवेगा-
त्तमसि च जीवयितुं नरेन्द्रसूनुम् ।

Colophon

(for -संप्लवः). D_4 मारुतिशोणितप्लुतो (for शोणितबाहुसंप्लवः). —D_9 om. l. 560–562. —(l. 560) D_4 गदां (for शक्तिं). T_3 स (for च) and सत्वरं (for सत्वरः). —(l. 562) D_4 गदा च (for तदा सा). —(l. 563) D_9 $T_{2.3}$ शक्त्या and -धारिणं (for शक्तिं and -दारिणीं respy.). —(l. 564) D_9 जघान (for चिक्षेप). —(l. 565) D_4 हानिम् (for ग्लानिम्). —(l. 566) D_9 धीरो (for वीरो). D_4 हनुमान् (for ऽपि धीमान्). $D_{4.9}$ संप्लुतः (for संवृतः). —(l. 567) D_4 पादघातेन. —(l. 568) D_9 गगने. D_4 विवेश (for प्रविश्य सः). —(l. 569) D_4 तल- (for पद-) and विशीर्णमस्तको (for विकीर्णमूर्धजो). —(l. 570) D_9 रक्षो (for वीरो). D_4 रक्षोवरो वेदनया तदातुरः. —(l. 572) D_4 स विस्मितः (for च सत्वरः). D_9 च तदा चमूमुखे (for निशितं च सत्वरः). —(l. 573) D_9 -तीक्ष्णेन (for -तीव्रेण). —(l. 574) D_9 कंठ- (for कटि-). T_2 दशकंठकार्यकः. —D_9 om. l. 575. —(l. 575) D_4 त्वचोस्य (for ततस्तु). —(l. 577) D_4 नितंबदेशेतिकठोरकण्वकें. —D_9 om. l. 578. —(l. 578) D_4 om. [अ]ध. —(l. 579) D_4 ततो वचो; D_9 तरिमस्तदा; T_3 एवं वचो (for एवं कपिर्). $D_{4.9}$ T_3 प्र(D_9 [अ]भि)भाषितं. —(l. 580) D_4 त्यजस्व (for संत्यज्य). —(l. 581) D_4 प्रयाहि (for याहि प्र-). —(l. 584) D_4 -घातं तु महच्च (for -पूरं मम ताप-). D_9 हि विशोचनीयं (for मम तापदारुणम्). —(l. 590) D_4 किं ते बलं (for करेण ते). D_9 जानामि बलं च (for ते वृद्धतमस्य). —After l. 592, D_4 ins.:

17* स चन्द्रहासोऽपि बभञ्ज मध्यतो
वक्षःप्रदेशे कठिनेऽतितेजसः ।

—(l. 593) D_9 तथागतं (for ततो गलं). —(l. 594) D_4 संस्पृश्य; D_9 संवेद्य; T_3 संपीड्य (for संवेष्टय). D_9 वानरः (for धावतः). —(l. 595) T_2 नभःस्थले. D_4 तदा (for रुषा). —(l. 598) D_9 विस्रस्त- (for विभ्रष्ट-). D_9 [स]स्तचेतनः; T_3 [स]ल्पतेजसः. —(l. 599) D_4 रक्तविलिप्त- (for कृत्तसमस्त-). —(l. 600) D_9 स (for वै). $D_{4.9}$ महार्णवे (for °हवे). —(l. 601) D_4 ययौ; D_9 ततो (for गतो). —(l. 602) D_4 बलैर्; D_9 जनैर्; T_3 जलैर् (for खरैर्). —(l. 603) D_4 वृद्धतरो (for °तमो). D_9 स राक्षसो विष्टशरै रणाजिरे. —(l. 604) D_4 -दुर्धरेण च (for -दुर्धरेण). —(l. 605) T_2 -समय- (for -समर-). D_4 -यूथपेंद्रनाथः (for -विधिः स यूथपेन्द्रो). D_9 कृतसमरो हरियूथपेंद्रमुख्यः. —(l. 606) $D_{4.9}$ स हरिवरो (for सह गिरिणा). D_9 -[अ]वसिक्त- (for -[अ]वलिप्त-). —(l. 607) D_4 -वीक्षितो (for -पूजितो). —(l. 608) D_9 समरपतितं (for तमसि च).

Colophon: —*Kāṇḍa name*: D_4 लंका°. —*Sarga name*: D_4 माल्यवतः पातालगमनं. —*Sarga no.* (figures,

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

एतस्मिन्नन्तरे वायुः प्रववौ सुखशीतलः ।
क्षीणाकारास्तदा तारा: प्रत्यूषः समपद्यत । [610]
दृष्ट्वा प्रदोषं संप्राप्तं रामः प्रद्रुतचेतनः ।
हा लक्ष्मण प्रियभ्रातः क्व यास्यसि विहाय माम् ।
हा हतोऽस्मि क्व गच्छामि किं पृच्छामि महाप्रिय ।
किं मे राज्येन भोगैर्वा किं प्राणैः सीतयापि वा ।
यत्प्राप्तस्त्वं महाबाहो दीर्घमध्वानमुद्यतः । [615]
कौसल्यां किं नु वक्ष्यामि सुमित्रां च परंतप ।
भरतं किं नु शत्रुघ्नं त्वया वीर्यवता विना ।
हा भ्रातस्तु महाबाहो प्रतिवाक्यं प्रयच्छ मे ।
न त्वं जीवसि सौमित्रे ध्वस्तं दुःखार्दितं च माम् ।
त्वद्वियोगेन दुःखेन तदा चेदमुदीरितम् । [620]
करोम्यराक्षसां भूमिं त्रैलोक्यं च दहाम्यहम् ।
एवमुक्त्वा महाबाहुः प्रगृहीत्वोग्रकार्मुकम् ।
अथान्धकारिर्भगवान्दिनाकीव व्यशोभत ।
ततः संत्रस्तमनसो वानरा भीमविक्रमाः ।
किमेतदिति भाषन्तः ससुग्रीवविभीषणाः । [625]
प्रणिपत्याग्रतः स्थित्वा सर्वे प्राञ्जलयोऽब्रुवन् ।
एकस्यार्थे महाबाहो त्रैलोक्यं मा विनाशय ।
त्वामेव क्रुद्धमासाद्य रौद्राख्योद्धृतपाणिनम् ।
दृष्ट्वा देवाः सगन्धर्वाः प्रद्रवन्ति दिशो दश ।
निर्घातैर्गगनं विद्युज्जालैर्दीप्तमिवाम्बरम् । [630]
चलन्ति पर्वता भूमौ वातोद्धूता महार्णवाः ।
उल्काः पतन्ति निर्घोषाः प्रनष्टाश्च दिशो दश ।
किमेतदिति भाषन्तो दिवि देवाः सचारणैः ।
इति विज्ञापितस्याथ सुग्रीवेण प्लवंगमैः ।
प्रशान्तिमगमत्कोपो राघवस्य महात्मनः । [635]
भूयः शोकसमाविष्टो रामो दशरथात्मजः ।
लक्ष्मणं पतितं दृष्ट्वा निशां क्षयमुपेयुषीम् ।
अब्रवीद्राघवो दीनः सुग्रीवं वानरेश्वरम् ।
सुग्रीव गच्छ किष्किन्धां सह वानरसेनया ।
कृतं मित्रप्रदानं ते युद्धं मे भुवि दुर्लभम् । [640]
अहं चाद्य महाबाहो यत्करिष्यामि तच्छृणु ।
आत्मानं प्रदहिष्यामि प्रदीप्ते हव्यवाहने ।
सहानेन गमिष्यामि लक्ष्मणेन महाबल ।
प्रेतराजपुरं दिव्यं नोत्सहे कर्तुमन्यथा ।
विभीषणस्य कर्तव्यं न कृतं भाषितं मया । [645]
एतद्दहति मे देहं शुष्ककाष्ठमिवानलः ।
एवमुक्तस्तु रामेण सुग्रीवो वाक्यमब्रवीत् ।
किमर्थं मुह्यसे वीर त्वादृशो नैव मुह्यति ।
त्रियामा शर्वरी जाता पश्चिमोऽयं प्रवर्तते ।
नियतं पश्चिमे यामे हनूमानागमिष्यति । [650]
इति तेषां ब्रुवाणानां हनूमान्दृष्टवानम्बरे ।
प्रदीप्त इव शैलेन्द्रो गगने प्राप दीपितः ।
किमेतदिति भाषन्तः कपयो जातविस्मयाः ।
केचिद्द्रुमान्समारूढाः केचिद्गीताः प्रदुद्रुवुः ।
केचिद्दुहाः प्रविविशुः सेतुमन्ये प्रपेदिरे । [655]
केचित्संघावृतास्तस्थुः केचिद्वावन्ति गर्विताः ।
केचिच्छैलशिलावृक्षान्केचित्कायांश्च रक्षसाम् ।
प्रगृह्याभ्यद्रवन्क्रुद्धा नादं मुञ्चन्ति चापरे ।

---

words or both): D4 om. ; D9 81 ; T2 107 ; T3 111. —(l. 610) D4 तथा (for तदा). D9 क्षीणतारस्तदाकाशः (for the prior half). —After l. 610, D4 ins. :

18* अस्तं प्रयातो भगवान्सोमः प्रक्षीणमण्डलः ।

—(l. 611) D9 प्राप्तं तु (for संप्राप्तं). —(l. 612) D4.9 प्रयासि (for यास्यसि). —(l. 613) D4.9 कं (for किं). D4 महाभुज; D9 मम प्रिय; T3 °प्रियं (for महाप्रिय). —(l. 614) D4 भोग्येन (for भोगैर्वा). —(l. 615) D4 त्वं प्रयातुं (for यत्प्राप्तस्त्वं). —(l. 616) T3 प्रवक्ष्यामि. D4 वा (for च). D9 परमं ततः (for च परंतप). —(l. 617) D4 चापि (for किं नु). D4 reads विना in marg. —(l. 618) D4 वीर सु- (for भ्रातस्तु). —(l. 619) D4 अर्हसि (for जीवसि). D9 न त्वं मामर्हसि भ्रातर् (for the prior half). D4 त्यक्तुं (for ध्वस्तं) and हि (for च). —D4 om. l. 620–621. —(l. 620) D9 धृतियोगेन (for त्वद्वियोगेन) and तथा (for तदा). —(l. 622) D9 इत्युक्त्वा स (for एवमुक्त्वा). D4.9 प्रगृहीतोग्रकार्मुकः (for the post. half). —(l. 623) D4 यथांतकाले; D9 अथांधकारे. T2 व्यरोचत (for व्यशोभत). —(l. 624) D9 -दर्शनाः (for -विक्रमाः). —(l. 625) D4 सुग्रीवश्च विभीषणः (for the post. half). —(l. 626) D9 T2 [आ]गताः (for [अ]ग्रतः). D9 [s]भवन् (for ऽब्रुवन्). —(l. 628) D4.9 एवं (for एव). D4 T3 -[उ]द्यत- (for -[उ]द्धृत-). —(l. 630) D4.9 स्फुर्यं(D9 °ट)ते गगने विद्युज्- (for the prior half). D4 -ज्वाला; D9 -ज्वालैर् (for -जालैर्). —(l. 631) D4 वसुधावाता विनदंति (for पर्वता भूमौ वातोद्धूता). D9 यथार्णवाः . —(l. 632) D4 चलंति शिखरा जाताः शैलनेष्टा दिशो दश (corrupt). —(l. 633) D4 इदं च (for एतद्). D9 भाषंते (for भाषन्तो). D4.9 सचारणाः . —(l. 634) D4 एवं (for इति) and [अ]थ सुग्रीवाद्यैः (for [अ]थ सुग्रीवेण). —(l. 638) D4 वानरैः सह (for वानरेश्वरम्). —(l. 639) D9 याहि (for गच्छ). D4.9 समं (for सह). —(l. 640) D4 यदन्यैर्भुवि दुःकृतं (for the post. half). —D9 om. from प्रदहिष्यामि in l. 642 up to प्रेतराजपुरं in l. 644. —(l. 643) D4 महाबलः . —(l. 644) D9 दीप्तं (for दिव्यं) and त्वन्यथा कृतं (for कर्तुमन्यथा). —(l. 645) D4 मित्रस्य (for कर्तव्यं). —(l. 646) D4 एवं (for एतद्) and वीर (for देहं). D4.9 शुष्कं (for शुष्क-). —(l. 648) D4.9 देव (for वीर). D9 हि (for [ए]व). —(l. 649) D4.9 याता (for जाता). —(l. 650) T3 नियते (for नियतं). —(l. 651) D4 दृश्यते (for ददृशे). —(l. 652) D4 प्रति- दीपितः ; D9 प्रापतत्तदा (for प्राप दीपितः). —(l. 655) D4.9 गुहां (for गुहाः). D4 प्रदीपिताः (for प्रपेदिरे). —(l. 656) D9 अभ्यंतरे (for संघावृताः). D4 केचित्पंकावृता नेशुः (for the prior half). —(l. 657) D4 केचित्तोयानि राक्षसाः (for the post. half). —(l. 658) D9 प्रहृष्याभ्यद्रवन्क्रुद्धा (for the

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

आधावन्ति प्रधावन्ति ऊर्ध्वपुच्छास्ततस्ततः ।
मायावी राक्षसः कोऽयमस्मान्हन्तुमुपागतः । [660]
इति तत्संभ्रमं दृष्ट्वा प्रकाशं च तदाम्बरे ।
जगाद यूथपान्राम एष सूर्यः प्रकाशते ।
इदानीं जीवितं नास्ति लक्ष्मणस्य महात्मनः ।
मम शोककरो ह्येष भास्करः पूर्वकोऽपि सन् ।
जानाति मां सुदुःखार्तं सततं बन्धुवत्सलम् । [665]
कृपां विहाय वीरस्य लक्ष्मणस्य महात्मनः ।
कथं करोति दिवसं पतिते पृथिवीपतौ ।
त्वं चापि रावणस्यास्य प्रियं कर्तुमिहोद्यतः ।
भेत्स्यामि मण्डलं तेऽद्य बाणैर्नभसि धावतः ।
इत्युक्त्वा चापमादाय बाणं कालानलप्रभम् । [670]
हन्तुमिच्छति काकुत्स्थो हनूमन्तं सभूधरम् ।
अङ्के लक्ष्मणमारोप्य राघवः शोकमोहितः ।
रविभ्रान्त्या कपिं शूरो रजन्यां हन्तुमुद्यतः ।
तदा तं वारयामास राघवं जाम्बवान्सुधीः ।
असौ न तपनो देव हनूमानेष चाग्रतः । [675]
द्रोणेन गिरिणा सार्धं रविवत्संप्रकाशते ।
नूनमेषोऽपि हनुमान्कृतकार्यो विभाव्यते ।
तिष्ठत्येष महाबाहो मानं कुरु हनूमतः ।
त्रैलोक्यं तस्य वीरस्य मानार्हस्य रघूत्तम ।

निशम्य वाक्यं स तदा नरेश्वरो [680]
विमुच्य भूमौ ज्वलितं शरासनम् ।
प्रस्थापयामास कपींश्च संमुखा-
ञ्जनूमतो जाम्बवतः प्रियं हितम् ।
हे यूथपा गच्छत सार्घ्यपाणयो
विनोदनार्थं मनसश्च मारुतेः । [685]
ते वानरा राघवभाषणाद्भुत
गताश्चुचुम्बुः पवनात्मजं च ।
स्तुवन्ति केचित्परिपूजयन्ति
पुष्पैः सुगन्धैः परितः पतद्भिः ।
पुच्छाग्रसंभ्रामणबाहुवेष्टनैः [690]
शाखामृगा वायुसुतं सरन्ति ।
एतस्मिन्नन्तरे वीरः सोऽवतीर्य नभस्तलात् ।
निक्षिप्य पर्वतं भूमौ नानारत्नविभूषितम् ।
विनीतः प्राञ्जलिस्तत्र राघवं वाक्यमब्रवीत् ।
श्रोतव्यं श्रूयतां देव ससुग्रीवविभीषण । [695]
ओषधीर्नाधिगच्छामि विचिन्वानो नरेश्वर ।
ततोऽयं तु मयानीतः सर्व ओषधिपर्वतः ।
व्यतिक्रममिमं मे त्वं क्षन्तुमर्हसि सुव्रत ।
बहुविघ्नाश्च तत्रासन्येनाहं प्रविलम्बितः ।
हनूमतो वचः श्रुत्वा रामो वचनमब्रवीत् । [700]

---

prior half) and चांबरे (for चापरे). —Note hiatus between the two halves of l. 659. —D₉ om. l. 660. —(l. 660) D₄ [ऽ]पि (for ऽयम्) and हंतुमस्मान् (by transp.) (for अस्मान्हन्तुम्). —(l. 661) D₉ श्रुत्वा (for दृष्ट्वा). D₄ इति संभ्रममालक्ष्य (for the prior half). D₉ T₃ तथा (for तदा). —(l. 662) D₉ वानरान् (for यूथपान्). D₄ आर्यः (for सूर्यः). —(l. 663) D₄ जीवितुं (for जीवितं). —(l. 664) D₄ पूर्वजोपि सन्; D₉ पूर्वभावनः. —(l. 665) D₄ न (for सु-). D₉ बंधुवत्सलः. —(l. 666) D₄ च भास्करः (for महात्मनः). —(l. 668) D₄.₉ [इ]ह (for [अ]स्य) and इव (for इह). —(l. 669) D₉ भासतः (for धावतः). —(l. 672) D₉ शोकविह्वलः. —(l. 673) D₉ हनूमंतं जगद्यो (for कपिं शूरो रजन्यां). D₄ भेत्तुम् (for हन्तुम्). —(l. 675) D₄ एषो; D₉ अहो (for असौ). D₄.₉ आगतः (for चाग्रतः). —(l. 676) D₉ स इहागतः (for संप्रकाशते). —(l. 677) D₉ T₃ हि (for ऽपि). D₄ हनूमान्वै (for ऽपि हनुमान्). —(l. 678) D₄.₉ तिष्ठतु (for तिष्ठति). T₃ महाबाहुर्. —D₉ om. l. 679. —(l. 679) D₄ त्रैलोक्यवीर- (for °क्यं तस्य) and मानार्हं च (for °र्हस्य). —For l. 680–681, D₄ subst.:

19* निशम्य वाक्यं स तदा ऋक्षराजस्य भाषितम् ।
विमुच्य भूमौ ज्वलितं सशरं च शरासनम् ।

—(l. 682) D₄ (before corr. as above) सर्वान् (for संमुखाद्). —(l. 685) D₄ [ऽ]स्य (for च). D₉ गमनस्य (for मनसश्च). —(l. 687) D₄.₉ मुदा (for च). —(l. 688) T₂ किंचित्. D₄ -पूजयंति तैः (for -पूजयन्ति). —(l. 689) D₄ च तमर्चयंति (for परितः पतद्भिः). —(l. 691) D₄ सरंति च; T₂ स्मरंति (for सरन्ति). —After l. 691, D₄ ins.:

20* ततः स हनूमान्वीरः क्षणेनैकेन पर्वतम् ।
गृहीत्वा त्वरया प्राप्तो लङ्केदेशं महाबलम् ।
लङ्कायां राक्षसा दृष्ट्वा परं त्रासमुपागताः ।
एवं ते चिन्तयामासुर्लङ्कायां पातयिष्यति ।
दुष्टेन राक्षसेन्द्रेण समादिष्टो महाबलः । [5]
हनूमन्तं समासाद्य वियतिस्थं महाबलम् ।
छत्रवत्पर्वतं गृह्य एष गच्छति वै पुनः ।
अनेन च हतोऽवश्यं राक्षसं कालनेमिनम् । (sic)
चिन्तां चक्रे तदा रक्षः कथमेतद्भविष्यति ।
ततोऽथ हनुमान्वीरो रामसैन्यमपश्यत । [10]

—(l. 692) T₂.₃ नभः(T₃ °भ)स्थलात्. —(l. 694) D₄ भूत्वा (for तत्र). —(l. 695) D₄ विज्ञाप्यं; D₉ कर्तव्यं (for श्रोतव्यं). —(l. 696) D₉ औषधीर्. D₄ [अ]व- (for [अ]धि-) and चिन्वानो हि (for विचिन्वानो). —(l. 697) D₄ सोयं चानु (for ततोऽयं तु). D₄ कृत्स्नस्त्वौषधि-; D₉ स काष्ठौषधि- (for सर्व ओषधि-). —(l. 698) D₉ [ऽ]द्य (for त्वं). D₄ एवं व्यतिक्रमं जातं (for the prior half). —After l. 698, D₄ ins.:

21* ओषध्या यानि चिह्नानि विस्मृतानि च संभ्रमात् ।
अत्र सर्वं विचिन्वध्वं मयानीतो ह्ययं गिरिः ।

—(l. 699) D₉ -विघ्नानि (for -विघ्नाश्च) and च (for प्र-). —For l. 699, D₄ subst. and reads after l. 697:

22* बहूनि तत्र विघ्नानि निहतानि मया रणे ।
ऋषिरूपधरस्तत्र कालनेमिर्निशाचरः ।
निहतः सुमहाकायो गन्धकालीति मोहिता ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

साधु वीर महाबाहो यस्य युक्तः पराक्रमः ।
देवानां सदृशं कर्म कृतं ते परमं महत् ।
सुग्रीवस्त्वब्रवीत्तत्र सुषेणं वैद्यमुत्तमम् ।
आरोह त्वं गिरिं रम्यं यत्र जाता महौषधी ।
तामोषधिं विजानीहि यया जीवति लक्ष्मणः । [705]
सुग्रीवस्य वचः श्रुत्वा सुषेणोऽन्ये च वानराः ।
गिरिमारुह्य तं रम्यं नानारत्नविभूषितम् ।
गिरिकूटानि रम्याणि नानापक्षियुतानि च ।
पद्मपत्राणि पश्यन्तश्चन्दनान्यगरूणि च ।
चम्पकैर्नागपुंनागैः कर्णिकारैश्च शोभितम् । [710]
स विचिन्वंस्तगिरिं तत्र ओषधीस्ता इतस्ततः ।
वानराणां तु सर्वेषां पूर्ववृत्तानि सूचयन् ।
इह ब्रह्मा च विष्णुश्च शक्रोऽग्निर्वरुणो यमः ।
लोकपालाश्च भगवान्कुबेरः सह राक्षसैः ।
इदं तदमृतस्थानं यत्र देवैः समागतैः । [715]
संवीतमप्सरोभिश्च ऋषिभिश्च महाव्रतैः ।
अत्र राहोः शिरश्छिन्नं विष्णुना प्रभविष्णुना ।
जाता साऽत्रौषधिर्दिव्या विशल्यकरणी शुभा ।
इयं सा चेति हृष्टात्मा ददर्श परमौषधीम् ।

59

After 6.89. 20^{ab}, Ś D$_{2.8.12}$ ins.:

नानातरुगणाकीर्णं नानाधातुविभूषितम् ।
अनेकरत्ननिलयं शिलापादपशोभितम् ।
वापीषु भ्रान्तविहगं लीनविद्याधरोरगम् ।
सिंहव्याघ्रसमाकीर्णं गजयूथसमाकुलम् ।
शतयोजनविस्तीर्णं ततो विंशतिमायतम् । [5]

उत्पाटयित्वा बाहुभ्यां लीलया चाचलोपमम् ।
ततस्तं पर्वतं गृह्य आकाशेन स गच्छति ।
पतन्ति शिखरात्तस्माल्लताभिः सह पादपाः ।
विद्रुताः शरभाः सिंहा व्यालाश्च महिषा गजाः ।
उत्पाट्य शैलं बाहुभ्यामाजगाम महाबलः । [10]
खेचरैः स्तूयमानस्तु सविद्याधरकिंनरैः ।
आजगाम हरिश्रेष्ठो द्वितीय इव पर्वतः ।
पुष्पवृष्टिं विमुञ्चन्ति गतं मार्गे हरीश्वरम् ।
सविद्याधरगन्धर्वा देवाश्च सह किंनरैः ।
वायुमुख्याश्च ते सर्वे संस्तुवन्ति हनूमतम् । [15]
अब्रुवन्विस्मिता दृष्ट्वा हनूमन्तं विहायसि ।
त्रैलोक्येऽपि न पश्यामो महतां कर्म ईदृशम् ।
यो हि कुर्यादिदं कर्म गन्धर्वाणां वधं रणे ।
पर्वतोत्पाटनं चैव कोऽन्यः कुर्याद्धनूमतः ।
साधु साधु महावीर्य विक्रान्तोऽसि महाबल । [20]
शापाद्विमोक्षिता चैव गन्धकाली त्वयाप्सराः ।
त्रयो गन्धर्वकोट्यस्तु हतास्ते निमिषेण वै ।
इममौषधिसंपूर्णं पर्वतं गृह्य गच्छसि ।
वायोस्तु वचनं श्रुत्वा हनुमान्वाक्यमब्रवीत् ।
लक्ष्मणं जीवयिष्यामि आज्ञां कुरु मम प्रभो । [25]
अभिवाद्य पितुः पादौ जगाम स कपीश्वरः ।
खेचरैः स्तूयमानस्तु सविद्याधरकिंनरैः ।
रावणेनापि क्रुद्धेन विदित्वा विक्रमं रिपोः ।
राक्षसाः पूर्वमादिष्टा गृह्यतां वानराधमः ।
निहते वानरे त्वद्य अर्धराज्यं ददाम्यहम् । [30]
तस्य राज्यं प्रदास्यामि तिष्ठध्वं खे निशाचराः ।
रावणस्य वचः श्रुत्वा ये प्रधाना महाबलाः ।

गन्धर्वाणां सहस्राणि निहतानि रघूत्तम ।
विलम्बो मेऽभवत्तत्र तेन न त्वरमागतः । [5]

—(l. 701) D$_9$ यस्ते (for यस्य). D$_4$ विक्रमं यस्य चेदृशं (for the post. half). —(l. 702) D$_9$ हरे (for महत्). —After l. 702, D$_4$ ins.:

23* पुनरेव हि नेतव्यो यदानीतः स एव हि ।
देवानां निलयस्थानं सदा पर्वणि पर्वणि ।

—(l. 704) D$_4$ आरोहय (for आरोह त्वं). T$_{2.3}$ महौषधिः. —(l. 705) D$_{4.9}$ तामौषधीं(D$_9$ °धिं); T$_3$ तदोषधिं. —D$_4$ om. from रम्याणि in l. 708 up to पत्राणि in l. 709. —(l. 709) D$_4$ [अ]गुरूणि. —(l. 711) Note hiatus between the two halves. D$_4$ ते (for स). D$_9$ तं संचिन्वन् (for स विचिन्वन्) and ततस् (for इतस्). D$_4$ प्लवंगमाः (for इतस्ततः). —(l. 712) D$_4$ सुषेणो न्यवदत्तेषां (for the prior half). D$_9$ पूर्ववृत्तानि सूचयन्विचचार ततस्ततः. —(l. 713) D$_9$ तत्र (for इह). —(l. 716) D$_4$ मुनिभिश् (for ऋषिभिश्). D$_9$ महद्भिरौ (for महाव्रतैः). —(l. 718) D$_9$ त्वौषधिर् (for [अ]त्रौषधिर्). —(l. 719) D$_9$ T$_{2.3}$ परमौषधि.

59

(l. 1) D$_8$ नानाकक्ष- (for नानातरु-). —(l. 2) D$_2$ -निचयं (for -निलयं). Ś शिखा- (for शिला-). —(l. 3) D$_2$ प्रहीत- (for वापीषु). Ś$_2$ लीला- (for लीन-). —(l. 5) Ś$_2$ विस्तीर्णम् (for विंशतिम्). D$_2$ उच्छ्रयं (for आयतम्). —(l. 6) D$_2$ पर्वतोत्तमं (for चाचलोपमम्). —Note hiatus between the two halves of l. 7. —(l. 8) D$_2$ तस्य (for तस्माल्). —(l. 9) D$_2$ शलभाः (for शरभाः). D$_8$ व्याकुलाश्च (hypm.) (for व्यालाश्च). —(l. 13) Ś$_2$ गते मार्गे (for गतं मार्गे). D$_2$ गच्छमाने हरीश्वरे (for the post. half). —D$_2$ om. l. 15. —(l. 15) L (ed.) हरीश्वरं (for हनूमतम्). —(l. 16) D$_2$ विस्मितं (for विस्मिता). —(l. 17) Ś$_1$ च; D$_{8.12}$ वै (for वा). D$_2$ महदाश्चर्यमीदृशं (for the post. half). —(l. 18) D$_2$ को (for यो). —(l. 19) D$_2$ नु (for ऽन्यः). —(l. 20) D$_{12}$ हि (for ऽसि). Ś$_2$ महाबलः (for °बल). —(l. 21) Ś$_2$ D$_8$ गंधमाली; D$_2$ गंधकाला (for गन्धकाली). —(l. 22) Ś$_2$ तु (for ते). —(l. 23) D$_2$ इदमोषधि- (for इममौषधि-). —Note hiatus between the two halves of l. 25. —(l. 26) D$_8$ अभिवंद्य (for °वाद्य). —(l. 27)=l. 11. Ś$_2$ स्तूयमानैस्तु (for °मानस्तु). —(l. 28) D$_2$ दुष्टेन (for क्रुद्धेन). —(l. 29) D$_2$ सर्वम् (for पूर्वम्) and वानराधिपः (for

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

गृहीत्वा शरनिर्भिन्नाश्चिपेतुस्ते महीतलम् ।
स्थूलदंष्ट्रा महानादा अष्टदंष्ट्राश्च राक्षसाः ।
उल्कामुखो महावक्त्रश्चतुर्नेत्रो महाबलः । [35]
हस्तिकर्णो द्विजिह्वश्च महावक्त्रो महाबलः ।
रक्ताक्षः पिङ्गलाक्षश्च दंष्ट्रोदरमहोदरौ ।
वक्रनासो विनासश्च काकतुण्डस्तु भैरवः ।
गृध्रतुण्डश्च हरयश्वः काकः कुवदनावुभौ ।
उल्काकेशो महाकायो हस्तिपादश्च राक्षसः । [40]
एते चान्ये च बहवो रावणस्य हितैषिणः ।
आवृत्य गगनं तस्थुर्हनूमद्वधकाङ्क्षया ।
मायाविनो महावीर्या मायां कुर्वन्ति राक्षसाः ।
शक्रो वैश्रवणः केचिद्यमो वरुण एव च ।
ब्रह्मा विष्णुः स्वयं रुद्र आदित्यो वायुशीतगू । [45]
ऋषयः पितरो देवाः केचिद्भूता हुताशनः ।
यतन्ते राक्षसाः सर्वे देवा भूत्वा महाबलाः ।
आवृत्य गगनं तस्थुर्हनुमान्येन गच्छति ।
हनुमानपि तेजस्वी गृहीत्वा शिखरं गिरेः ।
आजगाम महातेजा लीलया स हरीश्वरः । [50]
स तैर्बहुभिरावृत्य शक्तिशूलधरैस्तथा ।
निरुद्धः स महावीर्यः पन्नगैरिव पर्वतः ।
विज्ञातास्ते ततः सर्वे हनूमता महौजसा ।
अब्रवीद्राक्षसान्सर्वान्निहत्य पवनात्मजः ।
यदि रुद्रगणाः सर्वे युद्धार्थमिह चागताः । [55]
तथापि तान्हनिष्येऽहं राक्षसार्थे समुद्यतान् ।
यदि प्राप्तास्त्रयो लोकाः सदेवासुरपन्नगाः ।
सह सर्वान्हनिष्यामि का शङ्का मम राक्षसैः ।
तच्छ्रुत्वा वचनं ते तु हनूमन्तं समन्ततः ।
पूरयञ्शरवर्षेण राक्षसाः पवनात्मजम् । [60]
स हन्यमानो बहुभिर्न चकम्पे महाबलः ।
बाहुभ्यां पर्वतं गृह्य पद्भ्यामेव स युध्यति ।
बद्धलाङ्गूलपाशेन पद्भ्यां प्रहरते कपिः ।
कस्यचिद्वलवद्वक्त्रं कांश्चित्कर्णादगृह्णत ।
कांश्चिज्जघ्राह चरणे जानुभ्यां निष्पिपेष च । [65]
बभञ्ज बाहुवक्षांसि कांश्चित्तत्रैव पोथयत् ।
एवं ते राक्षसाः सर्वे सविद्याधरचारणाः ।
साधु साध्विति तं वीरं पुष्पवर्षैरवाकिरन् ।
तस्मिन्विमर्दे तुमुले स्थूलजङ्घो महाजवः ।
एक एव प्रदुद्राव निःश्वसन्नुरगो यथा । [70]
स गत्वा रावणे सर्वं ससैन्यस्य न्यवेदयत् ।
हताः सर्वे महावीरा ये बलिष्ठा निशाचराः ।
एकेन कपिमुख्येन लीलया रणमूर्धनि ।
अहमेको महद्युद्धं तदा तस्य महाप्रभो ।
कथंचिदेव संप्राप्तस्तव राजन्निवेदितुम् । [75]
तस्य तद्भाषितं श्रुत्वा राक्षसस्य महात्मनः ।
दीर्घमुष्णं च निःश्वस्य न किंचिदिदमब्रवीत् ।
दैवमेव परं मन्ये पौरुषं तु निरर्थकम् ।
यत्र वानरमात्रेण राक्षसा बहवो हताः ।
हनूमांश्च महातेजा निहत्य रजनीचरान् । [80]
आजगामाचलं गृह्य जगर्ज च महाबलः ।
तस्य नादं ततः श्रुत्वा सर्वे ते हरियूथपाः ।
हनुमानिह संप्राप्त इति हर्षमुपागताः ।
राघवोऽपि रवं श्रुत्वा हनूमतो महात्मनः ।
बाष्पपर्याकुले नेत्रे प्रमृज्य मुदितोऽभवत् । [85]
सविद्युदिव जीमूतस्तोयपूर्णो नभस्तले ।

°धमः). —Note hiatus between the two halves of l. 30. —(l. 31) D₂ तस्य मार्गं विचिन्वाना तिष्ठन्संख्ये निशाचराः. —(l. 33) D₂ उत्पेतुस्ते महीतलात् (for the post. half). —(l. 34) D₂ महादंता (for °नादा). —(l. 35) D₂ चतुर्दंष्ट्रो (for °नेत्रो). —Ś₁ om. l. 37–40. —(l. 37) D₂ दग्धोदर- (for दंष्ट्रोदर-). —(l. 38) Ś₂ D₈.₁₂ स (for तु). —(l. 39) D₂ दंडश्च (for हरयश्वः). L (ed.) काक-. D₂ हरयश्ववदनावुभौ (for the post. half). —D₂ om. l. 41–43. —After l. 43, D₈ wrongly repeats l. 41 and om. from l. 44 up to the prior half of l. 45. —(l. 44) D₂ कश्चिद् (for केचिद्). —(l. 45) D₁₂ रुद्राश्चादित्यो (for रुद्र आ°). D₂ वायु-चंद्रमाः (for °शीतगू). —(l. 46) D₂ कश्चिद्भूतो (for केचिद्भूता). Ś₂ हुताशनाः (for °शनः). —(l. 47) D₂ एवं ते (for यतन्ते) and देवमूला (for देवा भूत्वा). —(l. 48) Ś आदित्य- (for आवृत्य). D₂ एव (for येन). —(l. 50) D₁₂ आजघान (for आजगाम). —(l. 52) D₈ सुमहावीर्यः (for स महा°). D₂ निरुद्धश्च महातेजा पर्वतैरिव सर्वतः. —(l. 53) D₂ महात्मना (for महौजसा). —(l. 55) D₂ देव- (for रुद्र-). —D₈ om. l. 58. —(l. 58) D₂ सर्वांस्तान्निहनिष्यामि (for the prior half). —(l. 61) D₂ संताड्यमानो रक्षोभिर् (for the prior half). —(l. 62) Ś पद्भ्यामेवमयुध्यत; D₈ पद्भ्यां च स*युध्यत (for the post. half). —(l. 63) D₂.₁₂ बद्धा (for बद्ध-). —(l. 64) D₂ कांश्चित्कंठाद्. —(l. 65) D₂ ममंथ चरणैः (for जघ्राह चरणे) and चैव पोथयत् (for निष्पिपेष च). —(l. 66) D₂ योधयत; D₈ पूरयत् (for पोथयत्). L (ed.) नेत्रैर्व्ययोजयत् (for तत्रैव पोथयत्). —(l. 67) After the prior half, D₂ ins.:

1* रावणेन प्रणोदिताः ।
निहता वायुपुत्रेण रामस्य प्रियकाम्यया ।
ततो देवगणाः सर्वे.

—(l. 69) D₂ महारवः (for °जवः). —(l. 70) D₂ तुरगो (for उरगो). —(l. 71) D₂ पूर्वं (for सर्वं). D₂ तच्च सैन्यं; L (ed.) स्वसैन्यस्य (for ससैन्यस्य). —(l. 72) D₂ महाराज (for °वीरा) and च शिष्टा (for बलिष्ठा). —(l. 74) Ś एकं. D₂ दत्त्वा (for तदा). —(l. 75) Ś₁ अपि; D₂ इति (for एव). —(l. 77) D₁₂ इति चाब्रवीत् (for इदमब्रवीत्). D₂ स तु नास्तीति चाब्रवीत् (for the post. half). —(l. 78) Ś D₂ दैवमेवं. D₂ धिग्पौरुषमनर्थकं (for the post. half). —(l. 80) D₂ हनूमानपि तेजस्वी (for the prior half) and निहत्वा (for °हत्य). —(l. 82) D₂ ते तु (for तस्य). —(l. 83) D₂ सर्वे (for इति). —(l. 85) D₂ प्रगृह्य (for प्रमृज्य). —D₂ om. l. 86.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

60

After 2050*, Ñ V B D13 (Ñ1 D13 after 2049*) along with D7 (first time) cont.:

प्रभूतानि च चिह्नानि निहतानि मया रणे ।
ऋषिरूपधरस्तत्र कालनेमिर्निशाचरः ।
निहतः सुमहाकायो गन्धकाली च मोक्षिता ।
गन्धर्वाणां सहस्राणि निहतानि बहूनि च ।
विलम्बो मेऽभवत्तत्र तेन न त्वरयागतः । [5]
कालात्ययो कृते चैवं प्रसादं कर्तुमर्हथ ।
औषध्या यानि चिह्नानि तानि नष्टानि संभ्रमात् ।
अत्र सर्वे विचिन्वध्वं मयानीतो ह्ययं गिरिः ।
तस्य तद्वचनं श्रुत्वा साधु साध्विति मारुतिम् ।
प्राशंसद्राघवस्तत्र हनूमन्तं महाबलम् । [10]
देवानां सदृशं कर्म यत्कृतं हरिपुंगव ।
पुनरेव हि नेतव्यो यत आनीत एव हि ।
देवानां निलयं स्थानं सदा पर्वणि पर्वणि ।

अथ प्रीतो महातेजाः सुग्रीवो वाक्यमब्रवीत् ।
साधु वीर महाभाग यस्य ते बलमीदृशम् । [15]
सुषेणं चाब्रवीत्तत्र सुग्रीवः सुमहायशाः ।
देहि शीघ्रं महाभाग लक्ष्मणस्य महौषधीम् ।
सुग्रीवस्य वचः श्रुत्वा सुषेणस्त्वरितं ययौ ।
स तु दृष्ट्वा गिरेः शृङ्गं शशंस पवनात्मजम् ।
ततो द्रुमलताकीर्णं नानारत्नविभूषितम् । [20]
पश्यन्स गिरिकुञ्जानि नानापुष्पफलानि च ।
चन्दनागुरुवृक्षांश्च नानापुष्पलतास्तथा ।
हिन्तालसरलांश्चैव कोविदारांश्च पुष्पितान् ।
मन्दारपाटलांश्चैव सिन्धुवारवनानि च ।
कर्णिकारानशोकांश्च करवीरवनानि च । [25]
केसराणि च चूतांश्च नारिकेलवनानि च ।
नानागुल्मलताकीर्णं नानाजातिसमाकुलम् ।
विस्मितः पर्वतं दृष्ट्वा फलमूलोपशोभितम् ।
आरुरोह गिरिं रम्यं नानाधातुविभूषितम् ।
आरुह्य त्वरया चैव सोऽपश्यत्परमौषधिम् । [30]

60

(l. 1) Ñ1 D13 बहूनि तत्र चिह्नानि (for the prior half). Ñ1 महारणे; V3 महाबले (for मया रणे). —D13 om. l. 2-4. —(l. 3) Ñ2 V3 B3 D7 स (for सु-). —(l. 5) B3 तत्तु (for तत्र). Ñ1 D13 एवं विलंबितस्तत्र (D13 °स्मात्) त्वरितो नागतो ह्यहं. —(l. 6) V2 B2-4 चैव (for चैवं). V3 B1 कालात्ययकृते चैव (for the prior half). Ñ1 D13 एतद्व्यतिक्रमं त्वं तु (D13 मेद्य) क्षंतुमर्हसि मे प्रभो. —Ñ1 D13 om. l. 7-8. —(l. 7) B1 D7 ओषध्या. V2 B1.4 D7 भ्रष्टानि (for नष्टानि). —(l. 8) V3 illeg. after वैं in the prior half up to the post. half of l. 9. —(l. 10) B1 -रूपिं (for -बलम्). —For l. 9-10, Ñ1 D13 subst.:

1* हनूमतो वचः श्रुत्वा रामो हर्षसमन्वितः ।
अब्रवीत्साधु वीरेति विक्रमं यस्य तादृशम् ।

[(l. 2) D13 यस्य ते विक्रमो दृढः (for the post. half).] —Ñ1 D13 om. l. 11-13. —(l. 11) Ñ2 B3 नेदृशं (for स°). B2 कृतं वै (for यत्कृतं). —(12) V3 (with hiatus) यत्र (for यत). Ñ2 V1 B3 एष (for एव). V1 यत आनीतवानिति (for the post. half). —(l. 13) V3 B2.3 विलय- (for निलयं). B1 क्रीडास्थानं हि देवानां (for the prior half). —(l. 15) V1 महाबाहो (for °भाग). —V3 damaged from दृ in the post. half up to वी in the prior half of l. 16. —(l. 16) V2 B1 स (for सु-). —(l. 17) V3 लक्ष्मणाय (for लक्ष्मणस्य). —(l. 18) V1.2 B1.4 त्वरितः (for °तं). —For l. 14-18, Ñ1 D13 subst.:

2* प्रशशंस च सुग्रीवो हनूमन्तं कपीश्वरः ।
ततोऽब्रवीत्सुसंहृष्टः सुषेणं वैद्यमुत्तमम् ।
विशल्यकरणीं शीघ्रमुत्पाट्य च वनौषधीम् ।
सुग्रीववचनं श्रुत्वा सुषेणो हर्षमागतः ।

—Then Ñ1 D13 read l. 29. —G (ed.) om. l. 19-26. Ñ1 D13 om. (hapl.) l. 19-20. —(l. 19) V3 damaged from दृष्ट्वा up to लता in l. 27. B2 प्राशंसत् (for शशंस). V1 प्रशशंसानिलात्मजं (for the post. half). —(l. 21) Ñ1 V1.2 B1 D13 अपश्यद् (for पश्यन्स). B2.3 -शृंगाणि (for -कुञ्जानि). Ñ1 D13 कमलैरुत्पलैस्तथा (for the post. half). —(l. 23) B2 -शबलांश्; B3 (also in marg. as above) -नगरांश् (for -सरलांश्). —Ñ2 D7 om. (hapl.) from the post. half up to the prior half of l. 24. V2 B1 सु- (for च). —(l. 24) V1 illeg. for the prior half. B2 पलाश-; B3 कुंठार- (also पिंडार-); B4 चंपकान् (for मन्दार-). Ñ2 B3 -फलानि (for -वनानि). —B2 transp. l. 25 and l. 26. —B1.4 om. (hapl.) l. 26. —(l. 26) Ñ2 V2 D7 केसरान्निचुलांश्चूतान् (for the prior half). —For l. 22-26, Ñ1 D13 subst.:

3* वृक्षखण्डानि रम्याणि चन्दनागुरुशोभया ।
हिन्तालांस्तिलकांश्चैव नीपान्स्यन्दनकेसरान् ।
केतकान्पाटलांश्चैव मुचुकुन्दान्सुगन्धिनः ।
चम्पकान्कर्णिकारांश्च चूतान्लोध्रान्समन्ततः ।
कुटजान्नागपुष्पांश्च नीलाशोकांस्तथार्जुनान् । [5]

[(l. 2) D13 हिंताल-. —(l. 4) Ñ1 रम्यकान् (for चम्पकान्).] —Ñ1 D13 om. l. 27. G (ed.) transp. l. 27 and l. 28. —(l. 27) B1 महा- (for first नाना-). V1 -द्रुम-; B4 -तरु- (for -गुल्म-). B3 -समाकीर्णं (for -लता°). B1 -पक्षि-; D7 -धातु-; G (ed.) -गुल्म- (for -जाति-). B4 -विभूषितं (for -समाकुलम्). —(l. 28) G (ed.) स गिरिं (for पर्वतं). Ñ1 D13 विचिनोति समंतात्स पर्वतं गंधमादनं. —(l. 29) V1 दिव्यं (for रम्यं). V3 B1 नगं दिव्यं. Ñ1 D13 आरुहत्पर्वतं दिव्यं (for the prior half). —(l. 30) V3 damaged from या in the prior half up to the post. half. B1 तस्य शिखरे (for त्वरया चैव). Ñ1 D13 अचिरेणैव कालेन विशल्यां तामपश्यत.

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

61

After 2060*, Ñ V B along with D7 cont.; D3 cont. after 2061*; D4.9 T2.3 cont. after 2062*; while D13 ins. after l. 1 (including addl. colophon) of 2054*; whereas Ś D2.8.12 ins. l. 5-15, 17, 19-20, 79-80 and 77 only after 6.89. 29^{ab} (D12 before 29^{cd} owing to om.):

ततस्तु लक्ष्मणं दृष्ट्वा प्लवगन्तः प्लवंगमाः ।
कृत्वा ते हर्षसंनादमभ्यारोहन्त पर्वतम् ।
सर्वर्तुकुसुमाकीर्णं नानाद्रुमलताकुलम् ।
मुञ्चन्तः सिंहनादांश्च विचेरुस्ते शिलोच्चयम् ।
अपूर्वं पर्वतं दृष्ट्वा कौतूहलसमन्विताः । [5]
ततः प्राञ्जलयो भूत्वा सुग्रीवं समुपस्थिताः ।
कौतूहलसमुत्पन्नाः पर्वतारोहणं प्रति ।
अनुज्ञातास्ततस्तेन सुग्रीवेण महात्मना ।
ते नगाग्रांस्ततो गत्वा फलार्थं प्रतिधाविताः ।

61

D3.4.9 T2.3 om. l. 1-4. —(l. 1) V1 B1 च (for तु). Ñ1 D13 उत्थितं (for ततस्तु). V3 वीरा (for दृष्ट्वा). V3 B1 प्लवंतश्च; D7 प्रवलंतः (for प्लवगन्तः). Ñ1 D13 विशल्यं निरुपद्रवं (for the post. half). —After l. 1, Ñ2 D7 read l. 5-8. —Ñ1 D13 om. l. 2-3. —(l. 2) B4 दृष्ट्वा (for कृत्वा). Ñ2 D7 प्र- (for ते). V2 B4 -संवादम् (for -संनादम्). V3 B3 अधि- (for अभि-). B1 अभ्यारोहन्नगोत्तमं (for the post. half). —(l. 3) Ñ2 सर्वे तु; B1 सर्वतः (for सर्वर्तु-). Ñ2 illeg. for the post. half. —(l. 4) V1.2 B2.3 विचेरंत (for °रुस्ते). B1 तं नगोत्तमं (for ते शिलोच्चयम्). —For l. 4, Ñ1 D13 subst.:

1* सिंहनादान्व्यमुञ्चन्त वानरास्ते समन्ततः ।
[D13 विमुंचंतो.]

—Before l. 5, Ś D2.4.8.9.12 T2.3 ins.:

2* लक्ष्मणोऽपि समुत्थाय पर्यष्वजत मारुतिम् ।
सर्वे ते हर्षमापन्ना वानराः कामरूपिणः ।

[D4.9 T2.3 om. l. 1. —(l. 2) D4.9 T2.3 ततस्ते (D9 °स्तु) (for सर्वे ते). D2 हर्षसंपन्ना. D4.9 T2.3 कपयः (for वानराः).]

—B1-3 om. l. 5-8. V3 om. l. 5. —(l. 5) V1 ते तु तं; D9 T2.3 सर्वतो (for पर्वतं). D13 कुतूहल- . —(l. 6) G (ed.) सर्वे (for ततः). Ñ2 D7 वाक्यमब्रुवन् (for समुपस्थिताः). —For l. 6, Ś D2.8.12 subst.:

3* ततस्ते वानराः सर्वे राघवं वाक्यमब्रुवन् ।;

while D3 subst.:

4* वानरा राममानम्य ऊचुः परमहर्षिताः ।;

whereas D4 T2.3 subst.:

5* व्यज्ञापयंश्च सुग्रीवं राघवं सहलक्ष्मणम् ।
[T2 आज्ञापयंश्च. D4 च स- (for सह-).]

On the other hand, D9 subst.:

6* व्यज्ञापयन्तश्च सुग्रीवं तथा सहलक्ष्मणम् ।

—(l. 7) V3 damaged after कौ up to the prior half. V1 -समायुक्ताः; D4.9 T2.3 -समाविष्टाः (for -समुत्पन्नाः). Ś D2.3.7.8.12 कौतूहलं महाराज (for the prior half). Ś Ñ2 V2 B1-3 D2.3.7.8.12 अस्माकं(Ñ2 V2 B1-3 D7 सर्वेषां; note hiatas in other MSS.) पर्वतं प्रति (for the post. half). —After l. 7, Ś Ñ2 D2.3.7.8.12 ins.:

7* अनुज्ञां देहि राजेन्द्र पर्वतारोहणे प्रभो ।

[D3 आज्ञां ददस्व (for अनुज्ञां देहि). Ñ2 D2.3.7 -[आ]रोहणं प्रति (for °हणे प्रभो).]

—(l. 8) Ś D2.8.12 दत्तानुज्ञास्; D3 दत्ताज्ञास्ते (for अनुज्ञातास्). Ś Ñ2 D2.3.7.8.12 तु रामेण (for ततस्तेन). Ś D3.12 च वानराः; Ñ2 D7 च ते ततः; D2 समंततः (for महात्मना). D3 पर्वतं सर्ववानराः (for the post. half). —After l. 8, Ñ1 V B4 (l. 1-2 only) D13 ins.:

8* आरूढास्तत्र पश्यन्ति पर्वते गन्धमादने ।
ऋषिकुण्डानि दिव्यानि कमलान्युत्पलानि च ।
पर्वतं फलपुष्पाढ्यं नानाधातुविभूषितम् ।
समन्ततः परिचितं पर्वतं गन्धमादनम् ।

[(l. 1) V1 तत्रारूढास्तु (for आरूढास्तत्र). —(l. 2) Ñ1 V2 गिरिकर्णानि; D13 गिरिकुंडानि (for ऋषिकुण्डानि). V1.3 पुण्यानि; D13 रम्याणि (for दिव्यानि). —V3 damaged from first ला up to धा in l. 3. G (ed.) फलानि विविधानि च (for the post. half). —(l. 3) V2 illeg. for फल-. —(l. 4) V3 प्रविचितं (for परिचितं). D13 सर्वतः प्रविचिन्वंति (for the prior half). V1 समंततस्ते प्राचिन्वन्कौतूहलसमन्विताः.]

—Then Ñ1 D13 cont.; V cont. after 11*:

9* खनन्ति गिरिकुण्डेषु भक्षयन्ति फलानि च ।

[V2 illeg. for the prior half. V3 खांति स्म; D13 सुस्तानि (for खनन्ति). V3 damaged after गिरिकु up to च. V1 खात्वा च ऋषिकुंडेषु भक्षयंति स्म तानि वै.]

—Ñ1 D13 om. l. 9. —(l. 9) B3 ते नगाग्रैर्नगाग्राणि (for the prior half). —For l. 9, Ñ2 B2 D7 subst.:

10* ते नगाग्रान्नगाग्राणि फलार्थं च प्रधाविताः ।

[B2 समवेतैर् (for ते नगाग्रान्) and फलार्थेन (for °र्थं च).]; while V subst.:

11* ते नगाग्राणि दिव्यानि फलानि विविधानि च ।;

whereas B4 subst.:

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

क्षणेन वानरास्तत्र फलमूलमभक्षयन् । [10]
ते भक्षयित्वा मूलानि फलानि विविधानि च ।
पीत्वा च शीतलं तोयमवतेरुः प्लवंगमाः ।
अवतीर्णान्कपीन्दृष्ट्वा रामः सुग्रीवमब्रवीत् ।
उच्यतां हनुमान्वीरः पर्वतो नीयतामिति ।
यस्माच्चैवोद्धृतः स्थानात्तत्रैवायं निवेश्यताम् । [15]

सुग्रीवो रामवचनाद्धनूमन्तं तथोक्तवान् ।
हनूमानेवमुक्तस्तु सुग्रीवेण महात्मना ।
प्रणम्य वाहिनीमुख्यान्महाबलपराक्रमान् ।
बाहुभ्यामुद्धरंस्तत्र शिलोच्चयमनुत्तमम् ।
उत्पपात स वेगेन व्योम मारुतनन्दनः । [20]
अपश्यद्रावणस्तं च नीयमानं शिलोच्चयम् ।

12* प्लवगास्ते नगाग्राणि फलार्थे परिधाविताः ।

—V3 om. l. 10.—(l. 10) B2.3 वानरैस् (for °रास्). B2.3 अभक्ष्यत; G (ed.) च भक्षितं (for अभक्षयन्). —(l. 11) B1 भक्षयित्वा तु (for ते भक्षयित्वा).—(l. 12) B3 तु (for च). —V3 reads l. 13–16 for the first time after l. 4, repeating them here.—(l. 13) V2.3 (second time) B2 हरीन् (for कपीन्). V3 (first time) अपूर्वं ते तु तं दृष्ट्वा (for the prior half).—V3 (second time) damaged from म in the post. half up to नीय in l. 14.—For l. 10–13, Ñ1 D13 subst.:

13* निगिषान्तरमात्रेण तृप्तास्ते हरिपुंगवाः ।
फलमूलानि खादित्वा पीत्वा पानीयमेव च ।
अवतीर्णास्तु ते तत्र वानराः कामरूपिणः ।

[(l. 1) Ñ1 निमेष-.—(l. 3) Ñ1 ततस् (for तु ते).]

—Ñ1 D13 om. l. 14–15.—(l. 14) V3 (first time) damaged after तां up to पर्व.—(l. 15) B3 प्र (*sup. lin.*)वेश्यतां (for निवेश्यताम्).—For l. 9–15, Ś D2.3.8.12 subst.:

14* ते तु हृष्टतमा भूत्वा आरोहन्ति समन्ततः ।
भक्षयन्तः पिबन्तश्च लोलयन्तश्च पर्वते ।
क्षणेन वानरास्तृप्ता मधुमत्ताश्च सर्वशः ।
भक्षयित्वा फलान्दिव्यान्पीत्वा पानीयमुत्तमम् ।
अवतीर्णाः समन्ताच्च वानराः कामरूपिणः । [5]
अवतीर्णेषु तृप्तेषु वानरेषु महात्मसु ।
रामोऽब्रवीच्च सुग्रीवं हनुमानुच्यतां कपिः ।
नीयतां पर्वतस्तत्र त्वयानीतो यतो ह्ययम् ।

[(l. 1) Note hiatus between the two halves. D3 आरूढाः पर्वतं प्रायः फलपुष्पांबुभोजिनः.—D3 om. l. 2–3 and l. 6.—(l. 2) D12 reads भक्षयन्तः in marg. —(l. 3) Ś D8.12 सुप्ता (for तृप्ता). D2 सर्वतः (for सर्वशः). —(l. 4) D3 फलान्येते (for °न्दिव्यान्). D2 एव च (for उत्तमम्). D3 [अ]मृतसमं जलं.—(l. 5) D2 समं ते तु; D3 समंताच्च (for समन्ताच्च).—(l. 6) D12 om. (hapl.) वानरेषु.—(l. 7) D2 ब्रवीति (for ऽब्रवीच्च). D3 एतस्मिन्नंतरे रामो हनूमंतमुवाच ह.—(l. 8) D2 (with hiatus) आनीतो यस्त्वया इह; D3 यत्राभूत्स पुरा कपे (for the post. half).]

—D3 om. l. 16.—(l. 16) V3 (both times) B2 अथ (for तथा).—For l. 17, Ś D2.3.8.12 subst.:

15* राघवस्य वचः श्रुत्वा हनूमान्वानरेश्वरः ।

[D3 वायुनंदनः (for वानरेश्वरः).]

—For l. 16–17, Ñ1 D13 subst.:

16* अथाब्रवीत्तं सुग्रीवो हनूमन्तं महाबलम् ।
नयस्व वै गिरिं वीर भासुरं गन्धमादनम् ।
सुग्रीववचनं श्रुत्वा हनूमान्वायुविक्रमः ।

[(l. 1) D13 तु (for तं).—(l. 2) D13 पर्वतं (for भासुरं).]

—Ñ D8.13 om. l. 18.—(l. 18) V1 B2–4 -पराक्रमः; V3 damaged (for -पराक्रमान्).—V3 om. l. 19–20. —(l. 19) V1.2 B2 तं शिलोच्चयमुत्तमं (for the post. half). —For l. 19, Ñ1 D13 subst.:

17* बाहुभ्यां तोलयामास पर्वतं गन्धमादनम् ।

—(l. 20) B1 च; B2.3 [अ]थ (for स).—For l. 19–20, Ś D2.3.8.12 subst.:

18* बाहुभ्यां पर्वतं गृह्य जगाम विमलेऽम्बरे ।

[D3 नीत्वा (for गृह्य) and यथास्थानं चचाल सः (for the post. half).]

—D3 om. l. 21.—For l. 21, Ñ1 D13 subst.:

19* पश्यन्ति राक्षसाः सर्वे नयन्तं गन्धमादनम् ।

—(l. 22) Ñ1 D13 रावणस्तु (for दृष्ट्वा चैव). V3 चैव (for तत्र). Ñ1 D13 तान्समागतान् (for बलदर्पि°).—(l. 23) Ñ2 -बाहुं (for -घोरं).—For l. 8–23, D4.9 T2.3 subst.:

20* दत्ताज्ञा राघवेणैव सुग्रीवेणाङ्गदेन च ।
तं समारुरुहुः शैलं नानारत्नविभूषितम् ।
पश्यन्ति गिरिकूटानि भक्षयन्ति फलानि च ।
हृद्यानि मधुपानानि पिबन्ति मधुपिङ्गलाः ।
संभक्ष्य फलमूलानि पीत्वा पानीयमुत्तमम् । [5]
अवतीर्णास्ततः सर्वे वानरा हृष्टचेतसः ।
अथोवाच हनूमन्तं रामः सुग्रीवसंनिधौ ।
पर्वतो नीयतां वीर मर्यादा मा प्रणश्यतु ।
एवमुक्तस्तु हनुमान्वातरंहो महाकपिः ।
दोर्भ्यामुत्पाटय शैलेन्द्रं प्रयातुमुपचक्रमे । [10]
अथोदतिष्ठत्तीक्ष्णांशुर्लङ्घयित्वा महोदधिम् ।
दिशश्च विमलाः सर्वा जाताश्च हिमपाण्डुराः ।
हनूमन्तं सुविक्रान्तमुत्पत्य गगने स्थितम् ।
अपश्यन्राक्षसाः सर्वे व्रजन्तं सागरोपरि ।
रावणस्त्वब्रवीद्दृष्ट्वा समीपस्थान्निशाचरान् । [15]
तालजङ्घं महाकायं महानादं मनोहरम् ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

दृष्ट्वा चैवाब्रवीत्तत्र राक्षसान्बलदर्पितान् ।
तालजङ्घं महाघोरं सिंहवक्त्रं घटोदरम् ।
उल्कामुखं महावीर्यं चञ्चलाक्षं च राक्षसम् ।
हस्तिकर्णं महाबाहुं कङ्कतुण्डं तथैव च । [25]
शीघ्रं मायाप्रभावेन गृह्यतां हनुमान्कपिः ।
युष्मभ्यं राक्षसश्रेष्ठाः पूजां दास्याम्यनुत्तमाम् ।
रावणस्य वचः श्रुत्वा राक्षसास्ते महाबलाः ।
विचित्रकवचाः सर्वे नानाप्रहरणायुधाः ।

ततः सर्वे समुत्पेतुराकाशं रजनीचराः । [30]
गच्छन्तं मारुतिं दृष्ट्वा नगहस्तं दुरासदम् ।
राक्षसा बलिनः सर्वे वाक्यं तमिदमब्रुवन् ।
कस्त्वं वानररूपेण गिरिमादाय गच्छसि ।
न बिभेषि च देवानां दैत्यानां न च रक्षसाम् ।
अद्य कस्ते गृहीतस्य परित्राता भविष्यति । [35]
ब्रह्मा महेश्वरो विष्णुर्यमो वैश्रवणस्तथा ।
शक्रश्च सुमहातेजाः संप्राप्तास्त्वां जिघांसया ।

[D4 variants : (l. 1) दत्तानुज्ञा राघवेण (for the prior half). —(l. 4) दिव्यानि (for ह्यानि).—(l. 5) reads पीत्वा in marg.—(l. 6) -मानसाः (for -चेतसः). —(l. 8) विनश्यतु.—(l. 9) कृत- (for वात-).—(l. 10) तं शैलं (for शैलेन्द्रं). —(l. 11) महार्णवं.—(l. 12) विदिशः (for विमलाः).—(l. 16) स्थूल- (for ताल-). -नादं (for -कायं). महासत्त्वं (up to त्वं in marg.) महोदरं (for the post. half).]

—(l. 24) Ñ2 illeg.; V B2-4 चंद्रनेत्रं(B3 °लेखं); D4.7.9 T2.3 चतुर्वक्त्रं(D7 °दंष्ट्रं) (for चञ्चलाक्षं). —(l. 25) Ñ2 V2 B4 D7 महाकर्णं; V3 °वीर्यं (for महाबाहुं). Ñ2 V2 B4 कालतुंडं (for कङ्कतुण्डं). V3 ततोब्रवीत् (for तथैव च). —For l. 23–25, Ñ1 D13 subst.; while D4.9 T2.3 subst. l. 3–4 only for l. 25 :

21* तालजङ्घं महावज्रं महाकायं महाबलम् ।
कक्षतुण्डं च बीभत्सं चलनेत्रं महोदरम् ।
हस्तिकर्णं महावीर्यं सिंहवक्त्रं च दुर्जयम् ।
एते चान्ये च बहवो नियुक्ता रावणेन ह ।

[(l. 1) D13 स्थूलजंघं महावक्त्रं (for the prior half). —(l. 2) D13 कंकतुंडं. D13 बलनेत्रं (for चल°).—(l. 3) D4.9 T2.3 शंकुकर्णं (for महावीर्यं). D13 तु (for च). D4.9 T2.3 मेघचित्रं(D4 °चित्तं) च राक्षसं (for the post. half). —(l. 4) D4.9 T2.3 आज्ञप्ता (for नियुक्ता) and तु (for ह).]

—For l. 22–25, D3 subst. :

22* रावणोऽप्यब्रवीत्तत्र समीपस्थान्निशाचरान् ।
स्थूलदंष्ट्रं कालदंष्ट्रं वक्रतुण्डं निशाचरम् ।

—(l. 26) D3 वध्यतां हनुमान्; D9 T2.3 हनूमान्हन्य(D9 °न्वार्यं)ताम्. Ñ1 D4 transp. गृह्यतां and हनुमान्. D4.9.13 T2.3 इति (for कपिः). —After l. 26, Ñ1 D13 ins. :

23* गृह्णीयाद्यो ह्यमुं पापं सोऽर्धराज्यवहो भवेत् ।
एवं गृहीत्वा तं तिष्ठ पश्य देवान्ममागतान् ।

[(l. 1) D13 राज्यस्यार्धं ददामि च (for the post. half). —Ñ1 om. l. 2.]

—(l. 27) V1 युध्यतां; V3 B2 युध्यध्वं (for युष्मभ्यं). —For l. 27, D3 subst. :

24* वानरे निहते चास्मिन्सर्वं राज्यं ददामि वः ।

—Then D3 cont. :

25* एवमेव करिष्यामो यथाज्ञापयसे प्रभो ।
एवमुक्त्वा गता मायां चक्रुस्ते विविधामथ ।

—D3 om. l. 28–35. D13 om. l. 28–34. —For l. 27–28, D4.9 T2.3 subst. :

26* यो निगृह्यानयेत्तूर्णं तस्य राज्यं ददाम्यहम् ।
श्रुत्वा तु राक्षसेन्द्रस्य वचस्ते त्वरयान्विताः ।

[(l. 2) T2.3 तद् (for तु) and तु (for ते).]

—V3 om. l. 29. —(l. 29) B1 कवचावृतसर्वांगा (for the prior half). V1 reads the post. half in marg. B1 -प्रहरणास्; B4 -प्रबलास् (subm.) (for -प्रहरण-). B1.4 तथा; D4.9 -[उ]द्यताः; T2.3 -[अ]द्भुताः (for -[आ]युधाः). —(l. 30) B3 समुत्पत्य (for °त्पेतुर्). B1 राक्षसा; B3 चाकाशं (for आकाशं). —For l. 30–31, Ñ1 subst. :

27* उत्पतन्तं ततः सर्वे तदाकाशं महाबलाः ।
राक्षसा भीमकर्माणो मार्गमावृत्य वानरम् ।;

while D4.9 T2.3 subst. :

28* विहायसि गताः क्षिप्रं कृत्वा ते भास्वरं वपुः ।
वेष्टयन्ति हनूमन्तं मेघा इव दिवाकरम् ।

[(l. 1) D4 विहायसा. D4 देवासुरं (for ते भास्वरं). T2.3 ते कृत्वा भास्करं वपुः (for the post. half).]

—Ñ1 D9 T2.3 om. l. 32. —(l. 32) V3 B1 तद् (for तम्). D4 वाक्यमेतदिति ब्रुवन् (for the post. half). —(l. 33) Ñ1 पर्वतं गृह्य; D4.9 T2.3 गिरिं संगृह्य (for गिरिमादाय). —(l. 34) D4.9 T2.3 त्वं बिभेषि (for बिभेषि च). D9 transp. देवानां and दैत्यानां. B1.2 चैव; B3 च न (*sup. lin.* also एव) (by transp.) (for न च). V3 न दैत्यानां न (for दैत्यानां न च). D4.9 T2.3 च महात्मनां (for न च रक्षसाम्). —For l. 34, Ñ1 subst. :

29* न त्वं बिभेषि देवेभ्यो दैत्येभ्यो राक्षसेषु च ।

—D9 T2.3 om. l. 35–37. —(l. 35) D4 परित्रातुं (for परित्राता). —D4 om. l. 36–37. —(l. 37) B1 च; D7 त्वज्- (for त्वां). V3 प्राप्ताः स्म त्वज्- (for संप्राप्तास्त्वां). —For l. 36–37, Ñ1 D13 subst. :

30* शक्रो वैश्रवणश्चैव यमो वरुण एव च ।
ब्रह्मा चापि हि संप्राप्तस्त्वां हन्तुं हि वनौकसम् ।

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Digitized by eGangotri

तेषां तद्वचनं श्रुत्वा प्रत्युवाच स मारुतिः ।
यदि लोकास्त्रयः प्राप्ताः ससुरासुरपन्नगाः ।
सर्वांस्तान्निहनिष्यामि स्वबाहुबलमाश्रितः । [40]
इत्युक्त्वा तानसौ तत्र राक्षसान्रावणाश्रयान् ।
विदित्वा चेष्टितैर्वीरैर्हनूमांस्तैरयुध्यत ।
स गृहीत्वा गिरिं दोर्भ्यां पद्भ्यामेव महाबलः ।
युध्यमानो जघानाथ राक्षसांस्तान्महाबलान् ।
निष्पिपेषाथ रक्षांसि पद्भ्यामेव महाबलः । [45]
कांश्चिदेवाथ दंष्ट्राभिरपरानपि जानुना ।
आकाशे गच्छतस्तस्य वानरस्य महात्मनः ।
अन्ये लाङ्गूलपाशेन बद्धास्तत्र ललम्बिरे ।
लम्बमाना विभान्ति स्म राक्षसास्ते महाबलाः ।

[(l. 1) D_{13} शक्रं वैश्रवणं वायुं यमं वरुणमेव च. —(l. 2) D_{13} च (for second हि).]

—Then D_{13} cont.:

31* देवतानां समुत्पन्नो हनूमान्गृह्यतामिति ।

—(l. 38) $\tilde{N}_1$ D_{13} हनूमान्वाक्यमब्रवीत् (for the post. half). —For l. 38, $D_{4.9}$ $T_{2.3}$ subst.:

32* एवं तैर्निगृहीतस्तु विचिन्त्येदं वचोऽब्रवीत् ।

[D_4 वै (for तैर्). D_9 [ए]वं (for [इ]दं).]

—D_9 cont.:

33* मया हतास्त्वमे सर्वे गच्छन्तो यमपुरं द्रुतम् ।
इत्युक्त्वा राक्षसाः केचिन्नादेन विनिपातिताः ।

[(l. 1) post. half hypm.]

—For l. 36–38, D_3 subst.:

34* शक्रो वैश्रवणः कश्चिद्यमो वरुण एव च ।
ब्रह्मा विष्णुश्च रुद्रश्च सूर्यो वायुश्च चन्द्रमाः ।
ऋषयः पितरो देवाः केचिदासन्निशाचराः ।
आवृत्य गगनं तस्थुर्हनुमान्यत्र गच्छति ।
विज्ञाता तेन माया तु न च सर्वापि रक्षसाम् । [5]
अब्रवीद्राक्षसान्सर्वान्विहस्य पवनात्मजः ।
यदि देवगणाः सर्वे युद्धार्थमिह चागताः ।
तथापि तान्हनिष्यामि राक्षसार्थे समुद्यतान् ।

[(l. 1) cf. l. 1 of 30*.]

—D_9 om. l. 39–47. —(l. 39) B_1 प्रोक्ताः (for प्राप्ताः). $\tilde{N}_1$ $D_{3.4.13}$ $T_{2.3}$ यदि प्राप्तास्त्रयो लोकाः (for the prior half). D_3 सदेव- (for °सुर-). D_4 $T_{2.3}$ भवद्भिः सहिताः सुराः; D_{13} स्वयं नारायणोपि वा (for the post. half). —(l. 40) $\tilde{N}_2$ V_2 B_4 विहनिष्यामि; D_3 तु ह° (for निह°). $\tilde{N}_1$ V_3 सुबाहु- (for स्व°). B_4 आस्थितः (for आश्रितः). D_3 का कथा मम रक्षसां (for the post. half). —For l. 40, D_4 $T_{2.3}$ subst.:

35* ब्रह्माणमग्रतः कृत्वा न समा मम केचन ।

[D_4 नो साम्यं मम केनचित् (for the post. half).]

—Thereafter they cont.:

36* इत्येवं ब्रुवतस्तस्य कपिसिंहस्य तत्क्षणे ।
ततोऽवर्धत लाङ्गूलं कालपाशोपमं द्विषाम् ।
न च वायुसुतस्तस्मिन्व्रजमानो विहायसि ।

[(l. 1) T_3 तत्क्षणं. —(l. 3) D_4 अथ (for न च).]

—For l. 40, D_{13} subst.:

37* न भयं वा विषादो वा का शङ्का मम केनचित् ।

—After l. 40, D_3 ins.:

38* तस्य तद्वचनं श्रुत्वा हनूमन्तं सुवर्चसः ।
पूरयामासु बाणौघै राक्षसाः पवनात्मजम् ।

—D_3 om. l. 41–42. D_{13} om. l. 41. —For l. 41, B_1 subst.:

39* इत्युक्तास्ते हनुमता राक्षसा भीमविक्रमाः ।

—V_3 om. l. 42–43. B_1 reads l. 42–54 (l. 42–43 within brackets) after l. 70. —(l. 42) B_{2-4} वीरो (for वीरैर्). $\tilde{N}_1$ चेष्टितो वीरो; B_1 विष्टितो वीरो (for चेष्टितैर्वीरैर्). —For l. 42, D_{13} subst.:

40* प्रवृत्तास्तत्र वै युद्धे राक्षसास्ते हनूमता ।

—(l. 43) $\tilde{N}_1$ D_{13} गृहीत्वा पर्वतं दोर्भ्यां (D_{13} तत्र); B_{1-3} स गृहीतगिरिर्दोर्भ्यां (B_1 °र्द्रोण्यां) (for the prior half). D_{13} पद्भ्यामेव च युध्यति धरणीतले (hypm.) (for the post. half). —For l. 43, D_4 $T_{2.3}$ subst.:

41* बाहुभ्यां पर्वतं गृह्य लाङ्गूलेनाभ्ययुध्यत ।

—Thereafter they cont.; while D_9 ins. l. 5–6 only before l. 48:

42* ततस्तत्तस्य लाङ्गूलं वज्रप्रतिमगौरवम् ।
कालचक्रमिवाबद्धं भ्रमन्तं सर्वतो दिशम् ।
प्राहरन्राक्षसाः सर्वे शूलशक्तिपरश्वधैः ।
लाङ्गूले तस्य ते कर्तुं स्वल्पां वा न त्वचं क्षमाः ।
एकं द्वौ त्रींस्तु चतुरो विंशत्रिंशत्तथा शतम् । [5]
लाङ्गूलाग्रेण तान्वेष्टय भ्रामयित्वा व्यचिक्षिपत् ।

